कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/



Ⓐ

Acc. NO. ~~2298~~ M-1570
Title - सिद्धान्त कौमुदी.
Author - भट्टोजी दीक्षित.
Date - शके 1545.
subject - व्याकरण
folio - 275 folio avalible.
(6, 30 - 32, 34, 35 & 38 - 45 are missing)
Xerox - 560

KKSU LIBRARY
RAMTEK
441 106
M-1570
Dist. Nagpur

Checked 2012

सिद्धांत
॥१॥

॥श्रीगणेशाय नमः॥ श्रीगुरुभ्यो नमः॥ मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च॥ वैयाकरणसिद्धांत
कौमुदीयं विरच्यते॥ अइउण्॥ ऋऌक्॥ एओङ्॥ ऐऔच्॥ हयवरट्॥ लण्॥ ञमङणनम्॥
झभञ्॥ घढधष्॥ जबगडदश्॥ खफछठथचटतव्॥ कपय्॥ शषसर्॥ हल्॥ इति माहेश्वरा
णि सूत्राण्यणादिसंज्ञार्थानि॥ एषामंत्या इतः॥ लण्सूत्रे अकारश्च॥ हकारादिष्वकार उच्चा
रणार्थः॥ १।३।३ हलंत्यं॥ हलिति सूत्रे अंत्यमित्स्यात्॥ उपदेश आद्योच्चारणं॥ ततो अण् अच् इत्या
दिसंज्ञासिद्धौ॥ उपदेशेऽजनुनासिक इत्॥ उपदेशेऽनुनासिकोऽजित्संज्ञः स्यात्॥ प्रतिज्ञानु
नासिक्याः पाणिनीयाः॥ लण्सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञा॥ प्रत्याहा
रेष्वितां न ग्रहणं॥ अनुनासिक इत्यादिनिर्देशात्॥ न ह्यत्र ककारे परेऽचकार्यं दृश्यते॥ आ
दिरंत्येनेत्येतत्सूत्रेण कृता संज्ञा प्रत्याहारशब्देन व्यवह्रियते॥ ऊकालोऽज्झ्रस्वदीर्घप्लुतः॥

१ × आदिरंत्येन सहेता॥ अंत्येनेता सहित आदिर्मध्यगानां स्व
१। स्य च संज्ञा स्यात्॥ इति हल्संज्ञायां॥ हलंत्यं॥ उपदेशेंऽत्यं हलि

शतच कैयो३ लः ६

उश्च ऊश्च उ३श्च वः॥ वा कालइव कालो यस्य सोऽच् क्रमाद्ध्रस्वदीर्घप्लुतसंज्ञः स्यात्॥ स प्रत्येकमुदात्तादि
भेदेन त्रिधा॥ उच्चैरुदात्तः॥ ताल्वादिषु सभागेषु स्थानेषु ऊर्ध्वभागे निष्पन्नोऽजुदात्तसंज्ञः स्यात्॥ नीचैरनु
दात्तः॥ अर्वाङ्॥ समाहारः स्वरितः॥ उदात्तानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन् सोऽच् स्वरि
तसंज्ञः स्यात्॥ तस्यादित उदात्तमर्द्धह्रस्वं॥ ह्रस्वग्रहणमतंत्रं॥ स्वरितस्यादितोऽर्द्धमुदात्तं बोध्यं
॥ उत्तरार्द्धं तु परिशेषादनुदात्तं॥ तस्य चोदात्तस्वरितपरत्वे श्रवणं स्पष्टं॥ अन्यत्र तूदात्तश्रुतिः प्रा
तिशाख्ये विहिता॥ क१ वोऽश्वाः रथानां नये २ राः॥ ह्रस्वादिष्वनुदात्तः॥ अग्निमीळे इत्यादावनुदात्त
श्रुतिः॥ स नवविधोऽपि प्रत्येकमनुनासिकाननुनासिकत्वाभ्यां द्विधा॥ मुखनासिकावचनोऽनुना
सिकः॥ मुखसहितनासिकयोच्चार्यमाणोऽनुनासिकसंज्ञः स्यात्॥ तदित्थं अइउऋऌ ते पंचव
र्णाः प्रत्येकमष्टादशभेदाः॥ ऌवर्णस्य द्वादश॥ तस्य दीर्घाभावात्॥ एचामपि द्वादश॥ तेषां ह्र
स्वाभावात्॥ तुल्यास्यप्रयत्नं सवर्णं॥ ताल्वादिस्थानमाभ्यंतरप्रयत्नश्चेत्येतद्द्वयं यस्य

आ।ये

॥सिद्धांत॥
॥२॥

येन तुल्येन मिथः सवर्णं स्यात्॥ अकुहविसर्जनीयानां कंठः॥ इचुयशानां तालु॥ ऋटुरषा
णां मूर्द्धा॥ लृतुलसानां दंताः॥ उपूपध्मानीयानामोष्ठौ॥ ञमङणनानां नासिका च॥ एदैतोः
कंठतालु॥ ओदौतोः कंठोष्ठं॥ वकारस्य दंतोष्ठं॥ जिह्वामूलीयस्य जिह्वामूलं॥ नासि
कानुस्वारस्य॥ इति स्थानानि॥ यत्नो द्विधा॥ आभ्यंतरो बाह्यश्च॥ आद्यश्चतुर्द्धा॥ स्पृ
ष्टेषत्स्पृष्टविवृतसंवृतभेदात्॥ तत्र स्पृष्टं प्रयतनं स्पर्शानां॥ ईषत्स्पृष्टमंतस्थानां॥ वि
वृतमूष्मणां स्वराणां च॥ ह्रस्वस्यावर्णस्य प्रयोगे संवृतं॥ प्रक्रियादशायां तु विवृतमेव॥
एतच्च सूत्रकारेण ज्ञापितं॥ तथा हि॥ अ अ विवृतमनूद्य संवृतोनेन विधीयते॥ अस्य
चाष्टाध्यायीं संपूर्णां प्रत्यसिद्धत्वाच्छास्त्रदृष्ट्या विवृतत्वमस्त्येव॥ तथा च सूत्रं॥ पू
र्वत्रासिद्धं॥ अधिकारोयं॥ तेन सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा॥ त्रिपाद्या
मपि पूर्वं प्रति परं शास्त्रमसिद्धं॥ बाह्यप्रयत्नस्त्वेकादशधा॥ विवारः संवारः श्वा

॥राम॥
॥२॥

4

सानादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति ॥ खयां यमाः खयः ᳲक ᳲपौ विस
र्गः शर एव च ॥ एते श्वासानुप्रदाना अघोषाश्च विवृण्वते ॥ १ ॥ कंठमन्ये तु घोषाः स्युः संवृता नादभागिनः ॥ अयुग्मा
वर्गयमगा यणश्चाल्पासवः स्मृताः ॥ २ ॥ वर्गेष्वाद्यानां चतुर्णां पंचमे परे मध्ये यमो नाम पूर्वसदृशो वर्णः प्राति
शाख्यप्रसिद्धः ॥ पलिक्क्नीः ॥ चख्ख्नतुः ॥ अग्ग्निः घ्घ्नंतीत्यत्र क्रमेण कखगघेभ्यः परे तत्सदृशा एव यमाः ॥ तत्र वर्गा
णां प्रथमद्वितीयाः खयः ॥ तथा तेषामेव यमाः ॥ जिह्वामूलीयोपध्मानीयौ विसर्गः शषसाश्चेत्येतेषां वि
वारः श्वासोऽघोषश्च ॥ अन्येषां तु संवारो नादो घोषश्च ॥ वर्गाणां प्रथमतृतीयपंचमाः प्रथमतृतीयय
मौ यरलवाश्चाल्पप्राणा अन्ये महाप्राणा इत्यर्थः ॥ बाह्यप्रयत्नाश्च यद्यपि सवर्णसंज्ञायामनुप
युक्तास्तथाप्यांतरतम्यपरीक्षायामुपयोक्ष्यंत इति बोध्यं ॥ कादयो मावसानाः स्पर्शाः ॥ यरलवा अंतःस्थाः
॥ शषसहा उष्माणः ॥ ᳲक ᳲप इति कपाभ्यां प्रागर्द्धविसर्गसदृशौ जिह्वामूलीयोपध्मानीयौ ॥ अं अः
इति अचः परावनुस्वारविसर्गौ ॥ इति प्रयत्नविवेकः ॥ ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यं ॥ अकारहकारयो

।सिद्धां० रिकारलृकारयोः ऋकाररेषकारयोर्लृकारसकारयोश्च सावर्ण्यमित्येतेनाऌलौ आकारसहितौ तु आयु
।।३।। स वहलु वेत्येतौ मिथः सवर्णौ न स्तः। तेन दध्नी त्स्यहरति शीतलं षष्ठं सांद्रमित्येतेनेनुपरे ऋ यणो दिक्कन।
ञ्ञ न्यथादीर्घादीनामि । वहकारादीनामपि ग्रहणं कराख्यबल्लीह वृत्ते स्यात्। तथा हि। ग्राणु दित्
वर्णस्य वा प्रत्ययः। प्रतीयते विधीयत इति प्रत्ययः। अविधीयमानोऽण् उदित् सवर्णस्य संज्ञा स्यात्। अ
३५ त्राण्परेणणकारेण। तदेव मत्स्य छादं शानां संज्ञा तथेकारोकारौ। ऋकारस्त्रिंशतः एवं लृकारोऽपि
। एचो द्वादशानां। एदैतोरोदौतोश्च न मिथः सावर्ण्यं ए ओ ङिति सूत्रारंभसामर्थ्यात्। तेनैचश्चतु
विंशतेः संज्ञास्त्विति नापादनीयं। नाज्झलाविति निषेधो यद्यप्याक्षरसमाम्नायिकानामेव तथा
पि हकारस्य आकारो न सवर्णः। तत्राकारस्यापि प्रश्लिष्टत्वात्। तेन विश्वपालिरिसूत्रहो दह इति न
भवति। अनुनासिकाननुनासिकत्वेन यवला द्विधा। तेनाननुनासिकास्ते द्वयोर्द्वयोः संज्ञा। तपरस्त ।।राम
त्कालस्य। तः परो यस्मात्स च तात्परश्च उच्चार्यमाण [illegible] कालस्यैव संज्ञा स्यात्। तेन अत् इत् उत् इत्याद ।।३।।

6



ह्रस्वं लघु। संयोगे गुरु। संयोगे
परे ह्रस्वं गुरु संज्ञं स्यात्। सू १
दीर्घं च। ७

अउव्यार्थाः आदयस्तथा। उपसर्गाः क्रिया
प्रादयः क्रियायोगे उपसर्गसंज्ञाः ३

य[illegible]णोसंज्ञाः। अदूइति द्वादशानां वृद्धिरादैच्। आत् ऐ औच वृद्धिसंज्ञः स्यात्। अदेङ्गुणः। अत् एङ्
गुणसंज्ञः स्यात्। भूवादयो धातवः। क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः। चादयोसत्त्वे। अङ्व्यार्थ
चादयः। निपातसंज्ञाः स्युः। प्रादयः। गतिसंज्ञाश्च स्युः। प्र० परा० अप० सम्० अनु० अव० निस्० निर्०
दुस्० दुर्० वि० आङ्० नि० अधि० अपि० सु० उत्० अभि० प्रति० परि० उप० एते प्रादयः। विरामोवसा
नं। वर्णानामभावोऽवसानसंज्ञः स्यात्। परः संनिकर्षः संहिता। अतिशयितः संनिधिर्वर्णानां संहि
तासंज्ञः स्यात्। सुप्तिङंतं पदं। सुबंतं तिङंतं च पदसंज्ञं स्यात्। हलोनंतराः संयोगः। अज्भिरव्यवहि
ता हलः संयोगसंज्ञाः स्युः। इति संज्ञाप्रकरणं॥ ॥इको गुणवृद्धी। गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी
विधीयेते तत्र इक इति षष्ठ्यंतं पदमुपतिष्ठते। अचश्च। ह्रस्वदीर्घप्लुतशब्दैर्यत्र अज्विधीयते तत्राच इति
षष्ठ्यंतमुपतिष्ठते। आद्यंतौ टकितौ। टित्कितौ यस्योक्तौ तस्य क्रमादाद्यंतावयवौ स्तः। मिदचोंत्यात्प
रः। अच इति निर्धारणे षष्ठी। अचां मध्ये योंत्यस्तस्मात्परस्तस्यैवांतावयवो मित्स्यात्। षष्ठी स्थाने
योगा। अनिर्धारितसंबंधविशेषा षष्ठी स्थानेयोगा बोध्या। स्थाने च प्रसंगः। स्थानेंतरतमः॥
प्रसंगे सति सदृशतम आदेशः स्यात्। यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः। तस्मिन्निति निर्दिष्टे

८ नवेति विभाषा। निषेधविकल्पयोर्विभाषासंज्ञा स्यात्। स्वं रूपं शब्दस्याशब्दसंज्ञा। शब्दस्य स्वं रूपं संज्ञि शब्दशास्त्रे या संज्ञा तां विना। येन विधिस्तदंतस्य। विशेषणं तदंतस्य
ज्ञा स्यात् स्वरूपस्य। समासप्रत्ययविधौ प्रतिषेधः। उगिद्वर्ण[illegible]

वृत्ति ४

२

प्राय भूरा
नि[illegible]ताइ
सधि[illegible]



धी २ पत्व रितेनाधिकारः। स्वरितत्वयुक्तं शब्दस्वरूपमधिकृतं बोध्यं ५

पूर्वस्य। सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्यं। तस्मादित्युत्तरस्य। पंचमीनि-
र्देशेन क्रियमाणं कार्यमव्यवहितस्य परस्य बोध्यं। अलोन्त्यस्य। षष्ठीनिर्दिष्टांत्यस्यादेशः स्यात्। ङि-
४ च्च। अयमप्यंत्यस्य स्यात्। सर्वस्येत्यस्यापवादः। आदेः परस्य। परस्य यद्विहितं तत्तस्यादेर्बोध्यं। अलोन्त्यस्ये-
स्पष्टं ४ त्यस्यापवादः। अनेकाल्शित्सर्वस्य। अलोन्त्यसूत्रापवादः। अष्टाभ्य औशित्यावादेः परस्येत्येतदपि दा ६
न ९ परत्वादनेन बाध्यते। परनित्यान्तरंगापवादानामुत्तरोत्तरं बलीयः। असिद्धं बहिरंगमन्तरंगे। अकृतव्यूहाः
पाणिनीयाः। निमित्तं विनाशोन्मुखं दृष्ट्वा तत्प्रयुक्तं कार्यं न कुर्वन्तीत्यर्थः॥ ॥ इति परिभाषाप्रकरणं॥
इकोयणचि। इकः स्थाने यण् स्यादचि संहितायां विषये। सुधी उपास्य इति स्थिते। स्थानत आन्तर्या-
उपास्य ४ दिकारस्य यकारः। सुध्यू इति स्थिते। अनचि च। अचः परस्य यरो द्वे वा स्तो न त्वचि। इति धकार-
स्य द्वित्वं। स्थानिवदादेशोऽनल्विधौ। आदेशः स्थानिवत्स्यात् न तु स्थान्यलाश्रये विधौ। अनेने-
ह यकारस्य स्थानिवद्भावेनाच्त्वमाश्रित्यानचीति द्वित्वनिषेधो न शंक्यः। अनल्विधाविति त-
न्निषेधात्। अचः परस्मिन्पूर्वविधौ॥ अल्विध्यर्थमिदं। परनिमित्तोऽजादेशः स्थानिवत्स्या

रिन्द्राक्रो
मे पापे। वाह
ब्रह्मकल्पस्य
ब्राह्मादीर्घाहि
नेत्रादाचंपान्न
८

नद ५

रोपुत्रस्य। पुत्रशब्दस्य न द्वे स्त आदिनि परे आक्रोशे गम्ये। पुत्रादिनी त्वमसि पापे। आक्रोशे किं। तत्वकथने द्विर्वचनं भवत्येव। तत्परे च। पुत्रपुत्रा
तजग्धयोः। पुत्रहती। पुत्रहती। पुत्रजग्धी। पुत्रजग्धी। त्रिप्रभृतिषु शाकटायनस्य। त्रिप्रभृतिषु वर्णेषु संयुक्तेषु वा द्वित्वं। इंद्रः। इंद्रः। राष्ट्रं

त्स्थानिवत्तादवः पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये। इति यणः स्थानिवद्भावे प्राप्ते। न पदान्तद्विर्वचनव
रे यलोप स्वर सवर्णानुस्वार दीर्घ जश्चर्विधिषु। पदस्य चरमावयवे द्विर्वचनादौ च कर्त
व्ये परनिमित्तोजादेशो न स्थानिवत्स्यात्। इति स्थानिवद्भावनिषेधः। झलां जश् झशि।
इति धकारस्य दकारः। अदर्शनं लोपः। प्रसक्तस्यादर्शनं लोपसंज्ञं स्यात्। संयोगान्तस्य
लोपः। संयोगान्तं यत्पदं तस्य लोपः स्यात्। इति लोपे प्राप्ते। यणः प्रतिषेधो वाच्यः। यणो मयो
द्वे वाच्ये। मय इति पञ्चमी यण इति षष्ठी ति पक्षे यकारस्यापि द्वित्वं। तदि ह धकारयकारयोर्द्वि
त्वविकल्पाच्चत्वारि रूपाणि। एकधमेकयं। द्विधं द्वियं। द्विधमेकयं। एकधं द्वियं। सुद्ध्युपास्यः।
मद्ध्वरिः। धात्त्रंशः। लाकृतिः। अचो रहाभ्यां द्वे। अचः पराभ्यां रेफहकाराभ्यां परस्य यरो
द्वे वा स्तः। हर्य्यनुभवः। न ह्यस्ति। हलो यमां यमि लोपः। हलः परस्य यमो लोपः स्याद्वा य
मि। इति लोपपक्षे द्वित्वाभावपक्षे चैकयं रूपं तुल्यं। लोपाभावपक्षे तु आदित्यो देवतास्या

दनौ। त्वम
राष्ट्रं। स्प
द्वित्वं। अप
चार्यत्वं।
पाठ ३

५

दिसंहवि:। यमायमीति यथासंख्यविज्ञानान्नोहोमाहात्म्यं। एचोयवायाव:। एच: क्रमादय् अव् आय् आव् एते
स्युरचि। तस्य लोप:। नस्येतोलोप: स्यात्। इति यवयोर्लोपो न। उच्चारणसामर्थ्यात्। एवं वंसंज्ञापि। हन
नवति। हरये। विष्णवे। नायक:। पावक:। वान्तो यि प्रत्यये। यकारादौ प्रत्यये परे ओदौतोरव् आव् ए
तौ स्त:। गोर्विकारो गव्यं। गोपयसोर्यत्। नावा तार्यं। नाव्यं। नौवयोधर्मेत्यादिना यत्। गोर्यूतौ
छन्दस्युपसंख्यानं। अध्वपरिमाणे च। गव्यूति:। ऊतियूतीत्यादिना यूतिशब्दो निपातित:। वांतश्र
स्यत्र वकारात् गोर्यूतावित्यत्र छकारात् हापूर्वसोग लोपो व्योरिति लोपो न। वकार:। प्रश्लिष्य
ते। तेन श्रूयमाणवकारांत आदेश: स्यात्। वकारो न लुप्यत इतियावत्। धातोस्तन्निमित्तस्यैव।
यादौ प्रत्यये परे धातोरेचश्चेद्वांतादेशस्तर्हि तन्निमित्तस्यैव नान्यस्य। लव्यं। अवश्यलाव्यं॥
तन्निमित्तस्यैवेति किं। ओयते। औयत। क्षय्यजय्यौ शक्यार्थे। यांतादेशो निपातनार्थमिदं। क्षे
तुं शक्यं क्षय्यं। जेतुं शक्यं जय्यं। शक्यार्थे किं। क्षेतुं जेतुं योग्यं क्षेयं पापं जेयं मन:। क्रय्यस्तदर्थे

त्पररूपे प्राप्ते ऽनेन वृद्धिः। प्रैषः। प्रैष्यः। यस्तु ईष उञ्छे ईष गतिहिंसादानेषु तयोर्दीर्घोपधत्वादीषः ईष्यः तत्राद्गुणे प्रेषः प्रेष्यः। ऋते च तृतीयासमासे। सुखेन ऋतः। सुखार्तः। तृतीयेति किं। परमर्तः। प्रवत्सतरकम्बलवसनार्णदशानामृणे। प्रार्णं। वत्सतरार्णं। इत्यादि। ऋणस्यापनयनाय यदन्यदृणं क्रियते तदृणार्णं। दशार्णो देशः। नदी च दशार्णा। ऋणं राष्ट्रे दुर्गभूमौ जले च। उपसर्गादृति धातौ। अवर्णान्तादुपसर्गादृकारादौ धातौ परे वृद्धिरेकादेशः स्यात्। उपार्छति। प्रार्छति। अन्तादिवच्च। योऽयमेकादेशः स पूर्वस्यान्तवत् परस्यादिवत् स्यादिति रेफस्य पदान्तत्वे। खरवसानयोर्विसर्जनीयः। खरि अवसाने रेफस्य विसर्जनीयः स्यात्पदान्ते। इति विसर्गे प्राप्ते। अन्तवद्भावेन पदान्तस्य न विसर्गः। उभयथर्क्षु कर्त्तरि चर्षिदेवतयोरित्यादिनिर्देशात्। उपसर्गेणैव धातोराक्षेपे सिद्धे धाताविति योगविभागेन पुनर्विधानार्थं। तेन ऋत्यक इति पाक्षिकोऽपि प्रकृतिभावोऽत्र न भवति। वा सुप्यापिशलेः। अवर्णान्तादुपसर्गादृकारादौ सुब्धातौ वृद्धिर्वा स्यात्। आपिशलिग्रहणं पूजार्थं। प्रार्षभीयति। प्रर्षभीयति। सावर्ण्याल्लृवर्णस्य ग्रहणं। प्राल्कारीयति। प्रल्कारीयति।

तपरत्वाद्दीर्घे न। उपऋकारीयति। उपर्कारीयति। एङि पररूपं। आदुपसर्गादेङादौ धातौ पररूपमेकादेशः स्यात्।
प्रेजते। उपोषति। इह वा सुपीत्यनुवर्त्य वाक्यभेदेन व्याख्येयं। तेन एङादौ सुब्धातौ वा। उपेडकीयति। उपैडकीयति।
एवे चानियोगे। नियोगोऽवधारणं। क्वेव भोक्ष्यसे। अनवक्लृप्तावेवशब्दः। अनियोगे किं। तवैव। अचोंत्यादि टि।
अचांमध्ये योंत्यः स आदिर्यस्य तट्टिसंज्ञं स्यात्। शकंध्वादिषु पररूपं वाच्यं। तच्च टेः। शकंधुः। कर्कंधुः। कुलटा। सीमं-
वीषा तः केशवेशे। सीमांतोऽन्यः। मनीषा। लांगलीषा। पतंजलिः। सारंगः पशुपक्षिणोः। सारांगोऽन्यः। आकृतिगणो-
ऽयं। मार्तंडः। ओत्वोष्ठयोः समासे वा। स्थूलोतुः। स्थूलौतुः। बिंबोष्ठः। बिंबौष्ठः। समासे किं। तवौष्ठः। ओमाङो-
श्च। ओमि आङि चात्परे पररूपमेकादेशः स्यात्। शिवायों नमः। शिव एहि। शिवेहि। अव्यक्तानुकरणस्यात इ-
ध्वनेरनुकरणस्य योऽत् शब्दस्तस्मादितौ परे पररूपमेकादेशः स्यात्। पटत् इति। पटिति। एकाचो न। श्र-
दिति। नाम्रेडितस्यान्त्यस्य तु वा। आम्रेडितस्य प्रागुक्तं न स्यात्। अंत्यस्य तु तकारमात्रस्य वा स्यात्। डाचि विव-
क्षे द्वे स्वत इति बहुलवचनाद्द्वित्वं। तस्य परमाम्रेडितं। द्विरुक्तस्य परं रूपमाम्रेडितसंज्ञं स्यात्। पटत्प-
टेति। झलां जशोंते। पदांते झलां जशः स्युः। पटत्पटदिति। अकः सवर्णे दीर्घः। अकः सवर्णेऽचि परे दी-
र्घः स्यात्। दैत्यारिः। श्रीशः। विष्णूदयः। अचि किं। कुमारी शेते। नाज्झलाविति सावर्ण्यनिषेधस्तु न दी-

...आवयसयत्वस्य ... शिवादय ... स्यं तस्य ... तस्या ... आशिदा ... इवदत्तो ह ... आयुष्मानेधि देवदत्ता३ । स्त्रियाः । तु १ आशीर्वादे

आयुष्मती त्वं गार्गि निजगोत्रं ... वायत्र प्र ... स्यतिवादर्थ्यां ते प्रयुज्यते तेन ... नेह । आयुष्मानेधि ... राजन्य विशां वेति याच्यं

घे गांकारयोः ग्रहणं कर्त्तव्यम् स्यसावर्ण्यनिषेधस्याप्रागनिवृत्तेः । अकः किं । हरये । ऋति सवर्णे ऋ वा । होतॄकारः । होतृकार

रः । ऌति सवर्णे ऌ वा । होतॢकारः । पक्षे ऋकारः सावर्ण्यात् । होतृकारः । अति ऋ वा ऌति ऌ वेत्युभयत्रापि विधेयं वर्णद्वयं

द्विमात्रं आद्यस्य मध्ये द्वौ रेफौ तयोरेका मात्रा । अभितोऽज्भक्तिः परा । द्वितीयस्य तु मध्ये द्वौ लकारौ । शेषं प्राग्वत् । इहोभयत्रापि

अत्यक इति पाक्षिकः प्रकृतिभावो वक्ष्यते । एङः पदान्तादति । पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात् । हरेऽव । विष्णोऽव । सर्वत्र वि

भाषा गोः । लोके वेदे च गोरति वा प्रकृतिभावः स्यात्सन्धौ । गो अग्रम् । पदान्ते किं । गोः । अवङ् स्फोटायनस्य । अतीति निवृत्तम् । अचि परे

ते गोरवङ् वा स्यात् । गवाग्रम् । पदान्ते किं । गवि । व्यवस्थितविभाषया गवाक्षः । इन्द्रे च । गोरवङ् स्यादिन्द्रे । गवेन्द्रः । अथ प्रकृतिभावः । प्लुतप्रगृ

ह्या अचि नित्यम् । प्लुताः प्रगृह्याश्च वक्ष्यन्ते तेऽचि प्रकृत्या स्युः । एहि कृष्ण ३ अत्र गौश्चरति । हरी एतौ । नित्यमिति किं । हरी एतावित्यादौ

वयमेव प्रकृतिभावो यथा स्यात् । इकोऽसवर्णे इति ह्रस्वसमुच्चितो मा भूत् । इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च । अपदान्ता इकोऽसवर्णे

ऽचि परे प्रकृत्या स्युः ह्रस्वश्च वा । अत्र ह्रस्वविधिसामर्थ्यादेव प्रकृतिभावसिद्धेस्तदनुकर्षणार्थश्चकारो न कर्त्तव्य इति भाष्ये स्थितं ॥

चक्रि अत्र । चक्र्यत्र । पदान्ता इति किं । गौर्यौ । न समासे । वाप्यश्वः । ऋत्यकः । ऋति परे अकः प्राग्वत् । ब्रह्म ऋषिः । ब्रह्मर्षिः । पदान्ता

इत्येव । आर्च्छत् । समासेऽप्ययं प्रकृतिभावः । सप्त ऋषीणाम् । सप्तर्षीणाम् । वाक्यस्य टेः प्लुत उदात्तः । इत्यधिकृत्य । दूराद्धूते च । दूरात्संबोधने वाक्यस्य

टेः प्लुतः स्यात् । सक्तून् पिब देवदत्त ३ । गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् । प्लुतः स्यात् । दे३वदत्त । देवद३त्त । देवदत्त३ ।

उदाहरणः १ हे है प्रयोगे हैहयोः । एतयोः प्रयोगे दूराद्धूते च ... तत्र है हयोरेव प्लुतः । हे३ राम । रामहे३ ।१

१ दूराद्धूते यः शब्दस्तस्य आह्वाने ... यस्यापि गुरोर्वा प्लुतः १

गोऽग्र ५

मितिच३

६२

आयुष्मानेधि आयुष्मा

न्३।१९



स्थिते। उपस्थितोऽनार्ष इति। [illegible] तो प्लुतवद्भवति। अप्लुतकार्यं यणादिकं करोति। [illegible] क। इति सुश्लोकेति वर्तते। आ [illegible] त इत्यु

चीयेत। तथा च प्रगृह्याश्रये प्रकृतिभावे प्लुतस्य श्रवणं न स्यात्। इ [illegible] त्रं भग्नी इति। ई३ चाक्रवर्मणस्य। ई३ प्लुतोऽचि परेऽप्लुतवद्वा। चिनुहि इ३ इदं

तू विलाप्येयं २

तौ। क्वि? वकारादिकारस्य मा भूत्। अन्तः किं? कृष्ण। ३। एकैकग्रहणं पर्यायार्थं। इ३ द्राचामिति विसृज्यते। तेन सर्वः प्लुतो ग

कस्यते। ईदूदेद्द्विवचनं प्रगृह्यम्। ईदूदेदन्तं द्विवचनं प्रगृह्यसंज्ञं स्यात्। हरी एतौ। विष्णू इमौ। गङ्गे अमू। मणीवोष्ट्रस्य [illegible] तु

इवार्थे वेति वाच्यं वाधा वा बोध्यः। अदसो मात्। अस्मात्परावीदूतौ प्रगृह्यौ स्तः। अमी ईशाः। रामकृष्णावमू आसाते।

मात्किं। अमुकेत्र। असति मा ग्रहणे एकारो ऽनुवर्तेत। शे। अयं प्रगृह्यः स्यात्। अस्मे इन्द्राबृहस्पती। निपात एका

जनाङ्। एकोऽज्निपात आङ्वर्जः प्रगृह्यः। इ विस्मये। इ इन्द्रः। उ उमेशः। अनाङित्युक्तेर्ङिदाकारः प्रगृह्य एव। आ

एवं नु मन्यसे। आ एवं किल तत्। ङित्तु न प्रगृह्यः। ईषदुष्णं ओष्णं। वाक्यस्मरणयोरङित्। अन्यत्र ङिदिति विवेकः। ओत्।

ओदन्तो निपातः प्रगृह्यः। अहो ईशाः। सम्बुद्धौ शाकल्यस्येतावनार्षे। संबुद्धिनिमित्तक ओकारो वा प्रगृह्योऽवैदि

के इतौ परे। विष्णो इति। विष्णविति। उञः। उञ इतौ वा प्रागुक्तं। उ इति। विति। ऊँ। उञ इतौ दीर्घोऽनुनासिकः

प्रगृह्यश्च। ऊँ इत्ययमादेशो वा स्यात्। ऊँ इति। मय उञो वो वा। मयः परस्योञो वो वा स्यादचि। किम्वुक्तं। वस्य

सिद्धत्वान्नानुस्वारः। ईदूतौ च सप्तम्यर्थे। सप्तम्यर्थे पर्यवसन्नमी ईदूतौ प्रगृह्यौ स्तः। सोमो गौरी अधि श्रितः

मामकी तनू। सुपां सुलुगिति सप्तम्या लुक्। अर्थग्रहणं किं। वृत्तावर्थान्तरोपसंक्रान्ते मा भूत्। वाप्याम

श्वो वाप्यश्वः। अणोऽप्रगृह्यस्यानुनासिकः। अप्रगृह्यस्याणोऽवसानेऽनुनासिको वा स्यात्। दधिँ। दधि। अग्नि

४

८

गव्हस्यकि।अग्नी॥ ॥इत्यच्संधिः॥ ॥स्तोः श्चुनाश्चुः।सकारतवर्गयोःशकारचवर्गाभ्यांयोगेशका
रचवर्गौस्तः।हरिश्शेते।रामश्चिनोति।सच्चित्।शार्ङ्गिञ्जय।शात्।शात्परस्यतवर्गस्यचुत्वंनस्या
त्।विश्नः।प्रश्नः।ष्टुनाष्टुः।स्तोःष्टुनायोगेष्टुःस्यात्।रामष्षष्ठः।रामष्टीकते।तट्टीका।चक्रिण्ढौ पेष्टा ३
कसे।नपदान्ताट्टोरनाम्।अनामितिलुप्तषष्ठीकंपदांताट्टवर्गात्परस्यानामःस्तोःष्टुर्नस्यात्।
षट्संतः।षट्ते।पदान्तात्किं।ईट्टे।टोःकिं।सर्पिष्टमं।अनाम्नवतिनगरीणामितिवाच्यं।षण
षण्णवतिः।षण्णगर्यः।तोःषि।तवर्गस्यषकारेपरेनष्टुत्वं।सन्षष्ठः।झलांजशोन्ते।वागीशः।
विड्रूपः।यरोनुनासिकेनुनासिकोवा।यरःपदान्तस्यानुनासिकेपरेऽनुनासिकोवा
।एतन्मुरारिः।एतद्मुरारिः।स्थानप्रयत्नाभ्यामन्तरतमेस्पर्शेचरितार्थो
विधिर्येरेफेनप्रवर्तते।रत्नमुखः।प्रत्ययेभाषायांनित्यं।तन्मात्रं।चिन्मयं।[illegible]
कथंतर्हिमदोदग्राःककुद्मतइतियवादिगणेदकारनिपातनात्।तोर्लि।तव

गस्य लकारे परे परसवर्णः स्यात्। तल्लयः। विद्वाँल्लिखति। नकारस्यानुनासिको लकारः।
उदः स्थास्तंभोः पूर्वस्य। उदः परयोः स्थास्तंभोः पूर्वसवर्णः स्यात्। आदेः परस्य।
उत्थानं। उत्तंभनं। अघोषस्य महाप्राणस्य सस्य तादृश एव थकारः। तस्य झ
रो झरी। तिपाक्षिको लोपः। लोपाभावपक्षे तु थकारस्यैव श्रवणं। न तु खरि चेति च
र्त्वं। चर्त्वं प्रति थस्यासिद्धत्वात्। झयो होऽन्यतरस्यां। झयः परस्य हस्य पूर्वसवर्णो
वा स्यात्। घोषवतो नादवतो महाप्राण स्य हस्य तादृशो वर्गचतुर्थ एवादेशः।
वाग्घरिः। वाग्हरिः। श श्छोऽटि। झयः परस्य शस्य छो वा स्यादटि। तच्छिवः।
तच्शिवः। छत्वममीति वाच्यं। तच्छ्लोकेन। मोऽनुस्वारः। मांतस्य पदस्यानुस्वारः स्या
द्धलि। अलोऽन्त्यस्य। हरिं वंदे। पदस्येति किं। गम्यते। नश्चापदांतस्य झलि। नस्य
मस्य चापदांतस्य झल्यनुस्वारः स्यात्। यशांसि। आक्रंस्यते। झलि किं। मन्यसे। अ

दस्य चुत्वेन जकारे कृते। खरि च। खरि झलां चरः स्युः। इति जकारस्य चकारः। १४

संवृतकंठस्य

अमि किं वाक्
श्च्योतति

स्पष्टं

नुस्वारस्ययियिपरसवर्णः। अङ्कितः। अञ्चितः। कुण्ठितः। शान्तः। गुम्फितः। कुर्वन्तीयत्रण
त्वेप्राप्तेतस्यासिद्धत्वादनुस्वारेपरसवर्णेतस्यासिद्धत्वान्नणत्वं। वापदान्तस्य। पदा
न्तस्यानुस्वारस्ययियिपरेपरसवर्णोवास्यात्। त्वङ्करोषि। त्वंकरोषि। संयँता। संव्वत्स
रः। यल्लोकं। अत्रानुस्वारस्यपक्षेऽनुनासिकायवँल्लाः। मोराजिसमःक्वौ। क्विबं
तेराजतौपरेसमोमस्यमएवस्यात्। सम्राट्। हेमपरेवा। मपरेहकारेमस्यम
एवस्याद्वा। ह्मल ह्वल चलने। किम्ह्मलयति। किंह्मलयति। यवलपरेयवलावे
तिवक्तव्यं। यथासंख्यमनुदेशःसमानां। समसम्बन्धीविधिर्यथासंख्यंस्यात्। कियँ
ह्यः। किव्ँह्वलयति। किंह्वलयति। किल्ँह्लादयति। किंह्लादयति। नपरेनः। नप
रेहकारेपरेमस्यनःस्याद्वा। किन्ह्नुते। किंह्नुते। ङ्णोःकुक्टुक्शरि। ङकारणकारयोः
कुक्टुकावागमौवास्तःशरि। कुक्टुक्कारसिद्धत्वाज्जश्त्वेन। चयोर्द्वितीयाःशरिपौष्करसा

किंल्लः ३

सं ४

17

१०

परे २

ष्ठः। प्राङ्षष्ठः। प्राङ्क्षषष्ठः। प्राङ्क्षष्ठः। सुगण्षष्ठः। सुगण्ट्षष्ठः। ङः सि धुट्। ङात्परस्य सस्य धु
ड्वा स्यात्। षट्सन्तः। षट्त्सन्तः। नश्च। नकारान्तात्सस्य धुड्वा स्यात्। सन्त्सः। सन्सः। शि तुक्। नस्य पदान्तस्य
शे परे तुग्वा स्यात्। शश्छोऽटीति छत्वविकल्पः। पक्षे झरो झरीति चलोपः। सञ्छंभुः। सञ्च्छंभुः। सञ्च्
शंभुः। सञ्शंभुः। ञछौ ञचछा ञचशा ञशाविति चतुष्टयम्। रूपाणामिह तुक्छत्वचलोपा
नां विकल्पनात्॥१॥ ङमो ह्रस्वादचि ङमुण्नित्यम्। ह्रस्वात्परो यो ङम् तदन्तं यत्पदं तस्मात्परस्याचो नि
त्यं ङमुडागमः स्यात्। प्रत्यङ्ङात्मा। सुगण्णीशः। सन्नच्युतः। समः सुटि। समो रुः स्यात्सुटि। अलो
ऽन्त्यस्य। अत्रानुनासिकः पूर्वस्य तु वा। अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा स्यात्। अनुना
सिकात्परोऽनुस्वारः। अनुनासिकं विहाय रोः पूर्वस्मात्परोऽनुस्वारागमः स्यात्। खरवसान
योर्विसर्जनीयः। विसर्जनीयस्य सः। खरि विसर्जनीयस्य सः स्यात्। एतदपवादे वा शरीति पा
क्षिके विसर्गे प्राप्ते। संपुंकानां सो वक्तव्यः। सँस्स्कर्ता। समो वा लोपमेक इति भाष्यम्। लो
पस्यापि रुप्रकरणस्थत्वादनुस्वारानुनासिकाभ्यामेकसकारकं रूपद्वयम्। द्विसके

सँस्कर्तारि

सुगण्ट्षष्ठः

ङ २

१०

ोपरु द्विर्वचनोनास्यानुस्वारद्विर्वचनोक्तैः।ता द्विर्द्विता ल्लाना सिक्लैः संस्कर्त्रोऽङ्गेग्रं शत मृ।३।५
रकं तु कमेव।तत्रानचिवेति सकारद्वित्वपक्षे विसकारमपि रूपद्वयं।अनुस्वारविसर्गजिह्वामूलीयो
पध्मानीययमानामकारोपरि शर्षु चपाठस्योपसंख्यातत्वेनानुस्वारस्याप्यच्त्वात्।अनुना
सिकवतांत्रयाणां शरः खयइति कद्वित्वे षट्।अनुस्वारवतामनुस्वारस्यापि द्वित्वे द्वादश।एवमा
मष्टादशानां तकारद्वित्ववर्जनीतरेण पुनर्द्वित्वे एकत्वे द्वित्वे त्रित्वेमिति चतुः पंचाशत्।तत्र अणानु
सिकत्वे द्वोत्तरशतं।पुमः खय्यम्परे।अम्परे खयि पुमो रुः स्यात्।युसत्रिपक्षेऽनप्रस्य
मस्येति षत्वपर्युदासात् ऽक्रऽपयोः प्राप्तौ।अव्युत्पत्तिपक्षे तु षत्वं प्राप्तौ संपुंकानामिति सः
पुँस्कोकिलः।पुंस्कोकिलः।पुँस्पुत्रः।पुंस्पुत्रः।अम्परे किं।पुंक्षीरं।खयि किं।पुंदासः।ख्य
नश्छव्यप्रशान्॥
मादेशो न।पुंख्याने॥
अम्परे छवि नकारान्तस्य पदस्य रुः स्यात् न तु प्रशान्शब्दस्य।विसर्गः।सत्वं।श्चुत्वं।शार्ङ्गि
श्छिंधि।शार्ङ्गिँश्छिंधि।चक्रिँस्त्रायस्व।चक्रिंस्त्रायस्व।पदस्येति किं।हंति।अम्पर

११

कि। सन्नृत्स स्तः। खड्गमुष्टिः। अत्र शान्विं। घशान्ते नोति। न्हृन्ये। न्हृन्ति सस्य सः स्याद्वापकारे परे।
कु घोऽ कः पौव॥ कवर्गे पवर्गे वि परे विसर्जनीयस्य क्रमाज्जिह्वामूलीयोपध्मानीयौ स्तः।
यद्विसर्गः। येन नाप्राप्ते न्यायेन विसर्जनीयस्य सत्वस्यापवादोयं। ननु शर्परे विसर्जनीयः। इत्यस्य। ते
न वा सः। सौमि त्याद्दो विसर्ग एव। नृं ᳵ पाहि। नृं ᳵ पाहि। नृंः पाहि। नृः पाहि। नृं स्पाहि। कानाम्रेडिते। कान्त्वका
रस्य सः स्यादाम्रेडिते परे। संपुंकानामिति सः। यथा। कस्कादिषु च। एषु इणन्तमेरस्य विसर्गस्य षः स्यादन्यस्य तु
सः। ᳵकपयोरपवादः। इति सः। कांᳵ कान्। कांस्कान्। कस्कः। कौतस्कुतः। सर्पिष्कुण्डिका। धनुष्कपालं।
छोऽकृति गणोयं। छे च। ह्रस्वस्य छे परे तुगागमः स्यात् संहितायां। वृत्वेस्य असिद्धत्वाज्जश्त्वेन दः। ततश्चत्वं
स्या असिद्धत्वात् सत्ववृत्त्वेन जः। तस्य चर्त्वेन चः। चुत्वं स्या असिद्धत्वाद्दोः कुरिति कुत्वं न। स्वच्छा। शिवच्छाया।
आङ्माङोश्चैतयोश्छे तु तुक् स्यात्। पदान्ताद्वेति विकल्पापवादः। आच्छादयति। माच्छिदत्। दीर्घाद्दी
र्घाच्छे परे तुक् स्यात्। दीर्घस्याप्यं तुक्। ननु ह्रस्वेन सिद्धं मा भूत्। छायेति ज्ञापकात्। वैच्छियते। पदान्ताद्वा। दीर्घा
त्पदान्ताच्छे परे तुग्वा स्यात्। लक्ष्मीच्छाया। लक्ष्मीछाया॥ इति हल्सन्धिः॥ विसर्जनीयस्य सः। विष्णुस्त्राता।

सू २

११

शर्परे विसर्जनीयः। शर्परे खरि विसर्जनीयस्य विसर्जनीयो न त्वन्यत्। कः त्सरुः। घनाघनः क्षोभणः। इह
यथायथं सत्त्वे जिह्वामूलीयश्च न। वा शरि। शरि परे विसर्जनीयस्य विसर्जनीय एव वा स्यात्। हरिः शेते।
हरिश्शेते। खर्परे शरि वा विसर्गलोपो वक्तव्यः। रामस्थाता। हरिस्फुरति। पक्षे विसर्गे सत्त्वे च त्रैरूप्यं।
कुप्वोः ᳵक ᳶपौ च। कः करोति। कᳵ करोति। कᳵ खनति। कः खनति। कः पचति। कᳶ पचति। सोऽप
दादौ। विसर्जनीयस्य सः स्यादपदाद्योः कुप्वोः। पयस्पाशं। पयस्
ल्पं। यशस्कं। यशस्काम्यति। अनव्ययस्येति वाच्यं। प्रातः कल्पं। काम्ये रोरेवेति वाच्यं। नेह। गीः काम्य
ति। इणः षः। इणः परस्य विसर्गस्य षः स्यात्पूर्वविषये। सर्पिष्पाशं। सर्पिष्कल्पं। सर्पिष्कं। सर्पि
ष्काम्यति। नमस्पुरसोर्गत्योः। गतिसंज्ञयोरनयोर्विसर्जनीयस्य षः स्यात्कुप्वोः। नमस्करोति।
साक्षात्प्रभृतिष्विति कृञो योगे विभाषा गतिसंज्ञा। तदभावे नमः करोति। पुरोऽव्ययमिति नि
त्यं गतिसंज्ञा। पुरस्करोति। अगतित्वान्नेह। पूः पुरौ पुरः। प्रष्टव्याः। इदुदुपधस्य चाप्रत्ययस्य
इकारोकारोपधस्याप्रत्ययविसर्गस्य षः कुप्वोः। निष्प्रत्यूहं। आविष्कृतं। दुष्कृतं। अप्रत्ययस्येति कि

21

१२

भू। अग्निं करोति। वायुः करोति। एकादेशशास्त्रनिमित्तकस्य न षत्वं। कस्कादिषु भ्रातुष्पुत्रशब्दस्य पाठात्
तेनेह न। मातुः कृपा। मुहुसः प्रतिषेधः। मुहुः कामा। तिरसोऽन्यतरस्याम्। सो वा स्यात्। कुप्वोः। तिरस्कर्ता। तिरःक-
र्ता। द्विस्त्रिश्चतुरिति कृत्वोऽर्थे। कृत्वोऽर्थे वर्तमानानामेषां विसर्गस्य षो वा स्यात् कुप्वोः [illegible]ति। द्विष्करोति। द्विः
करोतीत्यादि। कृत्वोऽर्थे किं। चतुष्कपालः। इसुसोः सामर्थ्ये। एतयोर्विसर्गस्य षो वा स्यात् कुप्वोः। [illegible]। स-
र्पिष्करोति। सर्पिः करोति। धनुष्करोति। सामर्थ्यमिह व्यपेक्षा। सामर्थ्ये किं। तिष्ठतु सर्पिः पिब त्वमुदकं।
नित्यं समासेऽनुत्तरपदस्थस्य। इसुसोर्विसर्गस्यानुत्तरपदस्थस्य समासे नित्यं षः स्यात्। कुप्वोः। सर्पि-
ष्कुण्डिका। अनुत्तरपदस्थस्य किम्। परमसर्पिःकुण्डिका। कस्कादिषु सर्पिष्कुण्डिकाशब्दोऽसमासे व्यपेक्ष-
विरहेऽपि षत्वार्थः। व्यपेक्षायां नित्यार्थश्च। अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य। अका-
रादुत्तरस्यानव्ययविसर्गस्य समासे नित्यं सकारादेशः स्यात् करोत्यादिषु परेषु न तूत्तरपदस्थस्य। अ-
यस्कारः। अयस्कामः। अयस्कंसः। अयस्कुंसः। अयस्पात्रम्। अयः संहिता कुशा। अयस्कुशा। अय-
स्कर्णी। अतः किम्। गीःकारः। अनव्ययस्य किम्। स्वःकामः। समासे किं। यशः करोति। अनुत्तर-
पदस्थस्य किम्। परमयशःकारः। अधश्शिरसी पदे। एतयोर्विसर्गस्य सादेशः स्यात् पदशब्दे परे

धनुः करोति प

१२

अधस्पदं । शिरस्पदं । समासइत्येव । अधः पदं । शिरः पदं । अनुत्तरपदस्थस्येत्येव । परमशिरः पदं । कस्कादिषु च । भास्करः ॥
॥ इति विसर्गसंधिः ॥ ॥ स्वौजसमौट् इति सुप्रत्यये शिव स् अर्च्य इति स्थिते ससजुषो रुः । पदान्तस्य सस्य सजुष्शब्दस्य च
रुः स्यात् । जश्त्वापवादः । अतो रोरप्लुतादप्लुते । अप्लुतादतः परस्य रोरुः स्यादप्लुते ति । भोभगो इति प्राप्ते यत्वस्यापवादः । उ
त्वं प्रति रुत्वस्यासिद्धत्वं तु न भवति रुमनूद्य उत्वविधेः सामर्थ्यात् । प्रथमयोः पूर्वसवर्णः । अकः प्रथमाद्वितीययो
रचि परे पूर्वसवर्णदीर्घ एकादेशः स्यात् । इ[illegible]ति प्राप्ते । नादिचि । अवर्णादिचि न पूर्वसवर्णदीर्घः । आद्गुणः । एङः
पदान्तादति । शिवोऽर्च्यः । अत इति तपरः किम् । देवा अत्र । अति इति तपरः किम् । श्वआगन्ता । अप्लुत किम् । एहि सुश्रो
त३ अत्र स्नाहि । प्लुतस्यासि[illegible]द्धत्वादतः परोयं । अप्लुतादिति विशेषणं तत्सामर्थ्यान्नासिद्धत्वं । तपरकरणस्य त श्रा २ ५
न सामर्थ्याद्दीर्घनिवृत्त्यावरितार्थत्वात् । अप्लुते किम् । तिष्ठतु पय[illegible]अग्निदत्त । गुरोरनृत इति प्लुतः । हशि च । अप्लु
तादतः परस्य रोरुः स्याद्धशि । शिवो वंद्यः । रो रि इत्युकारानुबंधग्रहणान्नेह । प्रातरत्र । धातर्गच्छ । देवा इह इति
स्थिते रुत्वं । भोभगोअघोअपूर्वस्य योऽशि । एतत्पूर्वस्य रोर्यादेशः स्यादशि परे । असंधिः सौत्रः । लोपः
शाकल्यस्य । देवा इह । देवायिह । अशि किम् । देवाः सन्ति । यद्यपीह यत्वस्यासिद्धत्वाद्विसर्गो लिस्यते । तथा
पि विसर्गस्य स्थानिवद्भावेन रुत्वाद्यत्वं स्यात् । न ह्ययमल्विधिः । रोरिति समुदायरूपाश्रयणात् । लो

उञिपदे । ष्यन्तत्तुञि

अवर्णस्य वा परांतयोर्यवयोर्लोपे उञि स उ एकाग्निः । पदे किं । तंत्र्युतं । वेञः संप्रसारणे रूपं । यद्वि तु अंतपदोक्तो निपात उ ञिनिय ।
ञिर
रू धिपरस्य रूपं ४

१३

भगोस् अघोस् इति सकारांता निपाताः । तेषां रो यत्वं विकृते । व्योर्लघुप्रयत्नतरः शाकटायनस्य । पदांतयोर्वकारय
कारयोर्लघूच्चारणौ वा स्तोऽशि परे । यस्योच्चारणे जिह्वाग्रोपाग्रमध्यमूलानां शैथिल्यं स लघूच्चारणः ।
ओतो गार्ग्यस्य । ओकारात्परस्य पदांतस्यालघुप्रयत्नस्य यकारस्य नित्यं लोपः स्यात् । गार्ग्यग्रहणं पूजा
र्थं । भो अच्युत । लघुप्रयत्नपक्षे भोयच्युत । पदांतस्य किं । म्रातायुम्नौ । हलि सर्वेषां । भो भगो अघो अपूर्वस्य
लघ्वलघूच्चारणस्य यकारस्य लोपः स्याद्धलि सर्वेषां मतेन । भो देवाः । भो लक्ष्मि । भो विष्णु दृढ । भगो नमस्ते ।
अघो याहि । देवा नम्याः । देवा यांति । हलि किं । देवा यिह । रो सुपि । अह्नो रेफादेशः स्यान्न तु सुपि
रोऽपवादः । अहरहः । अहर्गणः । असुपि किं । अहोभ्यां । अत्राह्नि नि रुत्वं । रूपरात्रिरथंतरेषु रुत्वं
वाच्यं । अहोरूपं । गतमहो रात्रिरेषा । एकदेशविकृतस्यानन्यत्वादहोरात्रः । अहोरथंतरम् । अहरा
दीनां पत्यादिषु वा रेफः । विसर्गापवादः । अहर्पतिः । गीर्पतिः । धूर्पतिः । पक्षे विसर्गोपध्मानीयौ । रो रि ।
रेफस्य रेफे परे लोपः स्यात् । ढ्रलोपे पूर्वस्य दी । घोणिः । ढरेफौ लोपयतीति तथा । तस्मिंश्चार्थे पर्याद्ढ पौ
र रेफात्मके परे पूर्वस्याणो दीर्घः स्यात् । पुनारमते । हरी रम्यः । हरी भ्राजते । अणः किं । तृढः । तृढः । ह

१३

सर्वयह्शम्नुत्तरपदेपिपूर्वमात्रस्यदीर्घार्थं।अजर्घाः॥लीढः।७

सु

हृ हिंसायाम्।हृ।हृ उध्यमनो मनोरथ इत्यत्र रुत्वे कृते।हशि सुपि रोरीति लोपे वा प्राप्ते।विप्रतिषेधे परं का
र्यं तुल्यबल विरोधे परं कार्यं स्यादिति लोपे प्राप्ते।पूर्वत्रासिद्धमिति रोरीत्यस्यासिद्धत्वादुत्वमेव।
मनोर थः।एतत्तदोः सुलोपोकोरनञ्समासे हलि।अककारयोरेतत्तदोर्यः सुस्तस्य लोपः स्याद्ध
लि।नतु नञ्समासे।एष विष्णुः।स शंभुः।अकोः किं।एषको रुद्रः।अनञ्समासे किं।असः शिवः।हलि
किं।एषोत्र।सो चि लोपे चेत्पादपूरणम्।स इत्यस्य सो लोपः स्यादचि पादश्चेल्लोपे सत्येव पूर्येत।
सेमामविड्ढि प्रभृतिम्।इह चेत्स्यादेवगत्यत इति वामनः।अविशेषात् ऋक्यो कपादोपीय
परे।सैषदाशरथी रामः।लोपे चेदिति किं।स इत्येति।सएवमुक्ता।सत्येवेत्यवधारणं तु इह न सिद्ध
कुल मिति पूर्वत्रा द्वकुल ग्रहणानुवृत्त्या लभ्यते।तेनेह न।सोहमाजन्मशुद्धानां॥ ॥इति स्वादिसंधिः।
॥अर्थवद्धातुरप्रत्ययः प्रातिपदिकम्।धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वा अर्थवच्छब्दस्वरूपं प्रा
तिपदिकसंज्ञं स्यात्।कृत्तद्धितसमासाश्च।कृत्तद्धितान्तौ समासाश्च प्रातिपदिकसंज्ञाः स्युः।सुपूर्वसू

स्त २

प ४

पि २

म२ ते

णसिद्धेः समासग्रहणं नियमार्थं यत्र संघातपूर्वो भागः पदं तस्य चेद्भवति समासस्यैवेति। तेन वाक्यस्य न। प्रत्ययः।
२४ आपंचमपरिसमाप्तेरधिकारोयं। परश्च। अयमपि तथा। ङ्याप्प्रातिपदिकात्। ङ्यंतादाबंतात्प्रातिपदिकाच्चेत्या
पंचमपरिसमाप्तेरधिकारः। प्रातिपदिकग्रहणे लिंगवि[illegible]शिष्टस्यापि ग्रहणमित्येव सिद्धे पुनर्ङ्या[illegible] ग्रहणं
चु४ ङ्याबंतात्तद्धितो यथा स्यात्। ङ्याप्त्यांत्रागमात्तद्धितसमर्थ। स्वौजसमौट् छष्टाभ्यां भिस्ङेभ्यां भ्यस्ङसि
भ्यां भ्यस्ङसोसाम्ङ्योस्सुप्। ङ्यंतादाबंतात्प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः स्युः। सु उः स्यो रुकार
कारो जश्शसोष्टकारः पकारश्चेतः। विभक्तिश्च। सुप्तिङौ विभक्तिसंज्ञौ स्तः। तत्र सु औ जस् इत्यादीनां सप्तानां
त्रिकाणां प्रथमो द्वयः सप्तमीयंताः प्राचां संज्ञाः। नान्वितरिहापि व्यवहारः। सुपः। सुपस्त्रीणि त्रीणि वचना
न्ये कश एकवचनद्विवचनबहुवचनसंज्ञानि स्युः। द्व्येकयोर्द्विवचनैकवचने। द्वित्वैकत्वयोरेते स्तः।
बहुषु बहुवचनं। बहुत्वे एतत्स्यात्। रुत्वविसर्गौ। रामः। सरूपाणामेकशेष एकविभक्तौ। एकवि २४
भक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते। प्रथमयोः पूर्वसवर्णः। नादिचि। वृद्धिरेचि।
रामौ। चुटू। प्रत्ययाद्यौ चुटू इतौ स्तः। इति जस्य संज्ञा। न विभक्तौ तुस्माः। विभक्तिस्थाः तवर्गसकारम

चुटू

26

काराइतो न। इति सकारस्येत्त्वं। अतो गुणे। अपदान्तादकाराद्गुणे परतः पररूपमेकादेशः स्यात्। इति प्राप्तपरत्वात्पूर्वसवर्णदीर्घः। अतो गुण इति हि पुरस्तादपवादा अनंतरान्विधीन्बाधंते नोत्तरानिति न्यायेनाकः सवर्णदीर्घस्यैवापवादो न तु प्रथमयोः पूर्वसवर्णदीर्घस्यापि। रामाः। एकवचने संबुद्धिः। संबोधने प्रथमाया एकवचनं संबुद्धिसंज्ञं स्यात्। एङ् ह्रस्वात्संबुद्धेः। एङंताद्ध्रस्वांताच्चांगाद्धल्लुप्यते। संबुद्धेश्चेत्। संबुद्ध्याक्षिप्तस्यांगस्य एङ्ह्रस्वाभ्यां विशेषणान्नेह। हे कतरत्कुलेति। हे राम। हे रामौ। हे रामाः। एङ्ग्रहणं किं हे हरे हे विष्णो। अत्र हि परत्वान्नित्यत्वाच्च संबुद्धिगुणे कृते ह्रस्वात्परं नास्ति। अमि पूर्वः। अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात्। रामम्। रामौ। लशक्वतद्धिते। तद्धितवर्जप्रत्ययाद्या लशकवर्गा इतः स्युः। इति शसः शस्येत्संज्ञा। तस्माच्छसो नः पुंसि। पूर्वसवर्णदीर्घात्परो यः शसः सकारस्तस्य नः स्यात्पुंसि। अट्कुप्वाङ्नुम्व्यवायेऽपि। अट्कवर्गपवर्गाङ्नुम् एतैर्व्यस्तैर्यथासंभवं मिलितैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णः स्यात्समानपदे। पदव्यवायेऽपीति निषेधं बाधितुं नुम्ग्रहणं नुम्स्थानेऽनुस्वारोपलक्षणार्थं तच्चाकर्तुं शक्यं। अयोगवाहानामट्सूपदेशस्योक्तत्वात्। इति णत्वे प्राप्ते। पदान्तस्य। पदांतस्य नस्य णत्वं न स्यात्। रामान्। यस्मात्प्रत्ययविधिस्तदादिप्रत्य

विधिरिति किं। स्त्री इयति। प्रत्यये किं। प्रत्यय विशिष्टस्य ततोप्यधिकस्य वामाभूत्॥

१५ ऽंगम्॥ यः प्रत्ययो यस्मात् क्रियते तदादि शब्दस्वरूपं तस्मिन्परे अंगसंज्ञं स्यात्। भवामि भविष्यामि। त्यादौ
विकरणविशिष्टस्यांगसंज्ञार्थं तदादिग्रहणं। टाङसिङसामिनात्स्याः। अकारान्तादंगात् टाङसीनां क्रमा
दिनादय आदेशाः स्युः। णत्वं। रामेण। सुपि च। यञादौ सुपि परेऽतोंगस्य दीर्घः स्यात्। रामाभ्यां। अ
तो भिस ऐस्। अकारांतादंगात् भिस ऐस् स्यात्। अनेकाल्त्वात्सर्वादेशः। रामैः। ङेर्यः। अतोंगा
त्परस्य ङे इत्यस्य यादेशः स्यात्। रामाय। इह स्थानिवद्भावेन याद्देशस्य सुप्त्वात् सुपि चेति दीर्घः।
सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति परिभाषा तु नेह प्रवर्तते। कष्टाय क्रमणे इत्या
दिनिर्देशेन तस्या अनित्यत्वज्ञापनात्। रामाभ्यां। बहुवचने झल्येत्। झलादौ बहुवचने सुपि परेऽतों
गस्य एकारः स्यात्। रामेभ्यः। बहुवचने किं। रामः। रामस्य। झलि किं। रामाणां। सुपि किं। पचध्वं। ज
श्त्वं। [illegible]साने। अवसाने झलां चरो वा स्युः। रामात्। रामाद्। द्वित्वे रूपचतुष्टयं। रामाभ्यां। रामे
भ्यः। रामस्य। सस्य द्वित्वपक्षे खरि चेति चर्त्वे आंतरतम्यात् स एव न तु तकारः। अल्पप्राणतया प्रयत्न ८
भेदात्। अत एव सः सीति तादेश आरभ्यते। ओसि च। ओसि परेऽतोंगस्य एकारः स्यात्। १
रामयोः। ह्रस्वनद्यापो नुट्। ह्रस्वांतान्नद्यंताद[illegible]न्ताच्चांगात्परस्यामो नुडागमः स्यात्। न

28

रामाणाम्। ८   मे१   प:४

सि। नामि परे अजंतांगस्य दीर्घः स्यात्। सुपि चेति दीर्घो यद्यपि परस्तथापि न प्रवर्त्तते। संनिपातपरिभाषावि
रोधात्। नामीत्यनेन नवारंभसामर्थ्यात् परिभाषा बाध्यते। रामयोः। सुपि एत्वे कृते। अपदांतस्य मूर्द्धन्यः
आपादसमाप्तेरधिकारोयं। इण्कोरित्यधिकृत्य। आदेशप्रत्यययोः। सहेः साडः स इति सूत्रात् स इति   उ:१
षष्ठ्यंतमनुवर्त्तते। इण्कवर्गाभ्यां परस्य अपदांतस्यादेश [illegible] प्रत्ययावयव [illegible] सकारस्य मूर्द्धन्यः स्यात्।   स्त४
विवृताघोषस्य सस्य तादृश एव षः। रामेषु। इण्कोः किम्। रामस्य। आदेशप्रत्यययोः किं। सुपीः
सुपिसौ। अपदांतस्य किं। हरिस्तत्र। एवं कृष्णमुकुंदादयः। सर्वादीनि सर्वनामानि। सर्वादीनि शब्द
स्वरूपाणि सर्वनामसंज्ञानि स्युः। तदंतस्यापीयं संज्ञा। द्वंद्वे चेति ज्ञापकात्। तेन परमसर्वत्रेति त्र
ल्। परमभवकानित्यकच् सिद्ध्यति। जसः शी। अदंतात् सर्वनाम्नः परस्य जसः शी स्यात्। अ
नेकाल्त्वात् सर्वादेशः। नचावर्णस्त्विस्याहा विना अनुबंधकृतमनेकाल्त्वमिति वाच्यं। सर्वा [illegible]   त्य
गित्संज्ञाया एवाभावात्। सर्वे। सर्वनाम्नः स्मै। अतः सर्वनाम्नो ङे इत्यस्य स्मै स्यात्। सर्वस्मै। ङ
सिङ्योः स्मात्स्मिनौ। अतः सर्वनाम्न एतयोरेतौ स्तः। सर्वस्मात्। आमि सर्वनाम्नः सुट्। अव

29

णीनि। सर्वनाम्नो विहितस्यामः सुडागमः। एत्वषत्वे। सर्वेषां। सर्वस्मिन्। शेषं रामवत्। एवं विश्वादयोप्यदंताः

१६ सर्वादयश्च पंचत्रिंशत्। सर्व॰ विश्व॰ उभ॰ उभय॰ डतर॰ डतम॰ अन्य॰ अन्यतर॰ इतर॰ त्वत्। त्व॰ नेम।

सम। सिम। पूर्वपरावर दक्षिणोत्तरापर। धराणि व्यवस्थायामसंज्ञायां। स्वमज्ञातिधनाख्या

यां। अंतरं बहिर्योगोपसंव्यानयोः। त्यद्। तद्। यद्। एतद्। इदम्। अदस्। एक। द्वि। युष्मद्। अस्मद्। भव

स्य५ किं। इति॥ उभ॥ उभशब्दो द्वित्वविशिष्टवाचकः। अत एव नित्यं द्विवचनांतः। तस्येह पाठस्तु सकाकच्के जर्थ

न६ नवकच्प्रत्ययेनेष्टसिद्धिः। द्विवचनपरत्वाभावेनोभयतः उभयत्रेत्यादि। विवाचयत्र संगाहः। तदुक्तं। उभयोन्यत्र

अन्यत्रेति। द्विवचनपरत्वाभावे। उभयशब्दस्य द्विवचने नास्तीति कैयटः। अस्तीति हरदत्तः। तस्माज्जस ता५

जा५ योर्द्दशस्य स्थानिवद्भावेन तयप्प्रत्ययांततया प्रथमचरमेति विकल्पे प्राप्ते विसक्तिनिरपेक्षत्वेनांतरंगा

न्नित्यैव संज्ञा भवति। उभये। डतरडतमौ प्रत्ययौ। यद्यपि संज्ञाविधौ प्रत्ययग्रहणे तदंतग्रहणं ना

सुप्तिङंतमिति ज्ञापकात्। तथापीह तदंतग्रहणं केवलयोः संज्ञायाः प्रयोजनाभावात्। अन्यतर

तू२ न्यतमशब्दावव्युत्पन्नौ स्वभावाद्विबहुविषये निर्द्धारणे वर्तेते। तत्रान्यतमशब्दस्य गणेपाठाभावात्सा १६

न संज्ञा। त्वत् इति द्वावप्यदंतौ अन्यपर्यायौ। एक[illegible]तोऽपरोऽनुदात्त इत्येके। एकस्तांत इत्यप

नेमइत्यर्द्धे। समः सर्वपर्यायः तुल्यपर्यायस्तु नेह गृह्यते। यथासंख्यमनुदेशः समानामिति ज्ञापकात्। अंतरंब
हिर्योगेति गणसूत्रे अपुरी तिवक्तव्यं। अंतरायां पुरि। पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसं
ज्ञायां। एतेषां व्यवस्थायामसंज्ञायां सर्वनामसंज्ञा गणपाठात्सर्वत्र या प्राप्ता सा जसि वा स्यात्। पूर्वे पू
र्वाः। स्वाभिधेयापेक्षावधिनियमो व्यवस्था। व्यवस्थायां किं दक्षिणा गाथकाः। कुशला इत्यर्थः। स्वम
ज्ञातिधनाख्यायां। ज्ञातिधनान्यवाचिनः स्वशब्दस्य प्राप्ता संज्ञा जसि वा स्यात्। स्वे। स्वाः। त्मीया
इत्यर्थः। आत्मान इति वा। ज्ञातिधनवाचिनस्तु स्वा ज्ञातयोऽर्था वा। अंतरं बहिर्योगोपसंव्यानयोः। बा
ह्ये परिधानीये वार्थे अंतरशब्दस्य प्राप्ता संज्ञा जसि वा स्यात्। अंतरे अंतरा वा गृहा बाह्या इत्यर्थः।
अंतरे अंतरा वा शाटकाः परिधानीया इत्यर्थः। [illegible] पू
र्वादिभ्यो नवभ्यो वा। एभ्यो ङसिङ्योः स्मात्स्मिनौ वा स्तः। पूर्वस्मात् पूर्वात्। पूर्वस्मिन्। पूर्वे। ए
वं परादीनां। शेषं सर्ववत्। एकशब्दः संख्यायां नित्यैकवचनांतः। न बहुव्रीहौ। बहुव्रीहौ चिकीर्षिते स
र्वनामसंज्ञा न स्यात्। त्वकं पिता यस्य असौ त्वत्कपितृकः। अहकं पिता यस्य असौ मत्कपितृकः। इ

२१

गु

ति समासात्प्रागेव प्रक्रियावाक्ये सर्वनामसंज्ञा निषिध्यते। अन्यथा लौकिके विग्रहवाक्य इव तत्राप्यक
प्रवर्तेत। स च समासेपि श्रूयेत। अतिक्रांतो भवकंतमतिभवकानितिवत्। साधुकोस्तु त्वत्कपितृको मत्क
पितृक इति रूपे इष्टापत्तिं कुर्वंतस्तु ते प्रत्याख्येयाः। यथोत्तरं मुनीनां प्रामाण्यं। संज्ञोपसर्जनीभूतास्तु
न सर्वादयः। महासंज्ञाकरणेन तदनुगुणानामेव गणे संनिवेशात्। अतः संज्ञाकार्यमंतर्गणका
र्यं च तेषां न भवति। सर्वो नाम कश्चित्तस्मै सर्वाय देहि। अतिक्रांतः सर्वमतिसर्वस्तस्मा अतिसर्वाय।
अतिकतरं कुलं। अतितत्। तृतीयासमासे। अत्र सर्वनामता न स्यात्। मासपूर्वाय। तृतीयासमा
सार्थवाक्येपि न। मासेन पूर्वाय। द्वंद्वे च। द्वंद्वे उक्ता संज्ञा न। समुदायस्यायं निषेधो न त्ववयवा
नां। नैवं तदंतविधिना सुट्प्रसंगः। सर्वनाम्नो विहितस्यामः सुडिति व्याख्यातत्वात्। विभाषा
जसि। जसाधारं यत्कार्यं शी तावत्स्यात्तत्र कर्तव्ये द्वंद्वे उक्ता संज्ञा वा स्यात्। वर्णाश्रमेतरे। वर्णाश्र
मेतराः। शीभावं प्रत्येव विभाषेत्येवमुक्तं मते नाकच्। किंतु कप्रत्यय एव। वर्णाश्रमेतरकाः। प्र
थमचरमतयाल्पार्धकतिपयनेमाश्च। एते जसः कार्यं प्रत्युक्तसंज्ञा वा स्युः। प्रथमे। प्रथमाः।
शेषं रामवत्। तयः प्रत्ययः। तत

इत्यादि

वर्णाश्रमेतराणाम्॥०

श्री:
२१

स्वरदंताग्राह्याः। द्वितये। द्वितयाः। नेमे। नेमाः। शेषंसर्ववत्। विभाषाप्रकरणेतीयस्यङित्सूपसंख्यानं। द्वितीयस्मै। द्वितीयायेत्यादि। एवंतृतीयः। अर्थवद्ग्रहणान्नेह। पटजातीयाय। जराया जरसन्यतरस्याम्। जराशब्दस्यजरस्वास्यादजादौ वि भक्तौ। पदांगाधिकारेतस्यचतदंतस्यच। अनेकाल्त्वात्सर्वादेशेप्राप्ते। निर्दिश्यमानस्यादेशाभवंति। एकदेशविकृतस्यानन्यत्वाज्जरशब्दस्यजरस्। निर्जरसौ। निर्जरसः। इनादीन्बाधित्वापरत्वाज्जरस्। निर्जरसा। निर्जरसे। निर्जरसः। २। पक्षेहलादौचरामवत्। वृत्तिकृतानुपूर्वविप्रतिषेधेनेनातोः कृतयोःसन्निपातपरिभाषायाअनित्यत्वमाश्रित्यजरसिकृतेनिर्जरसिन। निर्जरसादितिरूपंनतुनिर्जरसा। निर्जरसदितिकेचिदित्युक्तं। तथाभिसिनिर्जरसैरितिरूपांतरमुक्तं। तदनुसारिभिश्चपूर्वोक्तवचनेनिर्जरस्येत्यसेःस्वरूपमितिस्वीकृतं। एतच्चभाष्यविरुद्धं। पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु। पाद॰ दंत॰ नासिका॰ मास॰ हृदय। निशा॰ असृज्। यूष। दोष्। यकृत्। शकृत्। उदक। आस्य। एषांपदादयआदेशाःस्युःशसादौवा। यत्तुआसनशब्दस्यासन्नादेश इतिकाशिकायामुक्तं। तत्त्वभाष्यादिकं। पादः। पादौ। पादाः। पादं। पादौ। पदः। पदा। पद्भ्यां। पदा। पादनौ। सुडनपुंसकस्य। सुडितिप्रत्याहारःस्वा

१।४

×स्यादि×

दिपर्वर्व न्ता निसर्वनामस्थानसंज्ञानिस्युरक्लीवस्य।स्वादिषसर्वनामस्थाने।कप्रत्ययावधिषु स्वादिषस
१८ र्वनामस्थानेषुपरतः पूर्वं पदसंज्ञं स्यात्।यचिभं।यकारादिषजादिषु स्वादिषसर्वनामस्थानेषुपूर्वं
तसंज्ञं स्यात्।आकडारादेका संज्ञा।इतऊर्ध्वं कडाराः कर्मधारय इत्यतः प्रागेकस्यैकैव संज्ञा
ज्ञेया।यापरानवकाशा च।तेनत्र साम्नाव स्थितसंज्ञैव न पदत्वं।अतो जश्भं नादतः।हृतः।हतोऽभ्यं।
द इत्याः।मासः।मासा।स्यामिरूत्वे यत्वेच यलोपः।मास्यां।मोसिः।अल्लोपोनः।अंगावयवोऽ
नह सर्वनामस्थाने यजादि स्वादिपरो यो न् तस्याकारस्य लोपः स्यात्।रषाभ्यां नो णः समानप
दे।एकपदस्थात्स्यां रेफषकाराभ्यां परस्य नस्य णः स्यात्।यूष्णः।यूष्णा।पूर्वस्मादपि विधौ
स्थानिवद्भाव इति पक्षे तु अड्व्यवाय इत्येवात्र णत्वं।पूर्वत्रासिद्धे नस्थानिवदिति तु इहनास्ति
तस्य दोषः संयोगादि लोप लत्वणत्वेष्विति निषेधात्।नलोपः प्रातिपदिकान्तस्य।प्रातिपदि नेतिर
केति चलुप्तषष्ठीकं पदं।प्रातिपदिकसंज्ञं यत्पदं तदंतस्य नकारस्य लोपः स्यात्।नलोपस्यासिद्ध स्त्रीः॥
त्वाद्दीर्घत्व मेत्वमेस्त्वं न।यूषभ्यां।यूषभिः।यूषभ्यः। इत्यादि।विभाषा ङिश्योः।अंगावयवो १७

क र

34

पजादि वलयन

आसन्यं प्राणमूचुरितिवा। आस्ये भवः। आसन्यः। हेपृ शांहस्यन। ३

ऽसवनीमस्छानपरोयोनर् तस्याकारस्य लोपो वास्य। नुः स्योपरतः। पृष्ठियूषणी। पद्हो रामवत्। पद्दन्निति
सूत्रे प्रभृतिग्रहणं प्रकारार्थं तथा च ओङः स्यामपि दोषन्भाहेशो साधेक कुदोषणी। इषुदोहतः। तेनप
दं प्रिशरणो स्त्रियांस्वात्इन्भा नसमन इत्यादि संगच्छते। ~~[illegible]~~ पुस
कत्त्रमयनएव साध्यात्। तेन दक्षिणं दो निर्विवर इति संगच्छते। भुजबाहू प्रवेष्टो दोरिति साहस्व
यन्हिं स्वमपि दोषं तस्य तथा विधस्य सजत इति। द्वयोरह्नो भवो द्व्यह्नः। संख्याविसायपूर्वस्याह्नस्याहन्नन्यत
रस्यां ङौ। संख्यादि पूर्वस्याह्नस्य अहन्नादेशो वा स्यान्ङौ। द्व्यह्नि। द्व्यहनि। द्व्यह्ने। विगतमहः। व्यह्नः।
व्यह्नि। व्यहनि। व्यह्ने। अह्नः सायः सायाह्नः। सायाह्नि। सायाहनि। सायाह्ने। इत्यदन्ताः। विश्व
पाः। दीर्घाज्जसि च। दीर्घाज्जसि इचि च परे प्रथमयोः पूर्वसवर्णो न स्यात्। वृद्धिः। विश्वपौ। सव
र्णदीर्घः। विश्वपाः। यद्यपीह ओ ङिना दिवी त्येव सिद्धं जसि तु सत्यपि पूर्वसवर्णदीर्घे निष्पत्ति तथा
पि गोयौ गौर्य्य इत्याद्यर्थं सूत्रमिह पिन्यायेलाद्दुपन्यस्तं। आतो धातोः। आकारान्तो यो धा
तुः तदन्तस्य भस्यांगस्य लोपः स्यात्। अलोन्त्यस्य। विश्वपः। विश्वपा। विश्वपाभ्यां। एवं शंखध्मा

ह

दयः।धातोः किं।हाहा नु।टा सवर्णदीर्घः।हाहा।ङे।वृद्धिः।हाहे।ङसि।ङस्।दीर्घः।हाहाः।ओसि।
वृद्धिः।हाहोः।ङौ।आद्गुणः।हाहे।शेषं विश्वपावत्।आत इतियोगविसागादधातोरप्यालोपः क्वचि
त्।हः।१ अ–२–अः।अदंता॥२॥हरिः।प्रथमयोः पूर्वसवर्णः।हरी।जसि च।ह्रस्वांगस्य गुणः स्या त सां
ज्जसि परे।हरयः।ह्रस्वस्य गुणः।ह्रस्वस्य गुणः स्यात्संबुद्धौ।एङ्ह्रस्वादिति संबुद्धिलोपः।हे हरे।
हरिं।हरी।हरीन्।शेषो घ्यसखि।अनदीसंज्ञो ह्रस्वौ या विवर्णौ वर्णौ तदंतं सखिवर्जं घिसंज्ञं
स्यात्।शेषः किं।मत्यै।एकसंज्ञाधिकारात्सिद्धे शेषग्रहणं स्पष्टार्थमिति तत्वं।ह्रस्वौ किं।वातप्रम्यै।
इ उ तौ किं।मात्रे।आङो ना स्त्रियां।घेः परस्याङो ना स्यादस्त्रियां।आङिति टासंज्ञा।प्राचां।हरिणा।
अस्त्रियां किं।मत्या।घेर्ङिति।घिसंज्ञस्य ङिति सुपि गुणः स्यात्।हरये।घेः किं।सख्ये।ङिति
किं।हरिभ्यां।सुपि किं।पट्वी।घेर्ङिती तिगुणे कृते।ङसिङसोश्च।एङोऽङ।ङसिङसोरति परे पूर्वरूप
मेकादेशः स्यात्।हरेः।२ हयोः।हरीणां।अच्च घेः।इदुद्भ्यामुत्तरस्य ङेरौत्स्यात् घेरंतादेशश्चाका
रः।हरौ।हर्योः।हरिषु।एवं श्रीपत्यग्निरविकव्यादयः।अनङ् सौ।सख्युरंगस्यानङादेशः स्यादसं
दूर

पू ५

८

36

हल्ङ्याब्भ्यः किम् । ग्रामणी ॥ दीर्घात्किं । नि कौशाम्बि । अतिखट्वः । सुनिमीतिकिं । अमैत्री स्त्रीः । लिपासहशितस्य अहराणाह्
सिचोऽम्ह राजन्तत्रि । अप्रक्तं किं । बिभर्ति । हल् किं । बिभेद । प्रथमं हल् किं । राजा । नलोपो नस्योह्रः संयोगांत लोपस्याभ्सिद्धत्वाह् ४

बुद्धेसोपरे ॥ ङिच्चेत्यंतादेशः ॥ अलोंत्यात्पूर्वउपधा ॥ अंत्यादलः पूर्वोवर्णउपधासंज्ञः स्यात् ॥ सर्वनाम
स्थानेचासंबुद्धौ ॥ नांतस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थानेपरे ॥ अपृक्त एकाल्प्रत्य
यः ॥ एकाल्प्रत्ययोयः सोपृक्तसंज्ञः स्यात् ॥ हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् ॥ हलंतात्परं दी
र्घौ येङ्यापौ तदंताच्च परं सुतिसी इत्येतदपृक्तं हल्लुप्यते ॥ सखा ॥ हे सखे ॥ सख्युरसंबुद्धौ ॥ सख्युरंगा
त्परं संबुद्धिवर्जं सर्वनामस्थानं णिद्वत्स्यात् ॥ अचोञ्णिति ॥ ञितिणितिचपरेऽचोवृद्धिः स्यात् ॥ सखा
यौ ॥ सखायः ॥ सखायं ॥ सखायौ ॥ घिसंज्ञाभावान्न तत्कार्यं ॥ सख्या ॥ सख्ये ॥ ख्यत्यात्परस्य ॥ ख्ये
तिशब्दाभ्यां कृतयणादेशाभ्यां परस्यङसिङसोरकारस्यउत्स्यात् ॥ सख्युः ॥ औत् ॥ इदुद्भ्यां प
रस्यङेरौत्स्यात् तकारानुवृत्तिरुत्तरार्था ॥ सख्यौ ॥ शेषंहरिवत् ॥ शोभनः सखासुसखा ॥ सुस
खायौ ॥ सुसखायः ॥ अनङ् वृद्धावयोरांगत्वात्तदंतेपिप्रवृत्तिः ॥ समुदायस्य सखिरूपत्वाभावे
नासखीति निषेधाप्रवृत्तेर्घिसंज्ञा ॥ सुसखिना ॥ सुसखये ॥ ङसिङसोर्गुणे कृते कृतयणादे

खीती शब्दाभ्यां ४

ल॰सिद्धां

२०

नको मुहृ

शीत्यातावाह्रस्वत्वादित्युक्तेन।सुसखेः।सुसखाविप्रादि।एवमतिशयितःसखाअतिसखा।
परमःसखायस्येतिविग्रहेपरमसखा।परमसखायावित्यादि।गौणत्वेपिनङित्वप्रवर्ते
ते।सखीमतिक्रान्तोतिसखिः।लिंगविशिष्टपरिभाषायाअनित्यत्वान्नटच्।हरिवत्।प्र
हानङित्वेनसवतः।गोस्त्रियोरितिह्रस्वेनसखिशब्दस्यलाक्षणिकत्वात्।लक्षणप्र
तिपदोक्तयोःप्रतिपदोक्तस्यैवग्रहणात्।पतिःसमासएव।पतिशब्दःसमासएवघिसं
ज्ञःस्यात्।पत्या।पत्ये।पत्युः२।पत्यौ।शेषंहरिवत्।समासेतुभूपतये।कतिशब्दोनित्यं
बहुवचनान्तः।बहुगणवतुडतिसंख्या।एतेसंख्यासंज्ञाःस्युः।डतिच।डत्यन्तासंख्या
षट्संज्ञास्यात्।प्रत्ययस्यलुक्श्लुलुपः।लुक्श्लुलुप्शब्दैःकृतंप्रत्ययादर्शनंक्रमात्
तत्तत्संज्ञंस्यात्।षड्भ्योलुक्।षड्भ्यःपरयोर्जश्शसोर्लुक्।प्रत्ययलोपेप्रत्ययलक्षणं।
[illegible]लोपेतदाश्रितंकार्यंस्यात्।इतिजसीतिगुणेप्राप्ते।नलुमताङ्गस्य।लुक्

२०

पि॰

38

स्लुलुप् एते लुमंतः। लुमता शब्देन लुप्ते तन्निमित्तमंगकार्यं न स्यात्। कति। २ क तिभिः। कतिभ्यः २।
कती नाम्। कतिषु। अस्मद्युष्मद्ष ट्संज्ञास्त्रिषु सरूपाः। त्रिशब्दो बहुवचनांतः। त्रयः। त्रीन्।
त्रिभिः। त्रिभ्यः २। त्रेस्त्रयः। त्रिशब्दस्य त्रय आदेशः स्यादामि। त्रयाणाम्। परमत्रयाणाम्।
गौणत्वे तु नेति केचित्। प्रियत्रीणाम्। वस्तुतस्तु प्रियत्रयाणाम्। त्रिषु। द्विशब्दो नित्यं द्विवच
नांतः। त्यदादीनामः। एषामकारांतादेशः स्याद्विभक्तौ। द्विपर्यंतानामेवेष्टिः। द्वौ २। द्वा
भ्याम् ३। द्वयोः २। द्विपर्यंतानां किं। भवान्। भवन्तौ। संज्ञायामुपसर्जनत्वे च नात्वं। सर्वा
द्यंतगणकार्यत्वात्। द्विर्नाम कश्चित्। द्विः। द्वी। द्वयः। द्वा। वृतिकारांतो तिद्विः। हरिवत्। आद्या
न्येतु। परमद्वावित्यादि। ओडुलोमिः। ओडुलोमी। उ डुलोमाः। [illegible]॥

बहुलेतु २

सि॰
२१

लोम्नोप त्येषु बहुष्वकारो वक्तव्यः। बाह्वादिञो पवादः। औडलोमिं। औडलोमी। उडुलोमान्॥
॥ इतीदंताः। वातप्रमी रित्युणादि सूत्रेण माङः ई प्रत्ययः कित्। वातं प्रमिमीते वातप्रमीः। दीर्घा
ज्जसि च। वातप्रम्यौ। वातप्रम्यः। हे वातप्रमीः। अमि पूर्वः। वातप्रमीं। वातप्रम्यौ। वातप्रमीन्। वा
तप्रम्या। वातप्रम्ये। वातप्रम्यः २। वातप्रम्योः। वातप्रम्यां। दी। घत्वी न्नुट्। ङौ तु सवर्णदीर्घः।
वातप्रमी। वातप्रम्योः। वातप्रमीषु। एवं ययी पप्यादयः। यात्यनेनेति ययीः मार्गः। पाति लोक
मिति पपीः सूर्यः। यापोः किद्द्वे चेति ई प्रत्ययः। क्विबंत वातप्रमी शब्दस्य तु अमि शसि ङौ च वि
शेषः। वातप्रम्यं। वातप्रम्यः। वातप्रम्यि। एरनेकाच इति वक्ष्यमाणो यण्। प्रधीवत्। बह्व्यः
श्रेयस्यो यस्य स बहुश्रेयसी। दीर्घङ्याबंताद् हल्ङ्यादिलोपः। यू स्त्र्याख्यौ नदी। ईदूदंतौ
नित्यस्त्रीलिंगौ नदीसंज्ञौ स्तः। प्रथमलिंगग्रहणं च। पूर्वं स्त्र्याख्यस्योपसर्जनत्वेने नदी ॥ २१॥
पि

40

त्वेवं कथमिसश्रयः। अंवार्थनद्योर्ह्रस्वः। अंवार्थानां नद्यंतानां ह्रस्वः स्यात्संबुद्धौ। हे बहुश्रेयसि।
शसि बहुश्रेयसीन्। आण्नद्याः। नद्यंतात्परेषां ङितामाडागमः स्यात्। आटश्च। आटोऽचिप
रे वृद्धिरेकादेशः स्यात्। बहुश्रेयस्यै। बहुश्रेयस्याः २। नद्यंतात्परस्याम्नुट्। बहुश्रेयसीनां। ङेरा
म्नद्याम्नीभ्यः। ङेः तोद्याबंतान्नीशब्दाच्च ङेराम् स्यात्। इह परत्वादाटानुबाध्यते।
बहुश्रेयस्यां। शेषं मीप्रत्ययांतवात प्रेमीवत्। अङ्यंतत्वान्न सुलोपः। अतिलक्ष्मीः।
शेषं बहुश्रेयसीवत्। कुमारीमिच्छन्कुमारी वाचरन्वो ब्राह्मणः कुमारी। क्यजंता
द्वाचारः क्विबंताद्वाकर्त्तरि क्विप्। हल्ङ्याहिलोपः। अचिश्नुधातुभ्रुवांय्वोरिय
ङुवङौ। श्नुप्रत्ययांतस्येवर्णोवर्णांतधातोर्भ्रू इत्येतस्यांगस्येयङुवङौ स्तो।

नदी ४

41

२२ ङ्जादौप्रत्ययेपरे।ङिःश्रेत्यनादेशः।आंनत्स्याद्वेरियङ्।ओःस्वङ्।इतीयङिप्राप्ते।ए
नेकाचोसंयोगपूर्वस्य।धात्ववयवसंयोगपूर्वोनभवतिय इवर्णस्तदंतोयोधातुस्तदं
तस्यानेकाचोंगस्य यण्स्यादजादौप्रत्ययेपरे।८ इतियण्।कुमार्यौ।कुमार्यः।हे
कुमारि।अमिशसिच कुमार्यं।कुमार्य्यः।कुमार्यौ।कुमार्य्याः।कुमारीणां।कुमार्य्यां।
प्रधीः।प्रध्यम्।प्रध्यः।उन्नयतीत्युन्नीः।धातुनासंयोगस्य।१०विशेषणादिह स्या
देवयण्।उन्न्यौ।उन्न्यः।हेउन्नीः।उन्न्यं।ङेराम्।उन्न्याम्।एवंग्रामणीः।अनेका
चःकिं।नीः।नियौ।नियः।अमिशसिच परत्वादियङ्।नियं।ङि नियः।ङेराम्।नि
याम्।असंयोगपूर्वस्येतिकिं।सुश्रियौ।यवक्रियौ।तिकारकेतरपूर्वपदस्य
यण्नेष्यते।शुद्धधियौ।परमधियौ।कथंतर्हि दुधियः।वृश्चिकभियेत्यादि। २२

ग२

42

उच्यते। दुःस्थिताधी। येषामिति विग्रहे। दुरित्यस्य धीशब्दं प्रति गतित्वमेव नास्ति। यत्क्रियायुक्ताः
प्राद्यस्तं प्रत्येव गत्युपसर्गसंज्ञा। वृश्चिकशब्दस्य बुद्धिकृतमपादानत्वं नेह विवक्षितं। वृश्चिक
संबाधिनीति। वृश्चिकत्वीरित्युत्तरपदलोपो वा। न तु सुधियाः। एतस्योयण्निस्या दिति सुपि। सुधियौ।
सुधियः। सखायमिच्छति सखीयति। ततः क्विप्। अल्लोपयलोपौ। अल्लोपस्य स्थानिवत्वाद्य
णिप्राप्ते। क्वौ लुप्तं न स्थानिवत्। एकदेशविकृतस्यानन्यतया ऽनङ्सौ। सखा। सखायौ।
सखायः। हे सखीः। अमि पूर्वरूपात्सखाद्यणिप्राप्ते। ततोपि परत्वात्सख्युरसंबुद्धौ। ण
विति प्रवर्त्तते। सखायं। सखायौ। शसि यणि सख्यः। सह खेन वर्त्तत इति सखः। तमिच्छतीति
सखीः। सुखमिच्छतीति सुखीः। सुतीः। सख्यौ। सुख्यौ। सुत्यौ। ख्यत्यादिति दीर्घ
स्यापि ग्रहणादुकारः। सख्युः। सुख्युः। सुत्युः। लूनमिच्छतीति लूनीः। दामा। दा

प्रस्त्रीनं॰१

२३ मी:॥ प्रस्त्रीमी:॥ घ्यणां ङसि ङसो अर्यणु। नलमम्वयोरस्तित्वात्स्य स्या दिसुर्वे। ल्ह: न्य:।
ह्याम्सु॥ प्रस्त्रीम्यु:॥ शु॰ष्कीयते॥ शु॰ष्की:॥ पक्वी:॥ इयङ्॥ शुष्कियो॥ शुष्किय:॥ ङसिङ
सो: शुष्किय:॥ इतीदृता:॥ शंभुर्हरिवत्॥ एवंविष्णुवायुभान्वादय:॥ तृज्वत्क्रोष्टु:॥
क्रोष्टुस्तृजन्तेन तुल्यं वर्त्तते संबुद्धौ सर्वनामस्थाने परे॥ क्रोष्टुशब्दस्थाने क्रोष्टृशब्द:
प्रयोक्तव्य इत्यर्थ:॥ ऋतो ङि सर्वनामस्थानयो:॥ ङौ सर्वनामस्थाने च ऋदन्तांगस्य
गुण: स्यादिति प्राप्ते॥ ऋदुशनस्पुरुदंसोऽनेहसां च॥ ऋदन्तानामुशनसादीनां चानङ् सो॰
स्यादसंबुद्धौ सौ परे॥ अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम्॥ अ
बादीनामुपधाया दीर्घ: स्यादसंबुद्धौ सर्वनामस्थाने परे॥ नप्त्रादिग्रहणं व्युत्पत्तिप
क्षे नियमार्थम्। तेन पितृभ्रातृप्रभृतीनां न॥ उणादिशब्दस्य सर्वत्रैव॥ समर्थसूत्रे २३

उक्रोतार इति साधुप्रयोगात्। क्रोष्टा। क्रोष्टारौ। क्रोष्टारः। क्रोष्टारम्। क्रोष्टारौ। क्रोष्टून्। वि
भाषा तृतीयादिष्वचि। अजादिषु तृतीयादिषु क्रोष्टुर्वा तृज्वत्। क्रोष्ट्रा। क्रोष्टुना। ऋत उत्। ऋतो ङ
सिङसोरति परे उकार एकादेशः स्यात्। रपरत्वं। रात्सस्य। रेफात्संयोगांतस्य सस्यैव लोपो नान्य
स्य। रेफस्य विसर्गः। क्रोष्टुः। २ आमि परत्वात् तृज्वद्भावे प्राप्ते। नुमचिरतृज्वद्भावेभ्यो नुट् पूर्ववि
प्रतिषेधेन। क्रोष्टूनां। क्रोष्टरि। क्रोष्टोः। पक्षे हलादौ च शंभुवत्। इत्युदंताः। हूहूः। हूह्वौ। हूह्वः। २ हूहूं।
हूह्वौ। हूहून्। अतिचमूशब्दे तु नदीकार्यं विशेषः। हे अतिचमु। अतिचम्वै। अतिचम्वाः २। अतिचमूनां।
अतिचम्वौ। खलपूः। ओः सुपि। धात्ववयवसंयोगपूर्वो न भवति य उवर्णस्तदंतो यो धातुस्तदंतस्याने
काचोऽङ्गस्य यण् स्यादजादौ सुपि। गतिकारकेतरपूर्वपदस्य यण् नेष्यते। खलप्वौ। खलप्वः। एवं सुल्वादयः।
अनेकाचः किं। लूः। लुवौ। लुवः। धात्ववयवसंयोगपूर्वस्येति किं। उल्लूः। उल्ल्वौ। उल्ल्वः। असंयोगपूर्वस्य किं। कटप्रु
वौ। [illegible]प्रुवः। गतीत्यादि किं। परमलुवौ। सुपि किम्। लुलुवतुः। लुलुवुः। न भूसुधियोः। स्वभुवौ। स्वभु

वः। वर्षाभ्वश्च। अस्योवर्णस्य यण् स्याददिसुपि। वर्षाभ्वौ। वर्षाभ्वः। दृन्भवतीति दृन्भूः। अन्भू दृन्भू जम्बूकफेलू
।।२४।। ण२ कर्कंधू दिधिषू इत्युण। दृस्त्रे युसो दृत। दृन्भ्वौ। दृन्भ्वः। दृन्भूं। दृन्भ्वौ। दृन्भून्। दृन्भिति भोते हिंसार्थे अधीये। स्रु
वः। क्विपि। दृन्भूः। दृन्करपुनःपूर्वस्य भुवो यण् वक्तव्यः। दृन्भ्वम्। दृन्भ्वः। खलपूवत्। करभ्वम्। करभ्वः। हीवपा
२४ वक एव कारः स्वार्थिकः। ञ्जन्तादृण्। कारभ्वौ। कारभ्वः। पुनस्तयोगिकः। पुंसि। पुनर्भ्वौ इत्यादि। दृग्भूकारा
न्तशब्दो स्वयंभूवत्। इत्यूदन्ताः। धाता। हेधातः। धातारौ। धातारः। अवर्णान्तस्य णत्वं वाच्यं। धातॄणां। एवं न
प्त्रादयः। नप्तारौ। पिता। व्युत्पत्तिपक्षेपि नप्त्रादिग्रहणस्य नियमार्थत्वान्नदीर्घः। पितरौ। पितरः। पि
तरम्। पितरौ। शेषं धातृवत्। एवं जामातृभ्रात्रादयः। ना। नरौ। नरः। हेनः। नृ वा नृ इत्यस्य नामि वा दी
र्घः स्यात्। नृणां। नृणां। इत्यृदन्ताः। गोतो णित्। गोशब्दात्परं सर्वनामस्थानं णित्कार्यकृत् स्यात्। गौः। गा
वौ। गावः। ओतोम्शसोः। आ ओत इति छेदः। ओकारादम्शसोर विपरे [illegible] आकार एकादेशः
स्यात्। गाम्। गाः। हयया सुबेवैंरयते। नेरुः। अविनवं। गां। गावौ। गाः। गवा। गवे। गोः इत्यादि। ओतो णि ।।२४।।

अमू१

46

हि लिवाच्यविहितविशेषणंच।तेनसुधोः।सुधावौ।ओकारांतादिहितं सर्वनामस्थानं इति व्याख्यानान्नेह।हेस
नो।स्तानव।ङः श्सुः।स्मृतोर्थे नसः।स्मृतोः।स्मृतावो।स्मृतावः।स्मृताम्।स्मृतावौ।स्मृतः।इत्योदताः।रायो
हलि।रैशब्दस्य आकारोंतादेशः स्याद्धलि विभक्तौ।अचि आयादेशः।राः।रायौ।रायः।रायौ।राभ्यां।रायः।र
या।राभ्याम्।इत्यैदंताः।ग्लौः।ग्लावौ।ग्लावः।ग्लावं।ग्लावौ।ग्लावः।ओमभ्यासोरिति हन्न प्रवर्तते।ऐऔसू
त्रेण ओदौतोः सावर्ण्याभावज्ञापनात्।। ।।इत्यजंताः पुल्लिंगाः।। ।।छ।।श्रीः।। ।।रमा।औङ आपः।आ
बंतादंगात्परस्य औङः शी स्यात्।औङ् इत्यौकारविभक्तेः संज्ञा।रमे।रमाः।संबुद्धौ च।आप एकारः स्यात्सं
बुद्धौ।एङ्ह्रस्वात् इति संबुद्धिलोपः।हे रमे२।हे रमाः।रमो।रमे।स्त्रीत्वान्नवा नावः।रमाः।आङि चापः।ओ
ङि ओसि च परे आबंतस्यांगस्य एकारः स्यात्।रमया।रमाभ्यां।रमाभिः।याडापः।आपः परस्य ङिद्वचन
स्य याडागमः स्यात्।वृद्धिरेचि।रमायै।सवर्णदीर्घः।रमायाः।रमयोः।रमाणां।रमायां।रमयोः।रमासु
एवं दुर्गाद्रियः।सर्वनाम्नः स्याड्ढ्रस्वश्च।आबंतात्सर्वनाम्नः परस्य ङितः स्याट्स्यादापश्च ह्रस्वः।याटापवा
दः।सर्वस्यै।सर्वस्याः२।एकादेशस्य पूर्वांतत्वेन ग्रहणादामि सर्वनाम्नः इति सुट्।सर्वासाम्।सर्वस्या

॥२५॥

सर्वयोः। सर्वासु। एवं विश्वादय आबंताः। विभाषा दिक्समासे बहुव्रीहौ। अत्र सर्वनामता वा स्यात्। उत्तरपूर्वस्यै। उत्तरपू
र्वायै। हि ङसामान्येतरावे इति प्रतिपदोक्तस्य दिक्समासस्येग्रह[illegible] णान्नेहायो नरासा पूर्वायिस्यो। उन्मुग्धा
याः तस्यैनुत्तरपूर्वायै। बहुव्रीहियहणं स्पष्टार्थं। अंतरस्ये। शाळायै। बाह्यायेत्यर्थः। अपुरी युक्तैर्नेति। अंतरायै। न
गर्यै। तीयस्य ङित्सु पसंख्यानात्। द्वितीयस्यै। द्वितीयायै। द्वितीयस्याः २ द्वितीयायाः २ द्वितीयस्यां। द्वितीयायां
[illegible]षरमावत्। एवं तृतीया। अंबार्थनद्योर्ह्रस्वः। हे अंब। हे अक्क। हे अल्ल। असंयुक्ता ये डलकास्तद्वतां ह्रस्वो न
हि अंबाडे। हे अंबाळे। हे अंबिके। जरा। जरसौ। रा। सोवास्वरत्वोज्जरस्। औ मिनुटः परत्वात् जरसू। ज
रसामित्यादि। पद्दे रमावत्। इहपूर्वविप्रतिषेधेन शासावेसंनिपातपरिभाषया। अनित्यतावा श्रि
यं जरसीइति किं विहा कुत्तान्नि मूळे। यद्यपि जरसादेशस्य स्थानिवद्भावेनाबंततामाश्रित्य ० औङ आपः
ओङि आपः। या ङ्यापः। ह्रस्वनद्यापः। ङेराम् इति पर्वविषयः। ज्ञानात् एवं न स्तु निरस्पर सु। तथापि अंलि न२
धा विस्मृते न भवंति आ आबिति प्रश्लिष्य आकाररूपस्यैवापः सर्वत्र ग्रहणात्। एवं हल्ड्याब्भ्य इति सूत्रे ॥२५॥
पि। आ आपूर्वौ इति प्रश्लेषादिति खर्दुः निष्कौशाम्बिः स्याहि सिङ्गदीर्घग्रहणं प्रत्याख्येयमिति नवैवम्

ई

पि

ग ४

प्यतिखड्डाये स्वरा अथ यमाकारत्वस्यानिष्ठावेनापूत्वं वा श्रियसयात्स्यादिति वाच्यं। आवंतं यूहंगतत
परस्य यांड्विधानात्। उपसर्जनस्त्रीप्रत्यये तदादिनियमात्। पहन्निति तिना शिकायानस्त्रं। नसः। नसा। नोस्या।
भिस्यादि। पैहंसु टिवेरमावत्। निशायानि शः। निशः। निशा। व्रश्चस्त्र स्तसृजमृजयजरोजस्त्राजछशांषः। व्र
श्चादीनां सप्तानां छशांतयोश्च षकारोंतादेशः स्यात्झलि पदांते वा। षस्य जश्त्वेन डकारः। निड्भ्यां। निड्भिः।
सुपिङः सी तिपत्त्वे धुट्। वर्चीतस्या सिद्धत्वाङ्ग्योश्छिती यादृतिटतयोश्छ्योर्नानपदांतात्। टोरिति ष्टुत्वं न। नि
ट्सु। निट्त्सु। षढोः कः सि। षस्य ढस्य च कः स्यात्सकारपरे। इति तु न भवति। जश्त्वस्यासिद्धत्वात्। किंतु भ्रस्या
दिसूत्रे दादेर्धातोरितित्स्त्राद्धातोरित्यनुवर्तयिति। तन्मते श्चत्वेन जकारे निजूत्स्यां। निजूसिः। निजुत्वं। निजुः। वे
कुरिति कुत्वं तु न भवति जश्त्वस्यासिद्धत्वात्। मांसपृतनासानूनां मांस्पृत्स्नवो वाच्याः। शसादौ वा। [illegible] पृतः।
ष्णा। पृ मांसू पदेसु टिवरमावत्। गोपाविश्वपावत्। मतिः प्रायेण हरिवत्। स्त्रीत्वान्न त्वाभावः। मतीः। नात्वं न। मत्या
ङितिङस्य च श्या। इयङुवङ्स्थानौ स्त्रीशब्दलिन्नौ नित्यस्त्रीलिंगावीदूतौ ह्रस्वौ च इवर्णोवर्णौ स्त्रियां वा नदीसंज्ञौ स्तौ ङिति पे ।।

49

॥सि॰मु॥
॥२६॥

आण्नद्याः। मत्यै। मतये। मत्याः। मतेः। नदीत्वपक्षे औदितिङेः रौ च प्राप्ते। इदुद्भ्याम्। नदीसंज्ञकाभ्यामिदुद्भ्यां परस्य
ङेराम् स्यात्। पक्षे अच्च घेः। मत्याम्। मतौ। एवं श्रुतिस्मृत्यादयः॥ त्रिचतुरोः स्त्रियां तिसृचतसृ। स्त्रीलिङ्गयोरेतयोरेतावा
देशौ स्तो विभक्तौ परतः। अचि र ऋतः। तिसृचतसृ एतयोः ऋकारस्य रेफादेशः स्यादचि गुणदीर्घोत्वानामपवादः।
तिस्रः २ तिसृभिः तिसृभ्यः २ आमि नुमि विशेषे नुट्। न तिसृचतसृ। एतयोर्नामि दीर्घो न स्यात्। तिसृणाम्। तिसृषु। प्रिया
मिति त्रिचतुरोर्विशेषणान्नेह। प्रियास्त्रयः स्त्रीणि वा यस्याः सा प्रियत्रिः। मतिवत्। आमि। प्रियत्रयाणामिति विशेषः
प्रिया। तिस्रो यस्य स इति विग्रहे तु प्रियतिसा। प्रियतिस्रौ। प्रियतिस्रः। प्रियतिस्रम् इत्यादि। प्रियास्तिस्रो यस्य तत् कुलं प्रि
यत्रि। स्यमोर्लु काकुप्तत्वेन प्रत्ययलक्षणाभावान्न तिस्रादेशः। न लुमतेति निषेधस्यानित्यत्वात्। पक्षे प्रियतिस्
रादेशात् पूर्वविप्रतिषेधेन नुम्। प्रियतिसृणी। प्रियतिसृणि। तृतीयादिषु वक्ष्यमाणपुंवद्भावविकल्पात्। पर्यायेण नु
म्यसावौ। प्रियतिस्रा। प्रियतिसृणा। द्वेरत्वे सत्याप्। द्वे २ द्वाभ्याम् ३ द्वयोः २। गौरी। गौर्यौ। गौर्यः। नदीकार्यम्। हे गौरि। गौर्यै।
एवं वाणी। नद्यादयः। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणादनङि णिद्वद्भावश्च प्राप्ते। विभक्तौ लिङ्गविशिष्टा
ग्रहणं। सखी। सख्यौ। सख्यः। इत्यादि गौरीवत्। अङ्यन्तत्वान्न सुलोपः। लक्ष्मीः। शेषं गौरीवत्। एवं तरीतन्त्र्यादयः। स्त्री
हे स्त्रि। स्त्रियाः। स्त्रीः। ईश्स्येयङ् स्यादजादौ प्रत्यये परे। स्त्रियौ। स्त्रियः। वाम्शसोः। अमि शसि च स्त्रिया इयङ् वा स्यात्॥

मु
॥२६॥

50

स्त्रियं। स्त्री। स्त्रियः। स्त्रीः। स्त्रिया। स्त्रियै। स्त्रियाः। स्त्रियोः। परत्वान्नुट्। स्त्रीणां। स्त्रियाम्। स्त्रियोः। स्त्रीषु। स्त्रियमतिक्रांतो
तिस्त्रीः। स्त्रिः। अतिस्त्रियौ। गुणनाभावौ। त्वचतुर्ष्टि परत्वात् पुंसि बाध्यते। क्लीबे नुमा च। स्त्रीशब्दस्येयङ् त्ववधार्य नाम्
जसि च। अतिस्त्रयः। हे अतिस्त्रे। अतिस्त्रियौ। अतिस्त्रयः। वाम्शसोः। अतिस्त्रिं। अतिस्त्रियम्। अतिस्त्रियः। अतिस्त्री
न्। अतिस्त्रिणा। घेर्ङिति। अतिस्त्रये। अतिस्त्रेः २ अतिस्त्रियोः। अतिस्त्रीणाम्। अच्च घेः। अतिस्त्रौ। ओस्योकारे वानि
त्यस्यादेशः शसोस्तु विलाप्य। इयादेशो विनान्यत्र स्त्रियाः पुंस्युपसर्जने। क्लीबे तु नुम्। अतिस्त्रिणी। अतिस्त्रीणि। अ
तिस्त्रिणे। ङे अस्तावज्ञा देवक्ष्यमाणपुंवद्भावा सदेशा वद्रूपम्। अतिस्त्रये। अतिस्त्रिणः। अतिस्त्रेः २ अतिस्त्रिणोः। अ
तिस्त्रियोरित्यादि। स्त्रियां तु प्रायेण पुंवत्। वासि। अतिस्त्रीः। अतिस्त्रिया। ङिति ह्रस्वश्चेति ह्रस्वात्तत्प्रयुक्तो विकल्पः। अ
तु४ स्त्रीति इयङुवङ्स्थानाविस्त्र्यस्येव पर्युदासस्त्रं संबद्धस्यैवानुवर्तनेः। अतिस्त्रियै। अतिस्त्रये। अतिस्त्रियाः। अतिस्त्रेः २ अति
[illegible] स्त्रियाम्। अतिस्त्रौ। श्रीः। श्रियौ। श्रियः। नेयङुवङ्स्थानावस्त्री। इयङुवङोः स्थितिर्ययोस्तावीदूतौ नदीसंज्ञौ स्तो न तु स्त्रीः। न
हे श्रीः। श्रियै। श्रिये। श्रियाः। श्रियः २ वामि। इयङुवङ्स्थानौ स्त्र्याख्यौ यू आमि वा नदीसंज्ञौ स्तः। न तु स्त्रीः। श्रीणाम्।
श्रियाम्। श्रियां। श्रियि। अवीशब्दस्य तु तत्रिकारादीनामेतेल्लक्ष्मीवद्रूपम्। पदान्तं विनापि स्त्रियावर्गमानत्वं नित्यस्त्री

द्रो

[illegible]

KKSU LIBRARY
RAMTEK
441 106
M-1570
Dist. Nagpur

हे२

त्यमिति स्त्रीकारौ लिंगांतरं नास्ति चापकत्वं तदिति कैयटमतेऽनु पुंवद्रूपम्। अकृष्टाची रिति विग्रहे तु स्त्रीवत्। अग्नि
शासिव च्च्यम्। श च्च्य इति विशेषः। सुष्टु चीर्यस्याः सुष्टुच्या पतिवेतीं गहे इति कारमते सुधी स्त्रीवत्। मतांतरे पुंवत्। सुष्टुची विर
रिति विग्रहे तु स्त्रीवदेव। ग्रामणीः पुंवत्। ग्रामनयन स्योत्सर्गतः पुंस्त्वमतेयापदांतरं विना स्त्रियामवृत्तेः। एवं खल
मो४ पवं नादेरपि पुंस्त्वमत्यिस्ये। सर्गिकिंवे बोध्यम्। येनुमतिवत्। स्त्रियां च। स्त्रीवाचि क्रोष्टु शब्द स्तृ जंतवद्रूपं लसते। अन्ते
स्पोङीपु। अदंते स्यो नांत स्पञ्च्यस्त्रियांङीपू स्यात्। क्रोष्ट्री। क्रोष्ट्र्यौ। क्रोष्ट्र्यः। वधूगौरीवत्। स्तृः स्त्रीवत्। कथं तर्हि हापितःगा हेमुख्नः।५
दे६ सिंसुस्तुइति संहिः। प्रमादएवायमिति बहवः। स्वकृप्रः पुंवत्। पुनस्तुः। दृक्के रेति यणा गवङो बाधनी। नेयङुवङिति नि
षेधोन। हे पुनर्भु। पुनर्भ्वम्। पुनर्भ्वौ। पुनर्भ्वः। एकाजुत्तरपदेणः। एकाजुत्तरेयस्य तस्मिन्नामा सप्रूवपदस्थान्निमित्ता पद७
त्परस्य प्रातिपदिकांतनुम्विभक्तिस्थस्य नस्य नित्यं णत्वं स्यात्। आरत्तसामर्थ्यान्नित्यत्वेसिलेपुनर्णग्रहणं स्पष्टार्थम्
यणं बाधित्वा परत्वात् नुट्। पुनर्भूणां। वर्षाभूः। भेकजातौ नित्यस्त्री त्वात्सावात् वर्षाभूः के यटमते। मतांतरेतु हे वर्षाभु ।।राम।।
पुनर्नवायां हे वर्षाभु। भेक्यां पुनर्नवायां स्त्री वर्षाभ्वः। दृत्तुरपुमानिति यादवः। वर्षाभ्वम्। वर्षाभ्वौ। वर्षाभ्वः। स्वयंभूः ।।२७।।
पुंवत्। न षट्स्वस्रादिभ्यः। षट्संज्ञकेभ्यः स्वस्रादिभ्यश्च ङीपू टापौ न स्तः। स्वसा तिस्रश्चतस्रश्च ननांदा दुहिता तथा। या

श्र

नामानेति संज्ञैन स्वस्रादय उदाहृताः॥१॥ अप्तृन्निति दीर्घः। स्वसा॥ स्वसारौ। स्वसारः। माता पितृवत्। शसि। मातॄः। द्यौर्गोवत्
राः पुंवत्। नौर्ग्लौवत्॥ ॥इत्यजंताः स्त्रीलिंगाः॥ ॥अतोम्। अतोगात्क्लीबात्स्वमोरम्स्यात्। अमि पूर्वः। ज्ञानं। एङ
ह्रस्वादिति हल्मात्रलोपः। हे ज्ञान। नपुंसकाच्च। क्लीबात्परस्यौङः शी स्यात्। भसंज्ञायाम्। यस्येति च। भस्येवर्णावर्ण
योर्लोपः स्यादीकारे तद्धिते च परे। इत्यकारलोपे प्राप्ते। औङः श्यां प्रतिषेधो वाच्यः। ज्ञाने। जश्शसोः शिः। क्लीबादनयोः शि
स्यात्। शि सर्वनामस्थानं। शी इत्येतदुक्तसंज्ञं स्यात्। नपुंसकस्य झलचः। झलंतस्याजंतस्य क्लीबस्य नुमागमः स्यात्स
र्वनामस्थाने परे। उपधाया दीर्घः। ज्ञानानि। पुनस्तद्वच्छेषं रामवत्। एवं धनवनादयः। अ डुतरादिभ्यः पंचभ्यः। ए
भ्यः क्लीबेभ्यः स्वमोरद्डादेशः स्यात्। टेः। डिति परे भस्य टेर्लोपः स्यात्। वावसाने। कतरद्। कतरत्। कतरे। कतराणि॥
दे[illegible]गत्यात्प्रथमयोरिति पूर्वसवर्णदीर्घः। एङ्ह्रस्वादिति संबुद्धिलोपश्च न भवति। हे कतरद्। पुनस्तद्वच्छेषं पुंवत्॥
कतमत्। इतरत्। अन्यत्। अन्यतरत्। अन्यतमस्य त्वन्यतममित्येव। एकतरात्प्रतिषेधो वक्तव्यः। एकतरम्। सोरम
देशे सन्निपातपरिभाषया न जरस्। अजरं। अजरसी। अजरे। परत्वाज्जरसि कृते झलंतत्वान्नुम्। सांतमहतः संयो
गस्य। सांतसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घः स्यादसंबुध्या सौ सर्वनामस्थाने परे। अजरांसि। अजराणि। अ
[illegible]

ते ३

२५

मिलुकोपवादः ★ अम्। सा वै बाधित्वा परत्वाज्जरस्। ततः संनिपातपरिभाषया न लुक्। अजरसं। अजरं। अजरसी। अज
रे। अजरांसि। अजराणि। शेषं पूर्ववत्। पद्दन्निति हृदयो हृकारस्य ना। हृदुदन्नासन्। हृदि। हृदा। हृद्भ्यां। उदानि
उद्ना। उदभ्यां। आसानि। आस्ना। आसभ्यां। मांसि। मांस्ना। मान्भ्यां। वस्तुतस्तु प्रभृतिग्रहणं प्रकारार्थमित्य
सं। अतएव ताध्ये मांस्पचन्या उखाया इत्युदाहृतम्। अपस्म्य पा हृत्वि नसव्यासंयोगात् लोपो नोपदन्नित्यत्र हि छंद
स्यनुवर्त्तितेव तोत थौ अपासीत्यत्र मा सेष्ठं दसीति वार्तिके छंदो ग्रहणसामर्थ्यात् लोकेपि क्वचिदिति कैयटोक्तेर
त्या प्रयोगमनुसृत्य पद्नोदयः प्रयोक्तव्या इति बोध्यं। ह्रस्वो नपुंसके प्रातिपदिकस्य। क्लीबे प्रातिपदिकस्या
जंतस्य ह्रस्वः स्यात्। श्रीपं ज्ञानवत्। श्रीपा। अत्र सन्निपातपरिभाषया आतो धातोरित्यालोपो न। स्वमो
र्नपुंसकात्। क्लीबात्स्वमोर्लुक् स्यात्। वारि। इकोचि विभक्तौ। इगंतस्य क्लीबस्य नुमागमः स्यादचि विभ
क्तौ। वारिणी। वारीणि। न लुमतेति निषेधस्यानित्यत्वात्पक्षे संबुद्धिनिमित्तो गुणः। हे वारि। हे वारे। आङो
ना। वारिणा। घेर्ङितीति गुणे प्राप्ते। वृद्ध्यौत्त्वतृज्वद्भावगुणेभ्यो नुम्पूर्वविप्रतिषेधेन। वारिणे। वारिणः। वारिणोः।
नुमचिरेति नुट्। नामीति दीर्घः। वारीणां। वारिणि। वारिणोः। हलादौ हरिवत्। तृतीयादिषु भाषितपुंस्कं पुंवद्गा ॥२८॥

पि५
हा६

यद्यपि४

लवस्य।प्रवृत्तिनिमित्तैक्ये भाषितपुंस्कमिगंतं क्लीबे पुंवद्वा स्याट्टादावचि।अनादिना।अनादिने।इत्यादि।शेषं वारिवत्।
पीलुर्वृक्षः तत्फलं पीलु।तस्मै पीलुने।अत्र न पुंवत्।प्रवृत्तिनिमित्तभेदात्।अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः।
एषामनङ् स्याट्टादावचि स चोदात्तः।अल्लोपोऽनः।दध्ना।दध्ने।दध्नः।द[illegible]नाम्।दध्नि।दधनि।शेषं वारिवत्।एवम
स्थिसक्थ्यक्षि।तदंतस्याप्यनङ्।अतिदध्ना।सुधि।सुधिनी।सुधीनि।हे सुधे।हे सुधि।सुधिया।सुधिना।प्र
ध्या।प्रधिना।मधु।मधुनी।मधूनि।हे मधो।हे मधु।एवमंब्वादयः।सानुशब्दस्य स्नुर्वा।स्नूनि।सानूनि।सुलु
सुलुनी।सुलूनि।सुल्वा।सुलुना।प्रियक्रोष्टु।प्रियक्रोष्टुनी।तृज्वद्भावात्पूर्वविप्रतिषेधेन नुम्।प्रियक्रो
ष्टूनि।टादौ पुंवत्।पक्षे प्रियक्रोष्ट्रा।प्रियक्रोष्टुना।प्रियक्रोष्टुने।नुमचिरेति नुट्।प्रियक्रोष्टूनाम्।धा
तृ।धातृणी।धातॄणि।हे धातः।हे धातृ।धात्रा।धातृणा।एवं ज्ञातृकर्त्रादयः।एच इग्घ्रस्वादेशे।आदिश्य
मानेषु ह्रस्वेषु मध्ये एव इगेव स्यात्।प्रद्यु।प्रद्युनी।प्रद्यूनि।प्रद्युना।इह न पुंवत्।यदिगंतं प्रद्यु इति तस्य
भाषितपुंस्कत्वाभावात्।एवमग्रेऽपि।प्ररि।प्ररिणी।प्ररीणि।प्ररिणा।एकदेशविकृतस्यानन्यत्वात्प्राद्रायो

प्रियक्रोष्ट्रा।प्रियक्रोष्टवे।अत्र नुमचि तृज्वद्भावात्पूर्वविप्रतिषेधेन नुमेव।प्रियक्रोष्टुना।२

हलीत्यात्वं।ग्रामण्यां।ग्रामणिः।नुमचिरेति नुड्यात्वे ग्रामणामिति माधवः।वस्तुतस्तु सन्निपातपरिभाषया नुड्वि

२९ धेन।नामीति दीर्घस्त्वारंभसामर्थ्यात्परिभाषां बाधत इत्युक्तं।ग्रामणी।सुनु।सुनुनी।सुनूनि।सुनु।इत्यादि

॥ इत्यजंता नपुंसकलिंगाः॥ हो ढः।हस्य ढः स्यात् झलि पदांते च।हल्ङ्याब्भ्य इति सुलोपः।पदांतत्वा

द्धस्य ढः।जश्त्वचर्त्वे।लिट्।लिड्।लिहौ।लिहः।लिहम्।लिहौ।लिहः।लिहा।लिड्भ्यां।लिट्सु।दादेर्धातो लिट्लुभ४

र्घः।उपदेशे दादेर्धातोर्हस्य घः स्यात् झलि पदांते च।उपदेशे किं।अधोगित्यत्र यथा स्यात्।

दामलिहमात्मन इच्छति दामलिह्यति ततः क्विप्।दामलिट्।अत्र मा भूत्।एकाचो बशो भष् झषंत

स्य स्ध्वोः।धातोरवयवो य एकाच् झषंतस्तदवयवस्य बशः स्थाने भष् स्यात् सकारे ध्वशब्दे पदां

ते च।एकाचो धातोरिति सामानाधिकरण्येनान्वये तु विहन्न स्यात्।गर्धभमाचष्टे गर्धभयति ततः क्वि ६३

प् णिलोपः।गर्धप् झलीति निवृत्तं स्ध्वोरिति ग्रहणसामर्थ्यात्तेनेह न।दुग्धं।दोग्धा।व्यपदेशिवद्भा

वेन धात्ववयवत्वाद्भष्भावः।जश्त्वचर्त्वे।धुक्।धुग्।दुहौ।दुहः।षत्वचर्त्वे धुक्षु।वा द्रुहमुहष्णुह २१

६३

सोनुमीयमानमात्वं प्राधान्य एव न तु गौणतायां तेन प्रियाष्टौ नोह लादावेव वैकल्पिकमात्वं प्रियाष्टाः। प्रियाष्टाभ्यां ३
प्रियाष्टानिः। प्रियाष्टाभ्यः। प्रियाष्टासु। प्रियाष्ट्नो राजवत्सर्वं। हाहाव ष्टापरं हलि। कु तखुलावः जश्भ्वं। चर्त्वं भुत् भुद्
बुधौ बुधः। बुधा। भुद्भ्यां। भुत्सु। ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च। एभ्यः क्विन् स्यात्। अला
क्षणिकमपि किंचित्कार्यं निपातनाल्लभ्यते। निरुपपदाद्युजेः क्विन्। कनावितौ। कृदतिङ्। संनिहितधात्वधि
कारे तिङ्भिन्नः प्रत्ययः कृत्संज्ञः स्यात्। वेरपृक्तस्य। अपृक्तस्य वस्य लोपः स्यात्। कृत्तद्धितेति प्रातिपदिकत्वा
त्स्वादयः। युजेरसमासे। युजेः सर्वनामस्थाने नुम् स्यादसमासे। सुलोपः। संयोगान्तस्य लोपः। क्विन्प्रत्ययस्य
कुः। क्विन्प्रत्ययो यस्मात्तस्य कवर्गोन्तादेशः स्यात्पदान्ते। नस्य कुत्वेन सानुनासिको ङकारः। युङ्। नश्चापदान्तस्येति नु
मोनुस्वारः। परसवर्णः। तस्यासिद्धत्वाच्चोः कुरिति कुत्वं न। युञ्जौ। युञ्जः। युञ्जम्। युञ्जौ। युजः। असमासे किम्। चोः कुः।
चवर्गस्य २ कवर्गः स्यात् झलि पदान्ते च। इति कुत्वम्। क्विन्प्रत्ययस्येति कुत्वस्यासिद्धत्वात्। सुयुक्। सुयुग्। सुयुजौ। सुयुजः। युजेरिति धा
तुपाठपठितेकारविशिष्टस्यानुकरणम्। नत्विकानिर्देशः। तेनेह न। युज्यते समाधत्त इति युक्। युज समाधौ दैवादिक आत्म

कृ२

निपदी॥ संयोगान्तस्य लोपः। खवन्नू। खवञ्जौ। खवञ्जः। व्रश्चेति षत्वं। असत्वर्द्धौ। राट् राड्। राजौ। राजः। राट्सु। राट्त्सु॥
खंविभ्राड् देवेट् देवेड्। देवेजौ। विश्वसृट् ड्। इह्यजे सृज्योः कुत्वं नेति कीबेवस्यते। परिमृट् ड्। षत्वविधौ राजिसाहचर्यादि
डुभ्राजृ [illegible]प्ताविति फणादिरेव गृह्यते। यस्तु एजृ भ्राजृ दीप्ताविति तस्य कुत्वमेव। विभ्राट् ड्। विभ्राग्स्याम्। परौ व्र
जेः षः पदान्ते। परौ उपपदे व्रजेः क्विप् स्याद्दीर्घश्च पदान्तविषये षश्च। परित्यज्य सर्वं व्रजतीति परिव्राट् ड्। परिव्राजौ।
परिव्राजः। विश्वस्य वसुराटोः। विश्वशब्दस्य दीर्घः स्याद्वसौ राट्शब्दे च परे। विश्वं वसु यस्य विश्वावसुः। रा
डिति पदान्तोपलक्षणार्थं। सर्वमविवात्तितौ। विश्वाराट् ड्। विश्वाराड्। विश्वराजौ। विश्वराजः। विश्वराड् स्याम्। स्कोः सं
योगाद्योरन्ते च। पदान्ते झलि च परे यः संयोगः तदाद्योः सकारककारयोर्लोपः स्यात्। सस्य तु श्चुत्वेन शः तस्य जश्त्वे
न जः। लञ्जौ। लञ्जः। ऋत्विगित्यादिना ऋतावुपपदे युजेः क्विन्। क्विन्नन्तत्वात् कुत्वम्। ऋत्विक् ग्। ऋत्विजौ। ऋ
त्विजः। रात्सस्येति नियमान्न संयोगान्तस्य लोपः। रोः कुः। कुङ्। कुञ्जौ। कुञ्जः। त्यदाद्यत्वं पररूपं च। तदोः सः ॥३३॥
सावनन्त्ययोः। त्यदादीनां तकारदकारयोरनन्त्ययोः सः स्यात् सौ परे। स्यः। त्यौ। त्ये। सः। तौ। ते। परमसः। परमतौ।

ह्द्४ वैर

मत्। अग्निमथौ। अग्निमथः। अग्निमद्भ्याम्। ऋत्विगादिना सूत्रेणाञ्चेः सुप्युपपदे क्विन्। अनिदितां हल उपधायाः क्ङि-
ति। हलंतानामनिदितामंगानामुपधाया नलोपः स्यात् किति ङिति च। उगिदचामिति नुम्। संयोगान्तस्य लोपः। नुमो नकार-
स्य क्विन्प्रत्ययस्येति कुत्वेन ङकारः। प्राङ्। अनुस्वारपरसवर्णौ। प्राञ्चौ। प्राञ्चः। प्राञ्चम्। प्राञ्चौ। अचः। लुप्तनकार-
स्यांचतेर्भस्याकारस्य लोपः स्यात्। चौ। लुप्ताकारनकारेंचतौ परे पूर्वस्याणो दीर्घः स्यात्। प्राचः। प्राचा। प्राग्भ्या-
म्। प्रत्यङ्। प्रत्यञ्चौ। प्रत्यञ्चः। प्रत्यञ्चम्। प्रत्यञ्चौ। अचः इति लोपस्य विषये अंतरंगोपि यण्न प्रवर्तते। अकृतव्यूहा इ-
तिपरिभाषया। प्रतीचः। प्रतीचा। अमुमंचतीति विग्रहे अदस् अञ्च् इति स्थिते। विष्वग्देवयोश्च टेरद्र्यंचतौ वप्रत्यये।
अनयोः सर्वनाम्नश्च टेरद्र्यादेशः स्यात्। वप्रत्ययान्ते अंचतौ परे। अदद्रि अच् इति स्थिते। यण्। अदसोसेर्दादु दो मः।
अदसोसांतस्य दात् परस्य उदूतौ स्तो दस्य मश्च। उ इति ह्रस्वदीर्घयोः समाहारद्वंद्वः। आंतरतम्यात् ह्रस्वव्यंजनयोर्ह्र-
स्वो दीर्घस्य दीर्घः। अमुमुयङ्। अमुमुयञ्चौ। अमुमुयञ्चः। अमुमुयञ्चम्। अमुमुयञ्चौ। अमुमुईचः। अमुमु-
ईचा। अमुमुयग्भ्यां। मुत्वस्यासिद्धत्वान्न यण्। अंत्यबाधेंत्यसदेशस्येति परिभाषामाश्रित्य परस्यैव मुत्वं वदतां मते
अदमुयङ्। उः से सकारस्थाने यस्य सोऽसिरिति व्याख्यानात् त्यदाद्यत्वविषय एव मुत्वं नान्यत्रेति पक्षे अदद्र्यङ्। [illegible]

स्य

59

व।अदसोद्रेः पृथङ्मुत्वं केचिदिच्छंति लत्ववत्।केचिदंत्यसदेशस्य नेत्येकेऽसेर्हि दृश्यते।उदङ्।उदंचौ।उदंचः।शसादाव
चि।उद ईत्।उच्छब्दात्परस्य लुप्तनकारस्यांचतेरस्याकारस्य ईः स्यात्।उदीचः।उदीचा।उदग्भ्याम्।समः समि।वप्रत्यय
तेंचतौपरे।सम्यङ्।सम्यंचौ।समीचः।समीचा।सहस्य सध्रिः।सध्र्यङ्।तिरसस्तिर्यलोपे।अलुप्ताकारेंचतौ वप्रत्ययांते
परे तिरसस्तिर्यादेशः स्यात्।तिर्यङ्।तिर्यंचौ।तिर्यंचः।तिरश्चः।तिरश्चा।तिर्यग्भ्याम्।नांचेः पूजायां।इजाधस्यांचतेरु
पधाया नस्य लोपो न स्यात्।अलुप्तनकारत्वान्नुम्।प्राङ्।प्रांचौ।नलोपः सावाहकारलोपेन।प्रांचः।प्रांचा।प्राङ्
भ्याम्।प्राङ्क्षु।प्राङ्षु।एवं पूजार्थे प्रत्यङ्ङादयः।क्रुंच गतौ।अस्य ऋत्विगादिना नलोपाभावोपि निपात्यते।क्रुङ्।
क्रुंचौ।क्रुंचः।क्रुङ्भ्याम्।चोः कुः।पयोमुक्।पयोमुग्।पयोमुचौ।पयोमुचः।व्रश्चेति षत्वं।स्कोरिति सलोपः।जश्
त्वे।सुवृट्।सुवृड्।सुवृश्चौ।सुवृड्सु।सुवृट्सु।महत् पूजायाम्।वर्त्तमाने पृषन्महद्बृहज्जगच्छतृवच्च।एते निपा
त्यंते शतृवच्चैषां कार्यं स्यात्।उगिदचां नुम्।सांतमहत इति दीर्घः।महान्।महांतौ।महांतः।हे मह
न्।महतः।महता।महद्भ्याम्।अत्वसंतस्य चाधातोः।अत्वंतस्योपधाया दीर्घः स्याद्धातुभिन्नासंतस्य चासंबु
द्धौ सौ परे।परं नित्यं च नुममबाधित्वा वचनसामर्थ्याद्दीर्घः।ततो नुम्।धीमान्।धीमंतौ।धीमंतः।हे धीमन्।शसा

कौटिः
सावर्योः

।।३७।।

60

दाघः। इहह लुप्ता द्दिलोपे प्रत्ययलक्षणेन नासुपीति तान षधाद् वा सावस्तः। तस्यासिद्धत्वान्नातलक्षणउपधादीर्घः संबुद्धौ नुहे दीर्घाहिनिटा
घः। दीर्घाहा नौ। दीर्घाहाणः। दंडि। दंडिनी। दंडीनि। स्रग्वि। स्रग्विणी। स्रग्वीणि। वाग्मि। वाग्मिनी। वाग्मीनि। बहुवृत्रहाणि। बहुपूषाणि। ब
ह्वर्यमाणि। असृजः पदान्ते कुत्वं। सृजेः क्विनो विधानात्। विश्वसृट् दैन। स्टजि दृशो रिति सूत्रे रज्जुसृड् स्यामिति साधुप्रयोगात्तायदा
श्वादि सूत्रे सृजियज्योः पदान्ते षत्वं कुत्वापवादः। स्रगिति शब्दस्य ऋत्विग्दधृक्स्रग्निपातनादेव कुत्वं। असृक्शब्दस्य अस्यतेरौणादिके ऋजप्रत्य
ये बोध्यं। असृक्। असृग्। असृजी। पद्दन्निति वा असृ। असानि। असृजा। अस्ना। असस्यो। अस्रव्यां। इत्यादि। ऊर्क्। ऊर्गु
ऊर्जी। ऊर्ञ्जि। नरजानां संयोगः। बहूर्जि नुम्प्रतिषेधः। अंत्यात्पूर्वो वा नुम्। बहूर्जि बहूर्ञ्जि वा कुलानि। त्यत्। त्ये। त्यानि। तत्। ते। तानि। रु६
यत्। ये। यानि। एतत्। एते। एतानि। अन्वादेशे तु एनत्। बे सिद्यतेः क्विप्। बेसित्। बेसिद्भ्वेसिदी। शौ अल्लोपस्य स्थानिवद्भावाद्झलंतत्वा
न्नुम्। अजंतलक्षणस्तु नुम्न। स्वविधौ स्थानिवद्भावात्। बेसिंदि। ब्राह्मणकुलानि। वे छिदि। गवाक्। शब्दस्य रूपाणि क्लीबे
प्योगिति सेद्दतः। असंध्यवङ् एवं रूपेनबाधिकशतेमतं। १ स्वमुपुनवषड्दोषट्के स्युः स्त्रीणि जश्शसोः। स्वादिषु षट्सु के रूपा
णीति विसावया। २ तथा हि गामंचतीति विग्रहे। ऋत्विगादिना क्विन्। अंचतेर्न लोपः। अवङ् स्फोटायनस्येत्यवङ्। गवाक्। गवाग्। सर्वत्र
विभाषेति प्रकृतिभावे गोअक्। गोअग्। पूर्वरूपे गोक्। गोग्। पूजायां नस्य कुत्वेनङः। गवाङ्। गोअङ्। गोङ्। औप्रत्यये नान्येव न
वा। औङः शी स्त्वादस्य ह्यलोपः। गोची। पूजायां तु गवांची। गोअंची। गोंची। जश्शसोः शिः। शेः सर्वनामस्थानत्वान्नुम्। गवांचि।

गो अचि । गोंचि । गतिपूजनयोस्त्रीण्येव । गोचा । गवांचा । गो अंचा । गोंचा । गवाग्भ्यां । गो अग्भ्याम् । गोग्भ्यां । गवाङ्भ्यौ । गो अङ्भ्यां ॥ ॥ गोङ्भ्याम ॥
सुपि तु उं तानोपञ्चेत्युक्तेः कुगिति कुत्वं । गवाङ्क्षु । गवाङ्षु । गवाक्षु । नेरे हस्वयोर्द्वितीयाद्युतिपक्षे ककारस्य खकारेण षण्णामाधिक्य
शंक्यो वृद्धस्यासिद्धत्वात्कुत्वस्य हेतुतस्यासिद्धत्वाञ्च श्चुत्वाभावपक्षे द्वितीयादेशाच्चीणि रूपाणि वर्द्धंतस्व । तुह्येभेषा [illegible] द्विवधि
नरनुनासिकविकल्पनात्रीरूपाण्यथ्याहि सतानि ५२७ सर्वतीतिमनीषिसिः । तिर्यक् । तिरश्ची । तिर्यंचि । पूजायां तु तिर्यङ्ति
र्यंची । तिर्यञ्चि । यकृत् । यकृती । यकृंति । पद्दन्निति वा यकन् । यकानि । यक्ना । यकृता । शकृत् । शकृती । शकानि । शक्ना । शकृ
ता । ददत् । ददती । वा नपुंसकस्य । अभ्यस्तात्परो यः शता तदन्तस्य क्लीबस्य वा नुम् स्यात्सर्वनामस्थाने । ददन्ति । ददति ।
तुदत् । आच्छीनद्योर्नुम् । अवर्णान्तादङ्गात्परो यः शतुरवयवस्तदन्तस्य नुम्वा स्यात् शीनद्योः परतः । तुदन्ती । तुदती । सा
त् । सान्ती । साती । सान्ति । पचत् । शप्श्यनोर्नित्यम् । शपश्यनोरात्परो यः शतुरवयवस्तदन्तस्य नित्यं नुम् स्यात् शीनद्योः प
रतः । पचन्ती । पचन्ति । दीव्यत् । दीव्यन्ती । दीव्यन्ति । स्वप् । स्वपी । नित्यात्परादपि नुमः प्रागपन्निति दीर्घः । प्रतिपदोक्तत्वात् । स्वां
पि । निरवकाशत्वं प्रतिपदोक्तत्वमिति पक्षे तु तत्र हलो नपुंसकस्य नुमेव । स्वंपि । स्वपा । अपो भि । स्वद्भ्याम् । स्वद्भिः । धनन्ती । त्या ॥ श्रु ३ ॥ ५१ ॥
धने: २ दिनात्सः षत्वस्यासिद्धत्वात् । धनुः । धनुषी । सान्ते ति दीर्घः । नुम्विसर्जनीयेति षत्वम् । धनूंषि । धनुषा । धनुर्भ्याम् । एवं चक्षुर्हवि
रादयः । पिपठिषतेः क्विप् । र्वोरिति दीर्घः । पिपठीः । पिपठिषी । अल्लोपस्य स्थानिवत्त्वात् तज्झले न लक्षणे नुम् । स्वविधौ स्थानिवत्त्वं

नी॰ ९

घ॰ ६

राद्वृत्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णाछादनायोविकारमैथुनेछाकेशवेशेषु। एकादशभ्यः प्रातिपदिकेभ्यः क्रमाद्वृत्त्या
दिष्वर्थेषु ङीष्स्यात्। जानपदी वृत्तिश्चेत्। अन्या तु जानपदी। उत्सादित्वादञंतत्वे हि ङीपा ह्युदात्तः। कुंडी अमत्रं चेत्। कुंडान्या।
कुंडिका हि। गुरोश्च हल इत्यप्रत्ययः। यस्तु अमृते जारजः कुंड इति मनुष्यजातिवचनस्ततो जातिलक्षणो ङीष् भवत्येव। अमत्रे
हि स्त्रीविषयत्वादप्राप्तो ङीष् विधीयते न तु नियम्यते। गोणी। आवपनं चेत्। गोणान्या। स्थली। अकृत्रिमा चेत्। स्थला
न्या। भाजी। श्राणा चेत्। भाजान्या। नागी स्थूला चेत्। नागान्या। गजवाची नागशब्दः स्थौल्यगुणयोगादन्यत्र प्रयुक्त
दाहरणं। सर्पवाची तु [illegible] गुणादन्यत्र प्रयुक्तः प्रत्युदाहरणं। काली वर्णश्चेत्। कालान्या। नीली अनाच्छादनं चेत्। नीला
न्या। नील्या रक्ता शाटीत्यर्थः। नील्या अन्वक्तव्यहृत्यनु। अनाच्छादनेपि न सर्वत्र। किंतु नीलादोषधौ। नीली। प्राणिनि
च। नीली गौः। संज्ञायां वा। नीली। नीला। कुशी अयोविकारश्चेत्। कुशान्या। कामुकी मैथुनेच्छा चेत्। कामुकान्या। कबरी
केशानां सन्निवेशविशेषः। कबरान्या। चित्रेत्यर्थः। शोणात्प्राचां। शोणी। शोणा। वोतो गुणवचनात्। उदंतात् गुणवाचिनो वा
ङीष्स्यात्। मृद्वी। मृदुः। उतः किं। शुचिः। गुणेति किं। आखुः। खरुसंयोगोपधान्न। खरुः पतिंवरा कन्या। पांडुः। बह्वादिभ्यश्च। एभ्यो
वा ङीष्। बह्वी। बहुः। कृदिकारादक्तिनः। रात्रिः। रात्री। सर्वतोऽक्तिन्नर्थादित्येके। शकटी। शकटिः। अक्तिन्नर्थात्किं। भू। अजननिः।
[illegible]वादप्राप्ते विध्यर्थं पद्धतिशब्दो गणे पठ्यते। हिमकाषिहतिषु चेति पद्भावः। पुंयोगादाख्यायां। या पुमाख्या पुंयोगा
त्स्त्रियांत

रस्त्रियां वर्त्तते ततो ङीष् स्यात्।गोपस्य स्त्री गो पी।पालकांतान्न।गोपालिका।अश्वपालिका।सूर्याद्देवतायां चाब्वक्तव्यः।सूर्यस्य
स्त्री देवता सूर्या।देवतायां किं।सूरी।कुंती।मानुषीयं।इंद्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्॥
एषामानुगागमः स्यात् ङीष् च।इंद्रादीनां षणां मातुलाचार्ययोश्च पुंयोग एवेष्यते।तत्र ङीषि सिद्धे आगममात्रं विधीयते इतरेषां तु
भुमुसयैः।इंद्राणी।हिमारण्ययोर्महत्वे।महद्धिमं हिमानी।अरण्यानी।यवाद्दोषे।दुष्टो यवो यवानी।यवनाल्लिप्यां।यवनानां लिपिः
यवनानी।मातुलोपाध्याययोरानुग्वा।मातुलानी।मातुली।उपाध्यायानी।उपाध्यायी।या तु स्वयमेवाध्यापिका तत्र वा ङीष् वाच्यः।उ
पाध्यायी।उपाध्याया।आचार्यादणत्वं च।आचार्यस्य स्त्री आचार्यानी।पुंयोग इत्येव।आचार्या स्वयं व्याख्यात्री।अर्यक्षत्रिया
भ्यां वा स्वार्थे।अर्याणी।अर्या स्वामिनी वैश्या वेत्यर्थः।क्षत्रियाणी।क्षत्रिया।पुंयोगे तु अर्यी क्षत्रियी।कथं ब्रह्माणीति ब्रह्मा
यति णमानयति जीवयतीति कर्मण्यण्।क्रीतात्करणपूर्वात्।क्रीतांतादंतात्करणादेः स्त्रियां ङीष्।वस्त्रक्रीती।क्वचिन्न।धनक्रीता।क्तादल्पाख्या
यां।करणादेः क्तांतादंतात् ङीष् स्यादल्पत्वे द्योत्ये।अभ्रलिप्ती द्यौः।बहुव्रीहेश्चांतोदात्तात्।बहुव्रीहेः क्तांतादंतोदात्तादंतात् स्त्रि
यां ङीष् स्यात्।जातिपूर्वादिति वक्तव्यम्।तेन बहुनञ्सुकालसुखादिपूर्वान्न।ऊरुभिन्नी।नेह।बहुकृता।जातांतान्न।दंतजाता॥ ॥४६॥
पाणिगृहीती भार्यायां।पाणिगृहीतान्या।अस्वांगपूर्वपदाद्वा।पूर्वेण नित्ये प्राप्ते विकल्पोऽयं।सुरापीती।सुरापीता।अंतोदात्तादि।
वस्त्रछन्नी।अनाछादनादित्युदात्तनिषेधः।अतस्त्र पूर्वेणापि न ङीष्।स्वांगाच्चोपसर्जनादसंयोगोपधात्।असंयोगोपधमुपसर्जं

64

नं यत्स्वांगं तदन्तादन्तात्प्रातिपदिकाद्वा ङीष् । केशानतिक्रांता तिकेशी । चंद्रमुखी । चंद्रमुखा । संयोगोपधात्तु सुगुल्फा । उपसर्जनात्किं । अ
शिखा । शोभना शिखा सुशिखा । स्वांगं त्रिधा । अद्रवं मूर्त्तिमत्स्वांगं प्राणिस्थ मविकारजं । सुस्वेदा द्रवत्वात् । सुज्ञाना । अमूर्त्तत्वात् । सुमुखा
शाळा । अप्राणिस्थत्वात् । सुशोफा । विकारजत्वात् । अतत्स्थं तत्र दृष्टं च । सुकेशी सुकेशा वा रथ्या । अप्राणिस्थस्यापि प्राणिनि दृष्टत्वात्
तेन चेत्तत्तथा युतं । सुस्तनी सुस्तना वा प्रतिमा । प्राणिवदप्राणिसदृशे स्थितत्वात् । नासिकोदरोष्ठजंघादन्तकर्णशृंगाच्च । एभ्यो वा ङीष् । क्रो
डयोर्बह्वज्लक्षणो निषेधो बाध्यते । पुरस्तादपवादन्यायात् । ओष्ठादीनां पंचानां तु संयोगोपधो ध्यते मध्येपवादन्यायात् । सहनञ् दिति बा
लक्षणस्तु प्रतिषेधः परत्वादस्य बाधकः । तुंगनासिकी । तुंगनासिका । इत्यादि । नेह । सहनासिका । अनासिका । अत्र वृत्तिः । अंगगात्रकंठे
भ्यो वक्तव्यम् । स्वंगी । स्वंगेत्यादि । तत्रानुक्तसमुच्चयार्थेन चकारेण संग्राह्यमिति केचित् । भाष्याद्यनुक्तत्वादप्रमाणमिदमिति प्रामा
णिकाः । अनुवार्त्तिकानि । पुच्छाच्च । सुपुच्छी । सुपुच्छा । कबरमणिविषशरेभ्यो नित्यं । कबरं चित्रं पुच्छं यस्याः सा कबरपुच्छीत्यादि । उप
ते ४ श्र मानात्पक्षाच्च पुच्छाच्च । नित्यमित्येव । उलूकपक्षी शाळा । उलूकपुच्छी सेना । न क्रोडादिबह्वचः । क्रोडादेर्बह्वचश्च स्वांगान्न ङीष् । कल्याण
क्रोडा । अश्वानामुरः क्रोडा । आकृतिगणोऽयं । सुजघना । सहनञ्विद्यमानपूर्वाच्च । सहेत्यादित्रिकपूर्वान्न ङीष् । सकेशा । अकेशा
विद्यमाननासिका । नखमुखात्संज्ञायाम् । न ङीष् स्यात् । शूर्पणखा । गौरमुखा । संज्ञायां किं । ताम्रमुखी कन्या । दिक्पूर्वपदान्ङीप् । दिक्पू
र्वपदात्स्वांगात्प्रातिपदिकात्स्वरस्य ङीषोङीबादेशः स्यात् । प्राङ्मुखी । आद्युदात्तं पदं । वाहः । वाहंतात्प्रातिपदिकान्ङीष् स्यात् । ङीषेवा

65

६२

नुवर्त्तते न ङीष्। दित्यवाड्भ्मे दित्यौही च मे। सखाशिश्वीति भाषायां। इति शास्त्रं प्रकारे भाषायामित्यस्यानंतरं द्रष्टव्यः। तेन छंदस्यपि क्वचित्। सखी। अशिश्वी।
आ धेनवो धुनयंतामशिश्वीः। जातेरस्त्रीविषयादयोपधात्। जातिवाचि यन्न च स्त्रियां नियतमयोपधं ततः स्त्रियां ङीष् स्यात्। आकृतिग्रहणा जातिः
अनुगतसंस्थानव्यंग्येत्यर्थः। तटी। लिंगानां च न सर्वभाक्। सकृदाख्यातनिर्ग्राह्या। असर्वलिंगत्वे सत्येकस्यां व्यक्तौ कथनाद्व्यक्त्यंतरे कथ
नं विनापि सुग्रहा जातिरिति लक्षणांतरं। वृषळी। सत्यंतं किं। शुक्ला। सकृदित्यादि किं। देवदत्ता। गोत्रं च चरणैः सह। अपत्यप्रत्ययांतः शाखा
ध्येतृवाची च शब्दो जातिकार्यं लभत इत्यर्थः। औपगवी। कठी। बह्वृची। ब्राह्मणी। यत्र तु शार्ङ्गरवादिपाठान्ङीनो ङी ध्यते। जातेः किं। मुं
ण्डा। अस्त्रीविषयात् किं। बलाका। अयोपधात् किं। क्षत्रिया। योपधप्रतिषेधे गवयहयमुकयमनुष्यमत्स्यानामप्रतिषेधः। गवयी। हयी।
मुकयी। हलस्तद्धितस्येति यलोपः। मनुषी। मत्स्यस्य ङ्यां। मत्सी। पाककर्णपर्णपुष्पफळमूळवाळोत्तरपदाच्च। पाकाद्युत्तरपदाज्जाति
वाचिनः स्त्रीविषयादपि ङीष् स्यात्। ओदनपाकी। शंकुकर्णी। शाळपर्णी। शंखपुष्पी। दासीफळी। दर्भमूळी। गोवाळी। ओषधिविशे
षरूढा एते। इतो मनुष्यजातेः। ङीष् स्यात्। दाक्षी। योपधादपि। उदमेयस्यापत्यं औदमेयी। मनुष्येति किं। तित्तिरिः। ऊङुतः। उकारांतादयो
पधान्मनुष्यजातिवाचिनः स्त्रियामूङ् स्यात्। कुरूः। कुरुनादिभ्यो ण्यः। तस्य स्त्रियामवंत्यादिभ्यो लुक्। अयोपधात् किं। अध्वर्यु
र्ब्राह्मणी। अप्राणिजातेश्चारज्ज्वादीनामुपसंख्यानं। रज्ज्वादिपर्युदासादुवर्णान्तेभ्य एव। अलाबूः। कर्कंधूः। अनयोर्दीर्घांतत्वे
पि नोङ्धात्वोरिति विभक्त्युदात्तत्वप्रतिषेधश्चोङः फलं। प्राणिजातेस्तु। कृकवाकुः। रज्ज्वादेस्तु। रज्जुः। हनुः। पंगोश्च। पंगूः। श्वशुरस्यो

खा५

॥५७॥

66

संज्ञायां। कद्रुकमंडल्वोः [illegible]यो संज्ञायांस्त्रियाम्॥ कद्रूः। कमंडलूः। संज्ञायां किं। कद्रुः। कमंडलुः। अच्छंदोर्थं वचनं

काराकारलोपश्च॥ वाह्यूङ्॥ पुंयोगलक्षणस्य ङीषोपवादः। लिंगविशिष्टपरिभाषया स्वादयः। श्वश्रूः॥ ऊरूत्तरपदादौपम्ये॥ उपमानवाचि पूर्व
पदमूरूत्तरपदं यत्प्रातिपदिकं तस्मादूङ् स्यात्। करभोरूः। संहितशफलक्षणवामादेश्च। अनौपम्यार्थं वचनं। संहितोरूः। सैव शफोरूः
शफौ खुरौ ताविव संश्लिष्टत्वादुपचारादूरू। लक्षणशब्दादर्शआद्यच्। लक्षणोरूः। वामोरूः। सहितसहाभ्यां चेति वक्तव्यं। हितेन सह स
हितौ ऊरू यस्यास्सा सहितोरूः। सहेते इति सहौ ऊरू यस्याः सा सहोरूः। यद्वा विद्यमानवचनस्य सहशब्दस्य ऊर्वतिशय इति प्रतिपादना
य प्रयोगः॥ शार्ङ्गरवाद्यञो ङीन्॥ शार्ङ्गरवादेरञो ऽकारस्तदंताच्च जातिवाचिनो ङीन् स्यात्। शार्ङ्गरवी। बैदी। जातेरित्यनुवृत्तेः पुंयोगे
ङीषेव। नृनरयोर्वृद्धिश्चेति गणसूत्रं। नारी॥ यङश्चाप्॥ यङंतात्स्त्रियां चाप् स्यात्। ष्यङ ष्यङोः सामान्यग्रहणं। आंबष्ठ्या। कारीषग
ध्या॥ षाद्यञः॥ चाप्स्यात्। पौतिमाष्या॥ आवट्याच्च॥ अस्माच्चाप्स्यात्। यञश्चेति ङीपोपवादः। अवटशब्दो गर्गादिः। आवट्या॥ तद्धिताः॥ आप
चम समाप्तेरधिकारोयं॥ यूनस्तिः॥ युवन्शब्दात्तिः स्यात्स च तद्धितः। लिंगविशिष्टपरिभाषया सिद्धे तद्धिताधिकारस्तत्रार्थः॥ युव
तिः॥ अनुपसर्जनादित्येव। बहवो युवानो यस्यां बहुयुवा। युवतीति तु योतेश्शत्रंता ङीपि बोध्यम्॥ ॥इति स्त्रीप्रत्ययाः॥ ॥७॥ ॥

॥ ॥ ह्रू॥ ह्रू॥ ह्रू॥ ह्रू॥र ॥ ॥ ह्रू॥ ह्रू॥ ह्रू॥ ह्रू॥ ह्रू॥ ह्रू॥ ह्रू॥ ह्रू॥ ह्रू॥ ह्रू॥ ह्रू॥ ह्रू॥ ह्रू॥ ह्रू॥ ह्रू॥ ह्रू॥ ह्रू॥ ह्रू॥ ह्रू॥२५

सद्धांतकौ०
॥राम॥
॥४८॥

कारके इत्यधिकृत्य ५

५ कर्तुः किं ॥ माषेष्वश्वं बध्ना
५ति । कर्मण ईप्सिता माषा न

॥श्रीः॥ प्रातिपदिकार्थलिंगपरिमाणवचनमात्रे प्रथमा। नियतोपस्थितिकः प्रातिपदिकार्थः। मात्रशब्दस्य प्रत्येकं योगः। प्रातिपदिकार्थमात्रे लिंगमा
त्राद्याधिक्ये संख्यामात्रे च प्रथमा स्यात्। उच्चैः। नीचैः। कृष्णः। श्रीः। ज्ञानं। अलिंगा नियतलिंगाश्च प्रातिपदिकार्थमात्र इत्यस्योदाहरणं। अनियतलिं
गास्तु लिंगमात्राधिक्यस्य। तटः। तटी। तटं। परिमाणमात्रे। द्रोणो व्रीहिः। द्रोणरूपं यत्परिमाणं तत्परिच्छिन्नो व्रीहिरित्यर्थः। प्रत्ययार्थे परिमाणे प्रकृत्यर्थो
ऽभेदेन संसर्गेण विशेषणं। प्रत्ययार्थस्तु परिच्छेद्यपरिच्छेदकभावेन व्रीहौ विशेषणमिति विवेकः। वचनं संख्या। एकः। द्वौ। बहवः। इहोक्तार्थत्वाद्विभ
क्तेरप्राप्तौ वचनं। संबोधने च। इह प्रथमा स्यात्। हे राम। कर्तुरीप्सिततमं कर्म। कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात्। अनभिहित इत्यधि
कृत्य। कर्मणि द्वितीया। अनुक्ते कर्मणि द्वितीया स्यात्। हरिं भजति। अभिहिते तु कर्मणि प्रातिपदिकार्थमात्र इति प्रथमैव। अभिधानं प्रायेण तिङ्
कृत्तद्धितसमासैः। तिङ्। हरिः सेव्यते। कृत्। लक्ष्म्या सेवितः। तद्धितः। शतेन क्रीतः शत्यः। समासः। प्राप्त आनंदो यं प्राप्तानंदः। क्वचिन्निपातेना
भिधानं यथा। विषवृक्षोपि संवर्ध्य स्वयं छेत्तुमसांप्रतं। सांप्रतमित्यस्य हि युज्यत इत्यर्थः। तथा युक्तं चानीप्सितं। ईप्सिततमवत्क्रियया युक्तमनी
प्सितमपि कारकं कर्मसंज्ञं स्यात्। ग्रामं गच्छंस्तृणं स्पृशति। विषं भुंक्ते। अकथितं च। अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्।
दुह्याच्पच्दंड्रुधिप्रच्छिचिब्रूशासुजिमंथ्मुषां। कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहां। दुहादीनां द्वादशानां तथा नीप्रभृतीनां चतुर्णां
कर्मणा यद्युज्यते तदेवाकथितं कर्मेति परिगणनं कर्तव्यमित्यर्थः। गां दोग्धि पयः। बलिं याचते वसुधां। अविनीतं विनयं याचते। तंडुलानोदनं
पचति। गर्गान् शतं दंडयति। व्रजमवरुणद्धि गां। माणवकं पंथानं पृच्छति। वृक्षमवचिनोति फलानि। माणवकं धर्मं ब्रूते। शास्ति वा। शतं जयति
रा०

तुः। तमप्
ग्रहणं किं।
पयसौ
दनं भुंक्ते
र्मेत्यनु
कर्मग्रहण
माधारनि
वृत्त्यर्थम्।
अन्यथा
गेहं प्रवि
॥४८॥ रा
[illegible]

अभि धत्ते वक्तीत्या
दि। कारके किं। मा
णवकस्य पितृ
पृच्छा नम्रः
नि२

२ गत्यादि किं। पाचयत्योदनं देवदत्तेन। अण्यंतानां किं। गमयति देवदत्तो यज्ञदत्तं तमपरः प्रयुंक्ते
नि१ गमयति देवदत्तेन यज्ञदत्तं विष्णुमित्रः। ४५

देवदत्ते। सुधां क्षीराब्धिं मथ्नाति। देवदत्तं शतं मुष्णाति। ग्राममजां नयति। हरति। कर्षति वहति वा। अर्थनिबंधनेयं संज्ञा। बलिं भिक्षते वसुधां॥
माणवकं धर्मं भाषते अभिधत्ते वक्तीत्यादि। अकर्मकधातुभिर्योगे देशः कालो भावो गंतव्योध्वा च कर्मसंज्ञ इति वाच्यम्। कुरून्स्वपिति। मासमा
स्ते। गोदोहमास्ते। क्रोशमास्ते। गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्त्ता स णौ। गत्याद्यर्थानां शब्दकर्मकाणामकर्मकाणां
चाणौ यः कर्त्ता स णौ कर्म स्यात्। शत्रूनगमयत्स्वर्गं वेदार्थं स्वानवेदयत्। आशयच्चामृतं देवान्वेदमध्यापयद्विधिं। आसयत्सलिले पृथ्वीं यः
स मे श्रीहरिर्गतिः। नीवह्योर्न। नाययति वाहयति वा भारं भृत्येन। नियंतृकर्तृकस्य वहेरनिषेधः। वाहयति रथं वाहान्सूतः। आदिखाद्योर्न। आ
दयति खादयति वान्नं बटुना। भक्षेरहिंसार्थस्य न। भक्षयत्यन्नं बटुना। अहिंसार्थस्य किं। भक्षयति बलीवर्दान्सस्यं। जल्पतिप्रभृतीनामु
पसंख्यानं। जल्पयति भाषयति पुत्रं देवदत्तः। दृशेश्च। दर्शयति हरिं भक्तान्। सूत्रे ज्ञानसामान्यार्थानामेव ग्रहणं न तु तद्विशेषार्थानामित्य
नेन ज्ञाप्यते। तेन स्मरति जिघ्रतीत्यादीनां न। स्मारयति घ्रापयति देवदत्तेन। शब्दायतेर्न। शब्दाययति देवदत्तेन। धात्वर्थसंगृहीतकर्मत्वेनाकर्म
कत्वात्प्राप्तिः। येषां देशकालादिभिन्नं कर्म न संभवति तेत्राकर्मकाः। न त्वविवक्षितकर्माणोपि। तेन मासमासयति देवदत्तमित्यादौ कर्मत्वं भवति।
देवदत्तेन पाचयतीत्यादौ न। हृक्रोरन्यतरस्याम्। हृक्रोरणौ कर्त्ता णौ वा कर्म स्यात्। हारयति कारयति वा भृत्यं भृत्येन वा कटं। अभिवादिदृशोरात्म
नेपदे वेति वाच्यम्। अभिवादयते दर्शयते देवं भक्तं भक्तेन वा। अधिशीङ्स्थासां कर्म। अधिपूर्वाणामेषामाधारः कर्म स्यात्। अधिशेते। अधि

क

।।राम।।
।।४९।।

तिष्ठति। अध्यास्ते वा वैकुंठं हरिः। अभिनिविशश्च। अभिनीत्येतत्संघातपूर्वस्य विशतेराधारः कर्म स्यात्। अभिनिविशते सन्मार्गं। परि
क्रयणे संप्रदानमिति सूत्रात् मंडूकप्लुत्यान्यतरस्यामित्यनुवर्त्य व्यवस्थितविभाषाश्रयणात् क्वचिन्न। पापेऽभिनिवेशः। उपान्वध्या
ङ्वसः। उपादिपूर्वस्य वसतेराधारः कर्म स्यात्। उपवसति। अनुवसति। अधिवसति। आवसति वा वैकुंठं हरिः। अभुक्त्यर्थस्य न।
वने उपवसति। उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु। द्वितीयाम्रेडितांतेषु ततोऽन्यत्रापि दृश्यते। उभयतः कृष्णं गोपाः।
सर्वतः कृष्णं। धिक् कृष्णाभक्तं। उपर्युपरि लोकं हरिः। अध्यधि लोकं। अधोधो लोकं। अभितःपरितःसमयानिकषाहाप्र
तियोगेपि। अभितः कृष्णं। परितः कृष्णं। ग्रामं समया। निकषा। हा कृष्णाभक्तं। तस्य शोच्यत इत्यर्थः। बुभुक्षितं न प्रतिभाति किं
चित्। अंतरांतरेण युक्ते। आभ्यां योगे द्वितीया स्यात्। अंतरा त्वां मां हरिः। अंतरेण हरिं न सुखं। कर्मप्रवचनीयाः। इत्य
धिकृत्य। अनुर्लक्षणे। लक्षणे द्योत्येऽनुरुक्तसंज्ञः स्यात्। गत्युपसर्गसंज्ञापवादः। कर्मप्रवचनीययुक्ते द्वितीया। एतेन यो
गे द्वितीया स्यात्। जपमनु प्रावर्षत्। हेतुभूतजपोपलक्षितं वर्षणमित्यर्थः। परापि हेतौ तृतीया बाध्यते। लक्षणेत्थंभूते
त्यादिना सिद्धे पुनः संज्ञाविधानसामर्थ्यात् तृतीयार्थे। अस्मिन् द्योत्येऽनुरुक्तसंज्ञः स्यात्। नदीमन्ववसिता सेना।

।।राम।।
।।४९।।

अधिपरी अनर्थकौ। उक्तसंज्ञौ स्तः। कुतोध्यागच्छति कुतः पर्यागच्छति। गतिसंज्ञाबाधात् गतिर्गतौ। इति निघातो न।
सुः पूजायां। सु सिक्तं। सु स्तुतं। पूजायां किं। सु षिक्तं किं तवात्र। क्षेपोयं। ४६

त्यपं

नद्यासहसंबद्धेत्यर्थः। षिञ् बंधने। क्तः। हीने। हीने द्योत्येनुः प्राग्वत्। अनु हरिं सुराः। हरेर्हीना इत्यर्थः। उपोधिके च। अधि
के हीने च द्योत्ये उपेत् प्राक्संज्ञः स्यात्। अधिके सप्तमी वक्ष्यते। हीने। उप हरिं सुराः। लक्षणेत्थंभूताख्यानभागवीप्सासु
प्रतिपर्यनवः। एष्वर्थेषु विषयभूतेषु प्रत्यादय उक्तसंज्ञाः स्युः। लक्षणे। वृक्षं प्रति। परि। अनु वा विद्योतते विद्युत्। इत्थंभू
ताख्याने। भक्तो विष्णुं प्रति परि अनु वा। भागे। लक्ष्मीर्हरिं प्रति पर्यनु वा। हरेर्भाग इत्यर्थः। वीप्सायां। वृक्षं वृक्षं प्रति परि अ
नु वा सिंचति। अत्रोपसर्गत्वाभावान्न षत्वं। एषु किं। परिषिंचति। अभिरभागे। भागवर्जे लक्षणादावभिरुक्तसंज्ञः स्यात्।
हरिमभिवर्त्तते। भक्तो हरिमभि। देवं देवमभिसिंचति। अभागे किं। यदत्र ममाभिष्यात्तद्दीयतां। अतिरतिक्रमणे च।
अतिक्रमणे पूजायां चातिः कर्मप्रवचनीयः स्यात्। अति देवान्कृष्णः। कालाध्वनोरत्यंतसंयोगे। इह द्वितीया स्यात्॥
मासं कल्याणी। मासमधीते। मासं गुडधानाः। क्रोशं कुटिला नदी। क्रोशं गिरिः। अत्यंतसंयोगे किं। मासस्य द्विरधी
ते। क्रोशस्यैकदेशे पर्वतः॥ ॥स्वतंत्रः कर्त्ता। क्रियायां स्वातंत्र्येण विवक्षितोर्थः कर्त्ता स्यात्। साधकतमं करणं। क्रि

क्रोशमधीते २

यासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात्॥ कर्तृकरणयोस्तृतीया॥ अनभिहिते कर्त्तरि करणे च तृतीया स्यात्॥ रामेण बाणेन हतो
वाळी॥ प्रकृत्यादिभ्य उपसंख्यानं॥ प्रकृत्या चारुः॥ प्रायेण याज्ञिकः॥ गोत्रेण गार्ग्यः॥ समेनैति विषमेणैति॥ द्विद्रोणेन धान्यं क्रीणाति॥
सुखेन दुःखेन यातीत्यादि॥ दिवः कर्म च॥ दिवः साधकतमं कर्मसंज्ञं स्यात् करणसंज्ञं॥ अक्षैरक्षान्वा दीव्यति॥ अपवर्गे तृतीया॥
अपवर्गः फलप्राप्तिस्तस्यां द्योत्यायां कालाध्वनोरत्यंतसंयोगे तृतीया स्यात्॥ अह्ना क्रोशेन वानुवाको धीतः॥ फलप्राप्तिः किं॥ मा
समधीतो नायातः॥ सहयुक्तेऽप्रधाने॥ सहार्थेन युक्तेऽप्रधाने तृतीया स्यात्॥ पुत्रेण सहागतः पिता॥ एवं साकंसार्द्धसमंयोगेपि॥
विनापि तद्योगं तृतीया॥ वृद्धो यूनेति निर्देशात्॥ येनांगविकारः॥ अंगिनो येनांगेन विकृतेन विकारो लक्ष्यते ततस्तृतीया स्या
त्॥ अक्ष्णा काणः॥ अक्षिसंबंधि काणत्वविशिष्ट इत्यर्थः॥ इत्थंभूतलक्षणे॥ किंचित्प्रकारं प्राप्तस्य लक्षणे तृतीया स्यात्॥
जटाभिस्तापसः॥ जटाज्ञाप्यतापसत्वविशिष्टः॥ संज्ञोऽन्यतरस्यां कर्मणि॥ संपूर्वस्य जानातेः कर्मणि तृतीया वा स्यात्॥ पित्रापि ॥५०॥

तरंवासंजानीते।हेतौ।हेत्वर्थेतृतीयास्यात्।द्रव्यादिसाधारणंनिर्व्यापारसाधारणंचहेतुत्वंकरणत्वंतुक्रियामात्रविषयंव्यापारनि
यतंच।दंडेनघटः।पुण्येनदृष्टोहरिः।फलमपीहहेतुः।अध्ययनेनवसति।गम्यमानापिक्रियाविभक्तौप्रयोजिका।अलंश्रमे
ण।श्रमेणसाध्यंनास्तीत्यर्थः।इहसाधनक्रियांप्रतिश्रमःकरणं।शतेनवत्सान्पाययतिपयः।शतेनपरिछिद्येत्यर्थः।अशिष्ट
व्यवहारेदाणःप्रयोगेचतुर्थ्यर्थेतृतीया।दास्यासंयछतेकामुकः।धर्मेतुभार्यायैसंयछति।कर्मणायमभिप्रैतिससंप्रदानं।दा
नस्यकर्मणायमभिप्रैतिससंप्रदानसंज्ञःस्यात्।चतुर्थीसंप्रदाने।विप्रायगांददाति।अनभिहितइत्येव।दानीयोविप्रः।क्रि
ययायमभिप्रैतिसोपिसंप्रदानं।पत्येशेते।रुच्यर्थानांप्रीयमानः।रुच्यर्थानांधातूनांप्रयोगेप्रीयमानोर्थःसंप्रदानंस्या
त्।हरयेरोचतेभक्तिः।श्लाघह्नुङ्स्थाशपांज्ञीप्स्यमानः।एषांप्रयोगेबोधयितुमिष्टःसंप्रदानंस्यात्।गोपीस्मरात्कृष्णा
यश्लाघते।ह्नुते।तिष्ठते।शपतेवा।धारेरुत्तमर्णः।धारयतेःप्रयोगेउत्तमर्णउक्तसंज्ञःस्यात्।भक्तायधारयतिमोक्षंहरिः।
स्पृहेरीप्सितः।स्पृहयतेःप्रयोगेइष्टःसंप्रदानसंज्ञःस्यात्।पुष्पेभ्यःस्पृहयति।ईप्सितमात्रेइयंसंज्ञा।प्रकर्षविवक्षायांतु

परंवा कर्मसंज्ञा।पुष्पाणिस्पृहयति।क्रुधद्रुहेर्ष्यासूयार्थानांयंप्रतिकोपः।क्रुधाद्यर्थानांप्रयोगेयंप्रतिकोपः सउक्तसंज्ञः स्यात्।
हरयेक्रुध्यति।द्रुह्यति।ईर्ष्यति।असूयतिवा।यंप्रतिकोपः किम्।भार्यामीर्ष्यति।मैनामन्योद्राक्षीदिति।क्रुधद्रुहोरुपसृष्टयोः
कर्म।सोपसर्गयोरनयोर्यंप्रतिकोपस्तत्कारकंकर्मसंज्ञंस्यात्।क्रूरमभिक्रुध्यति।अभिद्रुह्यति।रा धीक्ष्योर्यस्यविप्रश्नः।
एतयोः कारकंसंप्रदानंस्यात्।यदीयोविविधः प्रश्नः क्रियते कृष्णायराध्यतिईक्षतेवा।पृष्टोगर्गःशुभाशुभंपर्यालोचय
तीत्यर्थः।प्रत्याङ्भ्यांश्रुवः पूर्वस्यकर्त्ता।आभ्यांपरस्यशृणोतेर्योगेपूर्वस्यप्रवर्त्तनरूपव्यापारस्यकर्त्तासंप्रदानंस्यात्।
विप्रायगांप्रतिशृणोति।आशृणोतिवा।विप्रेणमह्यंदेहीतिप्रवर्त्तितः प्रतिजानीतिइत्यर्थः।अनुप्रतिगृणश्च।आ
गू२ भ्यांगृणातेःकारकंपूर्वव्यापारस्यमुक्तसंज्ञंस्यात्।होत्रेअनुगृणाति।प्रतिगृणाति।होताप्रथमंशंसतितमध्वर्युः ॥५१॥
प्रोत्साहयतीत्यर्थः।परिक्रयणेसंप्रदानमन्यतरस्याम्।नियतकालंभृत्यास्वीकरणंपरिक्रयणंतस्मिन्साधकतमंका

कर्तृसूत्र

75

रकं संप्रदानसंज्ञं वा स्यात्। शतेन शताय वा परिक्रीतः। तादर्थ्ये चतुर्थी वाच्या। मुक्तये हरिं भजति। क्लृपि संपद्यमाने च। भक्तिर्ज्ञानाय कल्पते। संपद्यते जायत इत्यादि। उत्पातेन ज्ञापिते च। वाताय कपिला विद्युत्। हितयोगे च। ब्राह्मणाय हितं। क्रियार्थोपपदस्य च कर्मणि स्थानिनः। क्रियार्था क्रिया उपपदं यस्य तस्य स्थानिनोऽप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थी स्यात्। फलेभ्यो याति। फलान्याहर्तुमित्यर्थः। नमस्कुर्मो नृसिंहाय। नृसिंहमनुकूलयितुमित्यर्थः। एवं स्वयंभुवे नमस्कृत्येत्यादावपि। तुमर्थाच्च भाववचनात्। भाववचनाश्चेति सूत्रेण यो विहितस्तदन्ताच्चतुर्थी स्यात्। यागाय याति। यष्टुं यातीत्यर्थः। नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च। एभिर्योगे चतुर्थी स्यात्। हरये नमः। उपपदविभक्तेः कारकविभक्तिर्बलीयसी। नमस्करोति देवान्। प्रजाभ्यः स्वस्ति। अग्नये स्वाहा। पितृभ्यः स्वधा। अलमिति पर्याप्त्यर्थग्रहणं। तेन दैत्येभ्यो हरिरलं प्रभुः समर्थः शक्त इत्यादि॥ प्रभ्वादियोगे षष्ठ्यपि साधुः। तस्मै प्रभवति स एषां ग्रामणीरिति निर्देशात्। तेन प्रभुर्बुभूषुर्भुवनत्रयस्य इति सिद्धं। वषडिन्द्राय। चकारः पुनर्विधानार्थः। तेनाशीर्विवक्षायां परामपि चतुर्थीं चाशिषीति षष्ठीं बाधित्वा चतुर्थ्येव भवति। स्वस्ति

गोस्यो स्त्याद्॥ मन्यकर्मण्यनादरे विभाषाऽप्राणिषु॥ प्राणिवर्जे मन्यतेः कर्मणि चतुर्थी वा स्यात्तिरस्कारे। न त्वां तृणं मन्ये तृणाय वा॥ श्यना निर्देशा
त्तानादियोगे नान त्वां तृणं मन्ये। अप्राणिष्वित्यपनीय नौकाकान्नशुकशृगालवर्जेष्विति वक्तव्यं। तेनान त्वां नावं अन्नं मन्ये इत्यत्र
प्राणित्वेपि चतुर्थी न। न त्वां शुने मन्ये इत्यत्र प्राणित्वेपि सवत्येव। गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि। अध्वभिन्ने ग
त्यर्थानां कर्मणि एते स्तः चेष्टायां। ग्रामं ग्रामाय वा गच्छति। चेष्टायां किं मनसा हरिं व्रजति। अनध्वनीति किं पंथानं गच्छति। गंत्रा
ऽधिष्ठिते ध्वन्येवायं निषेधः। यदा तूत्पथात्पथ एवाक्रमितुमिष्यते तदा चतुर्थी भवत्येव उत्पथेन पथे गच्छति॥ ॥ध्रुवमपाये
पादानं। अपायो विश्लेषस्तस्मिन्साध्ये ध्रुवमवधिभूतमपादानं स्यात्। अपादाने पंचमी। ग्रामादायाति। धावतोश्वात्पतति।
जुगुप्साविरामप्रमादार्थानामुपसंख्यानं। पापाज्जुगुप्सते। विरमति। धर्मात्प्रमाद्यति। भीत्रार्थानां भयहेतुः। भयार्थानां त्राणा
र्थानां च योगे भयहेतुरपादानं स्यात्। चोराद्विभेति। चोरात्त्रायते। पराजेरसोढः। पराजेः प्रयोगेऽसह्योर्थोऽपादानं स्यात्। अध्य ॥५२॥

यनात्पराजेर्यते ग्लायतीत्यर्थः।असोढः किं।शत्रून्पराजयते अतिल वतीत्यर्थः।वारणार्थानामीप्सितः।वारणार्थानां प्रयोगे इप्सितोर्थ उपा
दानं स्यात्।यवेभ्यो गां वारयति।अंतर्धौ येनादर्शनमिच्छति।व्यवधाने सति यत्कर्तृकस्यात्मनो दर्शनस्याभावमिच्छति तदपादानं स्यात्।मा
तुर्निलीयते कृष्णः।आख्यातोपयोगे।नियमपूर्वकविद्यास्वीकारे वक्ता प्राक्संज्ञः स्यात्।उपाध्यायादधीते।जनिकर्तुः प्रकृतिः।जायमान
स्य हेतुरपादानं स्यात्।ब्रह्मणः प्रजाः प्रजायंते।भुवः प्रभवः।भूकर्तुः प्रभवस्तथा।हिमवतो गंगा प्रभवति।तत्र प्रकाशत इत्यर्थः।ल्यब्लोपे
कर्मण्यधिकरणे च।प्रासादात्प्रेक्षते।आसनात्प्रेक्षते।प्रासादमारुह्य आसने उपविश्य प्रेक्षत इत्यर्थः।श्वशुराज्जिह्रेति।श्वशुरं
वीक्ष्येत्यर्थः।गम्यमानापि क्रिया कारकविभक्तीनां निमित्तं।कस्मात्त्वं।नद्याः।यतश्चाध्वकालनिर्माणं तत्र पंचमी तद्युक्तादध्वनः प्र
थमासप्तम्यौ।कालात्सप्तमी च वक्तव्या।वनाद्ग्रामो योजनं योजने वा।कार्तिक्या आग्रहायणी मासे।अन्यारादितरर्ते दिक्
शब्दांचूत्तरपदाजाहियुक्ते।एतैर्योगे पंचमी।अन्य इत्यर्थग्रहणं।इतरग्रहणं प्रपंचार्थं।अन्यो भिन्न इतरो वा कृष्णात्।आराद्व
नात्।ऋते कृष्णात्।पूर्वो ग्रामात्।दिशि दृष्टः शब्दो दिक्शब्दस्तेन संप्रति देशकालवृत्तिना योगेपि भवति।चैत्रात्पूर्वः फाल्गु
नः।अवयववाचियोगे तु न।तस्य परमाम्रेडितमिति निर्देशात्।पूर्वं कायस्य।अंचूत्तरपदस्य दिक्शब्दत्वेपि षष्ठ्यतसर्थेति षष्ठी

श्री२

वाधित्वे पृथग्ग्रहणे। प्राक्प्रत्यग्वा ग्रामात्। आच्। दक्षिणा ग्रामात्। आहि। दक्षिणाहि ग्रामात्। अपादाने पंचमी। तिसूत्रे कार्त्तिक्याः प्र
ति २ भृतीति भाष्यप्रयोगात् तद्युक्तियोगे पंचमी। भवात्प्रभृति आरभ्य वा सेव्यो हरिः। अपपरि बहिरिति समासविधानात् ज्ञापकात्
बहिर्योगे पंचमी। ग्रामाद्बहिः। अपपरी वर्जने। एतौ वर्जने कर्मप्रवचनीयौ स्तः। आङ् मर्यादावचने। आङ् मर्यादायामुक्त
संज्ञः। वचनग्रहणादभिविधावपि। पंचम्यपाङ्परिभिः। एतैः कर्मप्रवचनीयैर्योगे पंचमी स्यात्। अप हरेः परि हरेः सं
सारः। परिरत्र वर्जने। लक्षणादौ तु हरिं परि। आ मुक्तेः संसारः। आ सकलाद्ब्रह्म। प्रतिः प्रतिनिधिप्रतिदानयोः। एतयोरर्थयोः
प्रतिरुक्तसंज्ञः। प्रतिनिधिप्रतिदाने च यस्मात्। अत्र कर्मप्रवचनीयैर्योगे पंचमी स्यात्। प्रद्युम्नः कृष्णात् प्रति। तिळेभ्यः
प्रतियच्छति माषान्। अकर्तर्यृणे पंचमी। कर्तृवर्जितं यदृणं हेतुभूतं ततः पंचमी स्यात्। शताद्बद्धः। अकर्तरि किं। श
तेन बंधितः। विभाषा गुणेऽस्त्रियां। गुणे हेतावस्त्रीलिंगे पंचमी वा स्यात्। जाड्यात् जाड्येन वा बद्धः। गुणे किं। धनेन कुलं। अ
स्त्रियां किं। बुध्या मुक्तः। विभाषेति योगविभागादगुणे स्त्रियां च क्वचित्। धूमादग्निमान्। नास्ति घटोऽनुपलब्धेः। पृथग्विना ।।५३।।
नानाभिस्तृतीयान्यतरस्यां। एभिर्योगे तृतीया स्यात् पंचमी द्वितीया च। अन्यतरस्यांग्रहणं समुच्चयार्थं। पंचमीद्वितीये अनु

वेति। पृथक् रामेण। रामाद् रामं वा। एवं विना नाना। करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्ववचनस्य। एभ्योऽद्रव्यवचनेभ्यः करणे तृतीयापंच
म्यौ स्तः। स्तोकेन स्तोकाद्वा मुक्तः। द्रव्ये तु स्तोकेन विषेण हतः। दूरान्तिकार्थेभ्यो द्वितीया च। एभ्यो द्वितीया स्याच्चात् पंचमीतृतीये। प्रातिपदिका
र्थमात्रे विधिरयं। ग्रामस्य दूरं दूरात् दूरेण वा। अंतिकमंतिकादंतिकेन वा। असत्ववचनस्येत्यनुवृत्तेर्नेह दूरः पंथाः॥ ॥षष्ठी शेषे। कारक
प्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिः शेषस्तत्र षष्ठी। राज्ञः पुरुषः। कर्मादीनामपि संबंधमात्रविवक्षायां षष्ठ्येव। सतां गतं। मातुः
स्मरति। एधोदकस्योपस्कुरुते। भजे शंभोश्चरणयोः। फळानां तृप्तः। षष्ठी हेतुप्रयोगे। हेतुशब्दप्रयोगे हेतौ द्योत्ये षष्ठी स्यात्। अ
न्नस्य हेतोर्वसति। सर्वनाम्नस्तृतीया च। सर्वनाम्नो हेतुशब्दस्य च प्रयोगे हेतौ द्योत्ये तृतीया स्यात् षष्ठी च। केन हेतुना वसति। कस्य हे
तोः। निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनं। किं निमित्तं वसति। केन निमित्तेन। कस्मै निमित्ताय। इत्यादि। एवं किं कारणं। को हेतुः। किं
प्रयोजनमित्यादि। प्रायग्रहणादसर्वनाम्नः प्रथमाद्वितीये न स्तः। ज्ञानेन निमित्तेन हरिः सेव्यः। ज्ञानाय निमित्ताय इत्यादि। ष
ष्ठ्यतसर्थप्रत्ययेन। एतद्योगे षष्ठी स्यात्। दिक्शब्देति पंचम्या अपवादः। ग्रामस्य दक्षिणतः। पुरस्तात्। उपरि। उपरिष्टात्॥
एनपा द्वितीया। एनबंतेन योगे द्वितीया स्यात्। एनपेति योगविभागात् षष्ठ्यपि। दक्षिणेन ग्रामं ग्रामस्य वा। एवमुत्तरेण। दूरांतिका

सर्पिषो जानीते

79

र्थैः षष्ठ्यन्यतरस्यां। एतैर्योगे षष्ठी स्यात् पंचमी च। दूरं निकटं वा ग्रामस्य ग्रामाद्वा। दिवस्तदर्थस्य। द्यूतार्थस्य क्रयविक्रयरू
पव्यवहारार्थस्य च दिवः कर्मणि षष्ठी स्यात्। शतस्य दीव्यति। तदर्थस्य किं। ब्राह्मणं दीव्यति स्तौतीत्यर्थः। विभाषोपसर्गे। पूर्वयो
गापवादः। शतस्य शतं वा प्रतिदीव्यति। प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने। देवतासंप्रदानकेर्थे वर्त्तमानयोः प्रेष्यब्रुवोः कर्म
णो हविर्विशेषस्य वाचकात् शब्दात् षष्ठी स्यात्। अग्नये छागस्य हविषो वपाया मेदसः प्रेष्य। अनुब्रूहि वा। कर्तृकर्मणोः कृ
ति। कृद्योगे कर्तरि कर्मणि च षष्ठी स्यात्। कृष्णस्य कृतिः। जगतः कर्त्ता कृष्णः। गुणकर्मणि तु द्वितीया वा विकल्प्यते। नेताश्व
स्य ग्रामस्य ग्रामं वा। कृति किं। तद्धिते मा भूत्। कृतपूर्वी कटं। उभयप्राप्तौ कर्मणि। उभयोः प्राप्तिर्यस्मिन् कृति तत्र कर्मण्ये
व षष्ठी स्यात्। आश्चर्यो गवां दोहोऽगोपेन। स्त्रीप्रत्यययोरकाकारयोर्नायं नियमः। भेदिका बिभित्सा वा रुद्रस्य जगतः। शे
षे विभाषा। स्त्रीप्रत्यय इत्येके। विचित्रा जगतः कृतिर्हरेर्हरिणा वा। केचिदविशेषेण विभाषामिच्छन्ति। शब्दानामनुशा
सनमाचार्येणाचार्यस्य वा। क्तस्य च वर्त्तमाने। वर्त्तमानार्थस्य क्तस्य योगे षष्ठी स्यात्। न लोकेति निषेधस्यापवादः। राज्ञां
मतः बुद्धः पूजितो वा। अधिकरणवाचिनश्च। क्तस्य योगे षष्ठी। इदमेषां शयितं। न लोकाव्ययनिष्ठाखलर्थतृनाम्।

॥५४॥

80

रणां प्रयोगे षष्ठी न । लादेशाः । कुर्वन् कुर्वाणः सृष्टिं हरिः । उ । हरिं दिदृक्षुः । अळंकरिष्णुर्वा । उक । दैत्यान्घातुको हरिः । कमेरनिषेधः । लक्ष्म्याः कामुकः । अव्ययं । जगत्सृष्ट्वा सुखं कर्तुं । निष्ठा । दैत्यान् हतवान् । विष्णुना हता दैत्याः । खलर्थः । ईषत्करः प्रपंचो हरिणा । तृन् । इति प्रत्याहारः शतृशानचाविति तृशब्दादारभ्या तृनो नकारात् । शानन् । सोमं पवमानः । चानश् । आत्मानं मंडयमानः । शतृ । वेदमधीयन् । तृन् । कर्त्ता लोकान् । द्विषः शतुर्वा । मुरस्य मुरं वा द्विषन् । सर्वोयं कारकषष्ठ्याः प्रतिषेधः । शेषे षष्ठी तु स्यादेव ब्राह्मणस्य कुर्वन् । नरकस्य जिष्णुः । अकेनोर्भविष्यदाधमर्ण्ययोः । भविष्यत्यकस्य भविष्यदाधमर्ण्यार्थेनश्च योगे षष्ठी न स्यात् । सतः पाळकोवतरति । व्रजं गामी । शतं दायी । कृत्यानां कर्तरि वा । षष्ठी स्यात् । मया मम वा सेव्यो हरिः । कर्तरि किं । गेयो माणवकः साम्नां । भव्यगेयेति कर्तरि यद्विधानादनभिहितं कर्म । अत्र योगो विभज्यते । कृत्यानां । उभयप्राप्ताविति नेति स्यादनुवर्तते । तेन नेतव्या व्रजं गावः कृष्णेनातः कर्तरि वा । उक्तोर्थः । तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्यां । तुल्यार्थैर्योगे तृतीया वा स्यात् पक्षे षष्ठी । तुल्यः सदृशः समो वा कृष्णस्य कृष्णेन वा । अतुलोपमाभ्यां किं । तुला उपमा वा कृष्णस्य नास्ति । चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः । एतदर्थैर्योगे चतुर्थी वा स्यात् पक्षे षष्ठी । आयुष्यं चिरंजीवितं कृष्णाय कृष्णस्य वा स्यात् । एवं मद्रं भद्रं कुश

साधुरसाधुप्रयोगेषु। साधुः कृष्णो मातरि। असाधुर्मातुले ६

त ६

लं निरामयं सुखं वशं। अर्थः प्रयोजनं हितं पथ्यं स्यात्। आशिषि किं। देवदत्तस्यायुष्यमस्ति। व्याख्यानात्सर्वं चार्थग्रहणं। भद्रभद्र
योः पर्यायवादन्यतरेणापवनीयः।। ।।आधारोधिकरणं। कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणसंज्ञं
स्यात्। सप्तम्यधिकरणे च। अधिकरणे सप्तमी स्यात् चकाराद्दूरांतिकार्थेभ्यः। औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्या
धारस्त्रिधा। कटे आस्ते। स्थाल्यां पचति। मोक्षे इच्छास्ति। सर्वस्मिन्नात्मास्ति। वनस्य दूरे अंतिके वा। दूरांतिकार्थेभ्य इति विस
क्तित्रयेण सह वचनस्यात्र विलक्षणः फलितः। क्तस्येन्विषयस्य कर्मण्युपसंख्यानं। अधीती व्याकरणे। अधीतमनेनेति विग्रहः। इष्टा
दिभ्यश्चेति कर्त्तरीनिः। निमित्तात्कर्मयोगे। निमित्तमिह फलं। योगः संयोगसमवायात्मकः। चर्मणि द्वीपिनं हंति दंतयोर्हंति कुंज
रं। केशेषु चमरीं हंति सीम्नि पुष्कलको हतः। हेतौ तृतीयाप्राप्ता। सीमांडकोशः। पुष्कलको गंधमृगः। योगविशेषे किं। वेतनेन धा
न्यं लुनाति। यस्य च भावेन भावलक्षणं। यस्य क्रियया क्रियांतरं लक्ष्यते ततः सप्तमी स्यात्। गोषु दुह्यमानासु गतः। षष्ठी चाना
दरे। अनादराधिके भावलक्षणे षष्ठीसप्तम्यौ स्तः। रुदति रुदतो वा प्राव्राजीत्। रुदंतं पुत्रादिकमनादृत्य संन्यस्तवानित्य ।।राम।।
र्थः। स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च। एतैः सप्तभिर्योगे षष्ठीसप्तम्यौ स्तः। षष्ठ्यामेव प्राप्तायां पाक्षिको ।।५५।।

82

सप्तम्यर्थविवक्षयं।गवांगोषुवास्वामी।गवांप्रसूतः।गाएवानुभवितुंजातइत्यर्थः।आयुक्तकुशलाभ्यांचासेवायां।आभ्यांयोगेषष्ठीसप्तम्यौ
स्तस्तात्पर्ये।आयुक्तोव्यापारितः।आयुक्तःकुशलोवाहरिपूजनेहरिपूजनस्यवा।आसेवायांकिं।आयुक्तोगौःशकटे।ईषद्युक्तइत्यर्थः।यतश्च
निर्द्धारणे।जातिगुणक्रियासंज्ञाभिःसमुदायादेकदेशस्यपृथक्करणंनिर्द्धारणं।यतस्ततःषष्ठीसप्तम्यौस्तः।नृणांनृषुवाब्राह्मणःश्रे
ष्ठः।गवांगोषुवाकृष्णाबहुक्षीरा।गच्छतांगच्छत्सुवाधावन्शीघ्रः।छात्राणांछात्रेषुवामैत्रःपटुः।पंचमीविभक्ते।विभागोविभक्तं
निर्द्धार्यमाणस्ययत्रभेदएवतत्रपंचमीस्यात्।माथुराःपाटलिपुत्रकेभ्यआढ्यतराः।साधुनिपुणाभ्यामर्चायांसप्तम्यप्रतेः।आभ्यां
योगेसप्तमीस्यादर्चायां।नतुप्रतेःप्रयोगे।मातरिसाधुर्निपुणोवा।अर्चायांकिं।निपुणोराज्ञोभृत्यः।इहतत्त्वकथनेतात्पर्यं।अप्र
त्यादिरितिवक्तव्यं।साधुर्निपुणोवामातरंप्रतिपर्यनुवा।प्रसितोत्सुकाभ्यांतृतीयाच।आभ्यांयोगेतृतीयास्याच्चात्सप्तमी।प्र
सितउत्सुकोवाहरिणाहरौवा।नक्षत्रेचलुपि।नक्षत्रेप्रकृत्यर्थेसतियोलुप्लुप्संज्ञयालुप्यमानस्यप्रत्ययस्यार्थस्तत्रवर्तमा
नात्तृतीयासप्तम्यौस्तोऽधिकरणे।मूलेनावाहयेद्देवींश्रवणेनविसर्जयेत्।मूलेश्रवणेइतिवा।लुपिकिं।पुष्येशनिः।सप्तमीपं
चम्यौकारकमध्ये।शक्तिद्वयमध्येयौकालाध्वानौताभ्यामेतेस्तः।अद्यभुक्त्वायंद्व्यहेद्व्यहाद्वाभोक्ता।कर्तृशक्त्योर्मध्येऽयंका

यं.

यस्मादधिकमिति २

कः। इहस्थोयं क्रोशे क्रोशाद्वा लक्ष्यं विध्येत्। कर्तृकर्मशक्त्योर्मध्ये यं देशः। अधिकशब्दयोगेन सप्तमीपंचम्या ॥ विशेष्यते। तद
स्मिन्नधिकमिति चसूत्रनिर्देशात्। लोके। लोकाद्वाऽधिको हरिः। अधिरीश्वरे। स्वस्वामिसंबंधेऽधिः कर्मप्रवचनीयसंज्ञः
स्यात्। यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी। अत्र कर्मप्रवचनीययुक्ते सप्तमी स्यात्। उप परार्द्धे हरेर्गुणाः। परार्द्धादधिका
का इत्यर्थः। ऐश्वर्ये तु स्वस्वामिभ्यां पर्यायेण सप्तमी। अधिभुवि रामः। अधिरामे भूः। सप्तमी शौण्डैरिति समासपक्षे तु रामाधीना।
अषडक्षेत्यादिना खः ॥ ॥ इति विभक्त्यर्थाः ॥ ॥ छ ॥ श्रीः ॥ छ ॥ ॥ समर्थः पदविधिः। पदसंबंधी यो विधिः स समर्थाश्रितो बो स५
ध्यः। प्राक्कडारात्समासः। कडाराः कर्मधारय इत्यतः प्राक्समास इत्यधिक्रियते। सह सुपा। सुबंतं समर्थेन सह समस्यते। योगवि
भागस्येष्टसिध्यर्थत्वात्क्वचित्तिङंतोत्तरपदोयं समासः। स च छंदस्येव। पर्यभूषत्। अनुव्यचलत्। सुपा। सुप्सुपा सह समस्यते। स
मासत्वात्प्रातिपदिकत्वं। सुपो धातुप्रातिपदिकयोः। एतयोरवयवस्य सुपो लुक् स्यात्। भूतपूर्वे चरडिति निर्देशात्पूर्वनिपातः।
पूर्वं भूतो भूतपूर्वः। इवेन समासो विभक्त्यलोपश्च। जीमूतस्येव। अव्ययीभावः। अधिकारोयं। अव्ययं विभक्तिसमीपसमृद्धिव्यृ ॥५६॥
द्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्यांतवचनेषु। अव्ययमिति योगो विभ
सदिति योगो विभज्यते। ५

८५

समर्थेन

स्यते। अव्ययं समस्यते सोऽव्ययीभावः। प्रथमानिर्दिष्टं समास उपसर्जनं। समासशास्त्रे प्रथमानिर्दिष्टमुपसर्जनसंज्ञं स्यात्। उपस
र्जनं पूर्वं। समासे उपसर्जनं प्राक्प्रयोज्यं। एकविभक्ति चापूर्वनिपाते। विग्रहे यन्नियतविभक्तिकं तदुपसर्जनं स्यात् न तु तस्य पूर्व
निपातः। गोस्त्रियोरुपसर्जनस्य। उपसर्जनं यो गोशब्दः स्त्रीप्रत्ययान्तं च तदन्तस्य प्रातिपदिकस्य ह्रस्वः स्यात्। अव्ययीभावश्चेत्यव्य
यत्वं। नाव्ययीभावादतोऽम्त्वपंचम्याः। अदंतादव्ययीभावात्सुपो न लुक्। तस्य पंचमीं विना अमादेशश्च। दिशयोर्मध्यमपदिशं।
क्लीबाव्ययं त्वपदिशं दिशोर्मध्ये विदिक् स्त्रियामित्यमरः। तृतीयासप्तम्योर्बहुलं। अदंतादव्ययीभावात्तृतीयासप्तम्योर्बहुलमम
म्भावः स्यात्। अपदिशं। अपदिशेन। अपदिशे। बहुलग्रहणात्सुमद्रमुन्मत्तगंगमित्यादौ सप्तम्या नित्यमम्भावः। विभक्तीत्या
दस्यमर्थः। विभक्त्यर्थादिषु वर्त्तमानमव्ययं सुबंतेन सह समस्यते सोऽव्ययीभावः। विभक्तौ तावत्। हरौ इत्यधिहरि। सप्तम्यर्थ
स्यैवाच द्योतको अधिः। हरि ङि अधि इत्यलौकिकविग्रहवाक्यं। अत्र निपातेनाभिहितेप्यधिकरणे वचनसामर्थ्यात्सप्तमी।
अव्ययीभावश्च। अयं नपुंसकं स्यात्। ह्रस्वो नपुंसके प्रातिपदिकस्य। गोपायतीति गाः पातीति गोपाः तस्मिन्नित्यधि वा २
गोपं। समीपे। कृष्णस्य समीपमुपकृष्णं। समया ग्रामं। निकषा लंकां। आराद्वनादित्यत्र तु नाव्ययीभावः। अभितः परि
तः। अन्यारादिति द्वितीयापंचम्योर्विधानसामर्थ्यात्। मद्राणां समृद्धिः सुमद्रं। यवनानां व्यृद्धिः दुर्यवनं। विगता ऋ

८६

द्धिः व्यृद्धि। मक्षिकाणामभावो निर्मक्षिकं। हिमस्यात्ययोऽतिहिमं। अत्ययो ध्वंसः। निद्रा संप्रति न युज्यते इत्यतिनिद्रं। हरिशब्दस्य प्र
काश इति हरि। विष्णोः पश्चादनुविष्णु। पश्चाच्छब्दस्य तु नायं समासः। ततः पश्चात्स्रंस्यत इति साधुप्रयोगात्। योग्यतावीप्सापदार्थान
तिवृत्तिसादृश्यानि यथार्थाः। अनुरूपं रूपस्य योग्यमित्यर्थः। अर्थमर्थं प्रति प्रत्यर्थं। प्रतिशब्दस्य वीप्सायां कर्मप्रवचनीयसंज्ञावि
धानसामर्थ्यात्तद्योगे द्वितीयागर्भवाक्यमपि। शक्तिमनतिक्रम्य यथाशक्ति। हरेः सादृश्यं सहरि। वक्ष्यमाणेन सहस्य सः। ज्येष्ठस्या
नुपूर्व्येणेत्यनुज्येष्ठं। चक्रेण युगपदिति विग्रहे। अव्ययीभावे चाकाले। सहस्य सः स्यादव्ययीभावे न तु काले। सचक्रं। काले तु। सह
पूर्वाह्णं। सदृशः सख्या ससखि। यथार्थत्वेनैव सिद्धे पुनः सादृश्यग्रहणं गुणभूतेपि सादृश्ये यथा स्यादित्येवमर्थं। क्षत्राणां संप
त्तिः सक्षत्रं। ऋद्धेराधिक्यं समृद्धिः। अनुरूप आत्मभावः संपत्तिरिति भेदः। तृणमप्यपरित्यज्य सतृणमत्ति। साकल्येनेत्यर्थः। न
यत्नट्टणसत्तृणेतास्यर्थभू। अंते। अग्निग्रंथपर्यंतमधीते साग्नि। यथासादृश्ये। असादृश्य एव यथाशब्दः समस्यते। तेनेह न॥
यथा हरिस्तथा हरः। हरेरुपमानत्वं यथाशब्दो द्योतयति। तेन सादृश्ये इति वा यथार्थ इति वा प्राप्तं निषिध्यते। यावदवधारणे। या
वन्तः श्लोकास्तावन्तोऽच्युतप्रणामा यावच्छ्लोकं। सुप्प्रतिना मात्रार्थे। शाकस्य लेशः शाकप्रति। मात्रार्थे किं। वृक्षं प्रति विद्योतते
विद्युत्। अक्षशलाकासंख्याः परिणा। द्यूतव्यवहारे पराजय एवायं समासः। अक्षेण विपरीतं वृत्तं अक्षपरि। शलाकापरि॥

॥राम॥
॥५७॥

न१

एकपरि। विभाषा[illegible]धिकारोयं। एतत्सामर्थ्यादेवप्रादीनानां नित्यसमासत्वं। सुप्सुपेतितु नित्यसमासः। अव्ययमित्यादि समास
विधानात्ज्ञापकात्। अपपरिबहिरंचवः पंचम्याः। अपविष्णुसंसारः। अपविष्णोः। परिविष्णु। परिविष्णोः। बहिर्वनं। बहिर्वनात्। प्रा
ग्वनं। प्राग्वनात्। आङ्मर्यादाभिविध्योः। एतयोराङ् पंचम्यंतेन वा समस्यते सोव्ययीभावः। आमुक्तिसंसारः। आमुक्तेः। आबा
लंहरिभक्तिः। आबालेभ्यः। लक्षणेनाभिप्रती आभिमुख्ये। आभिमुख्यद्योतकावभिप्रती चिह्नवाचिना सह वा प्राग्वत्।
अभ्यग्निशलभाः पतंति। अग्निमभि। प्रत्यग्नि। अग्निं प्रति। अनुर्यत्समया। यंपदार्थं समया तेन लक्षणभूतेनानुः समस्य
ते सोव्ययीभावः। अनुवनमशनिर्गतः। वनस्य समीपं गत इत्यर्थः। यस्य चायामः। यस्य दैर्घ्यमनुना द्योत्यते तेन लक्षणभूते
नानुः समस्यते। अनुगंगं वाराणसी। गंगाया अनुगंगादैर्घ्यसदृशदैर्घ्योपलक्षितेत्यर्थः। तिष्ठद्गुप्रभृतीनि च। एतानि
निपात्यंते। तिष्ठंतिगावो यस्मिन्काले स तिष्ठद्गु दोहनकालः। आयतीगवं। इह शत्रादेशः पुंवद्भावविरहः समासां
तश्च निपात्यंते। इत्यादि। पारेमध्ये षष्ठ्या वा। पारमध्यशब्दौ षष्ठ्यन्तेन सह वा समस्यते। एदंतत्वं चानयोर्निपात्यते। पक्षे ष

पा:१

षष्ठीतत्पुरुषः।पारेगंगादानय।गंगापारात्।मध्येगंगात्।गंगामध्यात्।महाविकल्पेनवाक्यमपि।गंगा पारात्।गंगायामध्या
त्।संख्यावंश्येन।वंशोद्विधा।विद्ययाजन्मनाच।तत्रसर्वोवंश्यः।तद्वाचिनासहसंख्यासमस्यते।द्वौमुनीवंश्यौ।द्विमुनिव्याकर
णस्य।त्रिमुनि।विद्यातद्वतामभेदविवक्षया।त्रिमुनिव्याकरणं।एकविंशतिभारद्वाजं।नदीभिश्च।नदीभिःसंख्याप्राग्वत्।
समाहारेचायमिष्यते।सप्तगंगं।द्वियमुनं।अन्यपदार्थेचसंज्ञायां।अन्यपदार्थेविद्यमानंसुबंतंनदीभिःसहनित्यंस
मस्यतेसंज्ञायां।विभाषाधिकारेपिवाक्येनसंज्ञानवगमादिहनित्यसमासः।उन्मत्तगंगंनामदेशः।लोहितगंगं।
अव्ययीभावेशरत्प्रभृतिभ्यः।शरदादिभ्यष्टच्स्यात्समासांतोव्ययीभावे।शरदःसमीपमुपशरदं।प्रतिविपाशं।शरद्।
विपाश्।अनस्।मनस्।उपानह्।दिव्।हिमवत्।अनडुह्।दिश्।दृश्।विश्।चेतस्।चतुर्।त्यद्।तद्।यद्।कियत्।   पन॥
जरायाजरस्च।उपजरसं।प्रतिपरसमनुभ्योक्ष्णः।यस्येतिचप्रत्यक्षं।अक्ष्णःपरमितिविग्रहेसमासांतविधानं
ध्यादिव्ययीभावः।परोक्षेलिटितिनिपातनात्परस्योकारादेशः।परोक्षं।परोक्षाक्रियेत्यादितुअर्शआद्यचि।सम

८८

द्वो। अन्वक्षं। अनश्च। अन्नंतादव्ययीभावाट्टच् स्यात्। नस्तद्धिते। नांतस्य भस्य टेर्लोपः स्यात्तद्धिते। उपराजं। अध्यात्मं। नपुंसकादन्य
तरस्यां। अन्नंतं यत् क्लीबं तदंतादव्ययीभावाट्टज्वा। उपचर्मं। उपचर्म। नदीपोर्णमास्याग्रहायणीभ्यः। वा टच्। उपनदं। उपनदि। उपपो
र्णमासं। उपपौर्णमासि। झयः। झयंतादव्ययीभावाट्टज्वा। उपसमिधं। उपसमित्। गिरेश्च सेनकस्य। गिर्यंतादव्ययीभावाट्टज्वा। सेन
कग्रहणं पूजार्थं। उपगिरं। उपगिरि॥ ॥इत्यव्ययीभावः॥ ॥तत्पुरुषः। अधिकारोयं प्राग्बहुव्रीहेः। द्विगुश्च। द्विगुरपि तत्पुरुष
संज्ञः स्यात्। इदं सूत्रं त्यक्तुं शक्यं। संख्यापूर्वो द्विगुश्चेति पठित्वा चकारबलेन संज्ञासमावेशस्य सुवचत्वात्। समासांतः प्रयोज
नं। पंचराजं। द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः। द्वितीयान्तं श्रितादिप्रकृतिकैः सुबंतैः सह समस्यते वा स तत्पु
रुषः। कृष्णं श्रितः। कृष्णश्रितः। दुःखातीतः। गम्यादीनामुपसंख्यानं। ग्रामं गमी। ग्रामगमी। अन्नबुभुक्षुः। स्वयं क्तेन। द्वितीये
ति न संबध्यते। योग्यत्वात्। स्वयंकृतस्यापत्यं स्वायंकृतिः। खट्वा क्षेपे। खट्वाप्रकृतिकं द्वितीयांतं क्तांतप्रकृतिकेन सुबं
तेन समस्यते निंदायां। खट्वारूढो जाल्मः। नित्यसमासोयं। न हि वाक्येन निंदा गम्यते। सामि। सामिकृतं। कालाः। क्तेनेत्ये
व। अनत्यंतसंयोगार्थं वचनं। मासप्रमितः प्रतिपच्चंद्रः। मासं परिच्छेत्तुमारब्धवान्। अत्यंतसंयोगे चाकालाद्ध्ये वा। अक्तांता

सिद्धांतकौमुदी
॥५८॥

थेंविवचनं।मुहूर्त्तसुखं।मुहूर्त्तसुखं।तृतीयांतत्कृतार्थेनगुणवचनेनात-कृतेतिलुप्ततृतीयाकं।तृतीयांतेतृतीयांतार्थेंगुणवचने

कृत

नार्थशब्देनचसहप्राग्वत्।शंकुलयाखंडः।शंकुलाखंडः।धान्येनार्थोधान्यार्थः।तत्कृतेतिकिं।अक्ष्णाकाणः।पूर्वसदृशसमोना
र्थकलहनिपुणमिश्रश्लक्ष्णैः।तृतीयांतमेतैःप्राग्वत्।मासपूर्वः।मातृसदृशः।पितृसमः।ऊनार्थेमाषोनंकार्षापणं।माषवि
कलं।वाक्कलहः।आचारनिपुणः।गुडमिश्रः।आचारश्लक्ष्णः।मिश्रग्रहणेसोपसर्गस्यापिग्रहणं।मिश्रंचानुपसर्गमसंधावि
त्यत्रानुपसर्गग्रहणात्।गुडसंमिश्राःधानाः।अवरस्योपसंख्यानं।मासेनावरोमासावरः।कर्तृकरणेकृताबहुलम्॥
कर्तरिकरणेचतृतीयांतंबहुलंप्राग्वत्।हरिणात्रातोहरित्रातः।नखैर्भिन्नोनखभिन्नः।कृद्ग्रहणेगतिकारकपूर्वस्या
पिग्रहणं।नखनिर्भिन्नः।कृताकिं।काष्ठैःपचतितरां।अन्नेनव्यंजनं।संस्कारकद्रव्यवाचकंतृतीयांतमन्नेनप्राग्वत्।
दध्नाओदनोदध्योदनः।इहांतर्भू[illegible]तोपसेकक्रियाद्वारासामर्थ्यं।भक्ष्येणमिश्रीकरणं।गुडेनधानाःगुडधानाः।मिश्र
णक्रियाद्वारासामर्थ्यं॥ ॥चतुर्थीतदर्थार्थबलिहितसुखरक्षितैः॥चतुर्थ्यंतार्थाययत्तद्वाचिनाअ[illegible]थादिभिश्च
चतुर्थ्यंतंवाप्राग्वत्।तदर्थेनप्रकृतिविकृतिभावएवबलिरक्षितग्रहणात्ज्ञापकात्।यूपायदारुयूपदारु।नेह।रंधना

कृदंतेन

॥राम॥
॥५८॥

90

यच्छाली। अश्वघासादयस्तु षष्ठीसमासाः। अर्थेन नित्यसमासो विशेष्यलिंगता चेति वक्तव्यं। द्विजायायं द्विजार्थः सूपः। द्विजार्था यवागूः।
द्विजार्थं पयः। भूतबलिः। गोहितं। गोसुखं। गोरक्षितं॥ ॥पंचमी भयेन। चोराद्भयं चोरभयं। स्तोकांतिकदूरार्थकृच्छ्राणि क्तेन। स्तोकान्मुक्तः।
अल्पान्मुक्तः। अंतिकादागतः। अभ्याशादागतः। दूरादागतः। कृच्छ्रादागतः। पंचम्याः स्तोकादिभ्य इत्यलुक्॥ ॥षष्ठी॥ राज्ञः पुरुषो राज
पुरुषः। याजका[illegible]दिभिश्च। एभिः ष[illegible]ष्ठ्यंतं समस्यते। तृजकाभ्यां कर्त्तरीत्यस्य प्रसवोयं। ब्राह्मणयाजकः। देवपूजकः। गुणान्तरे
ण तरलोपश्चेति वक्तव्यो। तरबंतं यद्गुणवाचि तेन समासः। न निर्धारणे इति पूरणगुणेति च निषेधस्य प्रतिप्रसवोयं। सर्वेषां श्वेततर
ः सर्वश्वेतः। सर्वेषां महत्तरः सर्वमहान्॥ न निर्धारणे। निर्धारणे या षष्ठी सा न समस्यते। नृणां द्विजः श्रेष्ठः। पूरणगुणसुहितार्थ
सदव्ययतव्यसमानाधिकरणेन। पूरणाद्यर्थैः सदादिभिश्च षष्ठी न समस्यते। पूरणे सतां षष्ठः। गुणे। काकस्य कार्ष्ण्यं। ब्राह्मणस्य शु
क्लाः। यदा प्रकरणादिना दंता इति विशेष्यं ज्ञातं तदेदमुदाहरणं। अनित्योयं गुणेन निषेधः। संज्ञाप्रमाणत्वादित्यादिनिर्देशात्। तेना
र्थगौरवं बुद्धिमांद्यमिति सिद्धं। सुहितार्थास्तृप्त्यर्थाः। फलानां सुहितः। तृतीयासमासस्तु स्यादेव। स्वरे विशेषः। सत्। द्विजस्य कुर्वन्
कुर्वाणो वा। किंकर इत्यर्थः। अव्यय। ब्राह्मणस्य कृत्वा। पूर्वोत्तरसाहचर्यात्कृदव्ययमेव गृह्यते। तेन तदुपरीत्यादि सिद्धमिति रक्षितः।

वृति ४

त्यादि २

तव्या। ब्राह्मणस्य कर्त्तव्यं। तव्यता स्वकर्त्तव्यमेव। स्वकर्त्तव्यं स्वरे भेदः। समानाधिकरणेन। तक्षकस्य सर्पस्य। विशेषणसमासस्तु बहु[illegible]ग्रहणान्नागो।
धेनोरित्यां द्विपुपोटायुवतीत्यादीनां विलक्ष्यं तरेवरितार्थानां परत्वाद्बाधकः षष्ठीसमासः प्राप्तः सोप्यनेन वार्यते। क्तेन च पूजायां। नु३
मतिबुद्धीति सूत्रेण विहितो यः क्तस्तदन्तेन षष्ठी न समस्यते। राज्ञां मतो बुद्धः पूजितो वा। राजपूजित इत्यादौ तु भूते क्तान्तेन सह
तृतीयान्तस्य समासः। अधिकरणवाचिना च। क्तेन षष्ठी न समस्यते। इदमेषामासितं गतं भुक्तं वा। कर्मणि च। उभयप्राप्तौ क
गो र्मणीति या षष्ठी सा न समस्यते। आश्चर्यो गवां दोहो गोपेन। तृजकाभ्यां कर्त्तरि। कर्त्रर्थे तृजकाभ्यां षष्ठ्या न समासः। अपां
स्रष्टा। व ज्रस्य भर्त्ता। ओदनस्य पाचकः। कर्त्तरि किं। इक्षूणां भक्षणमित्युल्लिकापत्यर्थे सति तृशब्दस्य। याजकादिचास
मासः। भूसत्ता कथं तर्हि घटानां निर्मातुस्त्रिभुवनविधातुश्च कलह इति। शेषषष्ठ्या समास इति कैयटः। कर्त्तरि च। क
र्तृषष्ठ्या अकेन न समासः। भवतः शायिका। नेह तृजनुवर्त्तते। तद्योगे कर्त्तुरभिहितत्वेन कर्तृषष्ठ्या असम्भवात्। नित्यं क्री
डाजीविकयोः। एतयोरर्थयोरकेन नित्यं षष्ठी समस्यते। उद्दालकपुष्पभञ्जिका। क्रीडाविशेषस्य संज्ञा। संज्ञायामिति ॥ ६०॥

ति॰

सावयवत्वु लू ञ्जी विकायां दंतलेखकः। तत्र ञ्जीडायां विकल्पे जीविकायां तज्जकास्योकर्त्तरि निषेधे प्राप्ते वचनं। पूर्वापराधरोत्तरमेकदेशिनैका
धिकरणे। अवयव विनाश इह पूर्वादयः समस्यंते। एकवचनसंख्याविशिष्टश्चेदवयवी। षष्ठीसमासापवादः। पूर्वंकायस्य पूर्वकायः। अपरका
यः। एकदेशिना किं। पूर्वं नाभेः कायस्य। एकाधिकरणे किं। पूर्वश्छात्राणां। सर्वोप्येकदेशोऽह्ना समस्यते। संख्याविसायेति ज्ञापका
त्। मध्याह्नः। सायाह्नः। केचित्तु सर्व एकदेशः कालेन समस्यते न त्वह्नैव। ज्ञापकस्य सामान्यापेक्षत्वात्। तेन मध्यरात्रः उपारताः
पश्चिमरात्रिगोरव रात्रादित्यादि सिद्धमित्याहुः। अर्द्धं नपुंसकं। समांशवाच्यर्द्धशब्दो नित्यं क्लीबे स प्राग्वत्। एकविभक्तावषष्ठ्यन्त
वचनं। एकदेशिसमासविषयं कोयमुपसर्जनसंज्ञानिषेधः। तेन प ञ्चखट्वीत्यादि सिद्ध्यति। अर्द्धं पिप्पल्याः अर्द्धपि
प्पली। क्लीबे किं। ग्रामार्द्धः। द्रव्यैक्य एव। अर्द्धपिप्पलीनां। द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्यां। एतान्येकदेशिना सह प्रा
ग्वत्। द्वितीयं भिक्षाया द्वितीयभिक्षा। एकदेशिना किं। द्वितीयं भिक्षाया भिक्षुकस्य। अन्यतरस्यांग्रहणसामर्थ्यात्पू
रणगुणेति निषेधं बाधित्वा पक्षे षष्ठीसमासः। भिक्षाद्वितीयं। प्राप्तापन्ने च द्वितीयया। आपन्नो द्वितीयाश्रितेति समासः। प्रा

93

।सिद्ध

सिद्धशुष्कपक्वबंधेश्च। एतेः सप्तमी प्राग्वत्। सांकाश्यसिद्धः। आतपशुष्कः। स्थालीपक्वः। चक्रबंधः। ध्वांक्षेण क्षेपे। ध्वांक्षवाचिना
सह समस्यन्त प्राग्वन्निन्दायां· तीर्थे ध्वांक्ष इव तीर्थध्वांक्षः तीर्थकाकः। कृत्यैर्ऋणे। सप्तम्यन्तं कृत्यप्रत्ययान्तैः सह प्राग्वदावश्यके· मासदेयमृणं·
पूर्वाह्णे गेयं साम· संज्ञायां· सप्तम्यन्तं सुपा सह प्राग्वत्संज्ञायां· वाक्येन संज्ञानवगमान्नित्यसमासोऽयं अरण्येतिलकाः। वनेकशेरुकाः इत्य

नोजीविकां प्राप्त जीविकः। जीविकाप्राप्तः। आपन्नजीविकः। जीविकापन्नः। इह सूत्रे द्वितीयया अ इति छित्वा अका
रोऽपि विधीयते तेन जीविकां प्राप्ता स्त्री प्राप्तजीविका। आपन्नजीविका। कालाः परिमाणिना परिछेद्यवाचिना सु
बंतेन सह कालाः समस्यन्ते मासोजातस्य यस्य स मासजातः। द्व्यहजातः। द्वयोरह्नोः समाहारो द्व्यहः। द्व्यहो जातस्येति
विग्रहः। उत्तरपदेन परिमाणिना द्विगोः सिद्धये बहूनां तत्पुरुषस्योपसंख्यानं। द्वे अहनी जातस्य यस्य स द्व्यह्नजातः
अह्नोऽह्न इति वक्ष्यमाणोऽह्नादेशः। पूर्वत्र तु न संख्यादेः समाहार इति तन्निषेधः। सप्तमीशौण्डैः। सप्तम्यंतं शौण्डादि
भिः प्राग्वद्वा। अक्षेषु शौण्डोऽक्षशौण्डः। अधिशब्दोऽत्र पठ्यते। अध्युत्तरपदादिति खः। ईश्वराधीनः। पात्रेसमितादयश्च।
एते निपात्यंते क्षेपे पात्रेसमिताः। गेहेशूराः। ननु कार्ये गेहेशूरः। गेहेनर्दी। आकृतिगणोऽयं। चका
रोऽवधारणार्थः तेनेषां समासान्तरे घटकतया प्रवेशो न॥ ॥पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकर
णेन। विशेषणं विशेष्येणेति सिद्धे पूर्वनिपातनियमार्थं सूत्रं। एकसंख्यस्य दिक्संख्ये संज्ञायामिति नियमबाधनार्थं चापूर्वस्त्रि

शङ्क

॥ ६१॥

तास्समस्यन्ते इत्यल्प
... कैनाहोरात्राव
यवाः। अह्नोरात्रेश्चा
वयवाः सप्तम्यंताः क्तां
तेन सह प्राग्वत्· पू
र्वाह्णकृतं· अपररात्र
कृतं· अवयवग्रहणं
किं· अह्नि दृष्टं ... त
त्रात्रेत्यत क्तांतेन
सह प्राग्वत्· तत्रभु
क्तं। क्षेपे। सप्तम्यंतं
क्तांतेन प्राग्वन्निंदा
यां। अवतप्तेनकुल
स्थितं नष्टनत्· ४

९५

द्द स्यां शाद्धरणे तु बाहुद्दपञ्चप्रियेयस्य धागदमदप्रियः छत्रो पानद्प्रियः इत्यत्रैः पूर्वयोनिर्दिष्ट ६॥ समासो तक्षज पि...यमेव ७
त्रिपदे बहुव्रीहौ पूर्वाशाला विषुकामशमी च पूर्वेषुकामशमा।
नगरी नस्यां लवा पूर्वेषु कामशमी प्राचां ग्र
मनगराणामिषु
रपदस्थदिः अ हिर
तिङीपून्स्यात् २

य७

तः पश्चादनुलिप्तः स्नातानुलिप्तः एकनाथः। सर्वयाज्ञिकाः जरन्नैयायिकाः पुराणमीमांसकाः नवपावकाः। केवलवैयाकरणाः
दिक्संख्ये संज्ञायां। समानाधिकरणे इत्यापादपरिसमाप्तेरधिकारः। संज्ञायामेवेति नियमार्थं सूत्रं। पूर्वेषुकामशमी। सप्तर्षयः।
नेह। उत्तरा वृक्षाः। पञ्च ब्राह्मणाः। तद्धितार्थोत्तरपदसमाहारे च। तद्धितार्थे विषये उत्तरपदे च परतः समाहारे च वाच्ये दिक्संख्ये प्रा
ग्वत्। पूर्वस्यां शालायां भवः पौर्वशालः। समासे कृते दिक्पूर्वपदादसंज्ञायां ञ इति ञः। सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः। आ
परशालः। पूर्वशाला प्रिया यस्येति त्रिपदे बहुव्रीहौ कृते प्रियाशब्दे उत्तरपदे पूर्वयोस्तत्पुरुषः। तेन शालाशब्दे आका
र उदात्तः। पूर्वशालाप्रियः। दिक्षु समाहारो नास्त्यनभिधानात्। संख्यायास्तद्धितार्थे। षण्णां मातॄणामपत्यं षाण्मातुरः।
पञ्च गावो धनं यस्येति त्रिपदे बहुव्रीहाववान्तरतत्पुरुषस्य विकल्पे प्राप्ते द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनं। गोर
तद्धितलुकि। गोन्तात्तत्पुरुषाट्टच् स्यात् समासान्तो न तु तद्धितलुकि। पञ्चगवधनः। पञ्चानां गवां समाहारः। संख्यापू
र्वो द्विगुः। तद्धितार्थेत्यत्रोक्तः संख्यापूर्वो द्विगुः स्यात्। द्विगुरेकवचनं। द्विग्वर्थः समाहार एकवत्स्यात्। स नपुंसकमिति नपुंसक
त्वं। पंच्यगवं। कुत्सितानि कुत्सनैः। कुत्स्यमानानि कुत्सनैः सह प्राग्वत्। वैयाकरणखसूचिः। मीमांसकदुर्दुरूटः। पापाणके
दुलउत्क्षेपे। दुर्पूर्वः। औणादिकः कूटप्रत्ययः। बहुलमन्यत्रापीति णेर्लुक्। रलयोरेकत्वस्मरणाद्रः।१

कुत्सितैः। पूर्वसूत्रापवादः। पापनापितः। अणककुलालः। उपमानानि सामान्यवचनैः। घनश्यामः। इह पूर्वपदं तत्सदृशे लाक्षणिकमिति सूचयितुं
लौकिकविग्रहे इवशब्दः प्रयुज्यते। पूर्वनिपातनियमार्थं सूत्रं। उपमितं व्याघ्रादिभिः सामान्याप्रयोगे। उपमितं व्याघ्रादिभिस्सह प्राग्वत्साधा
रणधर्मस्याप्रयोगेऽसति। विशेष्यस्य पूर्वनिपातार्थं सूत्रं। पुरुषव्याघ्रः। नृसोमः। व्याघ्रादिराकृतिगणः। सामान्याप्रयोगे किं। पुरुषो व्याघ्र इव
शूरः। विशेषणं विशेष्येण बहुलं। भेदकं समानाधिकरणेन भेद्येन बहुलं प्राग्वत्। नीलमुत्पलं नीलोत्पलं। बहुलंग्रहणात् क्वचिन्नित्यं। कृष्णस
र्पः। क्वचिन्न। रामो जामदग्न्यः। पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च। पूर्वनिपातनियमार्थमिदं। पूर्ववैयाकरणः। अपराध्या
पकः। अपरस्यार्द्धे पश्चभावो वक्तव्यः। अपरश्चासावर्द्धश्च पश्चार्द्धः। कथमेकवीर इति। पूर्वकालैकेति बाधित्वा परत्वादनेनैव समासे वीरै
कं इति हि स्यात्। बाहुलकाद्भविष्यति। श्रेण्यादयः कृतादिभिः। श्रेण्यादिषु च्व्यर्थवचनं कर्तव्यं। अश्रेणयः श्रेणयः कृताः श्रेणीकृताः। क्तेन न
ञ्विशिष्टेनानञ्। कृतं च तदकृतं च कृताकृतं। शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानं। शाकप्रियः पार्थिवः शाकपार्थिवः
देवब्राह्मणः। सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः। सद्वैद्यः। वक्ष्यमाणेन महत आकारः। महावैयाकरणः। पूज्यमानैः किं। उत्कृष्टो गौः। पंकादु
द्धृत इत्यर्थः। वृन्दारकनागकुञ्जरैः पूज्यमानं। गोवृन्दारकः। व्याघ्रादेराकृतिगणत्वादेव सिद्धे सामान्याप्रयोगार्थं वचनं। कतरकतमौ जातिपरि
प्रश्ने। कतरकठः। कतमकलापः। गोत्रं च चरणैस्सहेति जातित्वं। किं क्षेपे। कुत्सितो राजा। किंराजा यो न रक्षति। पोटायुवतिस्तोककतिपय

स्य

॥६२॥

२ऊ६न्काबोयस्मिन्नूतथा २

गृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः ।तत्पुरुषः समानाधिकरणः कर्मधारयः ।पुंवत्कर्मधारयजातीयदेशीयेषु ।कर्मधा
रये जातीयदेशीययोश्च परतो भाषितपुंस्कं सदनूङं तं पूर्वं पुंवत् ।पूरणीप्रियादिष्वप्राप्तः पुंवद्भावो विधीयते ।महानवमी ।कृष्णचतुर्दशी ।महाप्रिया ।त
थाकोपधादेः प्रतिषिद्धः पुंवद्भावः कर्मधारयादौ प्रतिप्रसूयते ।पाचकस्त्री ।पञ्चमभार्या ।स्रौघ्नभार्या ।सुकेशभार्या ।ब्राह्मणभार्या ।एवं पाचकजा
तीया ।पाचकदेशीयेत्यादि ।पोटापोटा स्त्रीपुंसलक्षणा ।इभयुवतिः ।अग्निस्तोकः ।उदश्वित्कतिपयं ।गृष्टिः सकृत्प्रसूता ।गोगृष्टिः ।धेनुर्नवसू
तिका ।गोधेनुः ।वशा वन्ध्या ।गोवशा ।वेहद्गर्भघातिनी ।गोवेहत् ।बष्कयणी तरुणवत्सा ।गोबष्कयणी ।कठप्रवक्ता ।कठश्रोत्रियः ।कठाध्यापकः ।क
ठधूर्तः ।प्रशंसावचनैश्च ।एतैः सह जातिः प्राग्वत् ।गोमतल्लिका ।गोमचर्चिका ।गोप्रकाण्डं ।गो[illegible] ।गोतल्लजः ।प्रशस्ता गौरित्यर्थः ।मतल्लिका
दयो नियतलिंगाः ।न तु विशेष्यनिघ्नाः ।जातिः किं ।कुमारीमतल्लिका ।युवाखलतिपलितजरतीभिः ।पूर्वनिपातनियमार्थं सूत्रं ।लिङ्गविशि
ष्टपरिभाषया युवतिशब्दोऽपि समस्यते ।युवा खलतिः ।युवखलतिः ।युवतिः खलती ।युवखलती ।युवजरती ।युवत्यामेव जरतीधर्मोपलंभेन तद्व
पारोपात् सामानाधिकरण्यं ।कृत्यतुल्याख्या अजात्या ।भोज्योष्णं ।तुल्यश्वेतः ।सदृशश्वेतः ।अजात्या किं ।भोज्य ओदनः ।प्रतिषेधसामर्थ्याद्विशे
षणसमासोऽपि न ।कुमारः श्रमणादिभिः ।कुमारी श्रमणा ।कुमारश्रमणा ।इह गणे श्रमणा प्रव्रजिता गर्भिणी इत्यादयः स्त्रीलिंगाः पठ्यन्ते ।लिंगविशिष्ट
परिभाषया एतदेव ज्ञापकं बोध्यं ।चतुष्पादो गर्भिण्या ।चतुष्पाज्जातिवाचिनो गर्भिणीशब्देन सह प्राग्वत् ।गोगर्भिणी ।मयूरव्यंसकादयश्च ।एते निपात्य

दत्तभार्या ।२

हृः६
वलिन७

न्ते। मयूरो व्यंसको मयूरव्यंसकः। व्यंसको धूर्त्तः। उदक् च अवाक् च उच्चावचं। निश्चितं च प्रचितं च निश्चप्रचं। नास्ति किञ्चन यस्या किञ्चनः। आ

॥६३॥ ख्यातमाख्यातेन क्रियासातत्ये। अश्नीत पिबतेत्येवं सततं यत्राभिधीयते सा अश्नीतपिबता। पचतभृज्जता। खादतमोदता। नास्ति कुतोपि भ

यं स यस्य सोऽकुतोभयः। अन्यो राजा राजान्तरं। चिदेव चिन्मात्रं॥ ॥नञ्॥ नञ् सुपा समस्यते। नलोपो नञः। नञो नस्य लोपः स्यादुत्तरपदे

अब्राह्मणः। तस्मान्नुडचि। लुप्तनकारान्नञ उत्तरपदस्याजादेर्नुडागमः स्यात्। अनश्वः। अथ सिवेव्यपीलावेन सहायं किं कल्प्यते।

रल्लोहागमलघुसंदेहाः प्रयोजनमिति। अद्भुतायामसंकुचितमिति साध्यवार्त्तिकि प्रयोगात्। तेनानुपलब्धिरविवादोऽविघ्न इत्यादि सि

द्धं। नञो नलोपस्तिङि क्षेपे। अपचसि त्वं जाल्म। नैकधेत्यादौ तु नशब्देन सह सुप्सुपेति समासः॥ ॥नित्यं क्रीडेत्यतो नित्यमित्यनुवर्त्त

माने। कुगतिप्रादयः। एते समर्थेन नित्यं समस्यन्ते। कुत्सितः पुरुषः कुपुरुषः। गतिश्चेत्यनुवर्त्तमाने। ऊर्यादि । च्विडाचश्च। एते क्रियायो

गे गतिसंज्ञाः स्युः। ऊरीकृत्य। शुक्लीकृत्य। पटपटाकृत्य। कारिकाशब्दस्योपसंख्यानं। कारिका क्रिया। कारिकाकृत्य। अनुकरणं चानिति ॥६३॥

परं। खाट्कृत्य। अनितिपरं किं। खाडिति कृत्वा निरष्ठीवत्। आदरानादरयोः सदसती। सत्कृत्य। असत्कृत्य। भूषणेऽलं। अलंकृत्य। भूष

णे किं। अलं कृत्वौदनं गतः। पर्याप्तमित्यर्थः। अनुकरणमित्यादि त्रिसूत्री स्वभावात्कृञ्विषया। अंतरपरिग्रहे। अंतर्हत्य। मध्ये हत्वेत्य

र्थः। अपरिग्रहे किं। अंतर्हत्वा गतः। हतं परिगृह्य गत इत्यर्थः। कणेमनसी श्रद्धाप्रतीघाते। कणेहत्य पयः पिबति। मनोहत्य। कणेशब्दः

सप्तमीप्रतिरूपको निपातो ऽभिलाषातिशये वर्त्तते। मनःशब्दोप्येवं। पुरोऽव्ययं। पुरस्कृत्य। अस्तं च। अस्तमिति मांतमव्ययं गतिसंज्ञं स्यात्। अस्तंगत्य। अच्छगत्यर्थवदेषु। अव्ययमित्येव। अच्छगत्य। अच्छोद्य। अभिमुखं गत्वा उक्त्वा वेत्यर्थः। अव्ययं किं। जलमच्छं गच्छति। अदोनुपदेशे। अदःकृत्य। अदः कृतं परं प्रत्युपदेशे प्रत्युदाहरणं। तिरोन्तर्द्धौ। तिरोभूय। विभाषा कृञि। तिरःकृत्य। तिरस्कृत्य। तिरः कृत्वा। उपाजेन्वाजे। एतौ कृञि वा गतिसंज्ञौ। उपाजेकृत्य। उपाजे कृत्वा। अन्वाजेकृत्य। अन्वाजे कृत्वा। दुर्बलस्य बलमाधायेत्यर्थः। साक्षात्प्रभृतीनि च। कृञि वा गतिसंज्ञानि स्युः। च्व्यर्थ इति वक्तव्यं। साक्षात्कृत्य। साक्षात्कृत्वा। लवणंकृत्य। लवणं कृत्वा। मांतत्वं निपातनात्। अनत्याधान उरसिमनसी। उरसिकृत्य। उरसि कृत्वा। अभ्युपगम्येत्यर्थः। मनसिकृत्य। मनसि कृत्वा। निश्चित्येत्यर्थः। अत्याधानमुपश्लेषस्तत्र न। [illegible] उरसि कृत्वा पाणिं शेते। मध्येपदेनिवचने च। एते कृञि गतिसंज्ञा वा स्युरनत्याधाने। मध्येकृत्य। मध्ये कृत्वा। निवचनेकृत्य। वाचं नियम्येत्यर्थः। नित्यं हस्तेपाणावुपयमने। कृञि। उपयमनं विवाहः स्वीकारमात्रमित्यन्ये। हस्तेकृत्य। प्राध्वं बंधने। प्राध्वमित्यव्ययं। प्राध्वंकृत्य। बंधनेनानुकूलं कृत्वेत्यर्थः। प्रार्थनादिना वानुकूलकरणे प्राध्वं कृत्वा। जीविकोपनिषदावौपम्ये। जीविकामिव कृत्वा। जीविकाकृत्य। औपम्य किं। जीविकां कृत्वा। प्रादिग्रहणमगत्यर्थं। सुपुरुषः। अत्र वार्त्तिकानि। प्रादयो गताद्यर्थे प्रथमया। प्रगत आचार्यः प्राचार्यः। अत्यादयः क्रांताद्यर्थे द्वितीयया। अतिक्रांतो मालामतिमालः। अवादयः क्रुष्टाद्यर्थे तृतीयया। अवक्रुष्टः कोकिलया ऽवको

॥दि४॥ द्वितिय

किष्टः। पर्यादयो ग्लानाद्यर्थे चतुर्थ्या। परिग्लानोऽध्ययनाय पर्यध्ययनः। निरादयः क्रांताद्यर्थे पंचम्या। निष्क्रांतः कौशांब्या निष्कौशांबिः।
कर्मप्रवचनीयानां प्रतिषेधः। वृक्षं प्रति। तत्रोपपदं सप्तमीस्थं। सप्तम्यंते पदे कर्मणीत्यादौ वाच्यत्वेन स्थितं कुंभादि तद्वाचकं पदमुपप-
दसंज्ञं स्यात्। तस्मिन्सत्येव वक्ष्यमाणः प्रत्ययः स्यात्। उपपदमतिङ्। उपपदं सुबंतं समर्थेन नित्यं समस्यते। अतिङंतश्च समासः। कुंभं
करोतीति कुंभकारः। इह कुंभ अस् कार इत्यलौकिकं प्रक्रियावाक्यं। अतिङ् किं। मा भवान्भूत्। माङि लुङिति सप्तमीनिर्देशान्मा-
ङुपपदं। अतिङ्ग्रहणं ज्ञापयति सुपेत्येतन्नेहानुवर्तते। पूर्वसूत्रेपि गतिग्रहणं पृथक्कृत्वा तिङ्ग्रहणे तत्रापकृष्यते। सुपेति च
निवृत्तं। तथा च गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेरिति सिद्धं। व्याघ्री। अश्वक्रीती। कच्छपी। अमै-
वाव्ययेन। अमैव तुल्यविधानं यदुपपदं तदेवाव्ययेन सह समस्यते। स्वादुंकारं। नेह। कालसमयवेलासु तुमुन्। कालः स-
मयो वेला वा भोक्तुं। अमैवेति किं। अग्रे भोजं। अग्रे भुक्त्वा। विभाषाग्रे प्रथमपूर्वेष्विति क्त्वाणमुलौ। अमा चान्येन च तुल्य-
विधानमेतत्। तृतीयाप्रभृतीन्यन्यतरस्यां। उपदंशस्तृतीयायामित्यादीन्युपपदान्यमंतेनाव्ययेन सह वा समस्यंते। मूलके-
नोपदंशं भुंक्ते। मूलकोपदंशं। क्त्वा च। तृतीयाप्रभृतीन्युपपदानि क्त्वांतेन सह वा समस्यंते। उच्चैः कृत्य। उच्चैः कृत्वा। अव्ययेऽय-
थाभिप्रेतेति क्त्वा। तृतीयाप्रभृतीनीति किं। अलं कृत्वा। खलु कृत्वा॥ ॥तत्पुरुषस्यांगुलेः संख्याव्ययादेः। संख्याव्ययादेरंगु

॥दि४॥

त्यं तस्य तत्पुरुषस्य समासान्तोऽट् स्यात्। द्वे अंगुली प्रमाणमस्य द्व्यंगुलं दारु। निर्गतमंगुलिभ्यो निरंगु
लं। अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः। एभ्यो रात्रेरट् स्याच्चात्संख्याव्ययादेः। अहर्ग्रहणं द्वंद्वार्थं। अ
हश्च रात्रिश्च अहोरात्रः। सर्वा रात्रिः सर्वरात्रः। पूर्वं रात्रेः पूर्वरात्रः। संख्यातरात्रः। पुण्यरात्रः। द्वयो रात्र्योः
समाहारो द्विरात्रं। अतिक्रान्तो रात्रिमतिरात्रः। राजाहःसखिभ्यष्टच्। एतदन्तात्तत्पुरुषाट्टच् स्यात्। पर
मराजः। अतिराजः। कृष्णसखः। अह्नष्टखोरेव। टिलोपः स्यान्नान्यत्र। उत्तमाहः। द्वे अहनी भृतो द्व्यहीनः। तद्धितार्थे द्वि
गुः। तमधीष्ट इत्यधिकारे द्विगोर्वेत्यनुवृत्तौ रात्र्यहःसंवत्सराच्चेति खः। लिंगविशिष्टपरिभाषायाऽनित्यत्वान्नो
हः। मद्राणां राज्ञी मद्रराज्ञी। अह्नोऽह्न एतेभ्यः। सर्वादिभ्यः परस्याहन्शब्दस्याह्नादेशः स्यात् समासान्ते परे। अह्नो
ऽदन्तात्। अदन्तात्पूर्वपदस्थाद्रेफात्परस्याह्नो नस्य णः स्यात्। सर्वाह्णः। पूर्वाह्णः। संख्याताह्नः। द्वयोरह्नोर्भवः। का
लाट्ठञ्। द्विगोर्लुगनपत्य इति ठञो लुक्। द्व्यह्नः। स्त्रियामदन्ते वा टाप्। द्व्यह्ना। द्व्यह्नप्रियः। अत्यह्नः। तुस्मादि

॥६५॥

पूर्वापरेषु णत्वं न स्यात्। दीर्घाह्नी प्रावृट्। एवं चैतदर्थमह्न इत्यदन्तानुकरणेह्नशो न कर्त्तव्यः। प्रातिपदिकान्तेति ण
त्ववारणाय ह्नुत्वादिपाठस्यावश्यकत्वात्। अहन्ताहिति तपरकरणान्नेह। परागतमहः पराह्नः॥
न संख्यादेः समाहारे। समाहारे वर्त्तमानस्य संख्यादेरह्नादेशो न स्यात्। संख्यादेरिति स्पष्टार्थं। द्वि
योरह्नोः समाहारो द्व्यह्नः। त्र्यहः। उत्तमैकाभ्यां च। आभ्यामह्नोह्ना देशो न। उत्तमश
ब्दोऽन्त्यार्थः। पुण्यशब्दमाह। पुण्यैकाभ्यामित्येव तु सूत्रयितुमुचितं। पुण्याहः। सुदिनाहः। सुदिनशब्
दः प्रशस्तवाची। एकाहः। उत्तमग्रहणमुपान्त्यस्यापि संग्रहार्थमित्येके। संख्याताहः। अग्राख्यायामु
रसः। टच् स्यात्। अश्वानामुर इव अश्वोरसं। मुख्योऽश्व इत्यर्थः। ग्रामकौटाभ्यां च तक्ष्णः। ग्रामस्य त
क्षा ग्रामतक्षः। साधारण इत्यर्थः। कुट्यां भवः कौटः २ स्वतंत्रः। स चासौ तक्षा च कौटतक्षः। अतेः शु

॥६५॥

102

नः।अतिश्वोवराहः।अतिश्वीसेवा। उपमानादप्राणिषु।अप्राणिविषयकोपमानवाचिनःशुनष्टच्स्या
त्।आकर्षश्वेवाकर्षश्वः। अप्राणिषुकिं।वानरश्वेववानरश्वा।उत्तरमृगपूर्वाच्चसक्थ्नः।चादुपमा
नात्।उत्तरसक्थं।मृगसक्थं।पूर्वसक्थं।फळकमिवसक्थिफळकसक्थं।नावोद्विगोः।नौश
ब्दांता।द्विगोष्टच्स्यात्नतुतद्धितलुकि।द्वाभ्यांनौभ्यामागतोद्विनावरूप्यः।द्विगोर्लुगनपत्य इ
त्यत्रअ[illegible]स्यापकर्षणाद्धलादेर्नलुक्।पञ्चनावप्रियः।द्विनावं।त्रिनावं।अतद्धितलुकीतिकिम्।
पञ्चभिः[illegible]भिःक्रीतःपञ्चनौः।अर्द्धाच्च।अर्द्धान्नावष्टच्।नावोर्द्धमर्द्धनावं।क्लीबत्वंलोकात्।खार्याः
प्राचां।द्विगोरर्द्धाच्चखार्याष्टज्वास्यात्।द्विखारं।द्विखारि।अर्द्धखारं।अर्द्धखारी।द्वित्रिभ्यामंजलेः।

दज्वा स्याद्द्विगो। द्व्यंजलं। द्व्यंजलि। अतद्धितलुकीत्येव। द्वाभ्यामंजलिभ्यां क्रीतः द्व्यंजलिः। ब्रह्मणो जानपदाख्यायां। ब्र
ह्मान्तात्तत्पुरुषाट्टच् स्यात् समासेन जानपदत्वमाख्यायते चेत्। सुराष्ट्रे ब्रह्मा सुराष्ट्रब्रह्मः। कुमहद्भ्यामन्यतरस्या
म्। आभ्यां ब्रह्मणो वा टच् स्यात् तत्पुरुषे। कुत्सितो ब्रह्मा कुब्रह्मः। कुब्रह्मा। आन्महतः समानाधिकरणजातीययोः।
महत आकारोऽन्तादेशः स्यात् समानाधिकरणे उत्तरपदे जातीये च परे। महाब्रह्मः। महाब्रह्मा। महादेवः। महाजा
तीयः। समानाधिकरणे किं। महतः सेवा महत्सेवा। लाक्षणिकं विहाय प्रतिपदोक्तः सन्म[illegible]दिति समासो ग्रहीष्यत
इति चेत्। महाबाहुर्न स्यात्। तस्माल्लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्येति परिभाषा नेह प्रवर्त्तते। समानाधिक
रणग्रहणसामर्थ्यात्। आदिति योगविभागादात्वम्। प्रागेकादशस्य इति निर्देशाद्वा। एकादश। महतीशब्दस्य पुं
वत्कर्मधारयेति पुंवद्भावे कृते आत्वं। महाजातीया। महदात्वे घासकरविशिष्टेषूपसंख्यानं पुंवद्भावश्च। असामाना
धिकरण्यार्थमिदं। महतो महत्या वा घासो महाघासः। महाकरः। महाविशिष्टः। अष्टनः कपाले हविषि। अष्टाकपा ॥ ६६॥

१०५

ध्वः। गवि च युक्ते। गोशब्दे परे युक्त इत्यर्थे गम्ये अष्टन आत्वं वक्तव्यमित्यर्थः। अष्टागवं शकटं। अच्प्रत्य। न्व वेत्यत्राजिति योगविभागाद्बहुव्रीहावप्यच्। अष्टानां गवां समाहारोऽष्टगवं तद्युक्तं वा छकटमष्टागवमिति वा। द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः। आत्स्यात्। द्वौ च दश च द्वादश। द्व्यधिका दशेति वा। द्वाविंशतिः। अष्टादश। अष्टाविंशतिः। अबहुव्रीह्यशीत्योः किम्। द्वित्राः। द्व्यशीतिः। प्राक्शताद्वक्तव्यम्। नेह। द्विशतं। द्विसहस्रं। त्रेस्त्रयः। त्रिशब्दस्य त्रयस्स्यात्पूर्वविषये। त्रयोदश। त्रयोविंशतिः। बहुव्रीहौ तु त्रिदशाः। सुजर्थे बहुव्रीहिः। अशीतौ तु त्र्यशीतिः। प्राक्शतादित्येव। त्रिशतं। त्रिसहस्रं। विभाषा चत्वारिंशत्प्रभृतौ सर्वेषां। द्व्यष्टनोस्त्रेश्च प्रागुक्तं वा स्याच्चत्वारिंशदादौ परे। द्विचत्वारिंशत्। द्वाचत्वारिंशत्। अष्टचत्वारिंशत्। अष्टाचत्वारिंशत्। त्रिचत्वारिंशत्। त्रयश्चत्वारिंशत्। एवं पञ्चाशत्षष्टिसप्ततिनवतिषु। एकादिश्चैकस्य चादुक्। एकादिर्नञ्प्रकृत्या स्यादेकस्यादुगागमश्च। नञो विंशत्या समासे कृते एकशब्देन सह तृतीयेति योगविभागात्समासः। अनुनासिकविकल्पः। एकेन न विंशतिः। एकान्नविंशतिः। एकाद्नविंश

तिः। एकोनविंशतिरित्यर्थः। षषउत्वं दतृदशधासूत्तरादेष्टुत्वंचधासुवेतिवक्तव्यं। षोडन्। षोडश। षोढा। षड्धा।
परवल्लिंगं द्वन्द्वतत्पुरुषयोः। एतयोः परपदस्येव लिङ्गो स्यात्। कुक्कुटमयूर्याविमे। मयूरीकुक्कुटाविमौ। अर्द्धपिप्पली।
द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वाच्यः। पञ्चसु कपालेषु संस्कृतः पंचकपालः पुरोडाशः। प्राप्तोजी-
विकां प्राप्तजीविकः। आपन्नजीविकः। अलंकुमार्यै अलंकुमारिः। अत एव ज्ञापकात्समासः। निष्कौशांबिः। पूर्ववदश्व-
वउ ५ वडवौ। द्विवचनमतंत्रं। अश्ववडवौ। अश्ववडवान्। अश्ववडवैः। रात्राह्नाहाः पुंसि। एतदन्तौ द्वंद्वतत्पुरुषौ पुंस्येव। अनेन तरत्वा-
त्परं त्वात्परवल्लिंगतापवादो ऽयं परत्वात्समाहारनपुंसकतां बाधते। अहोरात्रः। रात्रेः पूर्वभागः पूर्वरात्रः। पूर्वाह्-
णः। संख्यापूर्वं रात्रं क्लीबं। द्विरात्रं। त्रिरात्रं। गणरात्रं। अपथं नपुंसकं। तत्पुरुष इत्येव। अन्यत्र तु अपथो देशः।
कृतसमासान्तनिर्देशान्नेह। अपंथाः। अर्द्धर्चाः पुंसि वा। अर्द्धर्चादयः शब्दाः पुंसि क्लीबे च स्युः। अर्द्धर्चः। अर्द्धर्चं। ध्व- ॥६०॥
जं। ध्वजः। एवं तीर्थशरीरमंडपयूषदेहांकुशकलशइत्यादि। सनपुंसकम्। समाहारे द्विगुर्द्वंद्वश्च नपुंसकं स्या-

पू

सरवल्लिंगापवादः। पंचगवं। दंतोष्ठं। अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः। पञ्चमूली। आबंतो वा। पंचखट्वी। पंचखट्वं। अनो
नलोपश्च वा च द्विगुः स्त्रियां। पंचतक्षी। पंचतक्षं। पात्राद्यंतस्य न। पंचपात्रं। त्रिभुवनं। चतुर्युगं। पुण्यसुदिनाभ्यामह्नः क्लीबतेष्टा।
पुण्याहं। सुदिनाहं। पथः संख्याव्ययादेः। संख्याव्ययरूपादादेः परः कृतसमासान्तः पथशब्दः क्लीबमित्यर्थः। त्रयाणां पन्थाः त्रिपथं।
कृतसमासान्तग्रहणान्नेह। सुपन्थाः। अतिपन्थाः। सामान्ये नपुंसकं। मृदु पचति। प्रातः कमनीयं। तत्पुरुषो नञ्कर्मधारयः। अ
धिकारार्थः। उपज्ञोपक्रमं तदाद्याचिख्यासायां। उपज्ञांत उपक्रमान्तश्च तत्पुरुषो नपुंसकं स्यात् तयोरुपज्ञायमानोपक्रम्य
माणयोरादिः प्राथम्ये वेदाख्यातुमिष्यते। पाणिनेरुपज्ञा। पाणिन्युपज्ञं ग्रन्थः। नंदोपक्रमं द्रोणः। छाया बाहुल्ये। छायान्तस्त
त्पुरुषो नपुंसकं स्यात् सर्वपदार्थबाहुल्ये। इक्षूणां छाया इक्षुछायं। विभाषासेनेति विकल्पस्यायमपवादः। इक्षुछाया निषादि
न्य इति तु समंतान्निषादिन्य इत्याद्युश्लेषो बोध्यः। सभा राजामनुष्यपूर्वा। राजपर्यायपूर्वः अमनुष्यपूर्वश्च सभांतस्तत्पुरु
षो नपुंसकं स्यात्। इनसभं। ईश्वरसभं। पर्यायस्यैवेष्यते। नेह। राजसभा। चंद्रगुप्तसभा। अमनुष्यशब्दो रूढ्या र
क्षः पिशाचादीनाह। रक्षःसभं। पिशाचसभं। अशाला च। संघातार्थायां सभायां तदंतस्तत्पुरुषं क्लीबं स्यात्। स्त्रीसभं। स्त्री

घा०२

सं तद्दत्यर्थः। अशाला किं। धर्मसभा। धर्मशाला इत्यर्थः। विभाषा सेनासुराच्छायाशालानिशानां। एतदंतस्तत्पुरुषः क्ली
बं वा स्यात्। ब्राह्मणसेनं। ब्राह्मणसेना। यवसुरं। यवसुरा। कुड्यच्छायं। कुड्यच्छाया। गोशालं। गोशाला। श्वनिशं। श्वनिशा।
तत्पुरुषो नञ्कर्मधारय इत्यनुवृत्तेर्नेह। दृढसेनो राजा। असेना। परमसेना॥ ॥इति तत्पुरुषः॥ ॥श्रीः॥ ॥ ॥
शेषो बहुव्रीहिः। अधिकारोऽयं। द्वितीयाश्रितेत्यादिना यस्य त्रिकस्य विशिष्य समासो नोक्तः स शेषः प्रथमांतमित्यर्थः
अनेकमन्यपदार्थे। अनेकं प्रथमांतमन्यस्य पदस्यार्थे वर्तमानं वा समस्यते स बहुव्रीहिः। अप्रथमाविभ क्त्यर्थे
बहुव्रीहिरिति समानाधिकरणानामिति च फलितं। प्राप्तमुदकं यं प्राप्तोदको ग्रामः। ऊढरथो नड्वान्। उपहृतपशु
रुद्रः। उद्धृतौदना स्थाली। पीतांबरः। वीरपुरुषको ग्रामः। प्रथमार्थे तु न। वृष्टे देवे गतः। व्यधिकरणानामपि न। पंच
भिर्भुक्तमस्य। प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः। प्रपतितपर्णः प्रपर्णः। नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः।
अविद्यमानपुत्रः अपुत्रः। अस्तीति विभक्तिप्रतिरूपकमव्ययं। अस्तिक्षीरा गौः। स्त्रियाः पुंवद्भाषितपुंस्कादनूङ्स

॥६८॥

मानाधिकरणे स्त्रियामपूरणीप्रियादिषु। भाषितपुंस्कादनूङ्। ऊङोऽभावोस्यामिति बहुव्रीहिः। निपातनात्। तस्यैवम्याञ्च लुकूप
ष्याश्च लुकू तुल्ये॥ इति निमित्ते यदुक्तं पुंस्कं तस्मात्पर ऊङ् अभावो यत्र तथाभूतं तस्य स्त्रीवाचकशब्दस्य पुंवाचकस्येव रूपं
स्त्रीलिंगं॥२ स्यात्समानाधिकरणे उत्तरपदे न पूरण्यां प्रियादौ च परतः। गोस्त्रियोरिति ह्रस्वः। चित्रा गावो यस्येति लौकिकविग्रहे चित्रा
स्गो जस् इत्यलौकिकविग्रहे। चित्रगुः। रूपवद्भार्यः। चित्राजरतीगौर्यस्येति विग्रहे अनेकोक्तेर्बहूनां बहुव्रीहिः। अत्र के
तन्वीदीर्घजंघः।५ चित्। चित्राजरतीगुः। जरतीचित्रागुर्वा। एवं दीर्घतन्वीजंघः। त्रिपदे बहुव्रीहौ प्रथमं न पुंवत्। उत्तरपदस्य मध्यमेन व्यवधा
नात्। द्वितीयमपि न पुंवत्। पूर्वपदत्वाभावात्। उत्तरपदशब्दो हि समासस्य चरमावयवे रूढः। पूर्वपदशब्दस्तु प्रथमाव
यव इति वदन्ति। वस्तुतस्तु नेह पूर्वपदमाक्षिप्यते आनङ्तद् इत्यत्र यथा। तेनोपान्त्यस्य पुंवदेव चित्राजरद्गुरित्यादि। अत ए
व चित्राजरत्यो गावो यस्येति द्वन्द्वगर्भेऽपि चित्राजरद्गुरिति भाष्यो। कर्मधारयपूर्वपदे तु द्वयोरपि पुंवत्। जरच्चित्रजरद्गुः। क अपि॥
र्मधारयोत्तरपदे तु चित्रजरद्गवीकः। भाषितपुंस्कात्किम्। गंगाभार्यः। अनूङ् किम्। वामोरूभार्यः। पूरण्यां तु। अपूर
णी प्रमाण्योः। पूरणार्थप्रत्ययान्तं यत् स्त्रीलिंगं तदन्तात् प्रमाण्यन्तात् च बहुव्रीहेरप् स्यात्। कल्याणी पंचमी यासां रा

चित्रजरद्गुः।३

त्रीणां ताः कल्याणीपंचमा रात्रयः स्त्रीप्रमाणी यस्य स्त्रीप्रमाणः॥ पुंवद्भावनिषेधो ऽप्रत्ययस्य प्रधानपूरण्यामेव। रात्रिः पू
रणी। वाच्या येत्युक्तोदाहरणे मुख्या चान्यत्र तु। नद्यृतश्च। नद्युत्तरपदादृदंतोत्तरपदाच्च बहुव्रीहेः कप् स्यात्। पुंवद्भावः। के
ऽणः। केपरे ऽणो ह्रस्वः स्यात्। इति प्राप्ते। न कपि। कपिपरे ह्रस्वो न स्यात्। कल्याणपञ्चमीकः पक्षः। अत्र तिरोहितावयव
भेदस्य पक्षस्यान्यपदार्थतया रात्रिरप्रधानं। बहुकर्तृकः। अप्रियादिषु किं। कल्याणी प्रियः। प्रिया। मनोज्ञा। कल्या
णी। सुभगा। दुर्भगा। भक्तिः। सचिवा। स्वसा। कान्ता। क्षान्ता। समा। चपला। दुहिता। वामा। अबला तनया। सामान्ये नपुंस
कं दृढभक्तिर्यस्य स दृढभक्तिः। स्त्रीत्वविवक्षायां तु दृढाभक्तिः। तसिलादिष्वाकृत्वसुचः। तसिलादिषु कृत्वसुजंतेषु प
रेषु स्त्रियाः पुंवत्स्यात्। परिगणनं कर्तव्यं। अव्याप्त्यतिव्याप्तिपरिहाराय। त्रतसौ। तरप्तमपौ। चरट्जातीयरौ। कल्प
॥ ६९॥ देशीयरौ। रूपप्पाशपौ। थाल्। तिल्थ्यनौ। बह्वीषु बहुत्रा बहुतः। दर्शनीयतरा। दर्शनीयतमा। घरूपेति वक्ष्यमा ॥९
णो ह्रस्वः परत्वात् पुंवद्भावं बाधते। पट्वितरा। पट्वितमा। पटुचरी। पटुजातीया। दर्शनीयकल्पा। दर्शनीयदेशीया। ॥६९॥

दर्शनीयरूपा। दर्शनीयपाशा। बहुधा। प्रशस्ता हकी हकतिः। अजा स्यो हिता अजथ्या। शसिव कृत्वा थस्य पुंवद्भावो वक्त
व्यः। बह्वीभ्यो देहि बहुशः। अल्पशः। त्वतलोः गुणवचनस्य। शुक्लाया भावः शुक्लत्वं। शुक्लता। गुणवचनस्य किं
कर्त्र्या भावः कर्त्रीत्वं। शरदः कृतार्थतैत्यादौ तु सामान्ये नपुंसकात्। स्यादेतद्द्वितो हस्तिनीनां समूहो हास्ति
कं। अदे किं रोहिलेयः। स्त्रीभ्यो ढगिति ढोत्र ग्रह्यते। अग्नेर्ढगिति ढकि तु पुंवद्भावः। आग्नेयी देवतास्य स्था
लीपाकस्य आग्नेयः। सपत्नीशब्दस्त्रिधा। शत्रुपर्यायात् सपत्नीशब्दः शाङ्गरवादित्वान्ङीन्येकः। समानः पतिर्य
स्या इति विग्रहे विवाहनिबंधनं पतिशब्दमाश्रित्य नित्यस्त्रीलिङ्गो द्वितीयः। स्वामिपर्यायपतिशब्देन भाषि
तपुंस्कस्तृतीयः। आद्ययोः शिवाद्यणि सपत्न्या अपत्यं सापत्नः। तृतीयात्तु लिङ्गविशिष्टपरिभाषया प
त्युत्तरपदलक्षणो ण्य एवानत्वण्। शिवादौ रूढ्योरेव ग्रहणात् सापत्न्यः। ठक्छसोश्च। भवत्याः छात्राः भाव
काः। भवदीयाः। एतद्वार्त्तिकमेकतद्धितेति सूत्रेन कर्त्तव्यम्। सर्वनाम्नो वृत्तिमात्रे इति भाष्यकारेष्टा गतार्थ

व॰

क१

त्वात्।सर्वमयः।सर्वकाम्यति।सर्विका भार्या यस्य सः सर्वभार्यः।सर्वप्रिय इत्यादि।पूर्वस्यैवेदं।तत्रैषा द्वेति लिङ्गा
त्।तेनाकारे एकशेषवृत्तौ च न।सर्विकाः सर्वाः।कुक्कुट्यादीनामण्डादिषु।कुक्कुट्या अंडं कुक्कुटांडं।मृग्याः पदं
मृगपदं।मृगक्षीरं।काकशावः।क्यङ्मानिनोश्च।एतयोः परतः पुंवत्।एनीवा॰चरति एतायते।श्येनीवा
चरति श्येतायते।स्वलिङ्गां कांचिद्दर्शनीयां मन्यते।दर्शनीयमानिनी।दर्शनीयां स्त्रियं मन्यते।दर्श
नीयमानी चैत्रः।न कोपधायाः।कोपधायाः स्त्रिया न पुंवत्।पाचिका भार्यः।रसिका भार्यः।मद्रिकाय
ते।मद्रिकामानिनी।कोपधप्रतिषेधे तद्धितवुग्रहणं।नेह।पाका भार्या यस्य स पाकभार्यः।संज्ञापूरण्यो
श्च।अनयोर्न पुंवत्।दत्ता भार्यः।दत्तामानिनी।दानक्रियानिमित्तः स्त्रियां पुंसि च संज्ञा।ततोयमिति ला
षितपुंस्कत्वमस्ति।पञ्चमी भार्यः।पञ्चमापाशा।वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे।वृद्धिशब्देन ॥७०॥
विहिताया वृद्धिस्तद्धेतुर्यस्तद्धितोऽरक्तविकारार्थस्तदन्ता स्त्री न पुंवत्।स्रौघ्नी भार्यः।माथुरीयते।मा

112

घृरीमानिनी। रक्ते तु काषायी कन्यास्य स काषायकन्यः। विकारे तु। हैमी मुद्रिका यस्य हैममुद्रिकः। वृद्धिशब्देन वृ
द्धिम्प्रति फलोपधाना लावादि न पुंवत्। वैयाकरणभार्यः। सौवश्वभार्यः। स्वाङ्गाद्ईतः। स्वाङ्गाद्य ईकारस्तद
न्ता स्त्री न पुंवत्। सुकेशीभार्यः। स्वाङ्गात्किम्। पटुभार्यः। इतिः किम्। च्चकेशभार्यः। अमानिनीति
वक्तव्यं। सुकेशमानिनी। सुकेशमानी। जातेश्च। जातेः परो यः प्रत्ययस्तदन्तं न पुंवत्। शूद्राभार्यः। बा
ह्मणीभार्यः। सौत्रस्यैवायं निषेधः। तेन हस्तिनीनां समूहो हास्तिकमित्यत्र न स्यात्। इति लवत्येवासं
ख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये। संख्येयार्थया संख्ययाऽव्ययादयः समस्यन्ते स बहुव्री
हिः। दशानां समीपे ये सन्ति त उपदशाः। नव एकादश वेत्यर्थः। बहुव्रीहौ संख्येय इति वक्ष्यमाणो
डच्। ति विंशतेर्डिति। विंशतेस्तिशब्दस्य लोपः स्याड्डिति। आसन्नविंशाः। विंशतेरासन्ना इत्य
र्थः। अदूरत्रिंशाः। अधिकचत्वारिंशाः। द्वौ वा त्रयो वा द्वित्राः। द्विरावृत्ता दश द्विदशाः। विंशतिरित्यर्थः।

दिङ्नामान्यन्तराले। दिशो नामान्यन्तराले वाच्ये प्राग्वत्। दक्षिणस्याः पूर्वस्याश्च दिशोन्तरालं दक्षिणपूर्वा
नामग्रहणाद्यौगिकानां न। ऐन्द्र्याश्च कौबेर्याश्चान्तरालं। तत्र तेनेदमिति सरूपे। सप्तम्यन्ते ग्रहणविषये
सरूपे पदे तृतीयान्ते च प्रहरणविषये इदं युद्धमित्यर्थे समस्येते कर्मव्यतिहारे स बहुव्रीहिः। इति शब्दा
दयं विषयविशेषो लभ्यते। अन्येषामपि दृश्यते। दीर्घ इत्यनुवर्त्तते। इति कर्मव्यतिहारबहुव्रीहौ पूर्वप
दान्तस्य दीर्घः। इ समासान्तो वक्ष्यते। तिष्ठद्गुप्रभृतिष्विच्प्रत्ययस्य पाठाद[illegible]व्ययीभावत्वं चाव्ययत्वं च।
केशेषु केशेषु गृहीत्वा युद्धं प्रवृत्तं केशाकेशि। दण्डैश्च दण्डैश्च प्रहृत्येदं युद्धं प्रवृत्तं दण्डादण्डि। मुष्टीमुष्टि।
ओर्गुणः। उवर्णान्तस्य भस्य गुणः स्यात्तद्धिते। अवादेशः। बाभ्रवो हविः। ओरोदिति वक्तव्ये गुणोक्तिः सं
ज्ञापूर्वको विधिरनित्य इति ज्ञापयितुं तेन स्वायंभुवमित्यादि सिद्धं। सरूपे किम्। हलेन मुसलेन। तेन
सहेति तुल्ययोगे। तुल्ययोगे वर्त्तमानं सहेत्येतत्तृतीयान्तेन प्राग्वत्। वोपसर्जनस्य। बहुव्रीहेरवयव

स्य सहस्य सः स्याद्वा। पुत्रेण सह सः सपुत्रः सहपुत्रो वागतः। तुल्ययोगवचनं प्रायिकं। सकर्मकः। सलोमकः। प्रकृत्याशिषि।
सहशब्दः प्रकृत्या स्यादाशिषि। स्वस्ति राज्ञे सहपुत्राय सहामात्याय। अगोवत्सहलेष्विति वाच्यं। सगवे। सवत्साय।
सहलाय। बहुव्रीहौ संख्येये डजबहुगणात्। संख्येये यो बहुव्रीहिस्तस्माड्डच् स्यात्। उपदशाः। अबहुगणात् किं।
उपबहवः। उपगणाः। अत्र स्वरे विशेषः। संख्यायास्तत्पुरुषस्य वाच्यः। निर्गतानि त्रिंशतो निस्त्रिंशानि व-
र्षाणि चैत्रस्य। निर्गतः त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः खड्गः। बहुव्रीहौ सक्थ्यक्ष्णोः स्वांगात्षच्। व्यत्ययेन षष्ठी।
स्वांगवाचिसक्थ्यन्ताद्बहुव्रीहेः षच् स्यात्। दीर्घे सक्थिनी यस्य स दीर्घसक्थः। जलजाक्षी। स्वांगात्किं मू
दीर्घस। क्थि शकटं। स्थूलाक्षा वेणुयष्टिः। अक्ष्णोऽदर्शनात्। अंगुलेर्दारुणि। अंगुल्यन्ताद्बहुव्रीहेः षच्
स्याद्दारुण्यर्थे। पञ्चांगुलयो यस्य तत्पञ्चांगुलं दारु। अंगुलीसदृशावयवं धा न्यादिविक्षेपकाष्ठम्। मु
ख्याते। बहुव्रीहिः किं। द्वे अंगुली प्रमाणमस्याः द्व्यंगुला यष्टिः। तद्धितार्थे तत्पुरुषे तत्पुरुषस्यांगुलेरित्य

115

शृहारूणि किमूपंसां गुलि हस्तः ॥ द्वित्रिभ्यां षमूर्द्ध्नः ॥ आभ्यां मूर्द्ध्नः षः स्यात् । बहुव्रीहौ । द्विमूर्द्धः । त्रिमूर्द्धः । नेतुर्नक्षत्रेऽड्वक्तव्यः

२सात्री णां मृगोनेतायासांता मृगनेत्राः रात्रयः । पुष्यनेत्राः ॥ अन्तर्बहिर्भ्यां च लोम्नः ॥ आभ्यां लोम्नोऽप्स्याद्बहुव्रीहौ । अन्तर्लोमः

बहिर्लोमः ॥ अञ्नासिकायाः संज्ञायां नसं चास्थूलात् ॥ नासिकान्ताद्बहुव्रीहेरच् स्यात् । नासिकाशब्दस्य नसंभा

नो तिन तु स्थूलपूर्वात् । पूर्वपदात्संज्ञायामगः ॥ पूर्वपदस्थान्निमित्तात्परस्य नस्य णः स्यात् संज्ञायां न तु गकारव्य

वधाने । द्रुरिव नासिका अस्य द्रुणसः । खरणसः ॥ ऋगः किं । ऋचामयनं ऋगयनो । अ ए ऋगयनादिभ्य इति नि

पातनाण्त्वाभावमाश्रित्य ऋग इति प्रत्याख्यातं भाष्ये । अस्थूलात् किमु । स्थूलनासिकः । खुरखराभ्यां वा नस् ।

खरणाः ।२ खुरणाः । पक्षेऽप् पीष्यते । खुरणसः । खरणसः ॥ उपसर्गाच्च ॥ आहे यो नासिकाशब्दस्तदन्ताद्बहुव्रीहेरच् नासि

कायानसादेशश्च । असंज्ञार्थं वचनं । उन्नता नासिका अस्य उन्नसः । उपसर्गादनोत्पर इति स्त्वंत द्रुन्ला

थकारग्राहात् । उपसर्गाद्बहुलं । उपसर्गस्थान्निमित्तात्परस्य नसो नस्य णः स्याद्बहुलं । प्रणसः ॥ वेर्ग्रो वक्तव्यः । विग ॥७२॥

तां नासिका अस्य विग्रः। ख्यश्च। विख्यः। कथं तर्हि विनसा हतबांधवेति भट्टिः। विगतया नासिकयोपलक्षितेति व्याख्ये
यम्। सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः। एते बहुव्रीहयोऽच्प्रत्ययान्ता निपात्यंते। शोभनं
प्रातरस्य सुप्रातः। शोभनं श्वोऽस्य सुश्वः। शोभनं दिवास्य सुदिवः। शारेरिव कुक्षिरस्य शारिकुक्षः। चतस्रोऽश्रयोऽस्य च
तुरश्रः। एण्या इव पादावस्य एणीपदः। अजपदः। प्रोष्ठो गौः तस्येव पादावस्य प्रोष्ठपदः। नञ्दुःसुभ्यो हलिस
क्थ्योरन्यतरस्याम्। अच् स्यात्। अहळः। अहळिः। असक्थः। असक्थिः। एवं दुःसुभ्यां। शक्त्योरिति पाठांतरं। अ
शक्तः। अशक्तिः। नित्यमसिच् प्रजामेधयोः। नञ्दुःसुभ्य इत्येव। अप्रजाः। दुःप्रजाः। अमेधाः। दुर्मेधाः। सुमेधाः।
धर्मादनिच् केवळात्। केवळात्पूर्वपदात्परो यो धर्मशब्दस्तदन्ताद्बहुव्रीहेरनिच् स्यात्। कल्याणधर्मा। केव
ळात्किम्। परमः स्वो धर्मो यस्येति त्रिपदे बहुव्रीहौ मा भूत्। स्वशब्दो हि न केवळं पूर्वपदं किं तु मध्यमत्वा
दपेक्षितं। संदिग्धसाध्यधर्मेत्यादौ तु कर्मधारयपूर्वपदो बहुव्रीहिः। एवं तु परमस्वधर्मेत्यपि साध्वेव। नि
वृत्तिधर्मा। अनुच्छित्तिधर्मेत्यादिवत्। पूर्वपदं तु बहुव्रीहिणा लक्ष्यते। जम्भा सुहरिततृणसोमेभ्यः। जंभेति कृ

117

तसमा स्तान्तं निपात्यते । जंभो भक्ष्ये दन्ते वा । शोभनो जंभोस्य सुजंभः । हरितजंभा । तृणं भक्ष्यं यस्य त मि

वदन्ता ऋस्येति वा तृणजंभा । एवं सोम जंभा । स्वाहिस्यः कि । पतित जंभः । दक्षिणेर्मा लुब्धयोगे । दक्षिणे मीं

व्रणं यस्य स दक्षिणेर्मा मृगः । व्याधेन कृतव्रण इत्यर्थः । इच् कर्मव्यतिहारे । कर्मव्यतिहारे यो बहुव्रीहिस्तस्मा ति

त्समासान्तः । केशाकेशि । मुसलामुसलि । द्विदंड्यादिभ्यश्च । तादर्थ्येरतुर्थेषां । एषां सिद्ध्यर्थमिच्प्रत्ययः स्या त्

द्वौ दन्तौ यस्मिन् प्रहरणे तत् । द्विदंडि । द्विमुसलि । उभाहस्ति । उभयाहस्ति । प्रसंभ्यां जानुनोर्ज्ञुः । र्वेभ्यां प ए

यो र्जानुशब्दयोर्ज्ञुरादेशः स्याद्बहुव्रीहौ । प्रगते जानुनी यस्य प्रज्ञुः । संज्ञुः । ऊर्ध्वाद्विभाषा । ऊर्ध्वज्ञुः । ऊर्ध्वजा

नुः । धनुषश्च । ध नुरन्तस्य बहुव्रीहेरनङादेशः स्यात् । शार्ङ्गधन्वा । वा संज्ञायां । शतधन्वा । शतधनुः । जा

याया निङ् । जायान्तस्य बहुव्रीहेर्निङादेशः स्यात् । लोपो व्योर्वलि । व कार यकारयोर्लोपः स्याद्वलि । पुं ङ्ग ॥७३॥

वः । युवतिर्जायास्य युवजानिः । गंधस्येदुत्पूतिसुसुरभिभ्यः । एभ्यो गंधस्येकारोंतादेशः स्यात् । उद्गि ।

[118

पूतिगंधिः।सुगंधिः।सुरभिगंधिः।गंधस्येत्वेतदेकांतग्रहणं।एकान्तएकदेशइवाअविभागेनलक्ष्यमाणइत्यर्थः।सु
गंधिःपुष्पंसलिलंच।सुगंधिर्वायुः।नेह।शोभनाःगंधाःद्रव्याण्यस्यसुगंधआपणिकः।अल्पाख्यायां।सूपस्यगं
धोलेशोयस्मिंनतत्सूपगंधिभोजनं।घृतगंधि।गंधोगंधकआमोदेलेशेसंबंधगर्वयोरितिविश्वः।उपमाना
च्च।पद्मस्येवगंधोस्यपद्मगंधिः।पादस्यलोपोऽहस्त्यादिभ्यः।हस्त्यादिवर्जितादुपमानात्परस्यपादशब्दस्य
लोपःस्याद्बहुव्रीहौ।स्थानिद्वारेणयंसमासान्तः।व्याघ्रस्येवपादावस्य।व्याघ्रपात्।अहस्त्यादिभ्यइतिकिं।
हस्तिपादः।कुसूलपादः।कुंभपदीषुच।कुंभपद्यादिषुपादस्यलोपोङीषचनिपात्यतेस्त्रियां।पादःपत्।कुंभ
पदी।स्त्रियांकिं।कुंभपादः।संख्यासुपूर्वस्य।पादस्यलोपःस्यात्समासान्तोबहुव्रीहौ।द्विपात्।सुपात्।वय
सिदन्तस्यदतृ।संख्यासुपूर्वस्यदन्तस्यदतृइत्यादेशःस्याद्वयसि।द्विदन्।चतुर्दन्।षड्दंतोस्यषोडन्।सुदन्। अ२
सुदती।वयसिकिं।द्विदन्तःकरी।सुदन्तः।अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च।एभ्योदन्तस्यदतृवा।कुड्मलाग्र

१२९

दन्त। कुम्भऽव्याघ्रदन्तः। ककुदस्यावस्थायां लोपः। अजातककुत्। पूर्णककुत्। उद्विभ्यां काकुदस्य। लोपः। उत्का
कुत्। विकाकुत्। काकुदं तालु। पूर्णाद्विभाषा। पूर्णकाकुत्। पूर्णकाकुदः। सुहृद्दुर्हृदौ मित्रामित्रयोः। सुदुर्भ्यां हृ
दयस्य हृद्भावो निपात्यते। सुहृन्मित्रं। दुर्हृदमित्रः। अन्यत्र तु सुहृदयः। दुर्हृदयः। उरःप्रभृतिभ्यः कप्। व्यूढोरस्कः।
प्रियसर्पिष्कः। इह पुमान्। अनड्वान्। पयः। नौः। लक्ष्मीरित्येकवचनान्ता निपठ्यंते। द्विवचनबहुवचनान्तेभ्य
स्तु शेषाद्विभाषेति विकल्पेन कप्। द्विपुमान्। द्विपुंस्कः। अर्थान्नञः। अनर्थकः। नञः किम्। अपार्थ क
म्। इनः स्त्रियां। बहुदण्डिका नगरी। अनिनस्मन्ग्रहणान्यनर्थकेनापि तदन्तविधिं प्रयोजयन्ति। बहु
वाग्मिका। स्त्रियां किम्। बहुदण्डी। बहुदण्डिको ग्रामः। शेषाद्विभाषा। अनुक्तसमासान्ताच्छेषाधिका
रस्थबहुव्रीहेः कब्वा स्यात्। महायशस्कः। महायशाः। अनुक्तेत्यादि किम्। व्याघ्रपात्। सुगन्धिः। प्रिय
पथः। शेषाधिकारस्था किम्। उपबहवः। उत्तरपूर्वा। सपुत्रः। तत्रादिनां शेषशब्दोर्थद्वयपरः। आपोन्य
द्यर्थौ
सकेऽद्वारितोऽर्थद्वयस्समर्थकस्तं।

अपार्थम्।६

।।७४।।

तरस्याम्॥ कपि आबन्तस्य ह्रस्वो वा स्यात्। बहुमालाकः। बहुमालकः। कबभावे बहुमालः। न संज्ञायां। शेषाद्दिति
प्राप्तः कम्न स्यात्संज्ञायां। विश्वेदेवा अस्य विश्वदेवः। ईयसश्च। ईयसन्तोत्तरपदान्न कप्। बहवः श्रेयांसोऽस्य बहुश्रे
यान्। गोस्त्रियोरिति ह्रस्वत्वे प्राप्ते। ईयसो बहुव्रीहेर्नेति वाच्यम्। ब व्यः श्रेय स्यो यस्य सः बहुश्रेयसी।
बहुव्रीहि[illegible]। अतिश्रेयसिः। वंदिते भ्रातुः। पूजितेऽर्थे यो भ्रातृशब्दस्तदन्तान्न कप् स्यात्। प्रशस्तो भ्राता यस्य प्र
शस्तभ्रा[illegible]भ्राता। न पूजनादिति निषेधस्तु बहुव्रीहौ सक्थ्यक्ष्णोरित्यतः प्रागेवेति वक्ष्यते। वंदिते किम्। मू
र्खभ्रा[illegible]डीतंत्र्योः स्वांगे। स्वांगे यो नाडीतंत्रीशब्दौ तदन्तात् कप् न स्यात्। बहुनाडिः कायः। बहुतंत्रीर्ग्रीवा। तंत्री
धमनी। स्वा[illegible]प्रत्ययांतत्वात् लाबाद्ध्रस्वो न। स्वांगे किम्। बहुनाडीकस्तंभः। बहुतंत्रीका वीणा। निष्प्रवाणिश्च। कबभा
वोऽत्र निपात्यते। प्रपूर्वाद्वयतेर्ल्युट्। प्रवाणी तंतुवायशलाका। निर्गता प्रवाणी अस्य निष्प्रवाणिः पटः। समाप्तवानः
नवद्ध्रस्वार्थः। ॥ सप्तमीविशेषणे बहुव्रीहौ॥ सप्तम्यन्तं विशेषणं च बहुव्रीहौ पूर्वं प्रयोज्यम्। कंठेकालः। अत एवं ज्ञा

121

पकाद्यधिकरणपदो बहुव्रीहिः।चित्रगुः।सर्वनामसंख्ययोरुपसंख्यानं।सर्वश्वेतः।द्विशुक्लः।मिथोनयोः समासे संख्या पूर्वं शब्दपर
विप्रतिषेधात्।अन्यः।संख्यायाश्च स्त्रीयस्याः।द्वित्राः।द्वंद्वेपि।द्वा दश।वा प्रियस्य।गुडप्रियः।प्रियगुडः।गड्वादेः परा सप्तमी।गडु
कंठः।क्वचिन्न।वहेगडुः।निष्ठा।निष्ठांतं बहुव्रीहौ पूर्वं स्यात्।कृतकृत्यः।जातिकालसुखादिभ्यः परा निष्ठा वाच्या।सारंग
जग्धी।मासजाता।सुखजाता।प्रायिकं चेदं।कृतकटः।पीतोदकः।वाहिताग्न्यादिषु।आहिताग्निः।अग्न्याहितः।आकृ
तिगणोयं।प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ।अस्युद्यतः।दंडपाणिः।क्वचिन्न।विहृतासिः।। ॥इति बहुव्रीहिः॥ ॥ ॥
चार्थे द्वंद्वः।अनेकं सुबंतं चार्थे वर्तमानं वा समस्यते स द्वंद्वः।समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः।परस्परनिरपेक्ष
स्यानेकस्य एकस्मिन्नन्वयः समुच्चयः।अन्यतरस्यानुषंगिकत्वेऽन्वाचयः।मिलितानामन्वय इतरेतरयोगः।समूहः समा
हारः।तत्रेश्वरं गुरुं च भजस्वेति समुच्चये भिक्षामट गां चानयेत्यन्वाचये च न समासोऽसामर्थ्यात्।धवखदिरौ।संज्ञापरि
भाषं।अनेकोक्तेः होतृपोतृनेष्टोद्गातारः।द्वयोर्द्वयोर्द्वंद्वं कृत्वा पुनर्द्वंद्वे तु होतापोतानेष्टोद्गातारः।राजदंतादिषु परं।ए ॥राम॥
षु पूर्वप्रयोगार्हं परं स्यात्।दंतानां राजा राजदंतः।धर्मादिष्वनियमः।अर्थधर्मौ।धर्मार्थौ।जंपती।दंपती।जायापती।जा ।।७५।

याश्चस्युः तावोदं तावच्च वा निपात्येते। आकृतिगणोयं। द्वंद्वे घि। द्वंद्वे घिसंज्ञं पूर्वं स्यात्। हरिश्च हरश्च हरिहरौ। अनेकप्राप्तावेक-
त्र नियमोऽनियमः शेषे। हरिगुरुहराः हरिहरगुरवः। अजाद्यदंतं। इदं द्वंद्वे पूर्वं स्यात्। ईशकृष्णौ। बहुष्वनियमः। अश्वरथेंद्राः।
इंद्राश्वरथाः। घ्यंतादजाद्यदंतं विप्रतिषेधेन। इंद्राग्नी। अल्पाच्तरं। शिवकेशवौ। ऋतुनक्षत्राणां समाक्षराणामानुपूर्व्येण। हे-
मंतशिशिरवसंताः। कृत्तिकारोहिण्यौ। समाक्षराणां किम्। ग्रीष्मवसंतौ। लघ्वक्षरं पूर्वं। कुशकाशं। अभ्यर्हितं च। तापसप-
र्वतौ। वर्णानामानुपूर्व्येण। ब्राह्मणक्षत्रियविट्शूद्राः। भ्रातुर्ज्यायसः। युधिष्ठिरार्जुनौ॥ ॥द्वन्द्वश्च प्राणितूर्यसेनांगानां।
एषां द्वंद्व एकवत्स्यात्। पाणिपादं। मार्दंगिकपाणविकं। रथिकाश्वारोहं। समाहारस्यैकत्वे सिद्धे नियमार्थं प्रकरणं। प्रा-
ण्यंगादीनां समाहार एव यथा स्यात्। अनुवादे चरणानां। चरणानां द्वंद्व एकवत्स्यात् सिद्धस्योपन्यासे स्थेणोर्लुङीति व-
क्तव्यम्। उदगात्कठकालापं। प्रत्यष्ठात्कठकौथुमं। अध्वर्युक्रतुरनपुंसकं। यजुर्वेदे विहितो यः क्रतुस्तद्वाचिनामनपुं-
सकलिंगानां द्वंद्व एकवत्स्यात्। अर्काश्वमेधं। अध्वर्युक्रतुः किम्। इषुवज्रौ सामवेदे विहितौ। अनपुंसकं किम्।
राजसूयवाजपेये। अर्द्धर्चादि। अध्ययनतो विप्रकृष्टाख्यानां। अध्ययनेन प्रत्यासन्ना आख्या येषां तेषां द्वंद्व एकवत्
श्लो॰ समासान्तरावगतस्या येत्स्यरा ईन संकीर्तनमात्रमनुवादः।४ चरणशब्दः शाखानिमित्तकः पुरुषेषु वर्तते।४

ऊ

कलादे॰

123

सि॰स॰

स्याद् । पदकक्रमकं । जातिरप्राणिनां । प्राणिवर्जजातिवाचिनो द्वन्द्व एकवत् । धाना शष्कुलि । प्राणिनां तु विट्शूद्राः । द्रव्यजा
तीनामेव । नेह । रूपरसौ । गमनाकुंचने । जातिप्राधान्य एवायमेकवद्भावः । द्रव्यविशेषविवक्षायां तु । बदरामलकानि । विशिष्टलिं
गो नदीदेशोऽग्रामाः । ग्रामवर्जनदीदेशवाचिनां भिन्नलिंगानां समाहारे द्वन्द्वः स्यात् । उध्यश्च इरावती च उध्येरावती । गंगा
शोणं । कुरवश्च कुरुक्षेत्रं च कुरुकुरुक्षेत्रं । भिन्नलिंगानां किम् । गंगायमुने । मद्रकेकयाः । अग्रामाः किम् । जांबवं नग
रं । शालूकिनी ग्रामः । जांबवशालूकिन्यौ । क्षुद्रजन्तवः । एषां समाहारे द्वन्द्व स्यात् । यूकालिक्षं । आ नकुलात् क्षुद्रज
न्तवः । येषां च विरोधः शाश्वतिकः । एषां प्राग्वत् । अहिनकुलं । गोव्याघ्रम् । काकोलूकमित्यादौ परत्वाद्विभाषा वृक्षमृगे
ति प्राप्तं सकारेण बाध्यते । शूद्राणामनिरवसितानां । अबहिष्कृतानां शूद्राणां प्राग्वत् । तक्षायस्कारं । पात्राद्बहिष्कृता
नां तु । चंडालमृतपाः । गवाश्वप्रभृतीनि च । यथोच्चारितानि । गवाश्वं । दासीदासमित्यादि । विभाषा मृगतृणधा
न्यव्यंजनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणां । वृक्षादीनां सप्तानां द्वन्द्वः । अश्ववडवेत्यादि द्वन्द्वत्रयं स्वभावा ग्र ग्व
त् । वृक्षादौ विशेषाणामेव ग्रहणं । प्लक्षन्यग्रोधं । प्लक्षन्यग्रोधाः । रुरुपृषतं । रुरुपृषताः । कुशकाशं । कुशकाशाः । व्रीहियवं ।

वृक्ष २

॥ द्दी

मे ४

ब्रीहियवाः। दधिघृतं। दधिघृते। गोमहिषं। गोमहिषाः। शुकबकं। शुकबकाः। अश्ववडवं। अश्ववडवौ पूर्वापरे। अधरोत्तरं। अध
रोत्तरे। फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानां बहुप्रकृतिरेव द्वंद्व एकवदिति वाच्यम्। बदराणि चामल
कानि च बदरामलकं। जातिरप्राणिनामित्येकवद्भावः। नेह। बदरामलके। रथिकाश्वारोहौ। प्लक्षन्यग्रोधौ। इत्यादि
विभाषावृक्षेति सूत्रेऽप्राणिनस्तेषां ग्रहणं जातिरप्राणिनामिति नित्यप्राप्ते विकल्पार्थम्। पशुग्रहणं हस्त्यश्वादि
षु सेनांगत्वान्नित्यप्राप्ते। मृगाणां मृगैरेव शकुनीनां तैरेवोभयत्र द्वन्द्वः। अन्यैस्तु सहेतरेतरयोग एवेति नियमार्थं मृग
शकुनिग्रहणं। एवं पूर्वापरमधरोत्तरमित्यपि। अश्ववडवग्रहणं तु पक्षे नपुंसकत्वार्थं। अन्यथा परत्वात्पूर्ववद
श्ववडवाविति स्यात्। विप्रतिषिद्धं चानधिकरणवाचि। विरुद्धार्थानामद्रव्यवाचिनां द्वंद्व एकवद्वा स्यात्। वैकल्पि
कः समाहारे द्वंद्वश्चार्थ इति सूत्रेण प्राप्तः स विरुद्धार्थानां यदि भवति तर्हि अद्रव्यवाचिनामेवेति नियमार्थमिदं। ते
न द्रव्यवाचिनामितरेतरयोग एव। शीतोष्णे उदके स्तः। विप्रतिषिद्धं किम्। नंदकपांचजन्यौ। इह पाक्षिकः समा

हारद्वंद्वो भवत्येव। नदधिपयआदीनि। एतानि नैकवत्स्युः। दधिपयसी। इध्माबर्हिषी। निपातनाद्दीर्घः। ऋक्सामे। वा
ङ्मनसे। अधिकरणैतावत्त्वे च। द्रव्यसंख्यावगमे एकवद्भवतीति नियमो न स्यात्। दश दन्तोष्ठाः। विभाषा समीपे। अ
धिकरणैतावत्त्वस्य सामीप्येन परिच्छेदे समाहार एवेत्येवंरूपो नियमो वा स्यात्। उपदशं दंतोष्ठं। उपदशा दंतो
ष्ठाः। आनङृतो द्वंद्वे। विद्यायोनिसंबंधवाचिनामृदंतानां द्वंद्वे आनङ् स्यादुत्तरपदे परे। होतापोतारौ। हो
तृपो[illegible]नेष्टोद्गातारः। मातापितरौ। पुत्रेन्यतरस्यामित्यतो मंडूकप्लुत्या पुत्र इत्यनुवृत्तेः। पितापुत्रौ। देवताद्वं
द्वे च। इहोत्तरपदे परे आनङ्। मित्रावरुणौ। वायुशब्दप्रयोगे प्रतिषेधः। अग्निवायू। वाय्वग्नी। पुनर्द्वंद्वग्रहणं
प्रसिद्धसाहचर्यस्य परिग्रहार्थं। तेन ब्रह्मप्रजापती इत्यादौ नानङ्। एतद्धि नैकहविःसंगित्वेन श्रुतं। नापि
लोके प्रसिद्धसाहचर्यं। ईदग्नेः सोमवरुणयोः। देवताद्वंद्व इत्येव। अग्नेःस्तुत्स्तोमसोमाः। अग्नेः परेषामेषां ॥७८॥
सस्य षः स्यात् समासे। अग्निष्टुत्। अग्निष्टोमः। अग्नीषोमौ। अग्नीवरुणौ। इद्वृद्धौ। वृद्धिमत्युत्तरपदे अग्ने

रिदादेशः स्याद्देवताद्वन्द्वे। अग्नामरुतौ देवतास्य आग्निमारुतं कर्म। अग्नीवरुणौ देवतास्य आग्निवारुणं देवताद्वन्द्वे
नेत्युत्तरपदवृद्धिः। अलौकिके वाक्ये आनङ् मीत्वं बाधित्वा इः। वृद्धौ किम्। अग्नेन्द्रः। नेन्द्रस्य परस्येत्युत्तरपदवृद्धि
प्रतिषेधः। विष्णौ न। आग्नावैष्णवं। दिवो द्यावा। देवताद्वन्द्वे उत्तरपदे। द्यावाक्षमी। द्यावाक्षामा। दिवसश्च पृथिव्यां। दिव
इत्येव। सा द्यावा। आदेशे अकारोच्चारण सकारस्य रुत्वं मा भूदित्येतदर्थं। द्यौश्च पृथिवी च दिवस्पृथिव्यौ। द्याव
पृथिव्यौ। छंदसि दृष्टानुविधिः। द्यावा चिदस्मै पृथिवी। दिवस्पृथिव्योररतिरित्यत्र पृहकारा विसर्गं पठन्ति। मातर
पितरावुदीचां। उदीचां किम्। मातापितरौ॥ ॥द्वन्द्वाच्चुदषहान्तात्समाहारे। चवर्गा दषहान्ताच्च द्वन्द्वाट्टच्समाहा
१ वाक्त्विषम् रे। वाक्त्वचं। त्वक्स्रजं। शमीदृषदं। छत्रोपानहं। समाहारे किम्। प्रावृट्शरदौ॥ ॥इति द्वन्द्वः॥ ॥७॥
अथैकशेषः। सरूपाणां। रामौ। रामाः। विरूपाणामपि समानार्थानां। वक्रदंडश्च कुटिलदंडश्च वक्रदंडौ। कु
टिलदन्डौ। वृद्धो यूना तल्लक्षणश्चेदेव विशेषः। यूना सहोक्तो गोत्रं शिष्यते। गोत्रयुवप्रत्ययमात्रकृतं चे
त्तयोः कृत्स्नं वैरूप्यं स्यात्। गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ। वृद्धः किम्। गर्गगार्ग्यायणौ। यूना किम्। गर्गगा

ग्यौ। तल्लक्षणः किम्। भागवित्तिभागवित्तिकौ। कुत्स्ने किम्। गार्ग्यवात्स्यायनौ। स्त्री पुंवच्च। यूना सहोक्तौ वृद्धा स्त्री शिष्य
ते तदर्थश्च पुंवत्। गार्गी च गार्ग्यायणश्च गार्ग्यौ। स्त्रियामित्यनुवर्त्तमाने यञञोश्चेति लुक्। दाक्षी च दाक्षायणश्च दा
क्षी। पुमान् स्त्रिया। स्त्रिया सहोक्तौ पुमान् शिष्यते स च पुंवदेव स्यात्। तल्लक्षणएव विशेषश्चेत्। हंसी च हंसश्च
हंसौ। भ्रातृपुत्रौ स्वसृदुहितृभ्याम्। भ्राता च स्वसा च भ्रातरौ। पुत्रश्च दुहिता च पुत्रौ। नपुंसकमनपुं
सकेनैकवच्चास्यान्यतरस्याम्। अक्लीबेन सहोक्तौ क्लीबं शिष्यते तच्च वा एकवत्स्यात्। तल्लक्षणएव विशेष
श्चेत्। शुक्लः पटः। शुक्ला पटी। शुक्लं वस्त्रं। तदिदं शुक्लं तानीमानि शुक्लानि। पिता मात्रा। मात्रा सहोक्तौ पि
ता वा शिष्यते। माता च पिता च पितरौ। मातापितरौ। श्वशुरः श्वश्र्वा। श्वश्र्वा सहोक्तौ श्वशुरो वा शिष्यते। श्व
शुरौ। श्वश्रूश्वशुरौ वा। त्यदादीनि सर्वैर्नित्यम्। सर्वैः सहोक्तौ त्यदादीनि नित्यं शिष्यन्ते। स च देवदत्तश्च
तौ। त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यते। स च यश्च यौ। पूर्वशेषोऽपि दृश्यत इति भाष्यम्। त्यदादि ।।७८।।

दृ

स च यश्च तौ।

तः शेषे पुंनपुंसकतो लिङ्गवचनानि [illegible] । सा च देवदत्तश्च तौ । तत्र देवदत्ता च यज्ञदत्ता च ता । नि । पुंनपुंसकयोस्तु ।
परत्वान्नपुंसकं शिष्यते । तच्च देवदत्तश्च ते । अद्वंद्वतत्पुरुषविशेषणानामिति वक्तव्यम् । कुक्कुटमयूर्याविमे । मयूरीकु-
क्कुटाविमौ । तत्र सा च अर्द्धपिप्पल्यौ ते । ग्राम्यपशुसंघेषु अतरुणेषु स्त्री । एषु सह विवक्षायां स्त्री शिष्यते । पुमान् स्त्रियेत्य-
स्यापवादः । गाव इमाः । ग्राम्येति किम् । रुरव इमे । पशुषु किम् । ब्राह्मणाः । संघेषु किम् । एतौ गावौ । अतरुणेषु किं-
वत्सा इमे । अनेकशफेष्विति वाच्यम् । अश्वा इमे । इह सर्वत्रैकशेषकृतेऽनेकत्वाभावाद् द्वंद्वो न । तेन शिरसी शिरां-
सीत्यादौ समासस्यैत्वं नोह्यं । ततः प्राण्यङ्गत्वादेकवद्भावश्च न । पन्थानौ पन्थान इत्यादौ समासान्तो न ॥ ॥ इत्ये-
कशेषः ॥ ॥ कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः । परार्थाभिधानं वृत्तिः । वृत्त्यर्थबोध-
कं वाक्यं विग्रहः । स द्विधा । लौकिको लौकिकश्चापरिनिष्ठितत्वात्साधुर्लौकिकः । प्रयोगानर्होऽसाधु-
रलौकिकः । यथा राज्ञः पुरुषः । राजन् ङस् पुरुष सु इति । अविग्रहो नित्यसमासोऽस्वपदविग्रहो वा । स-
मासश्चतुर्द्धेति प्रायोवादः । अव्ययीभावतत्पुरुषद्वंद्वाधिकारबहिर्भूतानामपि सह सुपेति विधानात् ।
बहुव्रीहिः

129

पूर्वपदार्थप्रधानोऽव्ययीभावः॥उत्तरपदार्थप्रधानस्तत्पुरुषः॥अन्यपदार्थप्रधानोबहुव्रीहिः॥उभयपदार्थप्र
धानोद्वंद्वः अस्यापि प्राचांप्रवादः प्रायोभिप्रायः।सूपप्रति।उन्मत्तगंगं इत्याद्यव्ययीभावे।अतिमालादौतत्पुरुषे द्वि
इत्यादि चाः बहुव्रीहौदंतोष्ठमित्यादि द्वन्द्वेचास्तायात्।तत्पुरुषविशेषःधारयः।तद्विशेषोद्विगुः।अनेकपदत्वं कर्म
द्वंद्वबहुव्रीह्योरेव।तत्पुरुषस्यक्वचिदेवे सुक्तं।किंच सुपांसुपातिङानाम्नाधातुनाथतिङांतिङा।सुबंतेनेति
ज्ञे॥ चद्वेयःसमासःषड्विधोबुधैः॥१॥सुपा।राजपुरुषः।तिङा।पर्यभूषत्।नाम्ना।कुंभकारः।धातुना।कटप्रूः।अजस्रं।
तिङांतिङा।पिबतखादता।तिङांसुपा।कृंतविचक्षणेनियस्यांक्रियायां।साकृंतविचक्षणा।एहीदयोन्यपदा डा६
र्थेइतिमयूरव्यंसकादौपाठात्समासः॥ ॥इतिसर्वसमासशेषः॥ ॥ऋक्पूरब्धूःपथामानक्षे।अअनक्षइति
दः।प छेकगाद्यंतस्यसमासस्यअप्रत्ययोऽवयवःस्यात्।ऋचःसेयाधूस्तदंतस्यटुन।अर्द्धर्चः।अनृचबह्वृचावध्येतर्ये
व।नेह अनृक्साम।बह्वृक्सूक्तं।विष्णोःपूः विष्णुपुरं।क्लीबत्वंलोकात्।विमलापंसरः।द्व्यंतरुपसर्गेभ्योपईत्।
अपइतिकृतसमासांतस्यानुकरणं।षष्ठ्यार्थेप्रथमा।एभ्योऽपस्यईत्स्यात्।द्विर्गताआपोस्मिन्नितिद्वीपं।अंत ॥७९॥

130

रीपं। प्रतीपं॰ समीपं। समापो देवयजनमिति तु समाः आपो ऽस्मिन्निति बोध्यम्॥ ऋक्त   समासान्तग्रहणान्नेह। खपूः। खपी। अव
र्णं ति। द्रा। क्षेपं। परेपं। आपं। परापं॥   गुदनो देशे। अनोः परस्याप स्य उत्स्याद्देशे। अनूपो देशः। राजधुरा। अक्षे तु। अक्षधूः।
दृढधूरक्षः। सखिपथोरप्यपथो देशः। अस्यत्यन्वव पूर्वात्सामलोम्नः। एतत्पूर्वात्सामलोमान्तात्समासादच् स्यात्। प्र
तिसामं। अनुसामं। अवसामं। प्रतिलोमं। अनुलोमं। अवलोमं। कृष्णोदक्पाण्डुसंख्यापूर्वाया भूमेरजिष्यते। कृष्ण
भूमः। उदग्भूमः। पाण्डुभूमः। द्विभूमः। त्रिभूमः। प्रासादः। संख्याया नदीगोदावरीभ्यां च। पंचनदं। सप्तगोदावरं। अजि
तियोगविभागादन्यत्रापि। पद्मनाभः। ऊर्णनाभः। अबहुःपर्ययादह्नो नु समासान्तः। गवामह्नीव गवाह्नः।
अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुह   र्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिं
दिवाहर्दिवसर   ज   सनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठ
श्वाः। एते पञ्चविंशतिरजन्ता निपात्यन्ते। आद्यास्त्रयो बहुव्रीहयः। अविद्यमानानि चत्वार्यस्यात् अचतुरः। विचतुरः।

सुचतुरः। त्र्युपाभ्यां चतुरो जिष्यते। त्रिचतुराः। चतुर्णां समीपे उपचतुराः। ततएकादश द्वंद्वाः। स्त्रीपुंसौ। धेन्वनडुहौ। ऋक्सा
मे। वाङ्मनसे। अक्षिणी च भ्रुवौ चाक्षिभ्रुवं। दाराश्च गावश्च दारगवं। ऊरू चाष्ठीवन्तौ च ऊर्वष्ठीवं। निपातनाट्टिलोपः।
पदष्ठीवम्। निपातनात्पादशब्दस्य पद्भावः। नक्तं च दिवा च नक्तं- दिवं। रात्रौ च दिवा च रात्रिंदिवं। रात्रेर्मान्तत्वं नि
पात्यते। अहनि च दिवा च अहर्दिवं। वीप्सायां द्वन्द्वो निपात्यते। अहन्यहनीत्यर्थः। सरजसं इति साकल्येऽव्ययी
जम्५ भावः। बहुव्रीहौ तु। सरजः पंकं। निश्चितं श्रेयः निःश्रेयसं। तत्पुरुष एवायं नेह। निश्रेयान् पुरुषः। पुरुषस्यायुः पु
रुषायुषं। ततो द्विगू। द्व्यायुषं। त्र्यायुषं। ततो द्वन्द्वः। ऋग्यजुषं। ततस्त्रयः कर्मधारयाः। जातोक्षः। महोक्षः। वृद्धो
क्षः। शुनः समीपमुपशुनं। टिलोपाभावः संप्रसारणं च निपात्यते। गोष्ठे श्वा गोष्ठश्वः। ब्रह्महस्तिभ्यां वर्चसः।
अच् स्यात्। ब्रह्मवर्चसं। हस्तिवर्चसं। पल्यराजभ्यां चेति वक्तव्यं। पल्यवर्चसं। राजवर्चसं। अवसमंधेभ्यस्तमसः॥ ॥८०॥
य१ अवतमसं। संतमसं। अंधयतीत्यंधः पचाद्यच्। अंधं तमोंधतमसं। श्वसो वसीयःश्रेयसः। वसुशब्दः प्रशस्तवा

132

वीतत ईयसुनि वसीयः। श्वस्शब्द उत्तरपदार्थप्रशंसामाशीर्विषयमाह। मयूरव्यंसकादित्वात्समासः। श्वोवसीयसम्। श्वः श्रेयसं तेभू
यात्। अन्ववतप्ताद्रहसः। अनुरहसं। अवरहसं। तप्तरहसं। प्रतेरुरसः सप्तमीस्थात्। उरसि प्रत्युरसं। विभक्त्यर्थेऽव्ययीभावः
अनुगवमायामे। एतन्निपात्यते दीर्घत्वे। अनु[illegible]यानं यस्य वा यामः इति समासः। द्विस्तावा त्रिस्तावा वेदिः। अ २ प्रत्य वाम
यष्टिलोपः समासश्च निपात्यते। यावती प्रकृतौ वेदिस्ततो द्विगुणा त्रिगुणा वा अश्वमेधादौ। तत्रेदं निपातनं। वेदिरिति
किं। द्विस्तावती त्रिस्तावती रज्जुः। उपसर्गाद्ध्वनः। प्रगतो ध्वानं प्राध्वो रथः। न पूजनात्। पूजनार्थात्परस्य समासान्ता न स्युः। थपि
सुराजा। अतिराजा। स्वतिस्यामेव नेह। परमराजः। पूजना किं। गामतिक्रांतोऽतिगवः। बहुव्रीहौ सक्थ्यक्ष्णोरित्यतः
प्रागेवायं प्रतिषेधः नेह। सुसक्थः। स्वक्षः। किमः क्षेपे। क्षेपे यः किंशब्दस्ततः परं यत्तदंता समासांता न स्युः। कुत्सितो रा
जा किंराजा। किंसखा। किंगौः। क्षेपे किं। किंराजः। किंसखः। किंगवः। नञस्तत्पुरुषात्। समासांतो न। अराजा। अस

133

स्वा॥ नसुरूषा किमू। अधुरं शकटं। पथो विभाषा॥ नञ्पूर्वात्पथो वा समासांतः। अपथं। अपंथाः। नसुरूषा इत्येव।
अपथो देशः। अपथं वर्त्तते॥ ॥इति समासान्ताः॥ ॥अलुगुत्तरपदे॥ अलुगधिकारः प्रागानङः। उत्तरपदाधिकार
स्त्वा पादपरिसमाप्तेः। पंचम्याः स्तोकादिभ्यः। एभ्यः पंचम्या अलुक् स्यादुत्तरपदे। स्तोकान्मुक्तः। एवमन्तिकार्थ
कृच्छ्रेभ्यः। उत्तरपदे किं। निष्क्रांतः स्तोकान्निस्तोकः। ब्राह्मणाछंसिन उपसंख्यानम्। ब्राह्मणविहितानि शा
स्त्राणि तत्परतया ब्राह्मणानि। तानि शंसतीति ब्राह्मणाछंसी। ऋत्विग्विशेषः। द्वितीयार्थे पंचम्युपसंख्यानादे
वा। ओजःसहोंभस्तमसस्तृतीयायाः। ओजसाकृतमित्यादि। अंजसउपसंख्यानं। अंजसा कृतं। आर्जवेन कृतमित्य
र्थः। पुंसानुजो जनुषांध इति च। यस्याग्रजः पुमान् स पुंसानुजः। जनुषांधो जात्यंधः। मनसः संज्ञायां। मन
सागुप्ता। आज्ञायिनि च। मनस इत्येव। अमनसा आज्ञातुं शीलमस्य मनसाज्ञायी। आत्मनश्च। आत्मनस्

सा २

द्रि।

ऽः ॰

साध्य

ष्पुर

॥८१॥

134

तीयाया अलुक् स्यात्।। पूरण इति वक्तव्यम्।। पूरणप्रत्ययान्ते उत्तरपदे इत्यर्थः।। आत्मनापञ्चमः।। जनार्दनस्त्वात्मचतु
तु२ र्थ एवेति बहुव्रीहिर्बोध्यः।। पूरणे किं।। आत्मकृतौ वैयाकरणाख्यायां चतुर्थ्याः।। आत्मन इत्येव।। आत्मनेपदं।। आत्मने
भाषा।। तादर्थ्ये चतुर्थी।। चतुर्थी इति योगविभागात्समासः।। परस्य च।। परस्मैपदं।। परस्मैभाषा।। हलदंतात्सप्तम्याः
संज्ञायां।। हलदंतादकारान्तात्सप्तम्या अलुक् संज्ञायां।। त्वचिसारः।। गवियुधिभ्यां स्थिरः।। आभ्यां स्थिरस्य षः स्या समा॰
त्।। गविष्ठिरः।। अत्रागवीति वचनादेवालुक्।। युधिष्ठिरः।। अरण्येतिलकः।। अत्र संज्ञायामिति सप्तमीसमासः।।
हृद्युभ्यां ङेः।। हृदिस्पृक्।। दिविस्पृक्।। मध्याद्गुरौ।। मध्येगुरुः।। अन्ताच्च।। अंतेगुरुः।। अमूर्धमस्तकात्स्वांगादका
मे।। कंठेकालः।। उरसिलोमा।। अमूर्धमस्तकात्किं।। मूर्धशिखः।। मस्तकशिखः।। अकामे किं।। मुखेका
मोस्य मुखकामः।। तत्पुरुषे कृति बहुलं।। स्तम्बेरमः।। कर्णेजपः।। क्वचिन्न।। कुरुचरः।। घकालतनेषु कालना

135

म्नः। सप्तम्या विभाषालुक् स्यात्। घ। पूर्वाह्णेतरे। पूर्वाह्णतरे। पूर्वाह्णेतमे। पूर्वाह्णतमे। काल। पूर्वाह्णेकाले। पूर्वा-
ह्णकाले। तन। पूर्वाह्णेतने। पूर्वाह्णतने। शयवासवासिष्वकालात्। खेशयः। खशयः। ग्रामेवासः। ग्रामवासः। ग्रामे-
वासी। ग्रामवासी। अपो योनियन्मतुषु। अप्सुयोनिः रूसत्तिर्यस्य सोऽप्सुयोनिः। अप्सुभवोऽप्सव्यः। अप्सु-
मंतावाज्यभागौ। षष्ठ्या आक्रोशे। चौरस्यकुलं। आक्रोशे किं। ब्राह्मणकुलं। वाग्दिक्पश्यद्भ्यो युक्तिदण्डह-
रेषु। वाचोयुक्तिः। दिशोदण्डः। पश्यतोहरः। आमुष्यायणामुष्यपुत्रिकामुष्यकुलिकेति वा। अमुष्यापत्यं
आमुष्यायणः। नडादित्वात्फक्। अमुष्यपुत्रस्य भाव आमुष्यपुत्रिका। मनोज्ञादित्वाद्वुञ्। एवमामुष्यकु-
लिका। देवानांप्रिय इति च मूर्खे। अन्यत्र देवप्रियः। शेपपुच्छलांगूलेषु शुनः। शुनःशेपः। शुनःपुच्छः। शु- ॥८२॥
नोलांगूलः। दिवश्च दासे। दिवोदासः। पुत्रेऽन्यतरस्याम्। षष्ठ्याः पुत्रेऽलुग्वा निंदायां। दास्याःपुत्रो दासीपु-

त्रः॥ निंदायां किम्॥ ब्राह्मणीपुत्रः॥ अतो विद्यायोनिसंबंधेभ्यः॥ विद्यासंबंधयोनिसंबंधवाचिनऋदन्तात्षष्ठ्या अलुक्॥ होतुरंतेवासी॥
होतुःपुत्रः॥ पितुरंतेवासी॥ पितुःपुत्रः॥ विद्यायोनिसंबंधेभ्यस्तत्पूर्वोत्तरपदग्रहणं॥ नेह॥ होतृधनं॥ पितृगृहं॥ विभाषा स्वसृपत्योः॥ ऋ
दंतात्षष्ठ्या अलुग्वा स्वसृपत्योः परयोः॥ मातुःपितुर्भ्यामित्यतरस्यां मूर्धन्यस्यांस्वसुः सस्य षो वा स्यात्समासे॥ मातुःष्वसा॥
मातुःस्वसा॥ पितुःष्वसा॥ पितुःस्वसा॥ लुक्पक्षे॥ मातृपितृभ्यां स्वसा॥ आभ्यां परस्य स्वसुः सस्य षः स्यात्समासे॥ मातृष्व
सा॥ पितृष्वसा॥ असमासे तु॥ मातुः स्वसा॥ पितुःस्वसा॥ ॥इत्यलुक्समासः॥ ॥घरूपकल्पचेलड्ब्रुवगोत्रमत ५
हतेषु ङ्योऽनेकाचो ह्रस्वः॥ भाषितपुंस्काद्योऽङीतदन्तस्यानेकाचो ह्रस्वः स्यात् घरूपकल्पत्ययेषु परेषु चेलडादिषु च स्वः६
सोत्तरपदेषु॥ ब्राह्मणितरा॥ ब्राह्मणितमा॥ ब्राह्मणिरूपा॥ ब्राह्मणिकल्पा॥ ब्राह्मणिचेली॥ ब्राह्मणिब्रुवा॥ ब्राह्मणि
गोत्रेत्यादि॥ ब्रूञः पचाद्यच् विवक्ष्यादेशगुणयोरभावोऽपि निपात्यते॥ चेलडादीनि वृत्तिविषये कुत्सनवाचीनि॥ कु
त्सितानि कुत्सनैरिति समासः॥ अकिमूदन्तातरा॥ भाषितपुंस्का किम्॥ आमव्क्रीतरा॥ कुवल्लीतरा॥ नद्याः शेषस्या

न्यतरस्याम्॥ अङ्यंतनद्याः ङ्यंतैकाचश्च घादिषु ह्रस्वो वा स्यात्॥ ब्रह्मबंधूतरा। ब्रह्मबंधुतरा। स्त्रीतरा। स्त्रि
तरा॥ कृन्नद्यां न। लक्ष्मीतरा॥ उगितश्च॥ उगितश्च परा या नदी तदंतस्य घादिषु ह्रस्वो वा स्यात्॥ विदुषितरा॥ ह्रस्वाभा
पेवेसे तसिलादिष्विति पुंवत्॥ विद्वत्तरा॥ ह्रस्वादिषु विदुषीतरेत्युदाहृतं तन्निर्मूलं॥ पादस्य पदाज्यातिगोप
हतेषु॥ एषूत्तरपदेषु पादस्य पद इत्ययमादेशः स्यात्॥ पादाभ्यामजतीति पदाजिः॥ पदातिः॥ अड्यतिस्यांपादेच
तीराश्रययः॥ अजेर्व्यत्तावो निपातनात्॥ पदगः॥ पदोपहतः॥ पद्यत्यतदर्थे॥ पादस्य पत्स्यादतदर्थे यति परे॥ पादौ
विध्यंतीति पद्याः शर्कराः॥ अतदर्थे किं॥ पादार्थमुदकं पाद्यं॥ इके चरतावुपसंख्यानं॥ पादाभ्यां चरतीति पदिकः॥ प
पा॥ दित्यारष्ठनू॥ हिमकाषिहतिषु च॥ पद्धिमं॥ पत्काषी॥ पद्धतिः॥ ऋचः शे॥ ऋचः पादस्य पत्स्याच्छे परे॥ गायत्र्या
पच्छः शंसति॥ पादंपादमित्यर्थः॥ ऋचः किं॥ पादशः कार्षापणं ददाति॥ उदकस्योदः संज्ञायां॥ उ[illegible]मेघः॥ उ
त्तरपदस्य चेति वक्तव्यं॥ क्षीरोदः॥ पेषंवासवाहनधिषु च॥ उदपेषं पिनष्टि॥ उदवासः॥ उदधिर्घटः॥ समुद्रे तु
पूर्वेण सिद्धं॥ एकहलादौ पूरयितव्येऽन्यतरस्यां॥ उदकुंभः॥ उदककुंभः॥ एकेति किं॥ उदकस्थालः॥ पूरयितव्ये किं॥ उ

उदवाहनः॥२

त५

॥८३॥

द२

दकपर्वतः। मंथौदनसक्तुबिंदुवज्रभारहारवीवधगाहेषु च। उदमन्थः। उदकमंथः। उदौदनः। उदकौदनः॥ ॥ इको ह्रस्वोऽङ्यो गालवस्य। इगंतस्या
ङ्यंतस्य ह्रस्वो वा स्यादुत्तरपदे। ग्रामणिपुत्रः। ग्रामणीपुत्रः। इकः किम्। रमापतिः। अङ्यः किम्। गौरीपतिः। गालवग्रहणं पूजार्थम्। अन्यतरस्या
मित्यनुवृत्तेः। इयङुवङ्भाविनामव्ययानां च नेति वाच्यम्। श्रीमदः। भ्रूभंगः। शुक्लीभावः। भ्रुकुंसादीनामिति वक्तव्यम्। भ्रुकुंसः। भ्रु
कुटिः। भ्रूकुंसः। भ्रूकुटिः। अकारोऽनेन विधीयत इति व्याख्यांतरम्। भ्रकुंसः। भ्रकुटिः। भ्रुवा कुंसो भाषणं शोभा वा यस्य सः। स्त्री
वेषधारी नर्तकः। भ्रुवः कुटिः कौटिल्यम्। ष्यङः संप्रसारणं पुत्रपत्योस्तत्पुरुषे। ष्यङंतस्य पूर्वपदस्य संप्रसारणं स्यात्पुत्रपत्यो
रुत्तरपदयोस्तत्पुरुषे। संप्रसारणस्य। संप्रसारणस्य दीर्घः स्यादुत्तरपदे परे। कौमुदगंध्यायाः पुत्रः कौमुदगंधीपुत्रः। कौ
मुदगंधीपतिः। व्यवस्थितविभाषया ह्रस्वो न। स्त्रीप्रत्यये चानुपसर्जने नेति तदादिनियमप्रतिषेधात्। परमकारीषगं
धीपुत्रः। उपसर्जने तु तदादिनियमान्नेह। अतिकारीषगन्ध्यपुत्रः। इष्टकेषीकामालानां चिततूलभारिषु। इष्टकादी
नां तदंतानां च पूर्वपदानां चितादिषु क्रमादुत्तरपदेषु ह्रस्वः स्यात्। इष्टकचितं। पक्वेष्टकचितं। इषीकतूलं। मुंजेषीकतू
लं। मालभारी। उत्पलमालभारी। कारे सत्यागदस्य। मुम् स्यात्। सत्यंकारः। अगदंकारः। अस्तोश्चेति वक्तव्यम्। अस्तुंका
रः। धेनोर्भव्यायाम्। धेनुंभव्या। लोकस्य पृणे। लोकंपृणः। पृण इति मूलविभुजादित्वात्कः। इत्येऽनभ्याशस्य। अनभ्या
शमित्यः। दूरतः परिहर्तव्य इत्यर्थः। भ्राष्ट्राग्न्योरिंधे। भ्राष्ट्रमिंधः। अग्निमिंधः। गिलेऽगिलस्य। तिमिंगिलः। अ[illegible]ल
गि

६१

स्यकिम्। गिलगिलः। गिलगिले च। तिमिंगिलगिलः। उष्णभद्रयोः करणे। उष्णंकरो। भद्रंकरो। रात्रेः कृति विभाषा। रात्रिंचरः। रात्रि-
चरः। रात्रिमटः। रात्र्यटः। अखिदर्थमिदं तेनम्। खिति तु अरुर्द्विषदिति नियमेव दृश्यते। रात्रिंमन्यः। समानस्य छन्दस्यमूर्द्ध-
प्रभृत्युदर्केषु। समानस्य सः स्यादुत्तरपदे न तु मूर्द्धादिषु। अनुभ्राता सगर्भ्यः। अनुसखा सयूथ्यः। यो नः सनुत्यः। तत्र सव
१८४॥ त्यर्थे सगर्भसयूथसनुताद्यत्। अमूर्द्धादिषु किम्। समानमूर्द्धा। समानप्रभृतयः। समानोदर्काः। समानस्येति यो
गो विभज्यते। तेन सपक्षः। साधर्म्यं सजातीयमित्यादि सिद्धमिति काशिका। अथवा [illegible] सदृशवचनोऽस्ति। स
दृशः सखा ससखवीति यथा। तेनायमस्वपदविग्रहो बहुव्रीहिः। समानः पक्षोऽस्येत्यादि। ज्योतिर्जनपदरात्रिना-
भिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु। एषु द्वादशसूत्तरपदेषु समानस्य सः स्याद्[illegible] समानत्वेन गम्य-
माने। चरणं शाखा। ब्रह्म वेदः। तदध्ययनार्थं व्रतमपि ब्रह्म। तच्चरतीति ब्रह्मचारी। समानः सः। सब्रह्मचारी।
तीर्थे ये। तीर्थे उत्तरपदे यादौ प्रत्यये विवक्षिते समानस्य सः स्यात्। सतीर्थ्यः। एकगुरुकः। समानतीर्थे वा- ॥राम॥
सीति यत्प्रत्ययः। विभाषोदरे। यादौ प्रत्यये विवक्षित इत्येव। सोदर्यः। समानोदर्यः। दृग्दृशवतुषु। सदृक्। १८४॥
सदृशः। दृक्षे चेति वक्तव्यम्। सदृक्षः। वतुरुक्तार्थः। इदंकिमोरीश्की। दृग्दृशवतुषु इदम ईश्। किमः की[illegible]
समानस्य सः स्यात्। सज्योतिः। सजनपद इत्यादि। चरणे ब्रह्मचारिणि। ब्रह्मचारिण्युत्तरपदे ५

140

त्यादृक्। ईदृशः। कीदृक्। कीदृशः॥ वतूदृशा दृशएव ह्यते दृक्षे च। ईदृक्षः। कीदृक्षः॥ आ सर्वनाम्नः॥ सर्वनाम्न आकारः स्याद् दृ
ग्दृशवतुषु। तादृक्। तादृशः। तावान्। तादृक्षः॥ दीर्घः ॰मवौ वे। अमूदृशः। अमूदृक्। अमूदृक्षः॥ अषष्ठ्यतृतीयास्थस्या
न्यस्य दुगाशीराशास्थास्थितोत्सुकोतिकारकरागछेषु॥ अन्यशब्दस्य दुगागमः स्यादाशीरादिषु परेषु। अन्यदाशीः।
अन्यदाशा। अन्यदास्था। अन्यदास्थितः। अन्यदुत्सुकः। अन्यदूतिः। अन्यद्रागः। अषष्ठीत्यादि किम्। अन्यस्या
न्ये न वाऽऽशीः रन्याशीः। कारकेच्छेऽर्थे नायं प्रतिषेधः। अन्यस्य कारकोऽन्यत्कारकः। अन्यस्यायमन्यदीयः। गहा
देराकृतिगणत्वान्न छः। अर्थे विभाषा। अन्यदर्थः। अन्यार्थः। कोः कत्तत्पुरुषेऽचि। अजादावुत्तरपदे कुत्सि
तोऽश्वः कदश्वः। कदन्नं। न तत्पुरुषे किम्। कूष्ट्रो राजा। त्रौ च। कुत्सितास्त्रयः कत्त्रयः। रथवदयोश्च। कद्रथः।
कद्वदः। तृणे च जातौ। कत्तृणं। कापथ्यक्षयोः। कापथं। काक्षः। अलिशब्देन तत्पुरुषः। अलिशब्देन बहुव्रीहिर्वा।
ईषदर्थे। ईषज्जलं काजलं। अनादावपि परत्वात् कादेशः। काम्लं। विभाषा पुरुषे। कापुरुषः। कुपुरुषः। अप्राप्त
विभाषेयम्। ईषदर्थे हि पूर्वविप्रतिषेधान्नित्यमेव। कवं चोष्णे। उष्णशब्दे उत्तरपदे कवं कश्च वा स्यात्। कवोष्णं।

॥८५॥

कोष्णं। कदुष्णं। पृषोदरादीनि यथोपदिष्टं॥ पृषोदरप्रकाराणि शिष्टैर्यथोच्चारितानि तथैव साधूनि। पृषत उदरं पृषोदरम्। तलो
पः। वारिवाहको बलाहकः। पूर्वपदस्य बः। उत्तरपदादेश्च लत्वम्। भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्ययात्। गूढोत्मा
वर्णविकृतेर्वर्णनाशात्पृषोदरम्॥१॥ दिक्शब्देभ्यस्तीरस्य तारभावो वा। दक्षिणतारम्। दक्षिणतीरम्। उत्तरता
रम्। उत्तरतीरम्। ब्रुवन्तो यस्यां सीदन्ति बृसी। ब्रुवच्छब्दस्य बृ आदेशः। सदेरधिकरणे डट्। आकृतिगणोयम्॥
नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ। क्विबन्तेषु एषु पूर्वपदस्य दीर्घः। उपानत्। नीवृत्। प्रावृट्। मर्मावि
त्। नीरुक्। अभीरुक्। ऋतीषट्। परीतत्। क्वाविति किम्। परिणहनम्। विभाषा पुरुषे इत्यतो मण्डूकप्लुत्या
विभाषानुवर्तते। सा च व्यवस्थिता। तेन गतिकारकयोरेव। नेह। पटुरुक्। तिग्मरुक्। वनगिर्योः संज्ञायां
कोटरकिंशुलुकादीनाम्। कोटरादीनां वने परे किंशुलुकादीनां गिरौ परे दीर्घः स्यात् संज्ञायाम्। व
नं पुरगामिश्रकासिध्रकासारिकाकोटराग्रेभ्यः। वनशब्दस्योत्तरपदस्य एभ्य एव नस्य णत्वं स्यान्नत्व
न्येभ्यः। इह कोटरान्ताः पंच वदीर्घविधौ कोटरादयो बोध्याः। तेषां कृतदीर्घाणां णत्वविधौ निर्देशो निय

श्री
॥राम॥
॥८५॥

सारिव वणम्।

माथीः। अन्येभ्यः इस्यतु विध्यर्थः। पुरगावणम्। मिश्रकावणम्। सिध्रकावणम्। कोटरावणम्। एत्यएवेति किम्। असिपत्रवनम्। वनस्या
ग्रेऽग्रेवणम्। राजदंतादिषु निपातनात्सप्तम्या अलुक्। प्रातिपदिकार्थमात्रे प्रथमा। किंशुलुकागिरिः। वलेर्बल प्रत्यये परे दी
र्घः स्यात्संज्ञायाम्। कृषीवलः। मतौ बह्वचोनजिरादीनाम्। अमरावती। अनजिरादीनां किम्। अजिरवती। संज्ञायामित्येव।
नेह। वलयवती। शरादीनां च। शरावती। उपसर्गस्य घञ्यमनुष्ये बहुलम्। उपसर्गस्य बहुलं दीर्घः स्यात् घञन्ते परे न तु
मनुष्ये। परिपाकः। परीपाकः। अमनुष्ये किम्। निषादः। सितेः कपि। एकसितीकः। द्विसितीकः। नरे संज्ञायाम्। विश्वा
नरः। मित्रे चर्षौ। विश्वामित्रः। शुनो दंतदंष्ट्राकर्णकुंदवराहपुच्छपदेषु दीर्घो वाच्यः। श्वादंत इत्यादि॥ ॥ प्रनिरंतः श
स्यो ४ रेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि। एभ्यो वनस्य णत्वं स्यात्। प्रवणम्। कार्ष्यवणम्। इत्यास[illegible] ण
त्वम्। विभाषौषधिवनस्पतिभ्यः। वनस्य णः स्यात्। दूर्वावणम्। दूर्वावनम्। शिरीषवणम्। शिरीषवनम्। असुः पशू
ल्यामेव। नेह। देवदारुवनम्। इरिकादिभ्यः प्रतिषेधो वक्तव्यः। इरिकावनम्। मिरिकावनम्। वाहनमाहितात्। आ
रोर्प्यदुह्यते तदाहितं तन्निमित्तात्परस्य वाहननकारस्य णत्वं स्यात्। इक्षुवाहणम्। आहिता किम्। इंद्रवाह

143

क्षीरं पानं येषां ते क्षीरपाणा उशीनराः। सुरापाणाः प्राच्याः। पीयत इति पानम्। कर्मणि ल्युट्। २

॥८ही॥

नम्। इक्षुस्वामिकं वाहनमित्यर्थः। वहते ल्युटि वृद्धिर्निपातनात्। पानं देशे। पूर्वपदस्थान्निमित्तात्परस्य पानस्य नस्य णत्वं स्याद्देशे गम्ये। वा भावकरणयोः। पानस्येत्येव। क्षीरपाणम्। क्षीरपानम्। गिरिनद्यादीनां वा। गिरिणदी। गिरिनदी। चक्रणितंबा। चक्रनितंबा। प्रातिपदिकान्तनुम्विभक्तिषु च। पूर्वपदस्थान्निमित्तात्परस्य एषु स्थितस्य नस्य णो वा स्यात्। प्रातिपदिकान्ते। माषवापिणौ। नुमि। व्रीहिवापाणि। विभक्तौ। माषवापेण। पक्षे माषवापिनावित्यादि। उत्तरपदस्य प्रातिपदिके तदन्तस्यैव णत्वम्। नेह। गर्गाणां भगिनी गर्गभगिनी। अत एव नुम्ग्रहणं कृतम्। अंगस्य नुम्विधानात्तदन्तत्वे हि नुमन्तोत्तरपदस्य। किंच प्रहिण्वन्नित्यादि हि वेनुमो णत्वार्थमपि नुम्ग्रहणम्। प्रेन्वनमित्यादौ तु लुक्त्वादित्वान्न। युवादेर्न। रम्ययूना। परिपक्वानि। एकाजुत्तरपदे णः। नित्यमित्युक्तम्। वृत्रहणौ। हरिंमानयतीति हरिमाणी। नुमि। क्षीरपाणि। विभक्तौ। क्षीरपेण। रम्यविणा। कुमति च। कवर्गवत्युत्तरपदे प्राग्वत्। हरिकामिणौ। हरिकामाणि। हरिकामेण। पदव्यवायेऽपि। पदव्यवाये णत्वं न स्यात्। माषकुंभवापेन। चतुरंगयोगेन। अतद्धित इति वाच्यम्। आर्द्रगोमयेण। शुष्कगोमयेण। पारस्करप्रभृतीनि च संज्ञायाम्। एतानि ससुट्कानि निपा

॥राम॥

॥८ही

124

त्यनेनाम्नि। पारस्करः। किष्किंधा। तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च। तास्य र्वैश्चर्त्वेन दकारोपि बोध्यः। तद्बृहतो
र्दकारतकारौ लुप्येते। करपत्योस्तु सुट्। चोरदेवतयोरिति समुदायोपाधिः। तस्करः। बृहस्पतिः। प्रायस्य चित्ति
चित्तयोः। प्रायश्चित्तिः। प्रायश्चित्तं। वनस्पतिरित्यादि। आकृतिगणोयं॥ ॥इति समासाश्रयविधयः॥ ॥
समर्थानां प्रथमाद्वा। इदं पदत्रयमधिक्रियते। प्राग्दिश इति यावत्। सामर्थ्यं परिनिष्ठितत्वं। कृतसंधिका
र्यमिति यावत्। प्राग्दीव्यतोऽण्। तेन दीव्यतीत्यतः प्राग् अण् अधिक्रियते। अश्वपत्यादिभ्यश्च। एभ्योऽण् स्यात् प्राग्दी
व्यतीयेष्वर्थेषु। वक्ष्यमाणण्यस्यापवादः। तद्धितेष्वचामादेः। ञिति णिति च तद्धिते परेऽचामादेरचो वृद्धिः
स्यात्। किति च। किति तद्धिते च तथा। अश्वपतेरपत्यादि आश्वपतं। गणपत्यो मंत्र इति तु प्रामादिकमेव। दैत्य
दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः। दित्यादित्यः पत्युत्तरपदाच्च प्राग्दीव्यतीयेष्वर्थेषु ण्यः स्यादणोपवादः। दैत्यः। अदिते
रादित्यस्य वा आदित्यः। प्राजापत्यः। यमाच्चेति काशिकायां। याम्यः। पृथिव्या ञाञौ। पार्थिवा। पार्थिवी। देवाद्
यञञौ। दैव्यं। दैवं। बहिषष्टिलोपो यञ्च। बाह्यः। ईकक्च। बाहीकः। स्थाम्नोऽकारः। अश्वत्थामः। लवार्थे लुलुग्वा
पृषोदरादित्वात् सस्य तः।०

गाणपतम्।७

145

यः॥ अश्वत्थामा॥ लोम्नोप - त्येषुबहुष्वा वाच्यः॥ इञोपवादः॥ उडुलोमाः॥ उडुलोमान्॥ बहुषुकिम्॥ औडुलोमिः॥ गोरजादिप्रसंगे यत्॥ गवी॥
अजादिप्रसंगेकिम्॥ गोभ्यो हेतुभ्यः आगतं गोरूप्यम्॥ गोमयी। उत्सादिभ्योञ्। औत्सः॥ अग्निकलिभ्यां ढग्वक्तव्यः॥ अग्नेरपत्यादि आ
ग्नेयम्। कालेयम्। इत्यपत्यादिविकारान्तार्थसाधारणप्रत्ययाः॥ ॥ स्त्रीपुंसाभ्यां नञ्स्नञौ लवनात्॥ धान्यानां लवन इत्यतः
प्रागर्थेषु स्त्रीपुंसाभ्यां क्रमान्नञ्स्नञौ स्तः॥ स्त्रैणः॥ पौंस्नः॥ वत्यर्थे न। स्त्रीपुंवच्चेति ज्ञापकात्। स्त्रीवत्। पुंवत्। द्विगोर्लु
गनपत्ये। द्विगोर्निमित्तं यस्तद्धितोऽजादिरनपत्यार्थः प्राग्दीव्यतीयस्तस्य लुक्स्यात्। पञ्चसु कपालेषु संस्कृतः पु
रोडाशः पञ्चकपालः॥ द्विगुनिमित्तस्येति किम्। पंचकपालस्येदं पांचकपालम्। अजादिकिं। पंचगर्गरूप्यम्। अ
नपत्ये किम्। द्वयो[illegible]योरपत्यं द्वैमित्रिः॥ गोत्रेऽलुगचि। अजादौ प्राग्दीव्यतीये विवक्षिते गोत्रप्रत्ययस्यालुक्
स्यात्। गार्गीच्छात्राः। वृद्धाच्छः॥ आपत्यस्य च तद्धितेऽनाति। हलः पर[illegible]स्यापत्ययकारस्य लोपः स्यात्तद्धिते न त्वाका
रे। गार्गीयाः। प्राग्दीव्यतः किम्। गर्गेभ्यो हितं गर्गीयम्। अचि किम्। गर्गेभ्य आगतं गर्गरूप्यम्। यूनि लुक्।
प्राग्दीव्यतीयेऽजादौ प्रत्यये विवक्षिते युवप्रत्ययस्य लुक्स्यात्। ग्लुचुकस्य गोत्रापत्यं ग्लुचुकायनिः। वद्धे
मालः फिन्। ततो यून्यण्। ग्लौचुकायनः। तस्य छात्रोऽपि ग्लौचुकायनः। अग्लौलु किं दृढवातावा छान।

॥८७॥

॥राम॥
॥८७॥

146

फक्फिञोरन्यतरस्यां। यूनीत्येव। पूर्वेण नित्ये लुकि प्राप्ते विकल्पार्थं सूत्रं। कात्यायनस्य छात्राः कातायाः कात्यायनीयाः। य
स्कस्यापत्यं यास्कः। शिवाद्यण्। तस्यापत्यं युवा यास्कायनिः। अणो द्व्यचः इति फिञ्। तस्य छात्राः यास्कीयाः यास्काय
नीयाः। तस्यापत्यं। षष्ठ्यंतात्कृतसंधेः समर्थादपत्येर्थे उक्ता वक्ष्यमाणाश्च प्रत्यया वा स्युः। उपगोरपत्यमौपगवः। आदिवृद्धि
रंत्योपधावृद्धिं बाधते। कृतसंधेः किं। सौत्थितिः। अकृतव्यूहपरिभाषया माभूत्। समर्थपरिभाषया नेह। कंब
मुपगोरपत्यं चैत्रस्य। प्रथमात्किं। अपत्यवाचकात् षष्ठ्यर्थे माभूत्। वाग्रहणाद्वाक्यमपि। दैवयज्ञीति सूत्रादन्यतरस्या
ग्रहणानुवृत्तेः समासोपि। उपग्वपत्यं। जातित्वान्ङीष्। औपगवी। आश्वपतः। दैत्यः। औत्सः। स्त्रैणः। पौंस्नः। अपत्यं पौत्र
प्रभृति गोत्रं। अपत्यत्वेन विवक्षितं पौत्रादि गोत्रसंज्ञं स्यात्। जीवति तु वंश्ये युवा। वंश्ये पित्रादौ जीवति पौत्रादेर्यद
पत्यं चतुर्थादि तद्युवसंज्ञमेव स्यान्न तु गोत्रसंज्ञं। भ्रातरि च ज्यायसि। ज्येष्ठे भ्रातरि जीवति कनीयान् चतुर्थादिर्युवा
स्यात्। एको गोत्रे। गोत्रे एक एवापत्यप्रत्ययः स्यात्। उपगोर्गोत्रापत्यमौपगवः। गार्ग्यः। नाडायनः। गोत्रे स्वैकोनसं
ख्यानां प्रत्ययानां परंपरा। यद्वा स्वद्धूनसंख्येस्यो निष्ठोऽसत्तिः प्रसज्यते॥ १॥ अपत्यं पितुरेव स्यात्ततः प्राचामपीति वा॥

147

मतत्सेदेनतद्धान्यैः स्तत्रमेतत्रयोत्तरम्॥२॥ पितुर्वेवापत्यमितिपदेरिउपगोस्तृतीयेवाच्ये औपगवादिर्न स्यात्। चतुर्थेत्विजीव
ज्ज्येष्ठे मृतवंश्ये चौपगवेः फक्। इत्यौपगिभ्रोः परंपरायां मूलाद्धृ ततमे गोत्रे एकोनशते प्रत्ययाः स्युः। पितामहादीना
मपीति मुख्यपक्षे तु तृतीयेवाच्ये उपगोरण् इष्टे सिद्धेपि च एणंनादिभ्यपि स्यात्। चतुर्थे ततः फगिति फगिभ्रोः परंप
मे ४ रायां शततमे गोत्रे ष्टनवनेरानिष्टप्रत्ययाः स्युः। अतो नियमार्थमिदं सूत्रम्। एवमनन्तरापत्ये प्यूह्यम्। गोत्राद्यून्य
॥८८॥ स्त्रियाम्। यून्यपत्ये गोत्रप्रत्ययांतादेव प्रत्ययः स्यात्। स्त्रियां तु न युवसंज्ञा। गार्ग्यस्य युवापत्यं गार्ग्यायणः।
स्त्रियां गोत्रत्वादेक एव प्रत्ययः। अत इञ्। अदंतं यत्प्रातिपदिकं तस्य कृतिका सष्ठ्यंतादिञ् स्यादप
त्येर्थे। दाक्षिः। बाह्वादिभ्यश्च। बाहविः। औडुलोमिः। आकृतिगणोयम्। सुधातुरकङ् च। चादिञ्। सुधातुर
पत्ये सौधातकिः। व्यासवरुडनिषादचंडालबिंबानां चेति वक्तव्यम्। न य्वाभ्यां पदांताभ्यां पूर्वौ तु ताभ्या ॥रा॥
मैच्। पदांताभ्यां यकारवकाराभ्यां परस्य न वृद्धिः किंतु ताभ्यां क्रमादैजागमौ स्तः। वैयासकिः। वारुड ॥८८॥
किरित्यादि। गोत्रे कुंजादिभ्यश्च्फञ्। व्रातच्फञोरस्त्रियाम्। व्रातवाचिभ्यश्च्फञंतेभ्यश्च स्वार्थे ञ्यः स्या

पूर्वौ

१५८

त। न तु स्त्रियाम्। कौंजायन्यः। बहुत्वे तञजत्वा लुग्वक्ष्यते। ब्राध्नायन्यः। स्त्रियां कौंजायनी। गोत्रत्वेन जातित्वाद् ङीष्। अनंतरापत्ये कौं
जिः। नडादिभ्यः फक्। गोत्र इत्येव। नाडायनः। चारायनः। अनंतरो नाडिः। यञिञोश्च। गोत्रे यौ यञिञौ तदंतात्फक् स्यात्। अना
र्षीत्युक्तेरापत्यस्येति यलोपो न। गार्ग्यायणः। दाक्षायणः। अनृष्यानंतर्ये विदादिभ्योञ्। एभ्यो गोत्रे। ये त्वत्रानृषयस्तेभ्य
आनंतर्येस्त्रैवैस्वार्थेष्यञ्। विदस्य गोत्रे वैदः। अनंतरो वैदिः। बाका। हैराकृतिगणो दिञ्। पुत्रस्यापत्ये पौत्रः। दौहित्रः। ग
र्गादिभ्यो यञ्। गोत्र इत्येव। गार्ग्यः। वात्स्यः। यञञोश्च। गोत्रे यद्यञंतमञंतं च तदवयवयोरेतयोर्लुक् स्यात्तत्कृते बहु
त्वे न तु स्त्रियाम्। गर्गाः। वत्साः। विदाः। उर्वाः। तत्कृते किम्। प्रियगार्ग्याः। स्त्रियां तु गार्ग्यः स्त्रियः। गोत्रे किम्। द्वैप्याः।
औत्साः। प्रवराध्यायप्रसिद्धमिह गोत्रम्। तेनेह न। पौत्राः। दौहित्राः। कपिबोधादांगिरसे। गोत्रे यञ् स्यात्। काप्यः।
बौध्यः। आंगिरसे किम्। कापेयः। बौधिः। वतंडाच्च। आंगिरस इत्येव। वातंड्यः। अनांगिरसे तु गर्गादौ शिवादौ च पा
द्यञणौ। वातंड्यः। वातंडः। लुक् स्त्रियाम्। वतंडाच्चेति विहितस्य लुक् स्यात् स्त्रियाम्। शार्ङ्गरवादित्वान्ङीन्। वतंडी।
अनांगिरसे तु वातंड्यायनी। लोहितादिबाधकः। आंगिरितु वातंडी। ऋषित्वाद्वक्ष्यमाणः ष्यङ्। अश्वादिभ्यः फञ्॥

ब्रा

149

गोत्रे आश्वायनः। पुंसि जाते। पुंसीति जातविशेषणम्। जातस्य गोत्रे जातायनः। पुंसीति किम्। जाताया अपत्यं जातेयः। शिवादिभ्योऽण्।
गोत्र इति निवृत्तम्। शिवस्यापत्यं शैवः। गांगः। पक्षे तिकादित्वात्फिञ्। गांगायनिः। शुभ्रादित्वाड्ढक्। गांगेयः। अवृद्धाभ्यो नदीमा
नुषीभ्यस्तन्नामिकाभ्यः। अवृद्धेभ्यो नदीमानुषीनामभ्योऽण् स्याड्ढकोपवादः। यामुनः। नार्मदः। सितिताया अपत्यं सैतितः।
~~[illegible]~~ अवृद्धाभ्यः किम्। वासवदत्तेयः। नद्यादि किम्। वैनतेयः। तन्नामिकाभ्यः किम्। शोभनाया अपत्यं शौभनेयः। ऋ
ष्यन्धकवृष्णिकुरुभ्यश्च। ऋषयो मन्त्रद्रष्टारः। वासिष्ठः। वैश्वामित्रः। अन्धकेभ्यः। श्वाफल्कः। वृष्णिभ्यः। वासुदेवः।।
आनिरुद्धः। शौरिरिति बाह्वादित्वात्। कुरुभ्यः। नाकुलः। साहदेवः। इञ एवायमपवादो मध्येपवादन्यायात्। अत्रिश
ब्दात्तु परत्वाड्ढक्। मातुरुत्संख्यासंभद्रपूर्वायाः। संख्यादिपूर्वाया मातृशब्दस्योदादेशोऽण्प्रत्ययश्च स्यात्। द्वैमातुरः।
सौमातुरः। भाद्रमातुरः। कन्यायाः कनीन च। ढकोपवादोऽण् तत्संनियोगेन कनीनादेशश्च। कानीनो व्यासः क
र्णश्च। अनूढाया एवापत्यमित्यर्थः। पीलाया वा। तन्नामिकाण्वाधित्वा द्व्यच इति ढकि प्राप्ते पक्षेऽण्विधीयते। पी
लाया अपत्यं पैलः। पैलेयः। ढक्च मंडूकात्। चादण्। पक्षे इञ्। मांडूकेयः। मांडूकः। मांडूकिः। स्त्रीभ्यो ढक्।।

आत्रेयः ४

।।राम।।

1150

१ या

स्त्री प्रत्ययान्तेभ्यो ढक् स्यात्। वैनतेयः। बाह्वादित्वात्सौमित्रिः। शिवादित्वात्सापत्नः। द्व्यचः। स्त्रीप्रत्ययांताद्द्व्यचोऽपत्ये ढक् स्यात्। तन्नामिकाणो-
पवादः। दात्तेयः। पार्थ इत्यत्र तु तस्येदमित्यण्। इतश्चानिञः। इकारांताद्द्व्यचोऽपत्ये ढक् स्यात् न त्विञन्तात्। दौलेयः। नैधेयः।
शुभ्रादिभ्यश्च। शुभ्रस्यापत्यं शौभ्रेयः। कल्याण्यादीनामिनङ्। एषामिनङादेशः स्याड्ढक्। काल्याणिनेयः। बांधकिनेयः।
कुलटाया वा। इनङभावो विकल्प्यते ढक् तु नित्यं पूर्वेणैव। कौलटिनेयः। कौलटेयः। सती भिक्षुकी च कुलटा। या तु व्यभिचा-
रार्थं कुलान्यटति तस्याः क्षुद्राभ्यो वेति पक्षे ढ्रक्। कौलटेरः। चटकाया ऐरक्। चटकस्येति वक्तव्यम्। लिंगविशिष्टपरि-
भाषया? स्त्रियामपि। चटकस्य चटकायाश्चापत्यं चाटकैरः। स्त्रियामपत्ये लुग्वाच्यः। तयोरेव स्त्र्यपत्ये चटका। अजादि-
त्वाट्टाप्। गोधाया ढ्रक्। गौधेरः। शुभ्रादित्वात्पक्षे ढक्। गौधेयः। आरगुदीचाम्। गौधारः। रकासिद्धे आकारोच्चारण-
मन्यतो विधानार्थम्। जडस्यापत्यं जाडारः। पडस्यापत्यं पाडारः। क्षुद्राभ्यो वा। अंगहीनाः शीलहीनाश्च क्षुद्रास्ताभ्यो वा
ढ्रक्। पक्षे ढक्। काणेरः। दासेरः। दासेयः। पितृष्वसुश्छण्। अणोऽपवादः। पैतृष्वस्रीयः। ढकि लोपः। पितृष्वसुरन्त-
स्य लोपः स्याड्ढकि। अत एव पैतृष्वसेयः। मातृष्वसुश्च। पितृष्वसुर्यदुक्तं तदस्यापि स्यात्। मातृष्वस्रीयः। मा-

॥ काणेयः ।२
ढक् १

160

ञ्।

ट्धसेयः। चतुष्पाद्भ्यो ढञ्। ढे लोपोऽकद्र्वाः। कद्रूभिन्नस्योवर्णान्तस्य भस्य लोपः स्याड्ढे परे। कामण्डलेयः। कमण्डलुशब्दश्चतुष्पाज्जातिवि
शेषः। गृष्ट्यादिभ्यश्च। एभ्यो ढञ्। अण्ढकोरपवादः। गार्ष्टेयः। मित्रयोरपत्यं। [illegible] ढञ्। केकयमित्रयुप्रलयानां यादेरियः। एषां य
कारादेरियादेशः स्याञ्ञिति णिति किति च तद्धिते परे। इतीयादेशे प्राप्ते। दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवाशिनायनि
भ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि। एतानि निपात्यन्ते। इति युलोपः। मैत्रेयः। मैत्रेयी। यस्कादिभ्यो गोत्रे। एभ्योऽपत्यप्र
त्ययस्य लुक् स्यात्तत्कृते बहुत्वे न तु स्त्रियाम्। मित्रयवः। राजश्वशुराद्यत्। राज्ञो जातावेवेति वाच्यम्। ये चाभावकर्मणोः। यादौ तद्धि
ते परेऽन् प्रकृत्या स्यान्न तु भावकर्मणोः। राजन्यः। श्वशुर्यः। जातिग्रहणं शूद्रादावुत्पन्नो राजनः। अन्। अण्यन्प्रकृत्या स्या
दिति टिलोपो न। अभावकर्मणोः किं। राज्ञः कर्म भावो वा राज्यम्। क्षत्राद्घः। क्षत्रियः। जातावित्येव। क्षा[illegible]त्रिरन्यः। कुलात्
खः। कुलीनः। [illegible]दन्तादपि तदन्तत्वेऽपूर्वपदादिति लि[illegible]त्। आढ्यकुलीनः। अपूर्वपदादन्यतरस्यां यड्ढकञौ। कुलादित्येव।
पक्षे खः। कुल्यः। कौलेयकः। कुलीनः। पदग्रहणं किम्। बहुकुल्यः। बाहुकुलेयकः। बहुकुलीनः। महाकुलादञ्खञौ। अन्य
तरस्यामित्यनुवर्तते। पक्षे खः। माहाकुलः। माहाकुलीनः। महाकुलीनः। दुष्कुलाड्ढक्। पूर्ववत्पक्षे खः। दौष्कुलेयः। दुष्कुलीनः।
स्वसुश्छः। स्वस्रीयः। भ्रातुर्व्यच्च। चाच्छः। अणोऽपवादः। भ्रातृव्यः। भ्रात्रीयः। व्यन्सपत्ने। भ्रातुर्व्यन्स्यादपत्ये प्रकृतिप्रत्ययसमुदायेन

आ८

शत्रौ वाच्ये। भ्रातृव्यः शत्रुः। पाप्मना भ्रातृव्येणेति तूपमानात्। रेवत्यादिभ्यष्ठक्। ठस्येकः। अंगात्परस्य ठस्येकादेशः स्यात्। रैवतिकः। गोत्र
स्त्रियाः कुत्सने ण च। गोत्रे या स्त्री तद्वाचकात् ठक्णौ स्तः कुत्सायाम्। सामर्थ्याद्यूनि। गार्ग्या अपत्यं गार्गो गार्गिको वा जाल्मः। पुंवद्भा
वाद्गार्ग्यशब्दात् ठक्णौ। यस्येति लोपः। आपत्यस्येति यलोपः। वृद्धाट्ठक्सौवीरेषु बहुलम्। सुवीरदेशोद्भवाः सौवीराः। वृद्धात्सौवीर
गोत्राद्यूनि बहुलं ठक् स्यात् कुत्सायाम्। भागवित्तेर्भागवित्तिकः। पक्षे फक्। भागवित्तायनः। कुर्वादिभ्यो ण्यः। अपत्ये। कौर
व्याः ब्राह्मणाः। वावदूक्यः। सम्राजः क्षत्रिये। साम्राज्यः। साम्राजोन्यः। सेनान्तलक्षणकारिभ्यश्च। एभ्यो ण्यः। हारि
षेण्यः। लाक्षण्यः। कारिः शिल्पी। तस्मात्। तान्तुवाय्यः। कौम्भकार्यः। नापित्यः। उदीचामिञ्। हारिषेणिः। लाक्षणिः। तान्तु
वायिः। कौम्भकारिः। नापितस्तु परत्वात्फिञेव। नापितायनिः। तक्ष्णोऽण उपसंख्यानम्। ताक्ष्णः। पक्षे ताक्षण्यः। तिकादि
भ्यः फिञ्। तैकायनिः। उदीचां वृद्धादगोत्रात्। आम्रगुप्तायनिः। प्राचां तु आम्रगुप्तिः। वृद्धात्किम्। दाक्षिः। अगोत्रात्कि
म्। औपगविः। प्राचामवृद्धात्फिन्बहुलम्। ग्लुचुकायनिः। मनोर्जातावञ्यतौ षुक् च। समुदायार्थो जातिः। मानुषः।
मनुष्यः। जनपदशब्दात्क्षत्रियादञ्। जनपदक्षत्रिययोर्वाचकादञ् स्यादपत्ये। दाण्डिनायनेति सूत्रे निपातनाद्धि

मु२

162

लोपः। ऐक्ष्वाकः। ऐक्ष्वाकौ। क्षत्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्यवत्। तद्राजमाचक्षाणस्तद्राज इत्यन्वर्थसंज्ञासामर्थ्यात्।
पंचालानां राजा पांचालः। पूरोरण्वक्तव्यः। पौरवः। पांडोर्ड्यण्। पांड्यः। द्व्यञ्मगधकलिंगसूरमसादण्। अञोपवादः।
द्व्यच्। आंगः। वांगः। सौह्मः। मागधः। कालिंगः। सौरमसः। तस्य राजन्यप्येवम्। वृद्धेत्कोसलाजादाञ्ञ्यङ्। आंब
ष्ठ्यः। सौवीर्यः। इत्। आवंत्यः। कौसल्यः। अजादस्यापत्यमाजाद्यः। कुरुनादिभ्यो ण्यः। कौरव्यः। नैषध्यः। स नैषध
स्याधिपतेरित्यादौ तु शैषिकोऽण्। साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ्। साल्वो जनपदस्तदवयवा उदुंब
थाह्
रादयः। तेभ्यः प्रत्यग्रथादिभ्यश्चेञ् स्यात्। अञोपवादः। औदुंबरिः। प्रात्यग्रथिः। कालकूटिः। आश्मकिः। राज
न्यप्येवम्। ते तद्राजाः। अञादयस्तद्राजसंज्ञाः स्युः। तद्राजस्य बहुषु तेनैवास्त्रियाम्। बहुष्वर्थेषु तद्राजस्य लु
क् स्यात्तदर्थकृते बहुत्वे न तु स्त्रियाम्। इक्ष्वाकवः। पंचालाः इत्यादि। कथं तर्हि कौरव्याः पशवः। तस्यामेव रघोः
पांड्याः इति। कौरव्ये पांड्ये साधवः। [illegible] इति समाधेयम्। रघूणामन्वयं वक्ष्ये निरुध्यमाना यदुभिः क
थंचिदित्यादौ तु रघुयदुशब्दयोस्तदपत्ये लक्षणया। कंबोजाल्लुक्। अस्मात्तद्राजस्य लुक्। कंबोजः। कंबोजौ। कं

॥राम॥
॥७१॥

163

दि॰ बोजादिभ्य इति वक्तव्यम्। चोलः। शकः। द्व्यञ्लक्षणस्याणो लुक्। केरलः। यवनः। कम्बोजो लुक्। कंबोजाः समरे इति पाठः सुगमः। दीर्घादिपाठे तु कंबो
जोऽभिजनो येषामित्यर्थः। सिंधुतक्षशिलादिभ्योऽण्। वित्यण्। स्त्रियामवन्तिकुन्तिकुरुभ्यः। तद्राजस्य लुक्। अवन्ती। कुन्ती। कु
रूः। अतश्च। तद्राजस्याकारस्य स्त्रियां लुक् स्यात्। शूरसेनी। मद्री। कथं माद्रीसुताविति। ह्रस्व एव पाठ इति हरदत्तः। न गादि
स्त्र ४ वेवाकल्प्यम्। न प्राच्यभर्गादियौधेयादिभ्यः। एभ्यो तद्राजस्य न लुक्। पांचाली। वैदर्भी। आंगी। वांगी। मागधी। एते प्राच्याः। भ
र्गी। कारूषी। केकेयी। केकयी। यत्तु जन्यजनकभावलक्षणे पुंयोगे ङीषु। युधाशुभ्राभ्यामाद्यौ अवशिष्टढक्। ततः स्वार्थे
पर्श्वादियौधेयादिभ्यामणञौ। दित्यम्। शार्ङ्गरवाद्यञ इति ङीन्। अतश्चेति लुक् किन्तु ढगन्तत्वान्ङीपु दानतनि इति स्वरः स्याद्
यौधेयी। शौभ्रेयी। ह्रस्वं लघु। संयोगे गुरु। संयोगे परे ह्रस्वं गुरुसंज्ञं स्यात्। दीर्घं च। अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गो
त्रे। त्र्यादीनामन्त्यमुत्तमं तस्य समीपमुपोत्तमं। गोत्रे यावणिञौ विहितावनार्षौ इति तदन्तयोर्गुरूपोत्तमयोः प्रातिपदिकयोः स्त्रि
यां ष्यङादेशः स्यात्। निर्दिश्यमानस्यादेशा भवन्ती त्यणिञोरेव। षङावितौ। यङश्चाप्। कुमुदगन्धेरपत्यं स्त्री कौमुदगन्ध्या।
वाराह्या। अनार्षयोः किम्। वासिष्ठी। वैश्वामित्री। गुरूपोत्तमयोः किम्। औपगवी। जातिलक्षणो ङीषु। गोत्रे किम्। अहि
च्छत्रे जाता आहिच्छत्री॥ ॥इत्यपत्याधिकारः॥ ॥ [illegible] ॥ ॥तेन रक्तं रागात्। रज्यतेऽनेनेति रागः। कषायेण र

वस्त्रं २

॥९२॥

वी५

क्तं काषायम्। मांजिष्ठं। रागात्किम्। देवदत्तेन रक्तं वस्त्रम्। लाक्षारोचनाट्ठक्। लाक्षिकः। रौचनिकः। शकलकर्दमाभ्यामुपसंख्यानम्।
शाकलिकः। कार्दमिकः। आभ्यामणपीति वृत्तिकारः। शाकलः। कार्दमः। नील्या अन्। नील्या रक्तं नीलं। पीतात्कन्। पीतकं। ह
रिद्रामहारजनाभ्यामञ्। हारिद्रं। माहारजनं॥ ५५॥ नक्षत्रेण युक्तः कालः। पुष्येण युक्तं पौषमहः। पौषी रात्रिः। लुबविशेषे। पू
र्वेण विहितस्य लुप् स्यात् षष्टिदंडात्मकस्य कालस्यावांतरविशेषश्चेन्न गम्यते। अद्य पुष्यः। कथं तर्हि पुष्ययुक्ता पौर्णमासी
पौषीति। विभाषाफाल्गुनीश्रवणकार्तिकीचैत्रीभ्यश्चेति निर्देशेन पौर्णमास्यामयं लुब्नेति ज्ञापितत्वात्। श्रवणशब्दात्तु अ
त एव लुप्। युक्तवद्भावान्नावश्य। अबाधकान्यपि निपातनानि। श्रावणी। द्वन्द्वाच्छः। नक्षत्रद्वंद्वाद्युक्ते काले छः स्याद्विशे
षे सत्यसति च। तिष्यपुनर्वसीयमहः। राधानुराधीया रात्रिः। दृष्टं साम। तेनेत्येव। वसिष्ठेन दृष्टं वासिष्ठं साम। अस्मिन्नर्थे
र्थे डिद्वा वक्तव्यः। उशनसा दृष्टमौशनं औशनसं। वामदेवाड्ड्यड्ड्यौ। वामदेवेन दृष्टं वामदेव्यम्। परिवृतो रथः। व
स्त्रैः परिवृतो रथः वास्त्रः। तत्रोद्धृतममत्रेभ्यः। शरावे उद्धृतः शारावओदनः। उद्धरतिरिह उद्धरणपूर्वके निधाने वर्त्तते॥
तेन सप्तमी। उद्धृत्य निहितं इत्यर्थः। स्थंडिलाच्छयितरि व्रते। स्थंडिले शयनेन स्थांडिलो भिक्षुः। संस्कृतं भक्षाः। सप्तम्यन्ताद
ण्स्यात् संस्कृतेऽर्थे यत्संस्कृतं भक्षाश्चेत्ते स्युः। भ्राष्ट्रे संस्कृताः भ्राष्ट्राः। अष्टसु कपालेषु संस्कृतोऽष्टाकपालः। पुरोडाशः।

साम ५

॥रा मा॥

॥९२॥

165

शूलोखाद्यत्॥ अणोपवादः। शूले संस्कृतं शूल्यं मांसं। उखा पात्रविशेषः। तस्यां संस्कृतं उख्यं। दध्नष्ठक्। दध्नि संस्कृतं दाधिकं। उदश्वितोन्यतर
स्याम्। ठक् स्यात्। पक्षेऽण्। इसुसुक्तान्तात्कः। ७ इस् उस् उक् त् एतदंतादंगात्परस्य ठस्य कः स्यात्। उदके श्वयति वर्धते इति उदश्वित्। तत्र
संस्कृतः औदश्वित्कः। औदश्वितः। क्षीराड्ढञ्। अत्र संस्कृतमित्येव संबध्यते न तु भक्षा इति। तेन यवाग्वामपि भवति। क्षैरेयी। सास्मि
न्पौर्णमासीति। इतिशब्दात्संज्ञायामिति लभ्यते। पौषी पौर्णमास्यस्मिन्पौषो मासः। आग्रहायण्यश्वत्थाट्ठक्। अग्रे हायनमस्या
इत्याग्रहायणी। प्रज्ञादेराकृतिगणत्वादण्। पूर्वपदात्संज्ञायामिति णत्वम्। आग्रहायणी पौर्णमासी अस्मिन्नाग्रहायणिको
मासः। अश्वत्थेन युक्ता पौर्णमासी अश्वत्थः। निपातनात्पौर्णमास्यामपि लुप्। आश्वत्थिकः। विभाषा फाल्गुनीश्रवणाकार्तिकी
चैत्रीभ्यः। एभ्यष्ठग्वा पक्षेऽण्। फाल्गुनिकः। फाल्गुनो मासः। श्रावणिकः। श्रावणो मासः। कार्तिकिकः। कार्तिकः। चैत्रिकः। चैत्रः। सा
स्य देवता। इन्द्रो देवतास्य ऐन्द्रं हविः। पाशुपतं। बार्हस्पत्यम्। त्यज्यमानद्रव्ये उद्देश्यविशेषो देवता। मंत्रस्तुत्या च। ऐंद्रो मंत्रः। आग्ने
यो वै ब्राह्मणो देवतयेति तु शैषिकेऽर्थे सर्वत्राग्नीति ढक्। कस्येत्। कशब्दस्य इकारादेशः स्यात्प्रत्ययसंनियोगेन। यस्येति लोपः।
स्तरवाहादिहद्धिः। को ब्रह्मा देवतास्य कायं हविः। श्रीर्देवतास्य श्रायं। शुक्राद्घन्। शुक्रियं। अपोनप्त्रपांनप्तृभ्यां घः। अपोन
प्त्रियं। अपांनप्त्रियं। अपोनपात् अपांनपाच्च देवता। प्रत्ययसंनियोगेन तु एतद्रूपं निपात्यते। अत एवापोनपातेऽपांनपाते तु

वाछः १

वृद्धीति प्रैषः। छश्च। योगविभागो यथासंख्यनिवृत्त्यर्थः। अपोनप्त्रीयं। अपांनप्त्रीयं। शतरुद्रा घश्च। शतरुद्रो देवता अस्य शतरुद्रि
यं शतरुद्रीयं। घछयोर्विधानसामर्थ्याद् द्विगोर्लुगनपत्ये इति न लुक्। महेन्द्राद् घाणौ च। महेन्द्रियं हविः। माहेन्द्रं। महे
न्द्रीयं। सोमाट्ट्यण्। सौम्यं। टित्वात् ङीप्। सौमी ऋक्। वाय्वृतुपित्रुषसो यत्। वायव्यं। ऋतव्यं। रीङ् ऋतः। अकृद्यकारे ऽसार्वधातु
के यकारे च्वौ च परे ऋदन्तांगस्य रीङादेशः स्यात्। यस्येति च। पित्र्यं। उषस्यं। द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तो
ष्पतिगृहमेधाच्छ च। द्यावापृथिवीयं। द्यावापृथिव्यं। शुनासीरीयं। शुनासीर्यं। कालेभ्यो भववत्। मासिकं। प्रावृषेण्यं।
महाराजप्रोष्ठपदाट्ठञ्। माहाराजिकं। प्रौष्ठपदिकं। देवताद्वन्द्वे च। अत्र पूर्वोत्तरपदयोरादेरचो वृद्धिः स्याञ्ञिति णि
ति किति च परे। आग्निमारुतं। नेन्द्रस्य परस्य। सौमेन्द्रः। परस्य किं। ऐन्द्राग्नः। दीर्घाच्च वरुणस्य। दीर्घात्परस्य वरुणस्य न वृ
द्धिः। ऐन्द्रावरुणं। दीर्घात्किं। आग्निवारुणीमनड्वाहीं। तद्धितेष्ववृत्तिरिति न वयज्ञादिष्वेव पर्यवसानं। मानावयज्ञिकः। का
लः। पाकयज्ञिकः। पूर्णमासादण् वक्तव्यः। पूर्णमासोऽस्यां वर्तते पौर्णमासी तिथिः। पितृव्यमातुलमातामहपितामहाः। एते
निपात्यन्ते। पितुर्भ्रातरि व्यत्। पितुर्भ्राता पितृव्यः। मातुर्डुलच्। मातुर्भ्राता मातुलः। मातृपित्रोः पितरि डामहच्। मातुः पिता
मातामहः। पितामहः। मातरि षिच्च। मातामही। पितामही। अवेर्दुग्धे सोढदूसमरीसचो वक्तव्याः। सकारपाठसामर्थ्यात्

पु॰४
१

॥राम॥
॥९३

167

चत्वसत्वेणमध्योहान्तेनासरत्नुदी
नता३

न्तषः। अविसोढं। अविदूसं। अविमरीसं। तिलान्निष्फलात्पिंजपेजौ। तिलपिंजः। तिलपेजः। वंध्यस्तिल इत्यर्थः। तस्य समूहः। काकानां स
मूहः काकं। बाकं। भिक्षादिभ्योऽण्। भिक्षाणां समूहो भैक्षं। गर्भिणीनां समूहो गार्भिणम्। इह भस्याढ इति पुंवद्भावे कृते। इनण्यनप
त्ये। इनण्यनपत्यार्थे। अणि परे इनः प्रकृत्या स्यात्। तेन नस्तद्धित इति टिलोपो न। युवतीनां समूहो यौवतं। न चैवं नाहनुहात्तादेरणि यौवनं।
गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ्। एभ्यः समूहे वुञ् स्यात्। लौकिकमिह गोत्रं। तच्चापत्यमात्रं। युवोरनाकौ।
युवु एतयोरनुनासिकयलोः क्रमादन अक एतावादेशौ स्तः। ग्लौचुकायनीनां समूहो ग्लौचुकायनकं। औपगवकमित्यादि। आप
त्यस्येति यलोपे प्राप्ते। प्रकृत्याऽके राजन्यमनुष्ययुवानः। राजन्यकं। मानुष्यकम्। वृद्धाच्चेति वक्तव्यम्। वार्द्धकम्। केदाराद्यञ्च।
चाद्वुञ्। कैदार्यं। कैदारकं। गणिकाया यञिति वक्तव्यम्। गाणिक्यं। ठञ्कवचिनश्च। चात्केदारादपि। कवचिनां समूहः काव
चिकं। कैदारिकम्। ब्राह्मणमाणववाडवाद्यन्। ब्राह्मण्यम्। माणव्यं। वाडव्यं। पृष्ठादुपसंख्यानम्। पृष्ठ्यं। ग्रामजनबंधुभ्यस्तल्।
ग्रामता। जनता। बंधुता। गजसहायाभ्यां चेति वक्तव्यम्। गजता। सहायता। अह्नः खः क्रतौ। अहीनः। अहर्गणसाध्यः सु
त्याकः क्रतुरित्यर्थः। क्रतौ किम्। आह्नम्। इह खण्डिकादित्वादञ्। अह्नष्टखोरेवेति नियमात् टिलोपो न। पर्श्वा णस्वक्तव्यः।
सिति च। सिति परे पूर्वं पदसंज्ञं स्यात्। अभस[illegible]त्वाद्गुणो न। पर्शूनां समूहः पार्श्वम्। [illegible]दिभ्यः। कापोतम्। मायूरम्।

य२

।।१८४।।

खडिकादिभ्यश्च। अञ् स्यात्॥ खंडिकानां समूहः खांडिकं। वाडवेयो। घनचितं। काठकं। कां दोग्धी। अचित्तहस्तिधेनोष्ठक्। साक्तुकं। हास्ति
कं। धैनुकं। केशाश्वाभ्यां यञ्छावन्यतरस्याम्। पक्षे ठगणौ। कैश्यं। कैशिकं। आश्वीयं। आश्वं। पाशादिभ्यो यः। पाश्या। तृण्या। धूम्या।।
वन्या। वात्या। खलगोरथात्। खल्या। गव्या। रथ्या। इनित्रकट्यचश्च। खलादिभ्यः क्रमात् स्युः। खलिनी। गोत्रा। रथकट्या।।
खलादिभ्य इनिर्वक्तव्यः। डाकिनी। कुटुंबिनी। आकृतिगणोयम्। विषयो देशे। षष्ठ्यंताद्दणादयः स्युरर्थे तत्परिषी क्षितेर्थो भवे
द्देशः। शिबीनां विषयो देशः शैबः। देशे किम्। देवदत्तस्य विषयोनुवाकः। राजन्यादिभ्यो वुञ्। राजन्यकः। भौरिक्याद्यैषुकार्या
दिभ्यो विधल्भक्तलौ। भौरिकीणां विषयो देशः भौरिकिविधम्। भौलिकिविधं। ऐषुकारिभक्तम्। सारसायनभक्तम्। सोस्या
दिरिति छंदसः प्रगाथेषु। पंक्तिरादिरस्य पांक्तः प्रगाथः। स्वार्थ उपसंख्यानम्। त्रिष्टुबेव त्रैष्टुभः। संग्रामे प्रयोजनयोद्धृभ्यः।।
संग्राम स्ये
मास्येत्यनुवर्तते। सुभद्रा प्रयोजनमस्येति सौभद्रः। भारता योद्धारोस्य संग्राम स्य भारतः। तदस्यां प्रहरणमिति क्री
डायां णः। दंडः प्रहरणमस्यां क्रीडायां दांडा। मौष्टा। घञः सास्यां क्रियेति ञः। घञंता। क्रियावाचिनः दस्यामिति
सप्तम्यर्थे स्त्रीलिंगे ञः प्रत्ययः स्यात्। घञ इति कृद्ग्रहणात् कृतिकारकस्यापि ग्रहणम्। श्येनतिलस्य पाते ञे। श्येन
तिलएतयोर्मुमागमः स्यात् ञप्रत्यये परे पातशब्दे उत्तरपदे। श्येनपातोस्यां वर्तते श्यैनंपाता मृगया। तिलपातोस्यां
वर्तते तैलंपाता स्वधा। श्येनतिलस्य किम्। दंडपातोस्यां वर्ततेति दांडपाता। तदधीते तद्वेद। व्याकरणमधीते वेद
प्रथमांता४

संग्रामस्ये ५

यो० वे ६

।।रामः।।
१८४।।

औक्थिकालंपरि
हराति३

वावैयाकरणः। क्रतूक्थादिसूत्रान्ताट्ठक्। क्रतुविशेषवाचिनामेव ग्रहणं। तेभ्यो मुख्यार्थेभ्यो वेदितरि तत्प्रतिपादकग्रंथपरेभ्यस्त्वध्ये
तरि। आग्निष्टोमिकः। वाजपेयिकः। उक्थं सामविशेषः तल्लक्षणपरो ग्रंथविशेषो लक्षणयोक्थं। तदधीते वेद वा औक्थिकः। मुख्यार्था
त्तूक्थशब्दाद्ठग्नेष्यते। न्याय। नैयायिकः। वृत्ति। वार्त्तिकः। लोकायत। लौकायतिकः। इत्यादि। सूत्रान्तात्तु अकल्पादेरेवेष्यते।
सांग्रहसूत्रिकः। अकल्पादेः किम्। काल्पसूत्रः। विद्यालक्षणकल्पान्ताच्चेति वक्तव्यम्। वायसविद्यिकः। गौलक्षणिकः। आश्वलक्ष
णिकः। पाराशरकल्पिकः। अंगक्षत्रधर्मत्रिपूर्वाद्विद्यान्तान्नेति वाच्यम्। आंगविद्यः। क्षात्रविद्यः। धार्मविद्यः। त्रिविधा विद्या त्रिविद्या
तामधीते वेद वेति त्रैविद्यः। आख्यानाख्यायिकेतिहासपुराणेभ्यश्च। यावक्रीतमधिकृत्य कृतमाख्यानमुपचाराद्यावक्रीतं
तदधीते वेत्ति वा यावक्रीतिकः। वासवदत्तामधिकृत्य कृता आख्यायिका वासवदत्ता। अधिकृत्य कृते ग्रंथे इत्यर्थे वृद्धाच्छः। त
स्य लुबाख्यायिकाभ्यो बहुलमिति लुप्। ततोऽनेन ठक्। वासवदत्तिकः। ऐतिहासिकः। पौराणिकः। सर्वादेः सादेश्च लुग्वक्तव्यः।
सर्ववेदानधीते सर्ववेदः। सवर्त्तिकः। सवार्त्तिकः। द्विगोर्लुगिति लुक्। द्वितंत्रः। इकन्पदोत्तरपदाच्छतषष्टेः षिकन्पथः। पूर्वप
दिकः। उत्तरपदिकः। शातपथिकः। शातपथिकी। षाष्टिपथिकः। षाष्टिपथिकी। क्रमादिभ्यो वुन्। क्रमकः। क्रमपद शिक्षा मीमांसा
क्रमादिः। वसंतादिभ्यष्ठक्। वासंतिकः। अथर्वाणमधीते आथर्वणिकः। दांडिनायनस्त्वेनिपात नाट्टिलोपो न। प्रोक्ताल्लुक्।
प्रोक्तार्थकप्रत्ययात्परस्याध्येतृवेदितृप्रत्ययस्य लुक्स्यात्। पाणिनं पणिनः। [illegible]कि विधाननितिकः। सोऽस्यास्त्रीतिप ऋी

श्री

170

तस्यगोत्रापत्यंपाणिनः। गाथिविदथिकेशिगणिपणिनश्च। एतेऽणिप्रकृत्यास्युः। इतिटिलोपोन। ततोयूनीञ्। पाणिनिः॥
ण्यक्षत्रियार्षञितोयूनिलुगणिञोः। इतिप्राप्तोलुक्तुनभवति। आर्षग्रहणेनप्रतिपदोक्तस्यैवार्षस्यग्रहणात्। पाणिनिनाप्रोक्तं
डा३ पाणिनीयं। वृद्धाच्छः। इञश्चेतिअण्तुन। गोत्रेयदिञ्तदन्तादितिवक्ष्यमाणत्वात्। ततोऽध्येतृवेदितृप्रत्ययोलुक्। स्वरेविशेयो
वविशेषः। पाणिनीयः। पाणिनीयाः। सूत्राच्चकोपधात्। सूत्रवाचिनःककारोपधात्अध्येतृवेदितृप्रत्ययस्यलु
क्स्यात्। अष्टकाः। अष्टावध्यायाःपरिमाणमस्याष्टकंपाणिनेःसूत्रम्। तदधीयतेविदन्तिवाअष्टकाः। छ
॥८५॥ न्दोब्राह्मणानिचतद्विषयाणि। छन्दांसिब्राह्मणानिचप्रोक्तप्रत्ययान्तानितद्विषयाणिस्युः। अध्येतृवेदितृप्रत्ययंवि
नानप्रयोज्यानीत्यर्थः। कठेनप्रोक्तमधीयतेकठाः। वैशम्पायनान्तेवासित्वाण्णिनिः। तस्यकठचरकादितिलुक्। त
तेऽणः। तस्यप्रोक्तात्लुक्। तदस्मिन्नस्तीतिदेशेतन्नाम्नि। उदुम्बराःसन्त्यस्मिन्देशेऔदुम्बरः। तेननिर्वृत्तम्। कुशाम्बे
ननिर्वृत्ताकौशाम्बीनगरी। तस्यनिवासः। शिबीनांनिवासोदेशःशैबः। अदूरभवश्च। विदिशायाअदूरभवंनगरंवै ॥रा॥
दिशम्। चकारेणप्रागुक्तास्त्रयोऽर्थाःसन्निधाप्यन्ते। तेनवक्ष्यमाणप्रत्ययानांचातुरर्थिकत्वंसिध्यति। वुञ्छण्कठ ॥७५॥
जिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसंका
शबलपक्षकर्णसुतङ्गमप्रगदिन्वराहकुमुदादिभ्यः। सप्तदशभ्यःसप्तदशक्रमात्स्युश्चातुरर्थ्याम्। अरी

औत्तगिकाले पारि
हराते ३

वा वैयाकरणः ॥ क्रतूक्थादिसूत्रांताट्ठक् ॥ क्रतुविशेषवाचिनामेव ग्रहणं ॥ तेभ्यो मुख्यार्थेभ्यो वेदितरि तत्प्रतिपादकग्रंथपरेभ्यस्त्वध्ये
तरि ॥ आग्निष्टोमिकः ॥ वाजपेयिकः ॥ उक्थं सामविशेषः तल्लक्षणपरो ग्रंथविशेषो लक्षणयोक्थं ॥ तदधीते वेद वा औक्थिकः ॥ मुख्यार्था
त्तूक्थशब्दाट्ठङ् नेष्यते ॥ न्यायं नैयायिकः ॥ वृत्तिं वार्त्तिकः ॥ लोकायतं लौकायतिकः ॥ इत्यादि ॥ सूत्रांतान्नु अकल्पादेरेवेष्यते ॥
सांग्रहसूत्रिकः ॥ अकल्पादेः किम् ॥ काल्पसूत्रः ॥ विद्यालक्षणकल्पांताच्चेति वक्तव्यम् ॥ वायसविद्यिकः ॥ गौलक्षणिकः ॥ आश्वलक्ष
णिकः ॥ पाराशरकल्पिकः ॥ अंगक्षत्रधर्मत्रिपूर्वाद्विद्यांतान्नेति वाच्यम् ॥ आंगविद्यः ॥ क्षात्रविद्यः ॥ धार्मविद्यः ॥ त्रिविधा विद्या त्रिविद्या
तामधीते वेद वेति त्रैविद्यः ॥ आख्यानाख्यायिकेतिहासपुराणेभ्यश्च ॥ यावक्रीतमधिकृत्य कृतमाख्यानमुपचाराद्यावक्रीतं
तदधीते वेत्ति वा यावक्रीतिकः ॥ वासवदत्तामधिकृत्य कृता आख्यायिका वासवदत्ता ॥ अधिकृत्य कृते ग्रंथे इत्यर्थे वृद्धाच्छः ॥ न
स्य लुबाख्यायिकाभ्यो बहुलमिति लुप् ॥ ततोऽनेन ठक् ॥ वासवदत्तिकः ॥ ऐतिहासिकः ॥ पौराणिकः ॥ सर्वादेः सादेश्च लुग्वक्तव्यः ॥
सर्ववेदानधीते सर्ववेदः ॥ सर्वतंत्रः ॥ सवार्त्तिकः ॥ द्विगोर्लुगिति लुक् ॥ द्वितंत्रः ॥ इकन्पदोत्तरपदाच्छतषष्टेः षिकन्पथः ॥ पूर्वप
दिकः ॥ उत्तरपदिकः ॥ शतपथिकः ॥ शतपथिकी ॥ षष्टिपथिकः ॥ षष्टिपथिकी ॥ क्रमादिभ्यो वुन् ॥ क्रमकः ॥ क्रम पद शिक्षा मीमांसा
क्रमादिः ॥ वसंतादिभ्यष्ठक् ॥ वासंतिकः ॥ अथर्वाणमधीते आथर्वणिकः ॥ दांडिनायनेत्यादिना निपातनाट्टिलोपो न ॥ प्रोक्ताल्लुक् ॥
प्रोक्तार्थकप्रत्ययात्परस्याध्येतृवेदितृप्रत्ययस्य लुक् स्यात् ॥ पणने पणं ॥ ग्रंथविशेषे कि विधानमिति कः ॥ सोऽस्यास्तीति ष ली

श्री

रणादिभ्यो वुञ्। अरीहणेन निर्वृत्तं आरीहणकं। कृशाश्वादिभ्यश्छण्। कार्शाश्वीयं। ऋश्यादिभ्यः कः। ऋश्यकं। कुमुदादिभ्य ष्ठच्। कुमुदि
कं। काशादिभ्य इलः। काशिलः। तृणादिभ्यः सः। तृणसं। प्रेक्षादिभ्य इनिः। प्रेक्षी। अश्मादिभ्यो रः। अश्मरः। सख्यादिभ्यो ढञ्। साखेयं। सं
काशादिभ्यो ण्यः। सांकाश्यं। बलादिभ्यो यः। बल्यं। पक्षादिभ्यः फक्। पाक्षायणः। पथः पंथ च। पांथायनः। कर्णादिभ्यः फिञ्। कार्णायनिः।
सुतंगमादिभ्य इञ्। सौतंगमिः। प्रगद्यादिभ्यो ञ्यः। प्रागद्यः। वराहादिभ्यः कक्। वाराहकः। कुमुदादिभ्य ष्ठक्। कौ
मुदिकः। जनपदे लुप्। जनपदे वाच्ये चातुरर्थिकस्य लुप् स्यात्। लुपि युक्तवद्व्यक्तिवचने। लुपि सति प्रकृतिवल्लिंगव
चने स्तः। पंचालानां निवासो जनपदः पंचालाः। कुरवः। अंगाः। वंगाः। कालिंगाः। वरणादिभ्यश्च। अजनपदा
र्थ आरंभः। वरणानामदूरभवं नगरं वरणाः। शर्कराया वा। अस्माच्चातुरर्थिकस्य वा लुप् स्यात्। ठक्छौ च। शर्करा
याः एतौ स्तः। कुमुदादौ वराहादौ च पाठसामर्थ्यात् सिद्धे ठच्कौ वा ग्रहणसामर्थ्यात् सिद्धे औत्सर्गिकोऽण्। तस्य लुब्वि
कल्पः। रूपाणि शर्करा। शार्करं। शार्करिकं। शर्करीयं। शर्करिकं। शार्करकं। नद्यां मतुप्। चातुरर्थिकः। इक्षुमती। कुमु
द्नड्वेतसेभ्यो ड्मतुप्। कुमुद्वान्। नड्वान्। वेतस्वान्। आद्ययो झय इति ञ्लत्वे मादुपधायाश्चेति वक्ष्यमाणेन वः।
महिषाच्चेति वक्तव्यम्। महिष्मान्नाम देशः। नडशादाड्ड्वलच्। नड्वलः। शादो जैबालघासयोः। शाद्वलः। शिखाया व
लच्। शिखावलं। उत्करादिभ्यश्छः। उत्करीयं। नडादीनां कुक् च। नडकीयं। क्रुञ्चा ह्रस्वत्वं च। क्रुञ्चकीयः। तक्ष

५

173

सिद्धां॰ सु॰ चं॰

॥ ९ श्री

नलोपश्च। तक्षकीयः॥ ॥इति चातुरर्थिकाः॥ ॥शेषे॥ अपत्यादिचतुरर्थ्यंतादन्योर्थः शेषस्तत्र जातादयः। चक्षुषा गृह्यते चाक्षुषं रूपं। श्रावणः शब्दः। औपनिषदः पुरुषः। दृषदि पिष्टाः दार्षदाः सक्तवः। उलूखले क्षुण्णः औलूखलो यावकः। अश्वैरुह्यते आश्वो रथः॥ चतुर्भिरुह्यते चातुरं शकटं। चतुर्दश्यां दृश्यते चातुर्दशं रक्षः। शेष इति लक्षणमधिकारश्च। तस्य विकार इत्यतः प्राक् शेषाधिकारः। राष्ट्रावारपाराद् घखौ। आभ्यां क्रमाद् घखौ स्तः शेषे। राष्ट्रियः। अवारपारीणः। अवारपाराद्विगृहीतादपि। विपरीताच्चेति वक्तव्यम्। अवारीणः। पारीणः। पारावारीणः। इह प्रकृतिविशेषाद् घादयष्ट्युट्युलंताः प्रत्यया उच्यंते। तेषां जातादयोऽर्थविशेषाः समर्थविभक्तयश्च वक्ष्यंते। ग्रामाद्यखञौ। ग्राम्यः। ग्रामीणः। कत्र्यादिभ्यो ढकञ्। कुत्सितास्त्रयः कत्त्रयः। तज्जातादिः कात्त्रेयकः। नागरेयकः। ग्रामादित्यनुवृत्तेः ग्रामेयकः। कुलकुक्षिग्रीवाभ्यः श्वास्यलंकारेषु। कौलेयकः श्वा। कौलोन्यः। कौक्षेयकोऽसिः। कौक्षोन्यः। ग्रैवेयकोलंकारः। ग्रैवोन्यः। नद्यादिभ्यो ढक्। नादेयम्। माहेयम्। वाराणसेयम्। दक्षिणापश्चात्पुरसस्त्यक्। दक्षिणेति आजंतमव्ययम्। दाक्षिणात्यः। पाश्चात्यः। पौरस्त्यः। कापिश्याः ष्फक्। कापिश्यां जातादि कापिशायनं मधु। कापिशायनी द्राक्षा। द्युप्रागपागुदक्प्रतीचो यत्। दिव्यं। प्राच्यम्। अपाच्यम्। उदीच्यं। प्रतीच्यम्। अव्ययात्त्यप्। अमेहक्वतसित्रेभ्य एव। अमा अंतिकसहार्थयोः। अमात्यः। इहत्यः। क्वत्यः। ततस्त्यः। तत्रत्यः। परिगणनेन किम्। उपरिष्टाद्भवः औपरिष्टः। अव्ययानां भमात्रे टिलोपः। अनित्योयं। बहिषष्टिलोपविधानात्। तेनेह न। आरातीयः।

॥ राम ॥

॥१९ श्री

179

त्यब्नेर्ध्रुव इति वक्तव्यम्॥ नित्यः॥ निसो गते॥ ह्रस्वात्तादौ तद्धिते॥ ह्रस्वादिणः परस्य सस्य षः स्यात्तादौ तद्धिते॥ निर्गतो वर्णाश्रमेभ्यो निष्ट्यः॥ चंडालादिः॥ अरण्याण्णः॥ आरण्याः सुमनसः॥ दूरादेत्यः॥ दूरेत्यः॥ उत्तरादाहञ्॥ औत्तराहः॥ ऐषमोह्यःश्वसोऽन्यतरस्याम्॥ एभ्यस्त्यब्वा॥ पक्षे वक्ष्यमाणौ ट्युट्युलौ॥ ऐषमस्त्यौ॥ ऐषमस्तनौ॥ ह्यस्त्यौ॥ ह्यस्तनौ॥ श्वस्त्यौ॥ श्वस्तनौ॥ पक्षे शौवस्तिकमिति वक्ष्यते॥ दिक्पूर्वपदादसंज्ञायां ञः॥ अणोऽपवादः॥ पौर्वशालः॥ असंज्ञायां किम्॥ संज्ञात्तायाः श्वकृते मभूत्॥ पूर्वेषुकामशम्यां भवः॥ पूर्वैषुकामशमः॥ प्राचां ग्रामनगराणामित्युत्तरपदवृद्धिः॥ मद्रेभ्योऽञ्॥ दिक्पूर्वपदादित्येव॥ दिशोऽमद्राणामिति पर्युदासादादिवृद्धिः॥ पौर्वमद्रः॥ आपरमद्रः॥ उदीच्यग्रामाद्बह्वचोऽन्तोदात्तात्॥ अञ्स्यात्॥ शैवपुरः॥ प्रस्थोत्तरपदपलद्यादिकोपधादण्॥ माहकिप्रस्थः॥ पालदः॥ नैलीनकः॥ कण्वादिभ्यो गोत्रे॥ एभ्यो गोत्रप्रत्ययान्तेभ्योऽण्स्यात्॥ कण्वो गर्गादिः॥ काण्वस्य छात्राः काण्वाः॥ इञश्च॥ गोत्रे य इञ् तदन्तादण्स्यात्॥ दाक्षाः॥ गोत्रे किम्॥ सौतंगमीयाः॥ गोत्रमिह शास्त्रीयं॰ न तु लौकिकं॥ तेनेह न॥ पाणिनीयाः॥ वृद्धिर्यस्याचामादिस्तद्वृद्धम्॥ यस्य समुदायस्याचां मध्ये आदिर्वृद्धिस्तद्वृद्धसंज्ञं स्यात्॥ त्यदादीनि च॥ वृद्धसंज्ञानि स्युः॥ वृद्धाच्छः॥ शालीयः॥ मालीयः॥ तदीयः॥ भवतष्ठक्छसौ॥ वृद्धाद्भवतष्ठक्छसौ स्तः॥ भावत्कः॥ अरवा॥ भवदीयः॥ वृद्धादित्यनुवृत्तेः शत्रन्तादणेव॥ भावतः॥ काश्यादिभ्यष्ठञ्ञिठौ॥ इकार उच्चारणार्थः॥ काशिकी॥ काशिका॥ वैदिकी॥ वैदिका॥ आपदादिपूर्वपदात्कालान्तात्॥ आपदादिराकृतिगणः॥ आपत्कालिकी॥ आपत्कालिका॥ धन्वयोपधाद्वुञ्॥ धन्वविशेषवाचिनो यकारोप

म६५

॥सिद्धांतकौमुदी

॥९७॥

धान्व देशवाचिनो ह्य उपधात् वुञ्स्यात्। ऐरावतं धन्व। ऐरावतकः॥ सांकाश्यकांपिल्य शब्दौ वुञ्छणादिसूत्रे एण्यान्तौ। सांकाश्यकः॥
कांपिल्यकः॥ नगरात्कुत्सनप्रावीण्ययोः॥ कुत्सिते प्रवीणे च जातादौ अस्य यार्थे नगरशब्दाद्वुञ्स्यात्। नागरकश्चौरः
शिल्पी वा। एतयोः किम्। नागराः ब्राह्मणाः॥ अरण्यान्मनुष्ये॥ वुञ्स्यात्। औपसंख्यानिकस्य णस्यापवादः। पथ्यध्याय
न्यायविहारमनुष्यहस्तिष्विति वाच्यम्। आरण्यकः पंथाः॥ अध्यायो न्यायो विहारो मनुष्यो हस्ती वा। गर्तोत्तर
पदाच्छः। देशइत्येव। वृकगर्तीयं। गहादिभ्यश्च। गहीयः॥ मुखपार्श्वतसो लोपश्च॥ मुखतीयं। पार्श्वतीयं। कुग्जनप
रस्य च। जनकीयं। परकीयं। देवस्य च। देवकीयं। स्वकस्य च स्वकीयं। राज्ञः कच। राजकीयं। पर्वताच्च। पर्वती
यः मनुष्यः। विभाषाऽमनुष्ये। मनुष्यभिन्नेऽर्थे पर्वताच्छो वा स्यात्। पर्वतीयानि पार्वतानि वा फलानि। युष्म
दस्मदोरन्यतरस्यां खञ्च। चाच्छः। पक्षेऽण्। युवयोर्युष्माकं वा अयं युष्मदीयः। अस्मदीयः। तस्मिन्नणि च यु
ष्माकास्माकौ। युष्मदस्मदोरेतावादेशौ स्तः खञ्यणि च। यौष्माकीणः। आस्माकीनः। यौष्माकः। आस्माकः॥ ॥राम॥ ॥९७॥
तवकममकावेकवचने। एकार्थवाचिनोर्युष्मदस्मदोस्तवकममकौ स्तः खञ्यणि च। तावकीनः। तावकः॥

178

मामकीनः । मामकः । छेतु । प्रत्ययोत्तरपदयोश्च । मपर्यंतयोरनयोरेकार्थयोस्त्वमौ स्तः प्रत्यये उत्तरपदे च । त्वदीयः । मदीयः । अर्धा
द्यत् । अर्ध्यः । परावराधमोत्तमपूर्वाच्च । परार्ध्यम् । अवरार्ध्यम् । अधमार्ध्यम् । उत्तमार्ध्यम् । दिक्पूर्वपदाट्ठञ्च । पौर्वार्धिकम् ।
पूर्वार्ध्यं । मध्यान्मः । मध्यमः । अ सांप्रतिके । मध्यशब्दात् अकारप्रत्ययः स्यात्सांप्रतिकेऽर्थे उत्कर्षापकर्षहीनो मध्यो
वैयाकरणः । मध्यं दारु । नातिह्रस्वं नातिदीर्घमित्यर्थः । द्वीपादनुसमुद्रं यञ् । समुद्रसमीपे यो द्वीपस्तद्विषया
द्वीपाद्यञ् । द्वैप्यी । द्वैप्या । काळाट्ठञ् । काळवाचिभ्यष्ठञ् स्यात् । मासिकं । सांवत्सरिकं । सायंप्रातिकः । पौनःपु
निकः । कथं तर्हि शार्वरस्य तमसो निषिद्धये इति काळिदासः । अनुदितोऽप्समेतागेतिसारदिः । समानकाली
त्यादि नं प्राक्काळीनमित्यौवा । अपस्वरा । एवंतिप्रामालिकाः । तत्र जात इति यावत्काळाधिकारः । श्राद्धे शरदः ठञ्
स्यात् । ऋत्वणोऽपवादः । शारदिकं श्राद्धं । विभाषा रोगातपयोः । शारदिकः शारदो वा रोगः । आतपो वा । एनयोः किं ।
शारदं दधि । निशाप्रदोषाभ्यां च । वा ठञ् । नैशिकं नैशं । प्रादोषिकं । प्रादोषं । श्वसस्तुट् च । श्वसः ठञ् वा
स्यात्तस्य तुडागमश्च । द्वारादीनां च । एषां न वृद्धिरैजागमश्च । शौवस्तिकं । संधिवेळाद्यृतुनक्षत्रेभ्योऽण् ॥

सिधांत कौमुदी

।।९८।।

ग्रैष्मं।२

संधिवेलादिभ्य ऋतुभ्यो नक्षत्रेभ्यश्च कालवृत्तिभ्यो ऽण् स्यात्। संधिवेलायां भवं सांधिवेलं। तैषं। संधिवेला
संध्या। अमावास्या। त्रयोदशी। चतुर्दशी। पंचदशी। पौर्णमासी। प्रतिपत्। संवत्सरात्फलपर्वणोः। सांवत्स
रं फलं पर्व वा। सांवत्सरिकमन्यत्। प्रावृष एण्यः। प्रावृषेण्यः। वर्षाभ्यष्ठक्। वर्षासु साधु वार्षिकं वासः। का
लात्साधुपुष्प्यत्पच्यमाने इति साध्वर्थे भवे चास्य न लोपः। हेमंताच्च। तलोपश्च वेदलोकयोश्चकारा
त्सहैव च ठञ् वा। हैमनं। हैमंतं। सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च। सायमित्यादिभ्यश्चतुर्भ्यो ऽ
व्ययेभ्यश्च कालवाचिभ्यष्ट्यु ट्युलौ स्तस्तयोस्तुट् च। तुटः प्रागनो हरः। अनद्यतन इत्यादिनिर्देशाग।
सायंतनं। चिरंतनं। प्राह्णे प्रगे अनयोरेदंतत्वं निपात्यते। प्राह्णेतनं। प्रगेतनं। दोषातनं। दिवातनं। चिरपरु
त्परारिभ्यस्त्नो वक्तव्यः। चिरत्नं। परुत्नं। परारित्नं। अग्रादिपश्चाड्डिमच्। अग्रिमं। आदिमं। पश्चि
मं। अंताच्च। अंतिमं। विभाषा पूर्वाह्णापराह्णाभ्याम्। आभ्यां ट्युट्युलौ वा स्तस्तयोस्तुट् च। पक्षे ठञ्। पूर्वा
ह्णेतनं। पराह्णेतनं। घकालतनेषु कालनाम्न इति अलुक्। पूर्वाह्णः सोऽयस्येति विग्रहे तु पूर्वाह्णतनं। अपरा

श्रु ढो

।।राम।।

।।९८।।

काष्ठादिनासंडादिभ्योयदन्नमलमपकृष्यत्लमोविक्षिप्यतेतदन्नमलमवस्करस्तद्योगाद्देशोपीतिमाधवः ४

ह्नतनौपौवाह्णिकेः।आपराह्णिकः।तत्रजातः।सप्तमीसमर्थाज्जातइत्यर्थेऽणादयोघादयश्चस्युः।स्रुघ्नेजातःस्रौघ्नः।औत्सः।
राष्ट्रियः।अवारपारीणः।इत्यादि।प्रावृषष्ठप्।एण्यस्यापवादः।प्रावृषिजातःप्रावृषिकः।संज्ञायांशरदोवुञ्।अणोऽपवादः।शार
दकाःदर्भविशेषामुद्गविशेषाश्च।पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्करात्वुन्।पूर्वाह्णिकः।अपराह्णकः।आर्द्रकः।मूलकः।प्रदोषक
अवस्करकः।पथःपंथच।पथिजातःपंथकः।अमावास्यायावा।अमावास्यकः।आमावास्यः।अच।अमावास्यः।श्रविष्ठाफल्गु
न्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक्।एभ्योनक्षत्रेभ्यःपरस्यजातार्थप्रत्ययस्यलुक्।लुक्त
द्धितलुकि।तद्धितलुकिउपसर्जनस्त्रीप्रत्ययस्यलुक्।श्रविष्ठासुजातःश्रविष्ठः।फल्गुनः।इत्यादि।चित्रारेवतीरो
हिणीभ्यःस्त्रियामुपसंख्यानम्।चित्रायांजाताचित्रा।रेवती।रोहिणी।आत्यौलुक्तद्धितलुकीतिलुकिकृतेपिप्पल्यादे
राकृतिगणत्वात्पुनर्ङीष्।फल्गुन्यषाढाभ्यांटानौवक्तव्यौ।स्त्रियामित्येव।फल्गुनी।अषाढा।श्रविष्ठाषाढाभ्यां
छण्वक्तव्यः।अस्त्रियामपि।श्राविष्ठीयः।आषाढीयः।स्थानान्तगोशालखरशालाच्च।एभ्योजातार्थस्यलुक्स्याद
गोस्थानेजातःगोस्थानः।गोशालः।खरशालः।विभाषासेनेति नपुंसकत्वेह्रस्वत्वं।वत्सशालाभिजि। श्वयु

179

सिद्धांतकौमुदी

॥९९॥

इत्यादि

कूरा तभिषजो वा। एभ्यो जातार्थस्य लुग्वा स्यात्। वत्सशाले जातः वत्सशालः। वात्सशालः। जातार्थे प्रतिप्रसूतो ऽण्वाडित्कर्त्व्यः। शा
तभिषः। शतभिषजः। शातभिषक्। नक्षत्रेभ्यो बहुलं। जात प्रत्ययस्य बहुलं लुक् स्यात्। रोहिणः। रौहिणः। कृतलब्धक्रीतकुश
लाः। तत्रेत्येव। स्रुघ्ने कृतो लब्धः क्रीतः कुशलो वा स्रौघ्नः। प्रायभवः। तत्रेत्येव। स्रुघ्ने प्रायेण बाहुल्येन भवति स्रौघ्नः। उपजा
नूपकर्णोपनीवेष्ठक्। औपजानुकः। औपकर्णिकः। औपनीविकः। संभूते। स्रुघ्ने संभवति स्रौघ्नः। कोशाड्ढञ्। कौशेयं
वस्त्रं। कालात्साधुपुष्प्यत्पच्यमानेषु। हेमन्ते साधुः हैमन्तः प्राकारः। वसन्ते पुष्प्यन्ति वासन्त्यः कुन्दलताः। शरदि पच्यन्ते
शारदाः शालयः। उप्ते च। हेमन्ते उप्यन्ते हैमन्ता यवाः। आश्वयुज्या वुञ्। आश्वयुज्यामुप्ताः आश्वयुजका माषाः॥
ग्रीष्मवसन्तादन्यतरस्याम्। पक्षे कत्वरो। ग्रैष्मकं। ग्रैष्मं। वासन्तकं। वासन्तं। देयमृणे। कालादित्येव। मासे देयमृ
णं मासिकं। व्याहरति मृगः। कालवाचिनः सप्तम्यन्ताच्छब्दायत इत्यर्थे स्युः। यो व्याहरति स मृगश्चेत्। निशा
यां व्याहरति नैशो मृगः। नैशिकः। तदस्य सोढं। कालादित्येव। निशासहचरितमध्ययनं निशा तत्सोढमस्य
नैशः। नैशिकः। तत्र भवः। स्रुघ्ने भवः स्रौघ्नः। राष्ट्रियः। दिगादिभ्यो यत्। दिश्यं। वर्ग्यं। शरीरावयवाच्च। दन्त्यं। कण्ठ्यं।
दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ्। दार्तेयं। कलशिर्घटः। तत्र भवं कालशेयं। ग्रीवा भ्यो ऽण्। चाड्ढञ्। ग्रैवेयं। ग्रै

लं

॥राम॥
१९९॥

180

वै। गंभीराञ्ञ्यः। गंभीरे भवं गांभीर्यं। अव्ययीभावाच्च। परिमुखे भवं पारिमुख्यं। परिमुखादिभ्य एवेष्यते। नेह। औपकूलः। अं
तःपूर्वपदाट्ठञ्। अव्ययीभावादित्येव। वेश्मनीत्यंतर्वेश्मं। तत्र भवमांतर्वेश्मिकं। आंतर्गणिकं। अध्यात्मादेष्ठञिष्यते।
अध्यात्मं भवमाध्यात्मिकं। अनुशतिकादीनां च। एषामुभयपदवृद्धिः स्याञ्ञिति णिति किति च। आधिदैविकं॥
आधिभौतिकं। ऐहलौकिकं। पारलौकिकं। अध्यात्मादिराकृतिगणः। ग्रामात्पर्यनुपूर्वात्। ठञ् स्यात्। अव्य
यीभावादित्येव। पारिग्रामिकः। आनुग्रामिकः। जिह्वामूलांगुलेश्छः। जिह्वामूलीयं। अंगुलीयं। वर्गान्ताच्च।
कवर्गीयं। अशब्दे यत्खावन्यतरस्यां। पक्षे पूर्वेण छः। मद्वर्ग्यः। मद्वर्गीणः। मद्वर्गीयः। अशब्दे किं। कवर्गी
यो वर्णः। कर्णललाटात्कन्नलंकारे। कर्णिका। ललाटिका। तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः। सु
पां व्याख्यानः सौपो ग्रन्थः। तैङः। कार्तः। सुप्सु भवं सौपं। बह्वचोऽन्तोदात्ताट्ठञ्। षत्वणत्वयोः विधायकं
शास्त्रं षत्वणत्वे तस्य व्याख्यानं तत्र भवो वा षात्वणत्विकः। पौरोडाशपुरोडाशात्ष्ठन्। पुरोडाशसहच
रितो [illegible] मन्त्रः पुरोडाशः। स एव पौरोडाशः तस्तत्र ष्ठन्। पौरोडाशिकः। पुरोडाशिकः। छंदसो यद
णौ। छंदस्यः। छान्दसः। द्व्यज्ब्राह्मणर्क्प्रथमाध्वरपुरश्चरणनामाख्याताट्ठक्। द्व्यचः ऐष्टिकः॥

181

अगोतत्वात्कः।

पाशुकः। ऋतो वा चातुर्हौतृकं। ब्राह्मणिकः। आर्चिकं इत्यादि। ऋगयनादिभ्यः। ठञादेरपवादः। आर्गयनः। औपनिषदः। वैयाकरणः।
॥ ॥ तत आगतः। स्रुघ्नादागतः स्रौघ्नः। ठगायस्थानेभ्यः। शुल्कशालाया आगतः शौल्कशालिकः। विद्यायोनिसंबंधेभ्यो
वुञ्। औपाध्यायकः। पैतामहकः। ऋतष्ठञ्। वुञोऽपवादः। हौतृकं। मातृकं। भ्रातृकं। पितुर्यच्च। चाद्ठञ्। रीङृतः। यस्ये-
तिलोपः। पित्र्यं। पैतृकं। गोत्रादंकवत्। विदेभ्य आगतं वैदं। गार्गं। दाक्षं। औपगवकं। हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः। स-
मादागतं समरूप्यम्। विषमरूप्यम्। पक्षे गहादित्वाच्छः। समीयं। विषमीयं। देवदत्तरूप्यं। दैवदत्तं। मयट् च। सममयं।
विषममयं। देवदत्तमयं। प्रभवति। तत इत्येव। हिमवतः प्रभवति हैमवती गंगा। विदूराञ्ञ्यः। विदूरात्प्रभवतीति वैदूर्यो
मणिः। तद्गच्छति पथिदूतयोः। स्रुघ्नं गच्छति स्रौघ्नः पंथाः दूतो वा। अभिनिष्क्रामति द्वारं। तदित्येव। स्रुघ्नमभिनि-
ष्क्रामति स्रौघ्नं कान्यकुब्जद्वारं। अधिकृत्य कृते ग्रंथे। तदित्येव। शारीरकमधिकृत्य कृतो ग्रंथः शारीरकीयः॥
शारीरकभाष्यमिति त्वभेदोपचारात्। शिशुक्रंदयमसभद्वंद्वेंद्रजननादिभ्यश्छः। शिशूनां क्रंदनं शिशुक्रंदः
तमधिकृत्य कृतो ग्रंथः शिशुक्रंदीयः। यमस्य सभा यमसभं क्लीबत्वं लोकात्। यमसभीयः। किरातार्जुनीयम्।
इन्द्रजननादिराकृतिगणः। इन्द्रजननीयं। विरुद्धभोजनीयं। सोऽस्य निवासः। स्रुघ्नो निवासोऽस्य स्रौघ्नः। अभि-
जनश्च। स्रुघ्नोऽभिजनोऽस्य स्रौघ्नः। यत्र स्वयं वसति स निवासः। यत्र पूर्वैरुषितं सोऽभिजन इति विवेकः। दूतीव

॥राम॥
॥१००॥

182

लातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः। तूदी। [illegible] नोस्य तौदेयः। शालातुरीयः। वार्मतेयः। कौचवार्यः। भक्तिः। सोस्येत्यनु
वर्तते। भज्यते सेव्यत इति भक्तिः। स्रुघ्नो भक्तिरस्य स्रौघ्नः। अचित्तादेशकालाट्ठक्। अपूपा भक्तिरस्य आपूपिकः। पायसिकः। अचित्ता
किम्। देवदत्तः। अदेशा किम्। स्रौघ्नः। अकाला किम्। ग्रैष्मः। महाराजाट्ठञ्। माहाराजिकः। वासुदेवार्जुनाभ्यां वुन्। वा
सुदेवकः। आर्जुनकः। तेन प्रोक्तम्। पाणिनिना प्रोक्तं पाणिनीयं। तित्तिरिवरतन्तुखण्डिकोखाच्छण्। छंदोब्राह्मणानीति त
द्विषयता। तित्तिरिणा प्रोक्तमधीयते तैत्तिरीयाः। का[illegible]ऋषिभ्यां णिनिः। काश्यपेन प्रोक्तमधीयते काश्यपि
नः। कलापिवैशंपायनान्तेवासिभ्यश्च। कलाप्यन्तेवासिभ्यः। हरिद्रुणा प्रोक्तमधीयते हारिद्रविणः। वैशंपायनान्तेवासिभ्यः।
आलंबिनः। कठचरकाल्लुक्। आभ्यां प्रोक्तप्रत्ययस्य लुक् स्यात्। कठेन प्रोक्तमधीयते कठाः। चरकाः। कलापिनोण्। क
लापिना प्रोक्तमधीयते कालापाः। नान्तस्य टिलोपे सब्रह्मचारिपीठसर्पिकलापिकौथुमितैतिलिजाजलि लांगलि शि
लालिशिखंडिसूकरसद्मसुपर्वणामुपसंख्यानम्। टिलोपः। छगलिनो ढिनुक्। छगलिना प्रोक्तमधीयते छागले
यिनः। पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः। पाराशर्येण प्रोक्तं भिक्षुसूत्रमधीयते पाराशरिणः। भिक्षवः। शैला
लिनो नटाः। कर्मंदकृशाश्वादिनिः। भिक्षुनटसूत्रयोरित्येव। कर्मंदेन प्रोक्तमधीयते कर्मंदिनो भिक्षवः। कृशाश्विनो न

जांगलि ४
[illegible]

183

टाः। तेनैकदिक्। सुदाम्नाऽद्रिणा एकदिक् सौदामनी। तसिश्च। स्वरादिपाठादव्ययत्वं। पीलुमूलेनैकदिक् पी
लुमूलतः। उपज्ञाते। तेनेत्येव। पाणिनिनोपज्ञातं पाणिनीयं। कृते ग्रंथे। वररुचिना कृतो वाररुचो ग्रन्थः। सं
ज्ञायां। तेनेत्येव। अग्रंथार्थमिदं। मक्षिकाभिः कृतं माक्षिकं मधु। तस्येदं। उपगोरिदमौपगवं। वहेस्तुर
णिट् च। संवोढुः स्वं सांवहित्रं। अग्नीधः शरणे रण् भं च। अग्निमिंधे। अग्नीत्। तस्य स्थानमाग्नीध्रं। तात्स्थ्याद्
सोप्याग्नीध्रः। समिधामाधाने षेण्यण्। सामिधेन्यो मन्त्रः। सामिधेनी ऋक्। रथाद्यत्। रथ्यं चक्रं। पत्रपूर्वाद
ञ्। पत्रं वाहनं। अश्वरथस्येदं आश्वरथं। हलसीराट्ठक्। हालिकं। सैरिकं। द्वन्द्वाद्वुन्वैरमैथुनिकयोः। काकोलू
किका। कुत्सकुशिकिका। दैवासुरादिभ्यः प्रतिषेधः। दैवासुरं। गोत्रचरणाद्वुञ्। औपगवकं। चरणाद्धर्माम्ना
ययोरिति वक्तव्यं। काठकं। संघाङ्कलक्षणेष्वञ्यञिञामण्। घोषग्रहणमपि कर्तव्यं। अञ्। बैदः संघोऽङ्को घोषो
वा। बैदं लक्षणं। यञ्। गार्गः। गार्गं। इञ्। दाक्षः। दाक्षं। परंपरासंबंधोऽङ्कः। साक्षात्तु लक्षणं। छन्दोगौक्थिकयाज्ञिकब
ह्वृचनटाञ्ञ्यः। छंदोगानां धर्म आम्नायो वा छांदोग्यं। औक्थिक्यं। याज्ञिक्यं। बाह्वृच्यं। नाट्यं। चरणाद्धर्माम्नाय

॥राम॥
॥१०१॥

184

द१

इदं साध्यमिति [illegible] टिलोपस्यो नित्यता॥ २५

योरिस्युक्तं। तस्मादयर्थान्तरत्वाद् द्वौ पितयोरेव॥ ॥[illegible] काः॥ तस्य विकारः॥ अश्मनो विकारे टिलोपो वक्तव्यः॥ अश्मनो विकारः आश्मः। आश्मनः। मार्त्तिकः। अवयवे च प्राण्योषधिवृक्षेभ्यः॥ चाद्विकारे। मयूरस्यावयवो विकारो वा मायूरः। मौर्वं काण्डं भस्म वा। पैप्पलं। त्रपुजतुनोः षुक्॥ आभ्यामण् स्याद्विकारे एतयोः षुगागमश्च। त्रापुषं। जातुषं। श[illegible] ञ्। शामीलं भस्म। शामीली स्रुक्। मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः॥ प्रकृतिमात्रान्मयड्वा स्याद्विकारावयवयोः। अश्ममयं। आश्मनं। अभक्ष्येत्यादि किम्। मौद्गः सूपः। कार्पासमाच्छादनं। नित्यं वृद्धशरादिभ्यः॥ आम्रमयं। शरमयं। एकाचो नित्यं। त्वङ्मयं। वाङ्मयं। कथं तर्हि आप्यमम्मयमिति। तस्येदमित्यणन्तात् स्वार्थे ष्यञ्। गोश्च पुरीषे॥ गोः पुरीषं गोमयं। पिष्टाच्च॥ मयट् स्याद्विकारे। पिष्टमयं भस्म। कथं पैष्टी सुरेति। सामान्यविवक्षायां तस्येदमित्यण्। संज्ञायां कन्॥ पिष्टाद्विकारे। पिष्टस्य विकारविशेषः पिष्टकः। पूपोऽपूपः पिष्टकः स्यात्। [illegible] ढञ्। ऐणेयं। एणस्य तु ऐणं [illegible]। गव्यं। पयस्यं। द्रोश्च। दुद्रव्यं। [illegible] माने वयः। द्रोरित्येव। द्रुवयं। योन वं द्रुवयं पाद्यमितिमानार्थके द्रव्ये। फले लुक्॥ विकारावयवप्रत्ययस्य विकारोऽवयवो वा [illegible]

वा१

नं।५

185

सिद्धांतकौमुदी

॥१०२॥

ययस्यलुकूस्यात्फले। आमळक्याः फलमामळकं। प्लक्षादिभ्योण्। विधानसामर्थ्यान्नलुकू। प्लाक्षं। न्यग्रोधस्यकेवलस्य। च
स्येनहिरैजागमश्च। नैयग्रोधं। जम्ब्वावा। जम्बूवृक्षात्फलेऽण्वास्यात्। जाम्बवंपक्षेओरञ्। तस्यलुकू। जम्बु। लुप्च। जम्ब्वाः फलप्रत्य
यस्यलुब्वास्यात्। लुपियुक्तिवत्। जम्ब्वाः फलंजम्बूः। फलपाकशुषमुपसंख्यानम्। व्रीहयः। मुद्गाः। पुष्पमूलेषुबहुळं। म
ल्लिकायाः पुष्पंमल्लिका। जात्याः पुष्पंजाती। विदार्याः मूलंविदारी। बहुळग्रहणान्नेह। पाटळानिपुष्पाणि। साल्वानि
मूळानि। बाहुलकात्क्वचिल्लुकू। अशोकम्। करवीरम्। हरीतक्यादिभ्यश्च। एभ्यः फलप्रत्ययस्यलुप्स्यात्। हरीत
क्यादीनांलिंगमेवप्रकृतिवत्। हरीतक्याः फलानिहरीतक्यः। कंसी[illegible] लुकू। कंसीयपरशव्या
यशब्दयोर्यञञौस्तश्छयतोश्चलुकू। कंसायहितंकंसीयं। तस्यविकारः कांस्यं। परशवेहितंपरशव्यं। तस्यपार
शवः॥ ॥प्रा[illegible]ः॥ ॥[illegible]कू। तद्वहतीत्यतः प्राग्ठगधिक्रियते। तदाहेतिमाशब्दा
दिभ्यउपसंख्यानम्। माशब्दंकारिशतियश्चाहसमाशब्दिकः। आहौप्रभूतादिभ्यः। प्रभूतमाहप्राभूतिकः।
पार्याप्तिकः। पृच्छतौसुस्नातादिभ्यः। सुस्नातंपृच्छतिसौस्नातिकः। सौरवशायनिकः। अनुरानिकादिः। गच्छ
तौपरदारादिभ्यः। पारदारिकः। गौरुतल्पिकः। तेनदीव्यतिखनतिजयतिजितं। अक्षैर्दीव्यतिआक्षिकः। अ

ता२

॥राम॥
॥१०२॥

स्या खनत्याभ्रिकः। अक्षैर्जयत्याक्षिकः। अक्षैर्जितमाक्षिकं। संस्कृतं। दध्ना संस्कृतं दाधिकं। मारीचिकं। तर
ति। उडुपेन तरत्यौडुपिकः। गोपुच्छाट्ठञ्। गौपुच्छिकः। नौद्व्यचष्ठन्। नाविकः। घटिकः। बाहुभ्यां तरति
वाहुको स्त्री। चरति। तृतीयांताद्गच्छति भक्षयतीत्यर्थयोष्ठक् स्यात्। हस्तिना चरति हास्तिकः। शाक
टिकः। दध्ना चरति दाधिकः। आकर्षात्ष्ठल्। आकर्षो निकषोपलः। आकर्षादिति पाठान्तरम्। ते
न चरत्याकर्षिकः। षित्वान्ङीष्। आकर्षिकी। प[illegible]ष्ठन्। पर्पेण चरति पर्पिकः। पर्पिकी। येन पी
ठेन पंगवश्चरंति स पर्पः। अश्विकः। राथिकः। श्वगणाट्ठञ्। चात्ष्ठन्। श्वगणेन चरति। श्वागणिकः।
श्वागणिकी। श्वगणिकः। श्वागणिकी। वेतनादिभ्यो जीवति। वेतनेन जीवति वेतनिकः। धानुष्कः।
वस्नक्रयविक्रयाट्ठन्। वस्नेन मूल्येन जीवति वास्निकः। क्रयविक्रयग्रहणं संघातविगृहीतार्थं।
क्रयविक्रयिकः। क्रयिकः। विक्रयिकः। आयुधाच्छ। चाट्ठन्। आयुधेन जीवत्यायुधीयः। आ
युधिकः। हरत्युत्संगादिभ्यः। उत्संगेन हरत्यौत्संगिकः। भस्त्रादिभ्यः ष्ठन्। भस्त्रया हरति भ

सिद्धांतकौमुदी
॥१०३॥

कः। पिवाह्मस्त्रिकी। विसाप। विवधात्। विवधेन हरतीति विवधिकः। पद्दो व्कू। वैवधिकः। एकदेशाविकृत
स्यानन्यत्वाद्वीवधादपि ष्ठन्। वीवधिकः। वीवधिकी। विवधवीवधशब्दोभयतोबद्धशिक्ये स्कंधवा
ह्येकाष्ठे वर्त्तेते। निर्वृत्तेक्षद्यूतादिभ्यः। अक्षद्यूतेन निर्वृत्तमाक्षद्यूतिकं वैरं। त्रेर्मप्नित्यं। त्रिप्रत्ययां
तप्रकृतिकात्तृतीयांतान्निर्वृत्तेर्थे मप् स्यान्नित्यम्। कृत्यानिर्वृत्तं कृत्रिमं। पक्त्रिमं। भावप्रत्यया
न्तादिमप् वक्तव्यः। पाकेन निर्वृत्तं पाकिमं। त्यागिमं। अपमित्ययाचिताभ्यां कक्कनौ। अपमित्येति ल्य
बन्तं। अपमित्यनिर्वृत्तमापमित्यकं। याचितेन निर्वृत्तं याचितकं। संसृष्टे। दध्ना संसृष्टं दाधिकं॥
चूर्णादिनिः। चूर्णैः संसृष्टाः चूर्णिनोऽपूपाः। लवणाल्लुक्। लवणेन संसृष्टो लवणः सूपः। लवणं
शाकं। मुद्गादण्। मौद्ग ओदनः। ओजःसहोंभसा वर्त्तते। ओजसा वर्त्तते ओजसिकः शूरः। साह
सिकश्चौरः। आंभसिको मत्स्यः। तत्प्रत्यनुपूर्वमीपलोमकूलं। द्वितीयांतादस्माद्वर्त्तत इत्यस्मिन्न
र्थे ठक् स्यात्। क्रियाविशेषणत्वात् द्वितीया। प्रतीपं वर्त्तते प्रातीपिकः। आन्वीपिकः। प्रातिलोमिकः।

॥राम॥
॥१०३॥

म॰

आनुलोमिकः। आतिकूलिकः। आनुकूलिकः॥ परिमुखंच॥ परिमुखंवर्त्तनिपारिमुखिकः॥ चात्पारिपार्श्विकः॥ प्रैंछति गर्ह्यम्॥
द्विगुणार्थं द्विगुणं। तत्प्रयच्छति द्वैगुणिकः। त्रैगुणिकः। वृद्धेर्वृधुषिभावो वक्तव्यः। वार्धुषिकः। कुसीददशैकाद
शात् ष्ठन्ष्ठचौ॥ गर्ह्यार्थस्यामाभ्यामेतौ स्तः। प्रयच्छतीत्यर्थे। कुसीदं वृद्धिस्तदर्थं द्रव्यं कुसीदं तत्प्रय
च्छति कुसीदिकः। कुसीदिकी। एकादशार्थं वा देकादश ते एव वस्तुनो दशानेति विग्रहेऽकारः समासा
न्त इहैवसूत्रे निपात्यते। दशैकादशिकः। दशैकादशिकी। दशैकादशान्प्रयच्छती। उत्तमर्ण एवेहा
पि तद्धितो। उंछति। बदराण्युंछति बादरिकः। रक्षति। समाजं रक्षति सामाजिकः। शब्ददर्दुरं करो
ति॥ शाब्दिकः। दार्दुरिकः। पक्षिमत्स्यमृगान्हन्ति। स्वरूपस्य पर्यायाणां विशेषाणां
च ग्रहणं। मत्स्यपर्यायेषु मीनस्यैव। पक्षिणो हन्ति पाक्षिकः। शाकुनिकः। मायूरिकः। मात्स्यिकः। मैनि
कः। शाकुलिकः। मार्गिकः। हारिणिकः। सारंगिकः। पदोत्तरपदं गृह्णाति। पूर्वपदं गृह्णाति पौर्वप

थः६

म॰ सा॰ ३६

181

मावरणे छत्तेत छीलमस्य छात्रः। छैत्रिकाः। अपूपस्त्वग्रेणेहितमस्मै आपूपिकः। तदस्मै दीयते नियुक्तं। अग्रभोजनं नि
यतं दीयते ऽस्मै आग्रभोजनिकः। श्राणामांसौदनाट्टिठन्॥ श्राणादि युक्तं दीयतेऽस्मै श्राणिकः। श्राणिकी। मांसौ
दनग्रहणं संघातविगृहीतार्थम्। मांसौदनिकः। मांसिकः। औदनिकः॥ भक्तादणन्यतरस्याम्॥ पक्षे ठक्। भ
क्तमस्मै नियुक्तं दीयते भाक्तः। भाक्तिकः। तत्र नियुक्तः॥ आकरे नियुक्तः आकरिकः। अगारान्ताट्ठन्॥
देवागारे नियुक्तो देवागारिकः। अध्यायिन्यदेशकालात्॥ निषिद्धदेशकालवाचकाट्ठक्। अध्येतरि। श्म
शाने ऽधीते श्माशानिकः। चातुर्दश्यामधीते चातुर्दशिकः। निकटे वसति। नैकटिको भिक्षुः। आवसथात्
ष्ठल्। आवसथे वसति आवसथिकः। षित्वान्ङीष्। आवसथिकी। आकर्षात्पर्पादेर्भस्त्रादिभ्यः कुसी
दसूत्राच्च। आवसथात्किसरादेः षितः षडेते ठगधिकारे। षडिति स्तनषट्केन विदि ता इत्यर्थः। प्रत्यया
स्तु मप्त॥ ॥ठकोऽवधिः समाप्तः॥ ॥प्राग्घिताद्यत्॥ तस्मै हितमित्यतः प्राग्यदधिक्रियते। तद्वहतिर
थयुगप्रासङ्गं। रथं वहति रथ्यः। युग्यः। वत्सानां दमनकाले स्कन्धे काष्ठमासज्यते स प्रासङ्गः। तं वह

190

।।२०५।।

तिग्रासेग्यः।धुरीयधुर्यौ।हलिचेतिदीर्घप्राप्तो।नलकुछुरी।तस्यकुछुरोश्चोपधायादीर्घेतिस्यात।धुर्यः।धौरेयः।खः।सर्वधु
रात।सर्वधुरांवहतिसार्वधुरीणः।एकधुराल्लुक्च।एकधुरीणः।एकधुरः।[illegible]धी।रालुक्।हलेवहतिहालिकः।सै
रिकः।स[illegible]।अतीव धूः।तां वहति प्रापयति जन्या।वि[illegible]नुया।द्वितीयांता द्विधा तीयवधेय
हस्यात्ततत्र ये अनुकर्षणम्।पादौ विध्यतीति पद्याः शर्कराः।[illegible]लब्धा।हन्ने लभे तत।धन लब्धा ध
न्याः।ग लं लब्धा गत्यः।[illegible]।अन्नं लब्धा आन्नः।[illegible]गतः।वश्यं परे करानुसारी।[illegible]।पद्या
कर्दमः।नातिशुष्क इत्यर्थः।मूल[illegible]वहिः।आवहलिं आवहः।तस्मा टनन्तं दस्यस्ती।यावहिः।कूळमा स्या
वाहियेषांते त्याः मुकुः।सं[illegible]यां धेनुष्या।।धेनुशब्दस्य युगागमो य प्रत्ययश्च स्वार्थे निपात्यते भ
इायाम्।धेनुष्या बंधके स्थिता।[illegible]तलमनुकानी[illegible]।ना ।।समः
म्यसम सम्मित समं मितेषु।नाव्या नार्यं नाव्या।वयसा तुल्यो वयस्यः।धर्मेण प्राप्यं धर्म्यम्।विषेण वध्यो वि ।।२०५।।
थ्यः।मूलेनानाम्यं मूल्यं।मूलेन समो मूल्यः।सीतया सम्मितं सीत्यं क्षेत्रम्।तुलया सम्मितं तुल्यं।[illegible]

ध्यर्थन्यायादनपेते। धर्मादनपेतं धर्म्यम्। पथ्यम्। अर्थ्यम्। न्याय्यं। छंदसो निर्मिते। छंदसा निर्मितं छंदस्यम्।
इच्छया कृतमित्यर्थः। उरसोण्च। चाद्यत्। उरसा निर्मितः पुत्रः औरसः उरस्यः। हृदयस्य प्रियः। हृद्यो देशः।
हृदयस्य हृल्लेखयदण्लासेष्विति हृदादेशः। मतजनहलात्करणजल्पकर्षेषु। मतं ज्ञानम्। तस्य करणं
भावः साधनं वा मत्यम्। जनस्य जल्पो जन्यं। हलस्य कर्षो हल्यः। तत्र साधुः। सामसु साधुः सामन्यः। वे
न्यः। ये चाभावकर्मणोरिति प्रकृतिभावः। कर्मण्यः। शरण्यः। प्रतिजनादिभ्यः खञ्। प्रतिजने साधुः
प्रातिजनीनः। सांयुगीनः। सार्वजनीनः। वैश्वजनीनः। भक्ताण्णः। भक्ते साधवो भाक्ताः शालयः।
परिषदो ण्यः। पारिषद्यः। परिषद इति योगविभागाण्णोऽपि। पारिषदः। कथादिभ्यष्ठक्। कथायां साधुः
काथिकः। गुडादिभ्यष्ठञ्। गुडे साधुर्गौडिक इक्षुः। साक्तुको यवः। पथ्यतिथिवसतिस्वपतेर्ढञ्। प
थि साधु पाथेयम्। आतिथेयः। वसतेर्वसतिस्तत्र साधुर्वासतेयी रात्रिः। स्वापतेयं धनम्। सभाया
यः। सभ्यः। समानतीर्थे वासी। साधुरिति निवृत्तम्। वसतीति वासी। समानतीर्थे गुरोर्वसतीति सतीर्थ्यः।

सिद्धांतकौमुदीसु०

॥१०६॥

समानोदरेशयित ओचोदात्तः। समानेउदरेशयितः स्थितः समानोदर्योभ्राता। सोदराद्यः। सोदर्यः। छयतोःप्राग्वत॥
॥ ॥इतिघाधिकारः॥ ॥ प्राक्क्रीताच्छः। तेनक्रीतमित्यतः प्राक्छोधिक्रियते। उगवादिभ्योयत्। प्राक्क्रीता-
दित्येव। उवर्णान्ताद्गवादिभ्यश्च यत्। छस्यापवादः। नाभिनभंच। नभ्योक्षः। नभ्यमंजनं। रथनाभावेवेदम्। शुनः
संप्रसारणंवावदीर्घत्वम्। शून्यं। ऊधसोनङ्। ऊधन्यः। कंबला[illegible] संज्ञायाम्। यत्स्यात्। कंबल्यमूर्णा-
पलशतम्। संज्ञायांकिम्। कंबलीयाऊर्णा। विभाषाहविरपूपादिभ्यः। आमिक्ष्यंदधि। आमिक्षीयम्। पु-
रोडाश्यास्तंडुलाःपुरोडाशीयाः। अपूप्यम्। अपूपीयम्। तस्मैहितम्। वत्सेभ्योहितोवत्सीयोगोधुक्। शं-
कव्यंदारु। गव्यंहविष्यम्। शरीरावयवाद्यत्। दंत्यं। कंठ्यं। नस्यम्। नाभ्यम्। खलयवमाषतिलवृषब्र-
ह्मणश्च। खलायहितंखल्यम्। यव्यम्। ब्रह्मण्यम्। [illegible]थ्या। [illegible]। अजथ्यायूथिः।
अविथ्या। आत्मन्विश्वजनभोगोत्तरपदात्खः। आत्माध्वानौखे। एतौखेप्रकृत्यास्तः। आत्मनेहित-
मात्मनीनं। विश्वजनीनं। कर्मधारयादेवेष्यते। षष्ठीतत्पुरुषाद्बहुव्रीहेश्च छएव। विश्वजनीयं॥

[illegible]

॥राम॥

॥१०६॥

193

थ्यर्थन्यायादनपेते। धर्मादनपेतं धर्म्यम्। पथ्यम्। अर्थ्यम्। न्याय्यं। छंदसो निर्मिते। छंदसा निर्मितं छंदस्यम्।
इछया कृतमित्यर्थः। उरसोण्च। चाद्यत्। उरसा निर्मितः पुत्रः औरसः। उरस्यः। हृदयस्य प्रियः। हृद्यो देशः।
हृदयस्य हृल्लेखयदण्लासेष्विति हृदादेशः। मतजनहलात्करणजल्पकर्षेषु। मतं ज्ञानम्। तस्य करणं
भावः साधनं वा मत्यम्। जनस्य जल्पो जन्यं। हलस्य कर्षो हल्यः। तत्र साधुः। सामसु साधुः सामन्यः। वे
मन्यः। ये चाभावकर्मणोरिति प्रकृतिभावः। कर्मण्यः। शरण्यः। प्रतिजनादिभ्यः खञ्। प्रतिजने साधुः
प्रातिजनीनः। सांयुगीनः। सार्वजनीनः। वैश्वजनीनः। भक्ताण्णः। भक्ते साधवो भाक्ताः शालयः।
परिषदो ण्यः। पारिषद्यः। परिषद इति योगविभागात् णोपि। पारिषदः। कथादिभ्यष्ठक्। कथायां साधुः
काथिकः। गुडादिभ्यष्ठञ्। गुडे साधुर्गौडिक इक्षुः। साक्तुको यवः। पथ्यतिथिवसतिस्वपतेर्ढञ्। प
थि साधु पाथेयम्। आतिथेयः। वसनं वसतिस्तत्र साधुर्वासतेयी रात्रिः। स्वापतेयं धनम्। सभाया
यः। सभ्यः। समानतीर्थे वासी। साधुरिति निवृत्तम्। वसतीति वासी। समानतीर्थे गुरौ वसतीति सतीर्थ्यः।

पंचजनादुपसंख्यानम्। पांचजनीनं। [illegible]ना ठञ् खश्च। सार्वजनिकः। सर्वजनीनः। [illegible]ना ठञ्। माहाजनि-
कः। मातृभोगीणः। पितृभोगीणः। राजभोगीनः। आचार्यादणत्वं च। आचार्यभोगीनः। स[illegible]भ्यां ण ढ-
ञौ। सार्वो णो वेति वक्तव्यम्। सर्वस्मै हितं सार्वम्। सर्वीयम्। पुरुषाद्वधविका[illegible]तेनकृतेषु। सामर्थ्यका-
रकयोगात्तेनेत्यस्य दन्तुमध्ये निवेशः। पुरुषस्य वधः पौरुषेयः। तस्येदमित्यणि प्राप्ते। पुरुषस्य विकारः
पौरुषेयः। आगिवजनाहित्योऽग् इत्यणि प्राप्ते। समूहे थाणि प्राप्ते। एकाकिनोपि प्रवृत्तिः पौरुषेयद्व-
ता इवेति माघः। तेन कृते तु ग्रंथे चौणि प्राप्ते। अग्रंथे तु प्रासादादाव प्राप्त एवेति विवेकः॥
माणवचरकाभ्यां खञ्। माणवाय हितं माणवीनं। चारकीणं। त[illegible]कृतेः प्रकृतौ। विकृतिवा-
चकाच्चतुर्थ्यन्तात्तदर्थायां प्रकृतौ वाच्यायां प्रत्ययः स्यात्। अंगारेभ्य एतानि आंगारीयाणि का-
ष्ठानि। प्राकारीया इष्टकाः। शंकव्यं दारु। छदिरुपधिबलेर्ढञ्। छादिषेयाणि तृणानि। बाले-
यास्तंडुलाः। उ[illegible]धिशब्दात्स्वार्थ इष्यते। उपधीयत इत्युपधिः रथांगं तदेव औपधेयम्। आ[illegible]

वि ५

सिद्धान्तकौमुदी

॥१०७॥

तोपानहोर्ज्यः॥ छस्यापवादः॥ आर्षभ्यो वत्सः॥ औपानह्यो मुञ्जः॥ चर्मण्यप्ययमेव पूर्वविप्रतिषेधेन॥ औपानह्यम्॥ चर्मणि
ऽञ्॥ चर्मण्योया विकृतिरित्यद्वा॥ रकादङ्गस्यात्॥ वाध्रै इदं वार्ध्रं चर्म॥ वारत्रं चर्म॥ तदस्य तदस्मिन्स्यादिति
प्राकारश्चासामिष्टकानां स्यात् प्राकारीया इष्टकाः॥ प्रासादीयं दारु॥ प्राकारोऽस्मिन्स्यात् प्राकारीयो देशः॥
इतिराद्यो लोकिकीं विवक्षामनुसारयति॥ तेनेदन॥ प्रासादो देवदत्तस्य स्यादिति॥ परिखाया ढञ्॥ पारिखे
यी भूमिः॥ श्री ॥ छयतोर्यविधिः॥ ॥ प्राग्वतेष्ठञ्॥ तेन तुल्यमिति वतिं वक्ष्यति॥ ततः प्राक् ठञधिक्रि
यते॥ आर्हादगोपुच्छसंख्यापरिमाणाट्ठक्॥ तदर्हतीत्येतदभिव्याप्य ठञधिकारमध्ये ठञोऽपवादष्ठ
धिक्रियते गोपुच्छादीन्वर्जयित्वा॥ असमासे निष्कादिभ्यः॥ आर्हादित्येतत्तेन क्रीतमिति यावत्समृद
शब्दस्यावधित्वमनुवर्त्तते॥ निष्कादिभ्योऽसमासे ठक् स्यात् आर्हीयेष्वर्थेषु॥ नैष्किकम्॥ समासे तु ठञ्॥
परिमाणान्तस्यासंज्ञाशाणयोः॥ उत्तरपदस्य वृद्धिः स्याञ्जिदादौ॥ परमनैष्किकम्॥ असमासग्रहणे
ज्ञापकं भवतीतः प्राक् हतविधिरिति॥ तेन सुगन्धे यवापूप्यमित्यादि॥ [illegible]र्थे तसेरव्यापूर्वपदा
नो तदन्तग्रहणे प्राग्वतेरिष्यते॥ बालुकि॥ पाराय लिकः॥ द्वैपारायणिकः॥ ऋलुकीति किं॥

॥राम॥

॥१०

घाभ्यां शूर्पाभ्यां क्रीतौ द्विशूर्पौ। द्विशूर्पेण क्रीतं शूर्पादञ् नाल्लुक्। किंतु ठञ्। द्विशौर्पिकम्। शताच्च ठन्यतावशते। शतेन क्रीतं शत्यं
शतिकम्। अशते किम्। शतं परिमाणमस्य शतकः संघः। इह प्रत्ययार्थो वस्तुतः प्रकृत्यर्थान्न भिद्यते तेन ठन्यतौ न किंतु
कन्नेव। असमास इत्येव। द्विशतेन क्रीतं द्विशतिकं। संख्याया अतिशदन्तायाः कन्। संख्यायाः कन्स्यादार्हीयेर्थे न तु
त्यन्तशदन्तायाः। पंचभिः क्रीतः पंचकः। बहुकः। त्यन्तायास्तु साप्ततिकः। शदन्तायाः। चात्वारिंशत्कः। वतोरिड्वा। वत्व
न्तात्कन इड्वा स्यात्। तावतिकः। तावत्कः। विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायां। योगविभागः कर्तव्यः। आर्हीये कन्
स्यादसंज्ञायां तु ड्वुन्स्यात्कनोपवादः। विंशकः। त्रिंशकः। संज्ञायां तु विंशतिकः। त्रिंशत्कः। कंसाट्टिठन्। टि
ङीबर्थः। कांसिकः। कांसिकी। अर्धाच्चेति वक्तव्यं। आर्धिकः। आर्धिकी। कार्षापणाट्टिठन्वक्तव्यः प्रतिरादेशश्च
वा। कार्षापणिकः। कार्षापणिकी। प्रतिकः। प्रतिकी। शूर्पादञन्यतरस्याम्। शौर्पी। शौर्पिकी। शतमानविंशति
कसहस्रवसनादण्। एभ्योऽण्स्यात् ठञोपवादः। शतमानेन क्रीतं शातमानं। वैंशतिकम्। साहस्रं। वा

इकारउच्चारणार्थः।२   ३७०   म१४

थि२

सिद्धांतकौमुदी

॥१०८॥

सनं। अध्यर्द्धपूर्वद्विगोर्लुगसंज्ञायाम्। अध्यर्द्धपूर्वाद्द्विगोश्च परस्यार्हीयस्य लुक्स्यात्। अध्यर्द्धकंसं। द्विकंसं। संज्ञायान्तु।
पांचकला[illegible]कम्। विभाषा कार्षापणसहस्राभ्याम्। लुग्वा स्यात्। अध्यर्द्धकार्षापणं। अध्यर्द्धकार्षापणिकम्। द्विकार्षा
पणं। द्विकार्षापणिकं। औपसंख्यानिकस्याटिठनो लुक्। पक्षे अध्यर्द्धप्रतिकम्। द्विप्रतिकं। अध्यर्द्धसहस्रं।
अध्यर्द्धसाहस्रम्। द्विसहस्रं। द्विसाहस्रं। द्वित्रिपूर्वान्निष्कात्। लुग्वा स्यात्। द्विनिष्कं। द्विनैष्किकम्। त्रिनिष्कं।
त्रिनैष्किकम्। बहुपूर्वाच्चेति वक्तव्यम्। बहुनिष्कं। बहुनैष्किकं। बिस्ताच्च। द्वित्रिबहुपूर्वाद्बिस्तादार्हीय
स्य लुग्वा स्यात्। द्विबिस्तं। द्विबैस्तिकमित्यादि। विंशतिकात्खः। अध्यर्द्धपूर्वद्विगोरित्येव। अध्यर्द्धविंशतिकी
नं। द्विविंशतिकीनम्। खार्या ईकन्। अध्यर्द्धखारीकं। द्विखारीकं। केवलायाश्चेति वक्तव्यम्। खारी
कम्। पणपादमाषशताद्यत्। अध्यर्द्धपण्यम्। द्विपण्यम्। द्विपाद्यम्। पादःपदितिनायस्येति ॥राम॥
लोपस्यस्थानिवद्भावात्। पद्यत्यतदर्थे इत्यपि न। प्राग्वर्त्यंगाथस्यैवनचगृहणात्। शाणाद्वा। यत्स्यात्। ॥१०९॥
पक्षे ठञ्। तस्य लुक्। अध्यर्द्धशाण्यम्। अध्यर्द्धशाणम्। द्वित्रिपूर्वादण्च। शाणादित्येव। योध्यत्

अध्यर्द्धपाद्यं।२

हलंतस्यात्नस्याद्दितिनाबः२

198

तेन त्रैरूप्यम्। परिमाणं तस्याः संज्ञा शाणयोरिति पर्युदासाद्द्वादिष्विव। द्वैशाणं। द्विशाण्यम्। द्विशाणम्। भूत्वस्मादयस्त्वेयो दश
प्रत्ययाः प्रकृतास्तेषां समर्थविभक्तयोऽर्थाश्चाकाङ्क्षिताः। तश्च इदानीमुच्यते।। ॥ तेन क्रीतम्। ठञ्। गोपुच्छेन क्रीतं गोपु
च्छिकम्। साप्ततिकं। प्रास्थिकं। ठक्। नैष्किकम्। तस्य निमित्तं संयोगोत्पातौ। संयोगः संबन्धः। उत्पातः शुभाशुभसू
चकं। शत्यः। शतिको धनपतिसंयोगः। शत्यं शतिकं दक्षिणाक्षिस्पन्दनम्। शतस्य निमित्तमित्यर्थः। वातपित्तश्लेष्म
भ्यः शमनकोपनयोरुपसंख्यानम्। वातस्य शमनं कोपनं वा वातिकं। पैत्तिकम्। श्लैष्मिकम्। सांनिपाताच्चेति वक्त
व्यम्। सांनिपातिकम्। गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत्। गोनिमित्तं संयोग उत्पातो वा। गव्यः। धन्यः। धन्यो यशस्यः।
स्वर्ग्यः। गोद्व्यचः किम्। विजयस्य वैजयिकम्। असंख्या इत्यादि किम्। पंचानां। पंचकं। सप्तकं। प्रास्थिकं। खारीकम्।
अश्वादि। आश्विकम्। आरश्मिकम्। ब्रह्मवर्चसादुपसंख्यानं कर्तव्यम्। ब्रह्मवर्चस्यम्। पुत्राच्छ च। साद्यत्। पुत्री
यः। पुत्र्यः। सर्वभूमिपृथिवीभ्यामणञौ। सर्वभूमेर्निमित्तं संयोग उत्पातो वा। सार्वभौमः। पार्थिवः। सर्वभूमिश
ब्दोऽनुशातिकादिषु पठ्यते। तस्येश्वरः। तत्र विदित इति च। सर्वभूमेरीश्वरः सर्वभूमौ विदितो वा सार्वभौमः। पा
र्थिवः। लोकसर्वलोकाट्ठञ्। तत्र विदित इत्यर्थे। लौकिकः। अनुशातिकादित्वादुभयपदवृद्धिः। सार्वलौकिकः।

स्य १

॥१०१॥

तस्यवापः। उप्यतेऽस्मिन्निति वापः क्षेत्रम्। प्रस्थस्य वापः प्रास्थिकं। द्रौणिकं। खारीकम्। पात्रात्ष्ठन्। पात्रस्य वापः क्षेत्रं। पात्रि
कः। पात्रिकी क्षेत्रभक्तिः। तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयते। वृद्धिर्दीयत इत्यादि क्रमेण प्रत्येकमभिसंबंधा
देकवचनमपि वा अस्मिन्वृद्धिः आयो लाभः शुल्कं उपदा वा दीयते पंचकः। शत्यः। शतिकः। साहस्रः। तत्र मलेनि
मूलातिरिक्तं ग्राह्यं वृद्धिः। ग्रामादिषु स्वामिग्राह्यो भाग आयः। विक्रेतुर्मूल्यादधिकं ग्राह्यो लाभः। रक्षा
निर्वेशो राजभागः शुल्कः। उत्कोच उपदा। चतुर्थ्यर्थ उपसंख्यानम्। पंचास्मै वृद्ध्यादि दीयते पंचको देव
दत्तः। समभब्राह्मणे दानमितिवदधिकरणे विवक्षा वा। पूरणार्धाट्ठन्। यथाक्रमं ठञ्ठनोरपवादः। द्वि
तीयो वृद्ध्यादिरस्मिन् दीयते द्वितीयिकः। तृतीयिकः। अर्धिकः। अर्धशब्दो रूपकार्धे रूढः। भागाद्यच्च॥
चाट्ठन्। भागशब्दोपि रूपकस्यार्धे। भागो वृद्ध्यादिरस्मिन् भाग्यं। शतं। भागिकम्। भाग्या भागिका विंशतिः।
तद्धरति वहत्यावहति भाराद्वंशादिभ्यः। वंशादिभ्यः परो यो भारशब्दः तदंतेय प्रातिपदिकेन स्वक्कतिक द्विती
यान्तादिभ्य थः। वंशभारं हरति आवहति वा वांशभारिकः। सेहुभारिकः। भारा वंशादिभ्य इत्यस्य व्याख्यान्त
रं भारस्तेभ्यो वंशादिभ्य इति। भारभूतान्वंशान्वहति वांशिकः। सेहुकः। वस्नद्रव्याभ्यां ठन्कनौ। यथा

वहति २

॥राम॥
॥१०१॥

200

संख्यं स्तः वस्नं हरति वहत्यावहति वा वस्निकः। द्रव्यकः। संभवत्यवहरतिपचति। प्रस्थं संभवति प्रास्थिकः। कटाहः। प्रस्थं स्व
स्मिन् समावेशयतीत्यर्थः। प्रास्थिकी ब्राह्मणी। प्रस्थमुपसंहरति पचति वेत्यर्थः। तत्पचतीति द्रोणादण्वा। द्रोणं पच
ति द्रौणी। द्रौणिकी। आढकाचितपात्रात्खोन्यतरस्याम्। पक्षे ठञ्। आढकं संभवत्यवहरति पचति वा आढकीना
आढकिकी। आचितीना। आचितिकी। पात्रीणा। पात्रिकी। द्विगोः ष्ठंश्च। आढकाचितपात्रादित्येव। आ
ढकाद्यंतात् द्विगोः संभवत्यादिष्वर्थेषु ष्ठन् खो वा स्तः। पक्षे ठञ्। तस्याध्यर्द्धेति लुक्। षित्वात् ङीष्। द्व्याढकि
की। द्व्याढकीना। द्विगोरिति ङीष्। द्व्याढकी। द्व्याचितिकी। द्व्याचितीना। अपरिमाणेति ङीप्निषेधः। द्व्याचिता।
द्विपात्रिकी।। द्विपात्रीणा। द्विपात्री। सोस्यांशवस्नभृतयः। अंशो भागः। वस्नं मूल्यं। भृतिर्वेतनं। सो पंचांशो वस्नो
भृतिर्वास्य पंचकः। तदस्य परिमाणं। प्रस्थं परिमाणमस्य प्रास्थिको राशिः। संख्यायाः संज्ञासंघसूत्राध्ययने
षु। पूर्वसूत्रमनुवर्त्तते। तत्र संज्ञायां स्वार्थे प्रत्ययो वाच्यः। यथा। द्व्येकयो। विति [illegible]त्संख्यामात्रवृत्तेः परिमाणिनि
व

प्रत्ययः। पंचैव पंचकाः शकुनयः। पंचपरिमाणमेषां मिति वा। संघे पंचकः। सूत्रे वाच्ये अष्टकं पाणिनीयं संघेषश इत्यत्र प्राणिसमूहे
रूढत्वात्सूत्रे पृथगुपात्तम्। पंचकमध्ययनं। स्तोमे डविधिः। पंचदशमंत्राः परिमाणमस्य पंचदशाः। सप्तदशाः। ए
कविंशाः। सोमयागेषु छंदोगैः क्रियमाणाष्टष्ठादिसंज्ञिका स्तुतिः स्तोमः। पंक्तिविंशति त्रिंशच्चत्वारिंशत्पंचाश
त्षष्टिसप्तत्यशीतिनवतिशतं। एते रूढिशब्दा निपात्यन्ते। पंचद्दशतौ वर्गे वा। पंचपरिमाणमस्य पंचद्वर्गः। दश
द्वा। पक्षे पंचकः। दशकः। त्रिंशच्चत्वारिंशतो ब्राह्मणे संज्ञायां डण्। त्रिंशदध्यायाः परिमाणमेषां ब्राह्मणानां
त्रैंशानि। चात्वारिंशानि। तदर्हति। लब्धुं योग्यो भवतीत्यर्थे द्वितीयान्ताट्ठञादयः स्युः। श्वेतछत्रमर्हतीति
श्वैतछत्रिकः। छेदादिभ्यो नित्यम्। नित्यमाभीक्ष्ण्यम्। छेदं नित्यमर्हति छैदिको वेतसः। छिन्नं प्ररूढत्वा
त्। विरागं विरंगं च। विरागं नित्यमर्हति वैरंगिकः। शीर्षच्छेदाद्यच्च। शिरश्छेदं नित्यमर्हति शीर्षच्छेद्यः। शै
र्षच्छेदिकः। यट्ठकोः सन्नियोगेन शिरसः शीर्षभावो निपात्यते। दंडादिभ्यः। एभ्यो यत्स्यात्। दंडमर्हतीति दं

घः। अघ्यौ विध्यः। कडंकरदक्षिणाच्छ। बाधार्थः। कडंकरोतीति विग्रहे ऽत एव निपातनाऽत्वम्। कडंकरं मा
षमुद्गादिकाष्ठमर्हतीति कडंकरीयो गौः। कडंकर्यः। दक्षिणमर्हतीति दक्षिणीयः। दक्षिण्यः। स्थालीबिलात्।
स्थालीबिलमर्हति स्थालीबिलीयाः तंडुलाः। स्थालीबिल्याः पाकयोग्या इत्यर्थः। यज्ञर्त्विग्भ्यां घखञौ। यथा
संख्यं स्तः। यज्ञमृत्विजं वार्हतीति यज्ञियः। आर्त्विजीनो यजमानः। यज्ञर्त्विग्भ्यां तत्कर्मार्हतीत्युपसंख्यानम्।
याज्ञियो देशः। आर्त्विजीनः। ऋत्विक्। आर्हीयाणां ठगादीनां द्वादशानां पूर्णोवधिः॥ ॥ अतः परं ठञेव॥
पारायणतुरायणचांद्रायणं वर्त्तयति पारायणं वर्त्तयतीति पारायणिकः छात्रः। तुरायणं यज्ञविशेषस्तं व
र्त्तयतीति तौरायणिको यजमानः। चांद्रायणिकः। संशयमापन्नः। संशयविषयीकृतोर्थः सांशयिकः॥ यो
योजनं गच्छति। योजनिकः। क्रोशशतयोजनशतयोरुपसंख्यानम्। क्रोशशतं गच्छति क्रौशशतिकः। यो
जनशतिकः। ततोभिगमनमर्हतीति च वक्तव्यम्। क्रोशशतादभिगमनमर्हति क्रौशशतिको भिक्षुः।
योजनशतिकः आचार्यः। पथः ष्कन्। षो ङीषर्थः। पंथानं गच्छति पथिकः। पथिकी। पंथो ण नित्यम्। प

थे

थानंनित्यंगछतिपांथः।पंथा।उत्तरपथेनाहृतंच।उत्तरपथेनाहृतमौत्तरपथिकं।उत्तरपथेनगछतीत्यौत्तरप
थिकः।कालात्।व्युष्टादिभ्योणित्यतः प्रागधिकारोयम्।तेननिर्वृत्तम्।अह्नानिर्वृत्तमाह्निकम्।तमधीष्टो
भृतोभूतोभावी।अधीष्टः सत्कृत्यव्यापारितः।भृतोवेतनेनक्रीतः।भूतःस्वसत्तयाव्याप्तः।कालः।भावीतादृशए
वानागतः।मासमधीष्टःमासिकोध्यापकः।मासंभृतोमासिकःकर्मकरः।मासंभूतःमासिकोव्याधिः।मासं
भावीमासिकउत्सवः।मासाद्वयसियत्खञौ।मासंभूतोमास्यः मासीनः।द्विगोर्यप्।मासाद्वयसीत्यनुवर्त्य
ते।द्वौमासौभूतः द्विमास्यः।षण्मासाण्ण्यच्च।वयसीत्येव।यबष्ठञनुवर्त्तते।ण्यच्।षाण्मास्यः।षण्मास्यः॥
षाण्मासिकः।अवयसिठंश्च।चाद्यत्।षण्मासिकोव्याधिः।षण्मास्यः।समायाःखः।समामधीष्टोभृतोभूतोभा ॥राम॥
वीवासमीनः।द्विगोर्वा।समायाःखइत्येव।तेनपरिजय्येत्यतःप्राङ्निर्वृत्तादिषुपंचस्वर्थेषुप्रत्ययाः।द्वि
समीनः।द्वैसमिकः।रात्र्यहःसंवत्सराच्च।द्विगोरित्येव।द्विरात्रीणः।द्वैरात्रिकः।द्व्यहीनः।द्वैयह्निकः। ॥१११॥
समासांतविधेरनित्यत्वान्नटच्।द्विसंवत्सरीणः।संख्यायाःसंवत्सरसंख्यस्यच।संख्यायाउत्तरप

दस्य वृद्धिः स्याञ्ञिदादौ। द्विसांवत्सरिकः। द्विषष्टिर्व्रतो द्विषाष्टिकः। वर्षाल्लुक् च। वर्षशब्दान्ता द्विगोर्वा खः। पक्षे ठञ्। वा स्य लुक्।
त्रीणि रूपाणि। द्विवर्षीणो व्याधिः। द्विवर्षः। वर्षस्याभविष्यति। उत्तरपदस्य वृद्धिः स्यात्। द्विवार्षिकः। भविष्यति तु द्वैवर्षिकः।
चित्तवति नित्यम्। वर्षशब्दान्ताद् द्विगोः प्रत्ययस्य नित्यं लुक् स्याच्चेतने प्रत्ययार्थे। द्विवर्षो दारकः। षष्टिकाः षष्टि
रात्रेण पच्यन्ते। बहुवचनमतन्त्रम्। षष्टिको धान्यविशेषः। तृतीयान्तात्कन् स्यात् रात्रशब्दलोपश्च निपात्यते। तेन
परिजय्यलभ्यकार्यसुकरम्। मासेन परिजय्यो जेतुं शक्यो मासिको व्याधिः। मासेन लभ्यं कार्यं सुकरं वा
मासिकम्। तदस्य ब्रह्मचर्यम्। द्वितीयान्तात्कालवाचिनोऽस्येत्यर्थे ठञ् प्रत्ययः स्यात्। अत्यन्तसंयोगे द्वितीया। मासं ब्र
ह्मचर्यमस्य मासिको ब्रह्मचारी। आर्धमासिकः। यद्वा प्रथमान्तादस्येत्यर्थे विधेयः। मासोऽस्येति मासिकं
ब्रह्मचर्यम्। महानाम्न्यादिभ्यः षष्ठ्यन्तेभ्य उपसंख्यानम्। महानाम्न्यो नाम विदामघवन्नित्याद्या ऋचः।
तासां ब्रह्मचर्यमस्य माहानाम्निकः। हरदत्तस्तु लस्याढ्ढ इति पुंवद्भावान्माहानामिक इत्याह। तस्य दक्षिणा य
ज्ञाख्येभ्यः। द्वादशाहस्य दक्षिणा द्वादशाहिकी। आख्याग्रहणादकालादपि। आग्निष्टोमिकी। वाजपेयि



कीतत्रचदीयतेकार्यंभववत्।प्रावृषिदीयतेकार्यंवाप्रावृषेण्यम्।शारदम्।कालाधिकारस्यठञोविधिः। ॥
व्युष्टादिभ्योऽण्।व्युष्टेदीयतेकार्यंवावैयुष्टम्।व्युष्ट।तीर्थ।संग्राम।प्रवास।इत्यादि।तेनयथाकथाचहस्ताभ्यांण
यतौ।यथाकथाचेत्यव्ययसंघातः।तृतीयान्तहस्तशब्दाच्चयथासंख्यंणयतौस्तः।अर्थद्वयंतुयथाभिधानेनेष्य
ते।यथाकथाचदीयतेकार्यंवायाथाकथाचम्।अनादरेणदेयंकार्यंवेत्यर्थः।हस्तेनदीयतेकार्यंवाहस्त्य
म्।संपादिनि।तेनेत्येव।कर्णवेष्टकाभ्यांसंपादिकार्णवेष्टकिकंमुखम्।कर्णिकाभ्याम्अवश्यंशोभ
तइत्यर्थः।कर्मवेषाद्यत्।कर्मणासंपादिकर्मण्यंशौर्यम्।वेषेणसंपादिवेष्योनटः।वेषःकृत्रिमआकारः।त
स्मैप्रभवतिसंतापादिभ्यः।संतापायप्रभवतिसांतापिकः।सांग्रामिकः।योगाद्यच्च।चाट्ठञ्।योगायप्रभ ॥राम॥
वतियोग्यः।यौगिकः।कर्मणउकञ्।कर्मणेप्रभवतिकार्मुकम्।समयस्तदस्यप्राप्तम्।समयःप्राप्तोऽस्यसामा ॥११२॥
यिकम्।ऋतोरण्।ऋतुःप्राप्तोऽस्यार्तवम्।कालाद्यत्।कालःप्राप्तोऽस्यकाल्यंशीतम्।प्रकृष्टेठञ्।काला
दित्येव।तदस्येतिवा।प्रकृष्टःदीर्घःकालोऽस्येतिकालिकंवैरम्।प्रयोजनम्।तदस्येत्येव।इदमस्यप्रयो

जनमस्यऐंद्रमहिकम्।प्रयोजनंफलंकारणंच।अनुप्रवचनादिभ्यश्छः।अनुप्रवचनंप्रयोजनमस्यानुप्रवचनीयम्। यं॥२
समापनात्सपूर्वपदात्।व्याकरणसमापनंप्रयोजनमस्यव्याकरणसमापनीयं।ऐकागारिकट्चौरे।एकमसहा
यमगारंप्रयोजनंयस्यमुमुषिषोःसऐकागारिकश्चौरः।आकालिकडाद्यंतवचने।समानकालावाद्यंतौ
यस्येत्याकालिकः।समानकालस्याकालआदेशः।आशुविनाशीत्यर्थः।पूर्वदिवसेमध्याह्नादावुसद्यदिने
लेतेनैवनश्यतीतिवा।आकाकादृश्या।आकालिकाविद्युत्।वनःपूर्णोऽवधिः॥१॥तेनतुल्यंक्रियाचेद्वतिः।
ब्राह्मणेनतुल्यंब्राह्मणवदधीते।क्रियाचेदितिकिम्।गुणतुल्येमाभूत्।पुत्रेणतुल्यःस्थूलः।तत्रतस्येव।मथु
रायामिवमथुरावत्स्रुघ्नेप्राकारः।चैत्रस्येवचैत्रवन्मैत्रस्यगावः।त[illegible]दर्हं।विधिमर्हतिविधिवत्पू
ज्यते।क्रियाग्रहणंमंडूकप्लुत्यानुवर्तते।तेनेहन।राजानमर्हतिछत्रं।तस्यभावस्त्वतलौ।प्रकृतिजन्य
बोधेप्रकारोभावः।गोर्भावः।गोत्वं।गोता।वांतंक्लीबे।तलंतंस्त्रियाम्।आचत्वात्।ब्रह्मणस्त्वइष्यतः
ज्ञाकूलत्वतलावधिक्रियेते।अपवादैःसहसमावेशार्थंगुणवचनादिभ्यःकर्मणिविधानार्थंचेदम्।चकारो

त्वतलो त्वधिकारलब्धाविति भावः

नञ्स्नञौ स्यातामपि स भावे गार्थः। स्त्रियाः भावः स्त्रैणं स्त्रीत्वं। स्त्रीता। पौंस्नं। पुंस्त्वं। पुंस्ता। पृथ्वादिभ्य इमनिज्वा। वा वचनमणादिसमावे
शार्थम्। रऋतो हलादेर्लघोः। इष्ठेमेयस्सु। टेः। टिलोपः स्यादिष्ठेमेयस्सु। पृथोर्भावः प्रथिमा। पार्थवं। म्रदिमा। मार्दवम्। वर्ण
दृढादिभ्यः ष्यञ्च। चादिमनिच्। शौक्ल्यम्। शुक्लिमा। दार्ढ्यम्। पृथुमृदुभृशकृशदृढपरिवृढानामेव रत्वम्। द्रढिमा।
षोङीषर्थः। औचिती। याथाकामी। गुणवचनब्राह्मणादिभ्यः कर्मणि च। चाद्भावे। जडस्य कर्म भावो वा जाड्यम्।
वा ब्राह्मण्यम्। चार्हतो नुम्च। अर्हतो भावः कर्म वा आर्हन्त्यम्। आर्हन्ती। ब्राह्मणादिराकृतिगणः। आपादपरिसमाप्तेर्भाव
कर्माधिकारः। चातुर्वर्ण्यादीनां स्वार्थ उपसंख्यानम्। चत्वारो वर्णाश्चातुर्वर्ण्यम्। चातुराश्रम्यम्। त्रैस्वर्यम्। षाड्गुण्यम्। सै
न्यम्। सांनिध्यं। सामीप्यं। औपम्यं। त्रैलोक्यं। सर्ववेदाः सर्ववेदाः तानधीते सर्ववेदः। सर्वादेरिति लुक्। स एव सार्व
वेद्यः। चतुर्वेदस्योभयपदवृद्धिश्च। चतुरो वेदानधीते चतुर्वे[illegible]स एव चातुर्वैद्यः। चतुर्विद्यस्येति पाठान्तरम्। च
तुर्विद्य एव चातुर्वैद्यः। स्तेनाद्यन्नलोपश्च। नेति संघातग्रहणम्। केवलसोर्योपमा घुसू। स्तेनस्य भावः कर्म वा स्ते
यम्। स्तेनाद्दिति योगं विभज्य स्तेन्यमिति ष्यञन्तमपि केचिदिच्छन्ति। सख्युर्यः। सख्युर्भावः कर्म वा सख्यम्। दूतवणि

बा:।३

॥राम॥
॥११३॥

स्याज्वाद्दूतस्य भावः कर्मवा दूत्यम्। वणिज्यमिति काशिका। माधवस्तु वणिज्याशब्दः स्वभावात् स्त्रीलिंगः। सावएव
वात्र प्रत्ययो न तु कर्मणीत्याह। साध्ये तु दूतवणिग्भ्यां येति नास्त्येव। ब्राह्मणादित्वाद्वाणिज्यमपि। कपिज्ञात्योर्ढक्। का
पेयम्। ज्ञातेयम्। पत्यन्तपुरोहितादिभ्यो यक्। सेना। पत्यं पौरोहित्यम्। राजासे। राजशब्दोऽसमासे यकं लभते यथा॥
राज्ञो भावः कर्मवा राज्यम्। समासे तु ब्राह्मणादित्वात् ष्यञ्। आधिराज्यम्। प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ्।
प्राणभृज्जाति। आश्वम्। औष्ट्रम्। वयोवचन। कौमारं। कैशोरम्। औद्गात्रम्। औन्नेत्रम्। सौष्ठवं। दौष्ठवं। हायन
न्तयुवादिभ्योऽण्। द्विहायनो। द्वैहायनम्। यौवनम्। स्थाविरम्। श्रोत्रियस्य यलोपश्च। श्रौत्रम्। कुशलचपलनिपु
णपिशुनकुतूहलक्षेत्रज्ञाः युवादिषु ब्राह्मणादिषु पठ्यन्ते। कौशलं। कौशल्यमित्यादि। इगंताच्च लघुपूर्वात्।
शुचेर्भावः कर्मवा शौचम्। मौनम्। कथं काव्यम्। कविशब्दस्य ब्राह्मणादित्वात्। योपधाद्गुरूपोत्तमाद्वुञ्॥
रामणीयकम्। आभिधानीयकम्। सहायाद्वा। साहाय्यम्। साहायकम्। द्वंद्वमनोज्ञादिभ्यश्च। शैष्योपाध्यायिका।
मनोज्ञकं। गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु। अत्याकारोऽधिक्षेपः। तदवेतः। ते गोत्रचरणयोर्भावकर्मणि वाच्ये

न्चं

च्छव गतवान्।। गार्गिकया श्लाघते। गार्ग्यत्वेन विकत्थत इत्यर्थः। गार्गिकयाँ त्याकुरुते। गार्गिकामवैत।। होत्राभ्यश्छः।। होत्राश
ब्द ऋत्विग्वाची स्त्रीलिंगः। बहुवचनाद्विशेषग्रहणम्। अच्छावाकस्य भावः कर्म वा अच्छावाकीयम्। मैत्रावरुणीयम्।।
ब्रह्मणस्त्वः। होत्रावाचिनो ब्रह्मशब्दात्त्वः स्यात्। छस्यापवादः। ब्रह्मत्वम्। नेति वाच्यं त्वतलोर्बाधनार्थम्।। ब्रा
ह्मणपर्याया ब्रह्मन्शब्दात्तु त्वतलौ। ब्रह्मत्वं। ब्रह्मता।। नञ्स्नञोऽधिकारः समाप्तः।। ।। धान्यानां भवने क्षे
त्रे खञ्। भवत्यस्मिन्निति भवनम्। मुद्गानां भवनं क्षेत्रं मौद्गीनम्। व्रीहिशाल्योर्ढक्। व्रैहेयम्। शालेयम्।।
यवयवकषष्टिकाद्यत्। यवानां भवनं क्षेत्रं यव्यम्। यवक्यं। षष्टिक्यं। विभाषा तिलमाषोमाभंगाणुभ्यः। यद्वा स्या
त्पक्षे खञ्। तिल्यम्। तैलीनम्। माष्यम्। माषीणम्। उम्यं। औमीनं। भंग्यं। भांगीनं। अणव्यं। आणवीनं।।
सर्वचर्मणः कृतः खखञौ। असामर्थ्येऽपि निपातनात्समासः। सर्वश्चर्मणा कृतः सर्वचर्मीणः। सार्वचर्मीणः।।
यथामुखसंमुखस्य दर्शनः खः। मुखस्य सदृशं यथामुखं प्रतिबिंबं। निपातनात्सादृश्येऽव्ययीभावः। समं सर्वं
मुखं संमुखम्। समशब्दस्यान्तलोपो निपात्यते। यथामुखं दर्शनः यथामुखीनः। सर्वस्य मुखस्य दर्शनः संमु
खीनः। सर्वादेः पथ्यंगकर्मपत्रपात्रं व्याप्नोति। सर्वादेः पथ्याद्यन्ताद्द्वितीयान्तात्खः स्यात्। सर्वपथान् व्या

।।राम।।
।।११४।।

210.

ग्नोति सर्वपथीनः। सर्वांगीणः। सर्वकर्मीणः। सर्वपत्रीणः। सर्वपात्रीणः। आप्रपदं प्राप्नोति। पादस्याग्रे प्रपदं तन्मर्यादीकृत्य आप्रपदं
आप्रपदीनः पटः। अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु। अनुपदायामेना दृश्येव। अनुपदं बद्धा अनुपदीना उपान
ह। सर्वान्नानि भक्षयति सर्वान्नीनो भिक्षुः। अयानयः स्थलविशेषः। तन्नेयः अयानयीनः शारः। परोवरपरंपरपुत्र
पौत्रमनुभवति। परांश्चावरांश्चानुभवति परोवरीणः। अवरस्योत्वं निपात्यते। परांश्च परतरांश्चानुभवति परंप
रीणः। परकृतेः परपरभावो निपात्यते। पुत्रपौत्राननुभवति। पुत्रपौत्रीणः। परंपराशब्दस्तु अव्युत्पन्नेश्रा हो
नरस्त्रीलिंगम्। तस्मादेव स्वार्थे ष्यञ्। पारोवर्यम्। कथं पारावर्यविदिति। असाधुरेवायम्। एवं त्र्ययसीति
योगेनैव परोवरेति निपातनात्। अवारपारात्यन्तानुकामं गामी। अवारपारं गामी अवारपारीणः। अवारी
णः। पारीणः। पारावारीणः। अत्यन्तगामी अत्यन्तीनः। भृशं गन्तेत्यर्थः। अनुकामं गामी। अनुकामीनः। यथेष्टंग
ता। समांसमां विजायते। मलोपोऽवशिष्टविभक्तेरलुक् पूर्वपदे निपात्यते। समांसमीना गौः। समांसमीनाना
येव प्रतिवर्षं प्रसूयते। एव प्रत्ययानुसन्तो यलोपो वा वक्तव्यः। समांसमीं विजायते। समायां समायां वा। अद्यश्वीना
वष्टब्धे। अद्य श्वो वा विजायते अद्यश्वीना वडवा। आसन्नप्रसवेत्यर्थः। केचित्तु विजाय इति नानुवर्तयन्ति। अद्य

श्वीनेमत्वणौ। आसन्नमित्यर्थः। आगवीनः। आङ्पूर्वाद्गोः कर्मकरेव प्रत्ययो निपात्यते। गोः प्रत्यर्पणपर्यंतं यः कर्म करोति स आ
गवीनः। अनुग्वलंगामी। अनुगु गोः पश्चात्स यालं गच्छति अनुगवीनो गोपालः। अध्वनो यत्खौ। अ धानमलंगा
त्यध्वन्यः। अध्वनीनः। येचाभावकर्मणोः। आत्माधानौ खे इति प्रकृतिभावः। अभ्यमित्राच्छ च। चा यत्खौ। अभ्य
मित्रीयः। अभ्यमित्र्यः। अभ्यमित्रीणः। अ मित्रानभिमुखं सुष्ठु गच्छतीत्यर्थः। गोष्ठात्खञ् भूतपूर्वे। गोष्ठोत्ततद्भू
र्वः गौष्ठीनो देशः। अश्वस्यैकाहगमः। एकाहेन गम्यत इत्येकाहगमः। आश्वीनोऽध्वा। शालीनकौपीने अधृष्टाका
र्ययोः। शालाप्रवेशमर्हतीति शालीनः। अधृष्टः। कूपपतनमर्हतीति कौपीनम्। पापंतत्साधनत्वाद्वा वर्जनीयत्वाद्वा
पुरुषलिंगमपि। तत्संबंधात्तदाच्छादनमपि। व्रातेन जीवति। व्रातेन शरीरायासेन जीवति न तु बुद्धिवैभवेन स
व्रातीनः। साप्तपदीनं सख्यम्। सप्तभिः पदैरवाप्यते साप्तपदीनम्। हैयंगवीनं संज्ञायाम्। ह्योगोदोहस्य हियंगु
रादेशः। विकारार्थे खञ्च निपात्यते। दुह्यत इति दोहः क्षीरम्। ह्योगोदोहस्य विकारः हैयंगवीनम्। नवनीतम्।
तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ। पीलूनां पाकः पीलुकुणः। कर्णस्य मूलं कर्णजाहम्। पक्षात्तिः।
मूलग्रहणमात्रमनुवर्तते। पक्षस्य मूलं पक्षतिः। तेन वित्तश्चुञ्चुप्चणपौ। पकारः प्रत्यययोरसंहोलुप्तनिर्दिष्टः। तेन

।।राम।।

।।१९५।।

श्री

वस्यनेत्सेज्ञा॥ विद्यया वित्तः विद्याचुञ्चुः॥ विद्याचणः॥ विनञ्भ्यां नानाञौ नसह॥ असहार्थे पृथग्भावे वर्त्तमानाभ्यां स्वार्थे प्रत्ययौ॥ विना॥
नाना॥ वेः शालच्छंकटचौ॥ क्रियाविशिष्टसाधनवाचकात् स्वार्थे॥ विस्तृतं॥ विशालं॥ विशंकटं॥ संप्रोदश्च कटच्॥ संकटम्॥ प्रक
टम्॥ उत्कटम्॥ ॰ वा वेः॥ विकटम्॥ अलाबूतिलोमाभंगाभ्यो रजस्युपसंख्यानम्॥ अलाबूनां रजोऽलाबूकटम्॥ तिलक
टम्॥ गोष्ठजादयः स्थानादिषु पशुनामादिभ्यः॥ गवां स्थानम्॥ गोगोष्ठम्॥ संघाते कटच्॥ अवीनां संघातः अविकटः॥ विस्ता
रे पटच्॥ अविपटः॥ द्वित्वे गोयुगच्॥ द्वौ उष्ट्रौ उष्ट्रगोयुगम्॥ षट्त्वे षड्गवच्॥ अश्वषड्गवं॥ स्नेहे तैलच्॥ तिलतैलम्॥ सर्ष
पतैलम्॥ भवने क्षेत्रे शाकटशाकिनौ॥ इक्षुशाकटम्॥ इक्षुशाकिनम्॥ अवात्कुटारच्च॥ चात्कटच्॥ अवाचीनं अवकु
टारः॥ अवकटः॥ नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः॥ अवादित्येव॥ नतं नमनं॥ नासिकाया नतम्
अवटीटम्॥ अवनाटम्॥ अवभ्रटम्॥ तद्योगान्नासिकाप्यवटीटा॥ पुरुषोप्यवटीटः॥ नेर्विडज्विरीसचौ॥ निविड
म्॥ निविरीसम्॥ इनच्पिटच्चिकचि च॥ नेरित्येव॥ नासिकाया नते अभिधेये इनच्पिटचौ प्रत्ययौ॥ प्रकृतेश्चिकचि
इत्यादेशौ॥ कप्रत्ययचिकादेशौ च वक्तव्यौ॥ चिकिनं॥ चिपिटम्॥ चिक्कं॥ क्लिन्नस्य चिल्पिल् लश्चास्य चक्षुषी॥ क्लि
न्ने चक्षुषी अस्य चिल्लः॥ पिल्लः॥ चुल् च॥ चुल्लः॥ उपाधिभ्यां त्यकन्नासन्नारूढयोः॥ संज्ञायामित्यनुवर्त्तते॥ पर्व

॥ सिद्धान्तकौमुदी

॥११६॥
११६

तस्यासन्नंस्थलमुपत्यका।आरूढंस्थलमधित्यका।कर्मणिघटोऽठच्।घटतइतिघटःपवाहम्।कर्मणिघटतेकर्मठःपुरुषः।
तदस्यसंजातंतारकादिभ्यइतच्।ताराकाःसंजाताअस्यतारकितंनभः।आकृतिगणोऽयम्।प्रमाणेद्वयसज्दघ्नञ्मात्र
चः।वृत्तस्येत्यनुवर्तते।ऊरुःप्रमाणमस्यऊरुद्वयसम्ऊरुदघ्नम्ऊरुमात्रम्।प्रमाणेलः।शमः।दिष्टिः।वितस्तिः।द्वि
गोर्नित्यम्।द्वौशमौप्रमाणमस्यद्विशमः।प्रमाणपरिमाणाभ्यांसंख्यायाश्चसंशयेमात्रज्वक्तव्यः।शममात्रम्।प्रस्थमा
त्रम्।पंचमात्राः।वत्वंतात्स्वार्थेद्वयसज्मात्रचौ।तावदेवतावद्द्वयसम्।तावन्मात्रम्।पुरुषहस्तिभ्यामण्च।पुरुषःप्रमाण
मस्यपौरुषम्।पुरुषद्वयसम्।यत्तदेतेभ्यःपरिमाणेवतुप्।यत्परिमाणमस्ययावान्।तावान्।एतावान्।किमिदंभ्यां
वोघः।आभ्यांवतुप्स्याद्वस्यघः।कियान्।इयान्।किमःसंख्यापरिमाणेडतिच।चाद्वतुप्।वस्यघःस्या
त्।कासंख्यायेषांतेकति।कियन्तः।संख्यायाअवयवेतयप्।पंचअवयवाअस्यपंचतयम्।द्वित्रिभ्यांतयस्यायज्वा।
द्वयम्।द्वितयम्।त्रयम्।त्रितयम्।उभादुदात्तोनित्यम्।उभशब्दात्तयपोऽयच्स्यात्सचाद्युदात्तः।उभयम्।तदस्मिन्न
धिकमितिदशांताड्डः।एकादशअधिकाअस्मिन्नेकादशम्।शतसहस्रयोरेवेष्यते।नेह।एकादशअधिकाअस्यां
विंशत्यां।प्रकृतिप्रत्ययार्थयोःसमानजातीयत्वएवेष्यते।नेह।एकादशमाषाअधिकाअस्मिन्सुवर्णशते।शद

स५

॥ राम ॥
॥११६॥

त विंशतेश्च। डः स्यात् उक्तेऽर्थे। विंशादधिका अस्मिन् विंशं शतम्। विंशम्। तस्य पूरणे डट्। एकादशानां पूरणः एकादशः। नांतादसं-
ख्यादेर्मट्। डटो मडागमः स्यात्। पंचानां पूरणः पंचमः। नांतात् किम्। विंशः। असंख्यादेः किम्। एकादशः। षट्कतिकतिप-
यचतुरां थुक्। एषां थुगागमः स्याड्डटि। षण्णां पूरणः षष्ठः। कतिथः। कतिपयथः। इस्य संख्यात्वे पुनरेव ज्ञापकं डुट्। क-
तिपयथः। चतुर्थः। चतुरश्छयतावाद्यक्षरलोपश्च। तुरीयः। तुर्यः। बहुपूगगणसंघस्य तिथुक्। डटीत्येव। पूगसंघस्यासं-
ख्यात्वेपि अत एव डट्। बहुतिथ इत्यादि। वतोरिथुक्। डटीत्येव। यावतिथः। द्वेस्तीयः। डटोऽपवादः। द्वयोः पूरणो द्वितीयः। त्रेः
संप्रसारणं च। तृतीयः। विंशत्यादिभ्यस्तमडन्यतरस्याम्। एभ्यो डटस्तमडागमो वा स्यात्। विंशतितमः। विंशः। एकवि-
शतितमः। एक विंशः। नित्यं शतादिमासार्धमाससंवत्सराच्च। शतस्य पूरणः शततमः। मासादेरत एव डट्। मा-
सतमः। षष्ट्यादेश्चासंख्यादेः। षष्टितमः। संख्यादेस्तु विंशत्यादिभ्य इति विकल्प एव। एकषष्ठः। एकषष्टितमः। म-
तौ छः सूक्तसाम्नोः। मत्वर्थे छः स्यात्। अच्छावाकशब्दोऽस्मिन्नस्ति अच्छावाकीयं सूक्तम्। वारवंतीयं साम। तत्र कु-
शलः पथः। वुन् स्यात्। पथि कुशलः पथकः। आकर्षादिभ्यः कन्। आकर्षे कुशलः आकर्षकः। आकषादिरयं
इति रेफरहितो मुख्यः पाठः। आकषो निकषः। धनहिरण्यात्कामे। कामइच्छा। धने कामः धनको देवदत्तस्य॥

215

हिरण्यकः॥ स्वांगेभ्यः प्रसिते। केशेषु प्रसितः केशकः। तद्रसनायां तत्पर इत्यर्थः॥ उदराट्ठगाद्यूने॥ अविजिगीषौ कुत्स्या
त्। कनोपवादः। बुभुक्षया अत्यन्तपीडित उदरे प्रसितः औदरिकः। आद्यूने किम्। उदरकः। उदरपतिमाजनादौ प्रसक्त
इत्यर्थः॥ सस्येन परिजातः॥ सस्यशब्दो गुणवाची न तु धान्यवाची। शस्येनेति पाठांतरम्। सस्येन गुणेन परिजातः संब
द्धः सस्यकः साधुः॥ अंशं हारी॥ हारीत्यावश्यके णिनिः। अत एव तद्योगे षष्ठी न। अंशको दायादः॥ तंत्रादचिरापहृते॥
तंत्रकः पटः। प्रत्यग्र इत्यर्थः॥ ब्राह्मणकोष्णिके संज्ञायाम्॥ आयुधजीविनो ब्राह्मणा यस्मिन् देशे स ब्राह्मणकः। अ
ल्पमन्नं यस्यां सा उष्णिका यवागूः। अन्नशब्दस्य तत्र कादेशो निपात्यते॥ शीतोष्णाभ्यां कारिणि॥ शीतं करोतीति शीतकः
अलसः। उष्णं करोतीति उष्णकः शीघ्रकारी॥ अधिकम्॥ अध्यारूढशब्दात् कन् उत्तरपदलोपश्च॥ अनुकाभिकाभीकः
कमिता॥ अन्वभीत्येकम्। अभेराति को दीर्घश्च। अनुकामयते अनुकः। अभिकामयते अभिकः। अभीकः॥
पार्श्वेनान्विच्छति॥ अनृजुरुपायः पार्श्वं तेनान्विच्छति पार्श्विकः॥ अयःशूलदंडाजिनाभ्यां ठक्ठञौ॥ तीक्ष्ण उ
पायो यः शूलं तेनान्विच्छति आयःशूलिकः साहसिकः। दंडाजिनं दंभः तेनान्विच्छति दांडाजिनिकः॥ तावति
थं ग्रहणमिति लुग्वा॥ कन् स्यात् पूरणप्रत्ययस्य च वा लुक्। द्वितीयकम् द्विकम् वा ग्रहणं देवदत्तस्येति॥

कन्सर्यतेनतुठकू ३

॥राम॥
॥११७॥

216

न रूपेण ग्रहणमित्यर्थः। तावतिथेन गृह्णातीति कन्वक्तव्यः नित्यश्च लुक्। षष्ठेन रूपेण गृह्णाति षट्को देवदत्तः। पंचकः। स एषां ग्रामणीः। देवदत्तो मुख्यो येषां ते देवदत्तकाः। त्वत्काः। मत्काः। शृंखलमस्य बंधनं करभे॥ शृंखलकः करभः। उत्क उन्मनाः। उद्गतमनस्कवृत्तेरुच्छब्दात्स्वार्थे कन्। उत्क उत्कंठितः। श्रोत्रियश्छंदोधीते। श्रोत्रियः। वेत्त्यनुवृत्तेः छांदसः। श्राद्धमनेन भुक्तमिनिठनौ। श्राद्धी। श्राद्धिकः। पूर्वादिनिः॥ पूर्वं कृतमनेन पूर्वी। सपूर्वाच्च। कृतपूर्वी। इष्टादिभ्यश्च। इष्टमनेन इष्टी। अधीती। छंदसि परिपंथिपरिपरिणौ पर्यवस्थातरि। लोके तु परिपंथिशब्दो न न्याय्यः। अनुपद्यन्वेष्टा। अनुपदमन्वेष्टा अनुपदी गवाम्। साक्षाद्द्रष्टरि संज्ञायाम्। साक्षाद्द्रष्टा साक्षी। क्षेत्रियच् परक्षेत्रे चिकित्स्यः। क्षेत्रियो व्याधिः। शरीरान्तरे चिकित्स्यः। अप्रतिकार्य इत्यर्थः। इंद्रियमिंद्रलिंगमिंद्रदृष्टमिंद्रसृष्टमिंद्रजुष्टमिंद्रदत्तमिति वा। इंद्र आत्मा तस्य लिंगं करणेन कर्तुरनुमानात्। इति करणः प्रकारा

217

सिद्धांतकौमु

॥११८॥

धीः॥ शैवेण दुर्जयमिंद्रियम्॥ ॥ तदस्यास्त्यस्मिन्निति मतुप्॥ गावोस्यास्मिन्वा संतीति गोमान्॥ तसौ मत्वर्थे। तांतसांतौ भसंज्ञौ स्तो मत्वर्थे
प्रत्यये परे। संप्रसारणम्। विदुष्मान्॥ गुणवचनेभ्यो मतुपो लुगिष्टः॥ शुक्लो गुणोस्यास्तीति शुक्लः पटः। कृष्णः॥ मादुपधायाश्च
मतोर्वोयवादिभ्यः॥ मवर्णावर्णांतान्मवर्णावर्णोपधाद्यवादिवर्जितात्परस्य मतोर्मस्य वः स्यात्॥ किंवान्॥ ज्ञानवान्॥
विद्यावान्॥ लक्ष्मीवान्॥ यशस्वान्॥ भास्वान्॥ यवादेस्तु॥ यवमान्॥ भूमिमान्॥ झयः॥ झयंतान्मतोर्मस्य वः स्यात्॥ अपदां
तत्वान्नजश्त्वम्॥ विद्युत्वान्॥ प्राणिस्थादातो लजन्यतरस्याम्॥ चूडालः॥ प्राणिस्थात्किम्॥ शिखावान्दीपः॥ प्राण्यंगा
देव। नेह। मेधावान्॥ सिध्मादिभ्यश्च॥ लज्वा स्यात्॥ सिध्मलः॥ सिध्मवान्॥ वातदंतबलललाटानामूङ्॥ वातूलः॥ व
त्सांसाभ्यां कामबले॥ आभ्यां लज्वा स्याद्यथासंख्यं कामवति बलवति चार्थे॥ वत्सलः॥ अंसलः॥ फेनादिलच्च॥ चाल्लच्॥ अन्य
तरस्यां ग्रहणेन मतुप्समुच्चयार्थमनुवर्त्तते॥ फेनिलः॥ फेनलः॥ फेनवान्॥ लोमादिपामादिपिच्छादिभ्यः शनेलचः॥
लोमशः॥ लोमवान्॥ रोमशः॥ रोमवान्॥ पामादिभ्यो नः॥ पामनः॥ अंगात्कल्याणे॥ अंगना॥ लक्ष्म्या अच्च॥ लक्ष्मणः॥ विष्व
गित्युत्तरपदलोपश्चाकृतसंधेः॥ विष्वणः॥ पिच्छादिभ्य इलच्॥ पिच्छिलः॥ पिच्छवान्॥ उरसिलः॥ उरस्वान्॥ प्रज्ञाश्रद्धार्चा
भ्यो णः॥ ॥ प्राज्ञो व्याकरणम्॥ प्राज्ञा॥ श्राद्धः॥ आर्चः॥ वृत्तेश्च॥ वार्त्तः॥ तपःसहस्राभ्यां विनीनी॥ विनीन्योरिकारो
४ प्रत्येकमादिपदं स्यणार्थम्॥४

वति ७

लोमादिभ्यः शः

॥राम॥
॥११८॥

[illegible]

नकारपरित्राणार्थंतपस्वी।सहस्री। अण्च। तापसः।साहस्रः।ज्योत्स्नादिभ्यउपसंख्यानम्।ज्योत्स्नः।तामिस्रः।सिकताशर्कराभ्यांच।।
सैकतोघटः।शार्करः।देशेलुबिलचौच।चादण्मतुपौ।सिकताःसंत्यस्मिन्देशेसिकता।सिकतिलः।सैकतः।सिकतावा
न्।एवंशर्करादयः।दंतउन्नतउरच्।उन्नतादंताःसंत्यस्यदंतुरः।ऊषसुषिमुष्कमधोरः।ऊषरः।सुषिरः।मुष्करः।मधु
माधुर्ये।मधुरः।रप्रकरणेखमुखकुंजेभ्यउपसंख्यानम्।खरः।मुखरः।कुंजोहस्तिहनुः।कुंजरः।नगपांसुपांडुभ्यश्च
नगरं।पांसुरः।पांडुरः।पांडुरा।ह्रस्वत्वयुसत्तरव।कच्छ्वाह्रस्वत्वंच।कच्छुरः।द्युद्रुभ्योमः।द्युमः।द्रुमः।केशाद्वोन्यतर
स्याम्।प्रकृतेनान्यतरस्यांग्रहणेनमतुपिसिद्धेपुनर्ग्रहणमिनिठनोःसमावेशार्थम्।केशवः।केशी।केशिकः।के
शवान्।अन्येभ्योपिदृश्यते।मणिवोनागविशेषः।हिरण्यवोनिधिविशेषः।अर्णसोलोपश्च।अर्णवः।गांड्यजगात्सं
ज्ञायाम्।ह्रस्वदीर्घयोर्यणातंत्रेणनिर्देशः।गांडिवं।गांडीवं।अर्जुनस्यधनुः।अजगवंपिनाकः।कांडांडादीरन्नी
रचौ।कांडीरः।आंडीरः।रजःकृष्यासुतिपरिषदोवलच्।रजस्वलास्त्री।कृषीवलः।वलेइतिदीर्घः।आसुतीवलः
शौंडिकः।परिषद्वलः।पर्षदितिपाठांतरेपर्षद्वलः।अन्येभ्योपिदृश्यते।भ्रातृवलः।पुत्रवलः।शत्रुवलः।वलहय

त्वसंज्ञायामित्यनुवृत्तेर्नेह दीर्घः। दंतशिखात्संज्ञायाम्। दंतावलो हस्ती। शिखावलः केकी। ज्योत्स्नातमिस्राशृंगिणोर्जस्वि
न्नूर्जस्वलगोमिन्मलिनमलीमसाः। मत्वर्थे निपात्यंते। ज्योतिषउपधालोपो नश्च प्रत्ययः। ज्योत्स्ना। तमसउपधाया
इत्वंरश्च। तमिस्रा। स्त्रीत्वमतंत्रं। तमिस्रं। शृंगादिनच्। शृंगिणः। ऊर्जसो बलच्। तेन बाधा माभूदिति विनिरपि। ऊर्ज
स्वी। ऊर्जस्वलः। ऊर्जोऽसुगागमश्चेति वृत्तिस्तु चिंत्या। ऊर्जस्वतीतिवदसुन्नंतेनैवोपपन्नः। गोशब्दान्मिनिः। गोमी।
मलशब्दादिनच्। मलिनः। ईमसच्। मलीमसः। अत इनिठनौ। दंडी। दंडिकः। व्रीह्यादिभ्यश्च। व्रीही। व्रीहिकः।
तुंदादिभ्य इलच्च। चादिनिठनौ मतुप्च। तुंदिलः। तुंदी। तुंदिकः। तुंदवान्। एकगोपूर्वाट्ठञ्नित्यम्। एकशतम
स्यास्ति ऐकशतिकः। ऐकसहस्रिकः। गौशतिकः। गौसहस्रिकः। रूपादाहतप्रशंसयोर्यप्। आहतं रूपमस्यास्ती
ति रूप्यः कार्षापणः। प्रशस्तं रूपमस्यास्तीति रूप्यो गौः। अन्येभ्योपि दृश्यते। हिम्याः पर्वताः। गुण्या ब्राह्मणाः॥ ॥राम॥
अस्मायामेधास्रजो विनिः। यशस्वी। यशस्वान्। मायावी। व्रीह्यादिपाठादिनिठनौ। मायी। मायिकः। क्विन्नं ॥११७॥
तत्वात्कुः। स्रग्वी। आमयस्योपसंख्यानं दीर्घश्च। आमयावी। शृंगवृंदाभ्यामारकन्। शृंगारकः। वृंदारकः। फ

220

लवहस्त्यामिनस्।फलिनः।बर्हिणः।हृदयाच्चालुरन्यतरस्याम्।हृदयालुः।अन्यतरस्यांग्रहणादिनिठनौ मतुप् च।हृदयी।हृदयिकः।
हृदयवान्।शीतोष्णतृप्रेभ्यस्तदसहने।शीतं न सहते शीतालुः।उष्णालुः। स्फायितेर्वी तिरकू।तृप्रः पुरोडाशस्तं न सहते तृप्रालुः।
तृप्रं दुःखमिति माधवः।हिमाच्चेलुः।हिमं न सहते हिमेलुः।बलाद्दूलः।बलं न सहते बलूलः।वातात्समूहे च।वातं न सहते
वातस्य समूहो वा वातूलः।तप्पर्वमरुद्भ्याम्।पर्वतः।मरुत्तः।ऊर्णाया युस्।सित्वात्पदत्वम्।ऊर्णायुः।छन्दसीति केचिद
नुवर्त्तयंति।युक्तं चैतत्।अन्यथा हि अहंशुभमोरित्यत्रैवोर्णाग्रहणं कुर्यात्।वाचो ग्मिनिः।वाग्मी।आलजाटचौ बहुभाषिणि।
कुत्सित इति वक्तव्यम्।कुत्सितं बहु भाषते वाचालः।वाचाटः।यस्तु सम्यग्बहु वदति तत्र वाग्मीत्येव।स्वामिन्नैश्वर्ये।ऐश्वर्य
वाचकात्स्वशब्दादामिनच्।स्वामी।अर्शआदिभ्योऽच्।अर्शांस्यस्य विद्यन्ते अर्शसः।आकृतिगणोऽयम्।वाता
तीसाराभ्यां कुक्च।चादिनिः।वातकी।अतीसारकी।पिशाचाच्च।पिशाचकी।हस्ताज्जातौ।हस्ती।वर्णाद्ब्रह्मचारिणि।
वर्णी।कंशंभ्यां बभयुस्तितुतयसः।कंशमिति मान्तौ।कमित्युदकसुखयोः।शमिति सुखे।अन्येभ्यो मतुप्प्रत्ययाः स्युः।।

221

कैवि॥१

सिद्धांतकौमुदीसु॰
पत्र २

युस्तयसोः सकारः पदत्वार्थः। कं भः। कं स्सः। कं युः। कं तुः। कं तः। कं स्य। शं भः। शं स्सः। शं युः। शंतिः। शं तुः। शंतः। शंय्यः। अनुस्वारस्य
वैकल्पिकः परसवर्णः। ककारयकारस्थानुनासिकौ वयोः। तुन्दिवलिवटेर्भः। वृद्धा नाभिस्तुन्दिः। मूर्द्धन्योपधोयमिति माधवः॥
तुंडिभः। वलिभः। वटिभः। पामादित्वाद्वलिनोपि। अहंशुभमोर्युस्। अहमिति मांतमव्ययमहंकारे शुभमिति शुभे। अहंयुः
अहंकारवान्। शुभंयुः शुभान्वितः॥ ॥इति मत्वर्थीयाः॥ ॥प्राग्दिशोविभक्तिः। दिक्शब्देभ्य इत्यतः प्राग्वक्ष्यमाणाः
प्रत्ययाः विभक्तिसंज्ञाः स्युः। अथ स्वार्थिकाः प्रत्ययाः। समर्थानामिति प्रथमादिति चेति त्रयम्। वेति चानुवर्तते एव। किं
सर्वनामबहुभ्योऽद्यादिभ्यः। किमः सर्वनाम्नो बहुशब्दाच्चेति प्राग्दिशोऽधिक्रियते। इदम इश्। प्राग्दिशीये परे
एतेतौरथोः। इदंशब्दस्य एत इत इत्यादेशौ स्तो रेफादौ थकारादौ च प्राग्दिशीये परे। इशोपवादः। एतदोन्। योगविभा
गः कर्तव्यः। एतदः। एतेतौ स्तो रथोः। अन्। एतद इत्येव। अन्ते कालत्वात्सर्वादेशः। नलोपः प्रातिपदिकान्तस्य। सर्वस्य सो
न्यतरस्यां दि। प्राग्दिशीये दकारादौ प्रत्यये परे सर्वस्य सो वा स्यात्। पंचम्यास्तसिल्। पंचम्यन्तेभ्यः किमादिभ्यः
स्तसिल् स्याद्वा। कुतिहोः। किमः कुः स्यात्तादौ हादौ च विभक्तौ परतः। कुतः। कस्मात्। यतः। ततः। इतः। अतः। अमुतः।

॥राम॥
॥१२०॥

223

बहुतः। द्व्यादेस्तु। द्वाभ्याम्। पर्यभिभ्यां च। आभ्यां तसिल् स्यात्। सर्वोभयार्थाभ्यामेव। परितः। सर्वत इत्यर्थः। अभितः। उभयत इत्यर्थः। सप्तम्यास्त्रल्। कुत्र। यत्र। तत्र। बहुत्र। इदमो हः। त्रलोऽपवादः। इशादेशः। इह। किमोऽत्। वाग्रहणमपकृष्यते। सप्तम्यास्त्रलो। किमोऽद्वा स्यात्। पक्षे त्रल्। क्वाति। किमः क्वादेशः स्यादति। क्व। कुत्र। वा ह च छन्दसि। कुह। कुहज। मधु। इतराभ्योऽपि दृश्यन्ते। पंचमीसप्तमीतरविभक्त्यंतादपि तसिलादयो दृश्यन्ते। दृशिग्रहणाद्भवदादियोग एव। स भवान्। ततो भवान्। तत्र भवान्। तं भवन्तम्। ततो भवन्तम्। तत्र भवन्तम्। एवं दीर्घायुः देवानांप्रियः आयुष्मान्। सर्वैकान्यकिंयत्तदः काले दा। सप्तम्यंतेभ्यः कालार्थेभ्यः स्वार्थे दा स्यात्। सर्वस्मिन्काले सदा। सर्वदा। एकदा। अन्यदा। कदा। यदा। तदा। काले किम्। सर्वत्र देशे। इदमो र्हिल्। सप्तम्यंतात्कालार्थादित्येव। हस्यापवादः। अस्मिन्काले एतर्हि। काले किम्। इह देशे। अधुना। इदमः सप्तम्यंतात्कालवाचिनः स्वार्थेऽधुना प्रत्ययः स्यात्। इशः। यस्येति लोपः। अधुना। दानीं च। इदानीं। तदो दा च। तदा। तदानीं। तदो दावचनमनर्थकम्। विहितत्वात्। अनद्यतने र्हिलन्यतरस्याम्। कर्हि। कदा। यर्हि। यदा। तर्हि। तदा। एतस्मिन्काले एतर्हि। सद्यःपरुत्परार्यैषमः परेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरे

223

वै२

द्युरधरेद्युरुभयेद्युरुत्तरेद्युः॥ एते निपात्यन्ते। समानस्य सभावो द्यश्चाहनि। समानेऽहनि सद्यः॥ पूर्वपूर्वतरयोः पर उदारी च संवत्सरे। पूर्वस्मिन्व
त्सरे परुत्। पूर्वतरे वत्सरे परारि। इदमः समसण् प्रत्ययः संवत्सरे। अस्मिन्संवत्सरे ऐषमः॥ परस्मादेद्यव्यहनि। परस्मिन्नहनि प
रेद्यवि। इदमोऽश् द्यश्च। अस्मिन्नहन्यद्य। पूर्वादिभ्य एद्युस्। पूर्वस्मिन्नहनि पूर्वेद्युः॥ अन्यस्मिन्नन्येद्युः॥ उभयस्मादुभयेद्युः॥
द्युश्चोभयाद्वक्तव्यः। उभयद्युः। प्रकारवचने थाल्। प्रकारवृत्तिभ्यः किमादिभ्यः थाल् स्यात्। तेन प्रकारेण तथा। यथा॥ इद
मस्थमुः॥ थालोऽपवादः। एतदोऽपि वाच्यः॥ अनेन एतेन वा प्रकारेण इत्थम्। किमश्च। केन प्रकारेण कथम्॥ ॥ प्राग्दिशीया
नां विभक्तिसंज्ञा नापूर्णो विधिः॥ ॥ दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः॥ सप्तम्याद्यन्तेभ्यो
दिशि रूढेभ्यो दिग्देशकालवृत्तिभ्यः स्वार्थेऽस्ताति प्रत्ययः स्यात्। पूर्वाधरावराणामसि पुरधवश्चैषाम्॥ एभ्योऽस्तात्यर्थे
ऽसि प्रत्ययः स्यात्तद्योगे चैषां क्रमात्पुर् अध् अव् इत्यादेशाः स्युः। अस्ताति च। अस्तातौ परे पूर्वादीनां पुरादयः
स्युः। पूर्वस्यां पूर्वस्याः पूर्वा वा दिक् पुरः। पुरस्तात्। अधः। अधस्तात्। अवः। [illegible] । विभाषावरस्य। अवरस्यास्ता ॥राम॥
तौ परेऽव् वा स्यात्। अवस्तात्। अवरस्तात्। एवं देशकालयोः। दिशि रूढेभ्यः किम्। ऐन्द्र्यां वसति। सप्तम्याद्यन्तेभ्यः कि। ॥१२१॥

अत एवासिं बाधित्वास्तातिः २

पूर्वस्यां ग्रामं गतः। दिग्ग्रहणं किम्। पूर्वस्मिन् गुरौ वसति। अस्तातिचेति ज्ञापकादस्तातिर्न बाधते। दक्षिणोत्तराभ्यामतसुच्। अ
स्तातेरपवादः। दक्षिणतः। उत्तरतः। विभाषा परावराभ्याम्। परतः। अवरतः। परस्तात्। अवरस्तात्। अञ्चेर्लुक्। अञ्चत्यन्ताद्दिक्
शब्दादस्तातेर्लुक् स्यात्। लुक्तद्धितलुकि। प्राच्यां। प्राच्याः। प्राची वा दिक्। प्राक्। उदक्। एवं देशे कालेऽपि। उपर्युपरिष्टात्। अ
स्तातेर्विषये तु ऊर्ध्वशब्दस्योपादेशः स्यात् रिल्रिष्टातिलौ च प्रत्ययौ। उपरि। उपरिष्टाद्वा वसति। आगतो रमणीयं वा। पश्चा
त्। अपरस्य पश्चभावः। आति च प्रत्यये। अस्तातेर्विषये। उत्तराधरदक्षिणादातिः। उत्तरात्। अधरात्। दक्षिणात्। एनब
न्यतरस्यामदूरेऽपञ्चम्याः। उत्तरादिभ्य एनब्वा स्यादवधिमतोः सामीप्ये पञ्चमीं विना। उत्तरेण। अधरेण। दक्षिणे
न। पक्षे यथास्वं प्रत्ययाः। इह केचिदुत्तरादीननुवर्त्य दिक्शब्दमात्रादेनपमाहुः। पूर्वेण ग्रामं। अपरेण ग्रामम्। दक्षि
णादाच्। अस्ताते विषये। दक्षिणा वसति। अपञ्चम्या इत्येव। दक्षिणादागतः। आहि च दूरे। दक्षिणाहि दूरे। आहिः स्या
त्। चादाच्। दक्षिणाहि। दक्षिणा। उत्तराच्च। उत्तराहि। उत्तरा। संख्याया विधार्थे धा। क्रियाप्रकारे वर्तमानात् संख्यावाचका
त्स्वार्थे धा स्यात्। चतुर्धा। पंचधा। अधिकरणविचाले च। द्रव्यस्य संख्यान्तरापादने धा स्यात्। एकं राशिं पंचधा कुरु। ए

225

प्रकरणे द्वैवलब्धे पुनर्ग्रहणं विधार्थे विहितस्य यथा स्यात्। अनन्तरस्यैव द्विधा प्नोति

धाः ४

काद्धो ध्यमुञन्यतरस्याम्। ऐकध्यम्। एकधा। द्वित्र्योश्च धमुञ्। आभ्यां धाप्रत्ययस्य धमुञ् वा स्यात्। द्वैधम्। द्विधा। त्रैधम्। त्रि-
धा। धमुञन्तात्स्वार्थे डदर्शनम्। पथि द्वैधानि। एधाच्च। द्वेधा। त्रेधा। याप्ये पाशप्। कुत्सितो भिषक्। भिषक्पाशः। पूर-
णाद्भागे तीयादन्। द्वितीयो भागः द्वितीयः। तीयादीकक् स्वार्थे वाच्यः। द्वैतीयीकः। द्वितीयः। तार्तीयीकः। तृतीयः।
न वि[illegible]याः। द्वितीया तृतीया विद्येत्येव। प्रागेकादशभ्योऽच्छन्दसि। पूरणप्रत्ययान्ताद्भागेऽन्। चतुर्थः। पंचमः। ष-
ष्ठाष्टमाभ्यां ञ च। चादन्। षष्ठो भागः षाष्ठः। अष्टमः। आष्टमः। मानपश्वङ्गयोः कन्लुकौ च। षष्ठाष्टमश-
ब्दाभ्यां क्रमेण कन्लुकौ स्तः मानपश्वङ्गयोर्वाच्ययोः। षष्ठको भागः मानं चेत्। अष्टमो भागः पश्वङ्गं चेत्। अस्य चाने-
व लुक्। चकाराद्यथाप्राप्तम्। षष्ठः। षाष्ठः। अष्टमः। आष्टमः। महाविलापयातिज्ञे लुग्वचनं पूर्वं च अने ।।राम।।
नित्या विति ह्लापः प्रयति। एकादाकिनिच्चासहाये। चात्कन्लुकौ। एकः। एकाकी। एककः। भूतपूर्वे चरट्। ।।१२२।।
आढ्यो भूतपूर्वः आढ्यचरः। षष्ठ्या रूप्य च। षष्ठ्यन्ताद्भूतपूर्वेऽर्थे रूप्यः। स्याच्चरट् च। कृष्णस्य भूतपूर्वो गौः
कृष्णरूप्यः। कृष्णचरः। तसिलादिषु त्वथस्यापतिग [illegible]तवान्पुंवत्। शुक्लायाः [illegible] तपूर्वः शुक्लरूप्य-

अतिशायने तमबिष्ठनौ। अतिशयविशिष्टार्थवृत्तेः स्वार्थे एतौ स्तः। अयमेषामतिशयेनाढ्यः आढ्यतमः। लघुतमो लघिष्ठः।
तिङश्च। तिङन्तादतिशये द्योत्ये तमप् स्यात्। तरप्तमपौ घः। एतौ घसंज्ञौ स्तः। किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे। किमेदन्तात्ति-
ङोऽव्ययाच्च यो घः तदन्तादामुः स्यान्न तु द्रव्यप्रकर्षे। किंतमाम्। प्राह्णेतमाम्। पचतितमाम्। उच्चैस्तमाम्। द्रव्यप्रकर्षे तु उच्चै-
स्तमस्तरुः। द्विवचनविभज्योपपदे तरबीयसुनौ। द्वयोरेकस्यातिशये विभक्तव्ये चोपपदे सुप्तिङन्तादेतौ स्तः। पूर्वयोरप-
वादः। अयमनयोरतिशयेन लघुतरो लघीयान्। उदीच्याः प्राच्येभ्यः पटुतराः। पटीयांसः। अजादी गुणवचनादे-
व। इष्ठन्नीयसुनौ गुणवचनादेव स्तः। नेह। पाचकतरः। पाचकतमः। तुश्छन्दसि। तृन्तृजन्तादिष्ठेयसुनौ स्तः। तुरिष्ठे-
मेयस्सु। तृशब्दस्य लोपः स्यादेषु परेषु। अतिशयेन कर्ता करिष्ठः। दोहीयसी धेनुः। प्रशस्यस्य श्रः। अस्य श्र आदेशः स्या-
दजाद्योः। प्रकृत्यैकाच्। इष्ठादिष्वेकाच्प्रकृत्या। श्रेष्ठः। श्रेयान्। ज्य च। प्रशस्यस्य ज्यादेशः स्यादिष्ठेयसोः। ज्येष्ठः। स्थूल-
दूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः। एषां यणादिपरं लुं पूर्वस्य गुणः इष्ठादिषु। स्थविष्ठः। दविष्ठः।
यविष्ठः। ह्रसिष्ठः। क्षेपिष्ठः। क्षोदिष्ठः। एवमीयसुन्। ह्रस्वक्षिप्रक्षुद्राणां पृथ्वादित्वा। ह्रसिमा। क्षेपिमा। क्षोदिमा। प्रि
ज्यादादीयसः। आदेः परस्य। ज्यायान्। वृद्धस्य च। ज्यादेशः स्यादजाद्योः। ज्येष्ठः। ज्यायान्। अन्तिकबाढयोर्नेदसाधौ। अजाद्योः।
नेदिष्ठः। नेदीयान्। साधिष्ठः। साधीयान्॥ ३

लघुः

॥१३३॥

ष्यते २

यस्थिरस्फिरोरुबहुळगुरुवृद्धतृप्रदीर्घवृंदारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रब्द्राघिवृंदाः। प्रियादीनां क्रमात् प्रादयः स्यु
रिष्ठादिषु। प्रेष्ठः। स्थेष्ठः। स्फेष्ठः। वरिष्ठः। बंहिष्ठः। गरिष्ठः। वर्षिष्ठः। त्रपिष्ठः। द्राघिष्ठः। वृंदिष्ठः। एवमीयसुन्। प्रियोरुबहु
ळगुरुदीर्घाणां पृथ्वादित्वात्स्थेमा। इत्यादि। बहोर्लोपो भू च बहोः। बहोः परयोरिमेयसोः लोपः स्यात्। बहोश्च भूरादेशः।
भूमा। भूयान्। इष्ठस्य यिट् च। बहोः परस्येष्ठस्य लोपः स्यात् यिडागमश्च। भूयिष्ठः। युवाल्पयोः कनन्यतरस्याम्। एतयोः
कनादेशो वा स्यादिष्ठेयसोः। कनिष्ठः। कनीयान्। पक्षे यविष्ठः। अल्पिष्ठ इत्यादि। विन्मतोर्लुक्। विनो मतुपश्च लुक् स्या
दिष्ठेयसोः। अतिशयेन स्रग्वी स्रजिष्ठः। स्रजीयान्। अति शयेन त्वग्वान् त्वचिष्ठः। त्वचीयान्। प्रशंसायां रूपप्। सुब
न्तात् तिङन्ताच्च। प्रशस्तः पटुः पटुरूपः। प्रशस्तं पचति पचतिरूपम्। ईषदपरिसमाप्तौ कल्पब्देश्यदेशीयरः। ईषदूनो वि
द्वान् विद्वत्कल्पः। यशस्कल्पम्। यजुष्कल्पम्। विद्वद्देश्यः। विद्वद्देशीयः। पचतिकल्पम्। विभाषा सुपो बहुच् पुरस्ता
त्तु। ईषदसमाप्तिविशिष्टेऽर्थे सुबंताद्बहु च्वा स्यात् स च प्रागेव न तु परतः। ईषदूनः पटुः बहुपटुः। पटुकल्पः। सुपः किं
यजतिकल्पम्। प्रकारवचने जातीयर्। प्रकारवति चायम्। थाल्तु प्रकारमात्रे। पटुप्रकारः पटुजातीयः। प्रागिवा

॥ता म॥
॥१२३॥

228

स्के:।इवेप्रतिकृतावित्यतःप्राक्।विकारः।।अव्ययसर्वनाम्नामकच्प्राक्टेः।।तिङश्चेत्यनुवर्तते।।कस्यचदः।।को
तावव्ययस्यदकारोंतादेशःस्यादकच्।।अज्ञाते।।कस्यायमश्वोऽश्वकः।।उच्चकैः।।नीचकैः।सर्वकैः।विश्वकैः।।
ओकारसकारलकारादौसुपिसर्वनाम्नष्टेःप्रागकच्।।युवकयोः।।आवकयोः।युष्मकासु।अस्मकासु।
युष्मकाभिः।अस्मकाभिः।ओकारेत्यादि किं।त्वयका।मयका।अकच्प्रकरणेतूष्णीमः
घ: काम् के।मित्वादंत्यादचःपरः।तूष्णीकामास्ते।शीलेकोमलोपश्च।तूष्णीशीलः तूष्णीकः।पचत
कि।जल्पतकि।धावतकि।हिरकुत्।कुत्सिते।कुत्सितोऽश्वोऽश्वकः।अनुकंपायां।पुत्रकः।अनुकंपितः
पुत्र इत्यर्थः।।नीतौचतद्युक्तात्।।सामदानादिरुपायोनीतिः।तस्यांगम्यमानायांअनुकंपायुक्तात्प्रत्ययः
स्यात्।हंततेधानकाःगुडकाः।एहकि।अद्धकि।पूर्वे णानुकंप्यमानात्प्रत्ययः।अनेनतुपरंपरासंबं

229

ठा२

घेपीतिविशेषः। बह्वचोमनुष्यनाम्नष्ठज्वा। पूर्वसूत्रद्वयविषयेघनिलचौच। तत्रैव। ठाजादावूर्ध्वंद्वितीयादचः। अस्मिन्प्रक
रणेयष्ठोऽजादिप्रत्ययश्चतस्मिन्परेप्रकृतेर्द्वितीयादचऊर्ध्वंसर्वंलुप्यते। अनुकंपितोदेवदत्तः देविकः। देवियः। देवि
लः। देवदत्तकः। अनुकंपितोवायुदत्तः वायुकः। प्राचामुपादेरडज्वुचौच। उपशब्दपूर्वात्प्रातिपदिकात्पूर्वविषये
अडज्वुचएतौस्तः। चाद्यथाप्राप्तम्। प्राग्ग्रहणंपूजार्थम्। अनुकंपितःउपेंद्रदत्तः। उपडः। उपकः। उपिकः। उपि
यः। उपिलः। उपेंद्रदत्तकः। षडूपाणि। जातिनाम्नःकन्। मनुष्यनाम्नइत्येव। जातिशब्देभ्योयोमनुष्यनामधेये
तस्मात्कन्स्यादनुकंपा यांनीतौच। सिंहकः। शरभकः। द्वितीयसंध्यक्षरंचेत्तदादेर्लोपोवक्तव्यः॥
कहोडः। कहिकः। एकाक्षरपूर्वपदानामुत्तरपदलोपोवक्तव्यः। वागाशीर्दत्तः। वाचिकः। कथंषडंगुली
दत्तः षडिकइति। षष्ठाजादिवचनात्सिद्धम्। अल्पे। अल्पंतैलं कम्। ह्रस्वे। ह्रस्वोवृक्षोवृक्षकः।
कुटीशमीशुण्डाभ्योरः। ह्रस्वाकुटीकुटीरः। शमीरः। शुंडारः। कुत्वाडुपच्। ह्रस्वाकुतूः। कुतुपः। कुतू

तैल२

कुत्वेः ह्रेहपाचेडुः ह्रस्वा सा कुतुपः पुमान्। कासूगोणीभ्यां ष्टरच्। आयुधविशेषः कासूः। ह्रस्वा सा कासूतरी। गोणीतरी। व
त्सोक्षाश्वर्षभेभ्यश्च तनुत्वे। वत्सतरः द्वितीयेवयः प्राप्तः। उक्षतरः। किंयत्तदो निर्धारणे द्वयोरेकस्य डतरच्। अनयोः
कतरो वैष्णवः। यतरः। ततरः। महाविभाषया। कः। यः। सः। वा बहूनां जातिपरिप्रश्ने डतमच्। बहूनां मध्ये नि
र्धारणे डतमच् वा स्यात्। जातिपरिप्रश्न इति प्रत्याख्यातमाकरे। कतमो भवतां कठः। यतमैमः। ततमः। वाग्र
हणमकजर्थम्। यकः। सकः। महाविभाषया यः। सः। किमोऽस्मिन्विषये डतरजपि। कतरः। एकाच्च प्राचाम्। डत
रच् डतमच् स्यात्। अनयोरेकतरो मैत्रः। एषामेकतमः। अवक्षेपणे कन्। व्याकरणकेन गर्वितः। येनेतरः कु
त्स्यते तदिहोदाहरणम्। स्वतः कुत्सिते तु कुत्सित इत्यस्य॥ प्रागिवीयानां पूर्णो विधिः॥ ॥इवे प्रतिकृतौ। कन्
स्यात्। अश्व इव प्रतिकृतिः अश्वकः। संज्ञायां च। अप्रतिकृत्यर्थ आरम्भः। अश्वसदृशस्य संज्ञा अश्वकः।
लुम्मनुष्ये। संज्ञायां विहितस्य कनो लुप् स्यात् मनुष्ये वाच्ये। चञ्चा तृणमयः पुमान्। चञ्चेव मनुष्यः चञ्चा।

231

वध्रिका।जीविकार्थेचापण्ये।जीविकार्थंयद्विक्रीयमाणेतस्मिन्वाच्येकनोलुप्स्यात्।वासुदेवः।शिवः।स्कन्दः।दे
वलकानांजीविकार्थासुदेवप्रकृतिष्विदम्।अपण्येकिम्।हस्तिकान्विक्रीणीते।देवपथादिभ्यश्च।कनोलुप्स्यात्
देवपथः।हंसपथः।आकृतिगणोयम्।वस्तेर्ढञ्।इवेइत्यनुवर्तते।ढञ्कृतावितिनिर्देशम्।वस्तिरिववास्तेयम्।वा
स्तेयी।शिलायाढः।शिलायाइतियोगविभागाढञपीत्येके।शिलेवशिलेयम्।शैलेयम्।शाखादिभ्योयः।शाखे
वशाख्यः।मुख्यः।जघन्यः।अग्र्यः।शरण्यः।द्रव्यंचभव्ये।द्रव्यमयंब्राह्मणः।कुशाग्राच्छः।कुशाग्रमिवकु
शाग्रीयाबुद्धिः।समासाच्चतद्विषयात्।इवार्थविषयात्समासाच्छःस्यात्।काकतालीयोदेवदत्तस्यवधः।
इहकाकतालसमागमसदृशश्चोरसमागमइतिसमासार्थः।तत्रसुक्तः।काकमरणसदृशस्तुप्रत्य
याथः।अजाकृपाणीयः।अतर्कितोपनतइतिफलितार्थः।शर्करादिभ्योण्।शर्करेवशार्करम्।अङ्गु
ल्यादिभ्यष्ठक्।अङ्गुलीवआङ्गुलिकः।भरुजेवभारुजिकः।कर्कलोहिताद्दीकक्।कर्कःशुक्लोश्वःस
इवकार्कीकः।लोहितीकःस्फटिकः।पूगाञ्ञ्योग्रामणीपूर्वात्।इवार्थोनिवृत्तः।नानाजातीयाअनि
यतवृत्तयोर्थकामप्रधानाःसंघाःपूगाः।तद्वाचकात्स्वार्थेञ्यःस्यात्।लोहितध्वज्यः।व्रातच्फञोरस्त्रि

नि३

यौ। व्रातकापोतपाक्य:। कौंजायन्य:। ब्राध्नायन्य:। पर्श्वादियौधेयादिभ्यामणञौ। आयुधजीविसंघवाचिभ्य एभ्य: क्रमादणञौ स्त:।
स्वार्थे। पार्शव:। पार्शवौ। पर्शव:। यौधेय:। यौधेयौ। योधेया:। ञ्यादयस्तद्राजा:। पू।३।। ञ्य इत्यारभ्योक्ता एतत्संज्ञा:
स्यु:। तेनास्त्रियां बहुषु लुक्। लोहितध्वजा:। कपोतपाका:। कौंजायना:। ब्राध्नायना: इत्यादि। पादशतस्य संख्यादे
र्वीप्सायां वुन् लोपश्च। लोपवचनमनैमित्तिकत्वार्थम्। अन्तोनस्थानिवत्। पाद: पत्। तद्धितार्थ इति समासे कृते प्र
त्यय:। वुन्नन्तं स्त्रियामेव। द्वौ द्वौ पादौ ददाति द्विपदिकां। द्विशतिकाम्। पादशतग्रहणमनर्थकमन्यत्रापि दर्शनात्।
द्विमोदकिकाम्। दण्डव्यवसर्गयोश्च। वुन् स्यात्। अपूर्वार्थमिदम्। द्वौ पादौ दण्डित: द्विपदिको। द्विपदिको व्यव
सृजति। ददातीत्यर्थ:। स्थूलादिभ्य: प्रकारवचने कन्। जातीयरोपवाद:। स्थूलप्रकार: स्थूलक:। अणुक:।। चं
चद्बृहतोरुपसंख्यानम्। चंचत्क:। बृहत्क:। सुरायाच्चहौ। सुरावर्णो हि: सुरक:। अनत्यन्तगतौ क्तात्। छिन्नक:।।

तिन्नकम्। नसामिवचने। सामिपर्यायेऽपपदे क्तान्तान्न कन्। सामिकृतम्। अर्द्धकृतम्। अनत्यंतगतेरिति प्रकृते वै
वा विधानात्स्त्रैणिकत्तप्राप्तः। इदमेव निषेधसूत्रं मत्वेतत्स्वार्थिकमपि कनं ज्ञापयति। वकुताकम्। बृहत्या आच्छा
दने कन् स्यात्। द्वौ प्रावारौ उत्तरासंगौ समौ बृहतिका तथा। आच्छादने किम्। बृहती छंदः। अषडक्षाशितंग्वलंक
र्मालंपुरुषाध्युत्तरपदात्खः। स्वार्थे। अषडक्षीणो मंत्रः। द्वाभ्यामेव कृत इत्यर्थः। आशिता गावो स्मिन्निति आ
शितंगवीनमरण्यम्। निपातनात्पूर्वस्य मुम्। अलंकर्मणे अलंकर्मीणः। अलंपुरुषीणः। ईश्वराधीनः।
नित्योयं खः। उक्तास्तु ते विभाषाग्रहणात्। अन्येपि केचित्स्वार्थिका नित्यमिष्यंते। प्राक्कमैनेः तमवादय
प्रागवुनः। अमादयः प्राग्घटः। ईवहत्ति जात्येताः समासांतश्चेति। विभाषांचेरदिक्स्त्रियाम्। अदिक्
स्त्रीवृत्तेरंचत्यंतात्प्रातिपदिकात्खः स्याद्वा स्वार्थे। प्राक्। प्राचीनम्। प्रत्यक्। प्रतीचीनम्। अवाक्। अवा

न्यादयः २

॥राम॥
॥१२६॥

वीनम्। नि क्ष्टपतिक्ष्टपवरिफयाथावमाधमाः। अवंतिमैरतीत्यवक्लृप्तौ। अर्वाचीनम्। अदिकुस्त्रियां किम्। प्राची दिक्। दिग्गत
णे किम्। प्राचीना ब्राह्मणी। स्त्रीग्रहणं किम्। प्राचीने ग्रामादाम्राः। जात्यंताच्छ बंधुनि। ब्राह्मणजातीयः। बंधुनि
किम्। ब्राह्मणजातिः शोभना। जातेर्व्यंजिके द्रव्ये बंधुः। स्थानांताद्विभाषा सस्थानेनेति चेत्। सस्थानेन तुल्येन
नेतस्थानोतमर्थविदित्यर्थः। पितृस्थानीयः। पितृस्थानः। सस्थानेन किम्। गोः स्थानम्। अनुगादिनष्ठक्।
अनुगदतीत्यनुगादी। स एवानुगादिकः। विसारिणो मत्स्ये। अण् स्यात्। वैसारिणः। मत्स्ये किम्। विसारी दे
वदत्तः। संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्। अभ्यावृत्तिर्जन्म। क्रियाजन्मगणने वृत्तेः संख्याशब्दा
त्स्वार्थे कृत्वसुच् स्यात्। पंचकृत्वो भुंक्ते। संख्यायाः किम्। भूरिवारान् भुंक्ते। द्वित्रिचतुर्भ्यः सुच्। कृत्वसुचो रा२
पवादः। द्विर्भुंक्ते। त्रिः। रात्सस्य। चतुः। एकस्य सकृच्च। सकृदित्यादेशः स्यात्। सुच् च। सकृद्भुंक्ते। संयोगांत
स्येति सुचो लोपः। न तु हल्ङ्याब्भ्य इति। अचैसीदित्यत्र सिच इव सुचोऽपि नद्योगात्। विभाषा बहोर्धाऽवि

प्रकृष्टकाले। अविप्रकृष्ट आसन्नः। बहुधा बहुकृत्वो वा दिवसस्य भुङ्क्ते। आसन्नकाले किम्। बहुकृत्वो मासस्य भु-
ङ्क्ते। तत्प्रकृतवचने मयट्। प्राचुर्येण प्रस्तुतं प्रकृतम्। तस्य वचनं प्रतिपादनं भावेऽधिकरणे वा ल्युट्। आद्ये प्रकृ-
तमन्नमन्नमयम्। अपूपमयम्। यवागूमयी। द्वितीये। अन्नमयो यज्ञः। अपूपमयं पर्व। समूहवच्च बहुषु॥
सामूहिकाः प्रत्यया अतिदिश्यन्ते। तस्मान्मयट्। मोदकाः प्रकृताः मौदकिकम्। मोदकमयम्। शाष्कुलिकम्।
शष्कुलीमयम्। द्वितीयेऽर्थे मौदकिको यज्ञः। मोदकमयः। अनन्तावसथेतिहभेषजाञ्ञ्यः। अनन्त एवानन्त्यम्।
आवसथ एवावसथ्यम्। इतिहेति निपातसमुदायः। ऐतिह्यम्। भेषजमेव भैषज्यम्। देवतान्तात्तादर्थ्ये
यत्। तदर्थ एव तादर्थ्यम्। स्वार्थे ष्यञ्। अग्निदेवतायै इदमग्निदेवत्यम्। पितृदेवत्यम्। पादार्घाभ्यां
च। पादार्थमुदकं पाद्यम्। अर्घ्यम्। नवस्य नू आदेशः त्नप्तनप्खाश्च प्रत्यया वक्तव्याः। नूत्नम्। नूतनम्।
नवीनम्। नश्च पुराणे प्रात्। पुराणे वर्तमानात् प्रशब्दान्नो वक्तव्यः। चात्पूर्वोक्ताः। प्रणः। प्रत्नम्। प्रतनं।
प्रीणम्। भागरूपनामभ्यो धेयः। भागधेयम्। रूपधेयम्। नामधेयम्। आग्नीध्रसाधारणादञ्। आग्नीध्रं

॥राम॥
॥१२७॥

साधारणम्। स्त्रियांङीप्। आग्नीध्री। साधारणी। अतिथेर्ञ्यः। तादर्थ्य इत्येव। अतिथये इदमातिथ्यम्। देवात्तल्। देव एव देवता। अवेः कः।
अविरेव अविकः। यावादिभ्यः कन्। याव एव यावकः। मणिकः। लोहितान्मणौ। लोहित एव मणिः लोहितकः। वर्णे चानित्ये।
लोहितकः कोपेन। लोहिता लिङ्गबाधनं वा। लोहितिका। लोहिनिका कोपेन। रक्ते। लाक्षादिना रक्ते यो लोहितस्त
स्मात्कन् स्यात्। लिंगबाधनं वेत्येव। लोहितिका लोहिनिका शाटी। कालाच्च। वर्णे चानित्ये रक्ते इति द्वयमनु
वर्तते। कालकं मुखं वैलक्ष्येण। कालकः पटः। कालिका शाटी। विनयादिभ्यष्ठक्। विनय एव वैनयिकः। सामयिकः।
उपायाद्ध्रस्वत्वं च। औपयिकः। वाचो व्याहृतार्थायाम्। संदिष्टार्थायां वाचि विद्यमानायां वाक्शब्दात्स्वार्थे ठक्। संदेशवाग्वा
चिकं स्यात्। तद्युक्तात्कर्मणोऽण्। कर्मैव कार्मणम्। वाचिकं श्रुत्वा क्रियमाणं कर्मेत्यर्थः। प्रज्ञादिभ्यश्च। प्रज्ञ एव प्राज्ञः।
प्राज्ञी। दैवतः। बांधवः। मृदस्तिकन्। मृदेव मृत्तिका। सस्नौ प्रशंसायाम्। रूपपोऽपवादः। प्रशस्ता मृत् मृत्सा मृत्स्ना।
उत्तरत्रान्यतरस्यांग्रहणान्नित्योऽयम्। बह्वल्पार्थाच्छस्कारकादन्यतरस्याम्। बहूनि ददाति बहुशः। अल्पानि
ददाति अल्पशः। बह्वल्पार्थान्मङ्गलामङ्गलवचनम्। नेह। बहु ददात्यनिष्टेषु। अल्पमाभ्युदयिकेषु। संख्यैकव

वनाच्चवीप्सायाम्। द्वौ द्वौ ददाति द्विशः। माषं माषं ददाति माषशः। प्रचुरशः। परिमाणशब्दाद्वृत्तावेकार्थादेवासंख्यैकवचनात्किम्।
घटं घटं ददाति। वीप्सायां किम्। द्वौ ददाति। कारकादित्येव। द्वयोः स्वामी। प्रतियोगे पञ्चम्यास्तसिः। प्रतिना कर्मप्रवचनीये
न योगे या पञ्चमी विहिता तदन्तात्तसिः स्यात्। प्रद्युम्नः कृष्णतः प्रति। आद्यादिभ्य उपसंख्यानम्। आदौ। आदि
तः। मध्यतः। अन्ततः। पृष्ठतः। पार्श्वतः। आकृतिगणोऽयम्। स्वरेण स्वरतः। वर्णतः। अपादानेऽहीयरुहोः। अपा
दाने या पञ्चमी तदन्तात्तसिः स्यात्। ग्रामादागच्छति ग्रामतः। अहीयरुहोः किम्। स्वर्गाद्धीयते। पर्वतादवरोहति॥
कृभ्वस्तियोगे संपद्यकर्तरि च्विः। अतत्तत्तथा भवतीति वक्तव्यम्। विकारात्मतां प्राप्नुवत्यां प्रकृतौ वर्तमानाद्वि
कारशब्दात्स्वार्थे च्विर्वा स्यात्करोत्यादिभिर्योगे। अस्य च्वौ। अवर्णस्य ईत् स्यात् च्वौ। वेर्लोपः। च्व्यन्तत्वादव्यय
वम्। अकृष्णः कृष्णः संपद्यते तं करोति कृष्णीकरोति। ब्रह्मीभवति। गङ्गीस्यात्। अव्ययस्य च्वावीत्वं ने
ति वाच्यम्। दोषाभूतमहः। दिवाभूता रात्रिः। एतच्चाचार्यलावश्येति [illegible] उक्तम्। [illegible]। ऋलः
परस्यापत्यस्य [illegible]स्य लोपः स्यात्क्ये च्वौ च परतः। गार्गीभवति। च्वौ च। च्वौ च परे पूर्वस्य दीर्घः स्यात्। शुची। [illegible]

॥राम॥
॥१२८॥

वति। पटस्यात्॥ अव्ययस्य दीर्घत्वं नेति केचित्। तन्निर्मूलम्॥ स्वस्ति स्यादिति तु महाविभाषया च्वेरभावे सिद्धम्॥ स्वस्ती स्या
दित्यपि पक्षे स्यादिति चेत्॥ भस्का। यद्दिने ष्पतेन हर्यनलिधाना च्चिरेव नोत्पद्यते इत्यस्तु। पि न्तः। मात्रीकरोति।
अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च। एषां लोपः स्यात् च्विश्च। अरूकरोति। उन्मनीस्यात्। उच्चक्षूकरोति। विर
हीकरोति। विरजीकरोति। विभाषा साति कार्त्स्न्ये। च्विविषये सातिर्वा स्यात्। साकल्ये। सात्पदाद्योः। सस्य षत्वं न
स्यात्। दधि सिञ्चति। कृत्स्नं शस्त्रमग्निः संपद्यतेऽग्निसाद्भवति। अग्नीभवति। महाविभाषया वाक्यमपि। कार्त्स्न्ये
किं। एकदेशेन शुक्लीभवति पटः। अभिविधौ संपदा च। संपदा कृभ्वस्तिभिश्च योगे सातिर्वा स्यात्। व्याप्तौ। प
क्षे कृभ्वस्तियोगे च्विः। संपदा तु वाक्यमेव। अग्निसात्संपद्यते। अग्निसाद्भवति शस्त्रम्। अग्नीभवति। जलसा
त्संपद्यते। जलीभवति। लवणम्। एकस्या व्यक्तेः सर्वावच्छेदेनान्यथाभावः कार्त्स्न्यं। बह्वीनां व्यक्तीनां किं
चिदवयवावच्छेदेनान्यथात्वमभिविधिः। तदधीनवचने। सातिः स्यात् कृभ्वस्तिभिः संपदा च योगे। राजसा

वयवा २

239

करोति।राजसात्संपद्यते।राजाधीनमित्यर्थः।देये त्रा च।तदधीने देये त्रा स्यात् सातिश्च क्रादियोगे।विप्राधीनं देयं करोतीति विप्रत्रा करोति।
विप्रत्रा संपद्यते।पक्षे विप्रसात्करोति।देये किम्।राजसाद्भवति राष्ट्रम्।देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम्।
एभ्यो द्वितीयांतेभ्यः सप्तम्यंतेभ्यश्च त्रा स्यात्।देवत्रा वंदे रमे वा।बहुलोक्तेरन्यत्रापि।बहुत्रा जीवतो मनः।अव्यक्तानुकरणाद्
द्व्यजवरार्द्धादनितौ डाच्।द्व्यच्।द्व्यवरं न्यूनं न तु ततो न्यूनम्।अनेकाजिति यावत्।तादृशमर्द्धं यस्य तस्माड्डाच् स्यात् कृभ्वस्ति
सियोगे।डाचि विवक्षिते द्वे बहुलम्।नित्यमाम्रेडिते डाचीति।डाच्परं यदाम्रेडितं तस्मिन्परे पूर्वपरयोर्वर्णयोः पररूपं स्यात्।।
इति तकारपकारयोः पकारः।पटपटाकरोति।अव्यक्तानुकरणात् किम्।दृषत्करोति।द्व्यजवरार्द्धात् किम्।श्रत्करोति।अव
रेति किम्।खरटखरटाकरोति।चपटचपटाकरोति।अनेकाच[illegible]ह्येव तु स्वरयितुमुक्तम्।एवं द्विडाचीति परसवर्ण्ये
वद्विवेसुवरेस्यव धेयम्।अनितौ किम्।पटिति करोति।कृञो द्वितीयतृतीयशंबबीजात् कृषौ।द्वितीयादिभ्यो डा
च्स्यात् कृञ एव योगे कर्षणेऽर्थे।बहुलोक्तेरव्यक्तानुकरणादव्यस्य डाचि न द्वित्वम्।द्वितीयं तृतीयं कर्षणं करोति द्वि
तीयाकरोति तृतीयाकरोति।[illegible] शंबशब्दः प्रतिलोमे।अनुलोमे कृष्टं क्षेत्रं पुनः प्रतिलोमं कर्षति शंबाकरोति।बीजेनस

लितकारवाम्।५

हकर्षति बीजाकरोति। संख्यायाश्चगुणांतायाः। कृभ्वोयोगे कृषेडाच्स्यात्। द्विगुणाकरोति क्षेत्रम्। द्वैव कर्म द्विगुणेकर्षणीकरोती त्यर्थः। सम क १
याच्चयापनायाम्। कृषावितिनिवृत्तम्। कृञोयोगे डाच्स्यात्। समयाकरोति। कालक्षेपं करोती त्यर्थः। सपत्रनिष्पत्रादतिव्यथने। सपत्राक
रोति मृगम्। सपुंखशर प्रवेशनेन सपत्रं करोती त्यर्थः। निष्पत्राकरोति। सपुंखस्य शरस्य पार्श्वे निर्गमनान्निष्पत्रं करोती त्यर्थः। अ
तिव्यथने किम्। सपत्रं निष्पत्रं वाकरोति भूतलम्। निष्कुलान्निष्कोषणे। निष्कुलाकरोति दाडिमम्। निर्गतं कुलं अंतरवयवानां
समूहो यस्मादिति बहुव्रीहेर्डाच्। सुखप्रियादानुलोम्ये। सुखाकरोति। प्रियाकरोति गुरुं। चित्तानुकूलाचरणेनानंदयतीत्य
र्थः। दुःखात्प्रातिलोम्ये। दुःखाकरोति स्वामिनम्। पीडयतीत्यर्थः। शूलात्पाके। शूलाकरोति मांसम्। शूलेन पचतीत्यर्थः। स
त्यादशपथे। सत्याकरोति भांडं वणिक्। क्रेतव्यमिति तथ्यं करोतीत्यर्थः। शपथे तु सत्यं करोति विप्रः। मद्रात्परिवापणे। म
द्रशब्दो मंगलार्थः। परिवापणं मुण्डनम्। मद्राकरोति कुमारं। मंगलं मुंडनेन संस्करोतीत्यर्थः। भद्राच्चेति वक्तव्यम्। भद्रा
३मद्रंकरोति करोति। अर्थः प्राग्वत्। परिवापणे किम्। भद्रं करोति। ॥ ॥ इति तद्धितप्रक्रिया॥ ॥ ॥श्री॥ ॥श्री॥ ॥ ॥
सर्वस्य द्वे इत्यधिकृत्य। नित्यवीप्सयोः। आभीक्ष्ण्ये वीप्सायां च द्योत्ये पदस्य द्वित्वं स्यात्। आभीक्ष्ण्यं तिङन्ते ष्वव्यय
संज्ञककृदन्तेषु च। पचति पचति। भु [illegible] भुक्त्वा। वीप्सायां। वृक्षं वृक्षं सिंचति। ग्रामो ग्रामो रमणीयः। परेर्वर्जने। परि परि

भद्रंकरोति२

४८

वंगेभ्यो वृष्टो देवः। वंगान्परिहृत्येत्यर्थः। उपर्यध्यधसः सामीप्ये। उपर्युपरि ग्रामम्। ग्रामस्योपरिष्टात्समीपदेशइत्यर्थः। अध्यधि सुखम्।
सुखस्योपरिष्टात्समीपकाले दुःखमित्यर्थः। अधोधो लोकम्। लोकस्याधस्तात्समीपदेशइत्यर्थः। वाक्यादेरामंत्रितस्यासूयासंमति
कोपकुत्सनभर्त्सनेषु। असूयायां सुंदर सुंदर वृथा ते सौंदर्यम्। संमतौ देव देव वंद्योसि। कोपे दुर्विनीत २ इदानीं ज्ञास्यसि। कु
त्सने। धानुष्क धानुष्क वृथा ते धनुः। भर्त्सने। चोर २ घातयिष्यामि त्वाम्। एकं बहुव्रीहिवत्। द्विरुक्ते एकशब्दो बहुव्रीहिवत्स्या
त्। तेन सुब्लोपपुंवद्भावौ। एकैकमक्षरं। इह द्वयोरपि सुपोर्लुकि सति बहुव्रीहिवद्भावादेव प्रातिपदिकत्वात्समुदायात्सु
प्। एकैकयाहुत्या। इह पूर्वभागे पुंवद्भावादवग्रहे विशेषः। न बहुव्रीहावित्यत्र पुनर्बहुव्रीहिग्रहणं मुख्यबहुव्रीहिला
भार्थम्। तेनातिदिष्टबहुव्रीहौ सर्वनामतास्त्येवेति प्राञ्चः। वस्तुतस्तु भाष्यमते चत्यालख्यातमेवनत। स्तनर्केति मिबहुव्री
ह्यर्थे लौकिके विग्रहे निषेधकम्। तत्तु बहुव्रीहावितीहापि हेशशैकेवलास्ति। एकैकस्मै देहि। आबाधे च। पीडाया
द्योत्यायां द्वे स्तः बहुव्रीहिवच्च। गत गत। विरहात्तीप्रमालस्येयमुक्तिः। बहुव्रीहिवद्भावात्सुब्लुक्। गतगता। इह पुं
वद्भावः। प्रकारे गुणवचनस्य। सादृश्ये द्योत्ये गुणवचनस्य द्वे स्तः स कर्मधारयवत्। कर्मधारयवदुत्तरेष्वित्यधिका
रात्। तेन पूर्वभागस्य पुंवद्भावः। समासस्यैवांतोदात्तत्वं च। पटुपट्वी। पटुपटुः। पटुसदृशः। ईषत्पटुरितियावत्। गुणे

॥राम॥
॥१३०॥

पसर्जनं द्रव्यवाचिनं केवलगुणवाचिनश्चेह न गृह्यते। शुक्लं शुक्लं रूपम्। शुक्लशुक्लः पटः। आनुपूर्व्ये द्वे वाच्ये। मूले मूले स्थूलाः। संभ्रमेण प्रवृत्तौ
यथेष्टमनेकधा प्रयोगो न्यायसिद्धः। सर्पः २ बुध्यस्व २ सर्पः २ बुध्यस्व २। क्रियासमभिहारे च। लुनीहि लुनीहीत्येवायं लुनाति। नित्यवी
प्सयोरिति सिद्धे स्वशार्थे द्वित्वार्थमिदम्। पौनःपुन्येऽपि लोटा सह समुच्चित्य द्योतकता लब्धुवा। कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये। समा
सवच्च बहुलम्। बहुलग्रहणादन्यपरयोर्न समासवत्त्वम्। इतरशब्दस्य तु नित्यम्। असमासवद्भावे पूर्वपदस्थस्य सुपः सुर्वक्तव्यः। अन्योन्यं
विप्रा नमन्ति। अन्योन्यौ। अन्योन्यान्। अन्योन्येन कृतम्। अन्योन्यस्मै दत्तमित्यादि। अन्योन्येषां पुष्करैरामृशन्त इति माघः। एवं प
रस्परं। अत्र कस्कादित्वाद्विसर्जनीयस्य सः। इतरेतरं। इतरेतरेणेत्यादि। स्त्रीनपुंसकयोरुत्तरपदस्थाया विभक्तेराम्भावो
वा वाच्यः। अन्योन्याम् अन्योन्यं परस्परां परस्परं इतरेतराम् इतरेतरं वा इमे ब्राह्मण्यौ कुले वा भोजयतः। अत्र केचित्। आमादेशो
द्वितीयाया एव। साध्यादौ तथैवोदाहृतत्वात्। तेन स्त्रीनपुंसकयोरपि तृतीयादिषु पुंवदेव रूपमित्याहुः। अन्ये तूदाहरण
स्य दिङ्मात्रत्वात् सर्वविभक्तीनामामादेशमाहुः। द ल द्वये टाबभावः। क्लीबे रादेरः स्वमोः। समासे सोरलुक् चेति सिद्धं बा
हुलकाच्चायं ॥१॥ तथाहि। अन्योन्यैपरस्परामित्यत्र इक द्वयेऽपि टाप्प्राप्तः। न च सर्वनाम्नो वृत्तिमात्र इति पुंवद्भावः। अन्यपर
योरसमासवद्भावात्। न च द्विर्वचनमेव वृत्तिः। यायो विग्रहः प्रैहत्समासे त्यादावतिप्रसङ्गात्। अन्योन्यामितरेतरामित्यत्र स

243

सिद्धांतकौमुदी
राम १३१॥श्री॥

द्रुतरादिभ्यश्चेत्यद्द्रुप्रत्ययः॥ अन्योन्यसंसक्तमहस्त्रियामम्॥ अन्योन्याश्रयः परस्पराद्विसाहय्यम्॥ अदृष्टपरस्परैरित्यादौ तो लु
क् छापन्नः सर्वेषां कुलकबलेन समाधेयम्॥ अकृतवार्तिकसाध्योदाहरणे स्त्रियामिति स्त्वे अन्योन्यसंश्रयं त्वे तदिति साधयेवा
च्यप्रमाणमिति॥ च्च कृच्छ्रे प्रियसुखयोरन्यतरस्याम्॥ प्रियेण प्रियेण ददाति॥ प्रियेण वा॥ सुखसुखेन सुखेन वा॥ द्विर्वचने कर्मधा
रयवद्भावः सुब्लुक् किं पुनस्तदेव वचनम्॥ इति प्रियमपि कृच्छ्रं नामासेन ददातीत्यर्थः॥ यथास्वे यथायथं॥ यथास्वमिति
वीप्सायाम् अव्ययीभावः॥ यो य आत्माय यश्च आत्मीयं तद्यथास्वम्॥ तस्मिन्यथाशब्दस्य द्वे क्लीबत्वं च निपात्यते॥ यथायथं ज्ञाता॥
यथास्वभावमि त्यर्थः॥ यथात्मीयमिति वा॥ ॥ इति द्विरुक्तप्रक्रिया॥ ॥ श्रीः॥ ॥ इति श्रीभट्टोजीदीक्षितविरचि
तायां सिद्धान्तकौमुद्यां पूर्वार्द्धं समाप्तम्॥ ॥ ॥ श्रीगणेशाय नमः॥ ॥ शुभमस्तु॥ ॥ श्रीः॥ ॥ श्रीः॥ ॥ श्रीः॥
॥छ॥ ॥ श्री॥

॥ रघुनाथेनालेख्ययं ग्रंथः॥ शुभं भवतु लेखकपाठकयोः॥ ॥ छ॥ छ॥ ॥ छ॥ ॥ ॥

श्रीराम॥ श्रीराम
श्रीराम॥॥

सरामतत्वपादर्पकाजे

[illegible] ईश्वरसंवत्सरे का[illegible] [illegible]
[illegible] पाणिन्यमरजयनेद्रा [illegible]
[illegible]

॥राम॥॥श्री
॥१३१॥

॥श्री गणेशाय नमः॥ श्रीमांर्हंतीचेणोर्गुणेयर्मेहर्षिजिरहार्दिवं। तोसूय्यमानोपगुणेवि
दुर्वि अयतेतरां॥१॥ पूर्वार्द्धे कथिताकर्प पंचमाध्यायवर्त्तिनः। प्रत्ययाअथकथ्यंते
तृतीयाध्यायगोचराः॥२॥ तत्रादौ दशलकाराः प्रदर्श्यंते। लट्। लिट्। लुट्। लृट्। ले
ट्। लोट्। लङ्। लिङ्। लुङ्। लृङ्। एषु पंचमो लकारः छंदोमात्रगोचरः॥ वर्त्तमाने ल
ट्॥ वर्त्तमानक्रियावृत्तेर्धातोर्लट् स्यात्॥ अटावितौ। लः कर्मणि च भावे चाकर्मकेभ्यः॥
लकाराः सकर्मकेभ्यः कर्मणि कर्त्तरि च स्युरकर्मभ्यो भावे कर्त्तरि च॥ लस्य। अधिका
रोयं। तिप्तसझिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्॥ ए
तेषां दश लादेशास्युः॥ लः परस्मैपदं॥ लादेशाः परस्मैपदसंज्ञास्युः॥ तङानावात्म
नेपदं॥ तङ् प्रत्याहारः शानच्कानचौ चैतत्संज्ञास्युः। पूर्वसंज्ञायापवादः॥ अनु
दात्तङित आत्मनेपदं॥ अनुदात्तेत उपदेशे यो ङित्तदंताच्च धातोर्लस्य स्थाने
आत्मनेपदं स्यात्॥ स्वरितञितः कर्त्रभिप्राये क्रियाफले॥ स्वरितेतो ञित

आत्मनेपदनिमित्तहीनाद्धातोः कर्त्तरिपरस्मैपदंस्यात्‌॥

ति०॥ श्चधातोरात्मनेपदंस्यात्‌ कर्तृगामिनीक्रियाफले॥ शेषात्कर्त्तरिपरस्मैपदं॥ तिङः स्त्रीणित्री
णिप्रथममध्यमोत्तमाः॥ तिङः उभयोः पदयोस्त्रयस्त्रिकाः क्रमादेतत्संज्ञास्युः॥ तान्येकव
१३२ चनाद्विवचनबहुवचनान्येकशः॥ लब्धप्रथमादिसंज्ञानि तिङः स्त्रीणित्रीणि प्रत्येकमेक
वचनादिसंज्ञानिस्युः॥ युष्मद्यु[illegible]पपदे समानाधिकरे स्यात्‌॥ प्रहासे च मन्योपपदे मन्य
तेरुत्तमएकवच्च॥ मन्यधातुरूपपदं यस्य धातोस्तस्मिन्प्रहासे तिङन्ते सति मध्यमः स्यात्प्र
हासेगम्यमाने मन्यतेरुत्तमः स्यात्स चैकार्थस्य वाचकः स्यात्‌॥ अस्मद्युत्तमः॥ तेषा
६ स्यात् भूतेस्मद्युत्तमः॥ शेषेप्रथमः॥ मध्यमोत्तमयोरविषये प्रथमः स्यात्‌॥ भूसत्तायां॥ कर्तृ
विवक्षायाम्भूति इष्यते॥ तिङ्शित्सार्वधातुकं॥ तिङः शितश्च धात्वधिकारोक्ता
एतत्संज्ञास्युः॥ कर्त्तरिशप्‌॥ कर्त्रर्थे सार्वधातुके परे धातोः शप्स्यात्‌॥ शपावितो॥
६ धातुक ३ सार्वधातुकयोः॥ अनयोः परयोरिगन्तांगस्य गुणः स्यात्‌॥ अवादेशः॥ भ[illegible]ती॥ भ
वतः॥ झोंतः॥ प्रत्ययावयवस्य झस्य अन्तादेशः स्यात्‌॥ अतोगुणे॥ भवंति॥ भवसि॥
भवथः॥ भवथ॥ अतोदीर्घोयञि॥ अतोंगस्य दीर्घः स्याद्यञादौ सार्वधातुके

॥ णेस्थानिन्यपिमध्यमः॥ तिङ्वाच्यकारकवाचि
॥ नियुष्मदिअप्रयुज्यमानेचमध्यमः॥ ४

परे। भवामि। भवावः। भवामः॥ सः भवति। तौ भवतः॥ ते भवंति। त्वं भवसि। अहं भवामि।
एहि मन्ये ओदनं भोक्ष्यसे। भुक्तः सोतिथिभिरिति। एतेऽभवा मन्ये। ओदनं भोक्ष्येध्वे। भो-
क्ष्यध्वे। भोक्ष्ये। भोक्ष्यावहे। इत्यादि। मन्यसे। मन्येथे। मन्यध्वे इति सर्वत्र॥ युष्मद्युपपद इत्या-
ध्वनुवर्त्तते तेनेह न। एहि भवान् मन्यते। ओदनं भोक्ष्य इति। प्रहासे किं। यथार्थकथने
मा भूत्। एहि मन्यसे। ओदनं भोक्ष्येऽभुक्तः सोतिथिभिः। परोक्षे लिट्॥ भूतानद्यतन इत्यादि 4
परोक्षार्थे वर्त्तेर्धातोर्लिट् स्यात्। लस्यतिबादयः॥ लिट् च॥ लिडादेशास्तिङ आर्द्धधातु-
कसंज्ञ एव स्यान्न तु सार्वधातुकसंज्ञस्तेन शबादयो न॥ परस्मैपदानां णलतुसुस्थल-
थुसणल्वमाः॥ लटस्तिबानां नवानां णलादयो नव स्युः॥ भु अ इति स्थिते॥ भुवो वुक् लु-
ङ्लिटोः॥ भुवो वुगागमः स्याल्लुङ्लिटोरचिः नित्यत्वाद्वुग्गुणवृद्धी बाधते॥ एकाचो
द्वे प्रथमस्य॥ अजादेर्द्वितीयस्येसघिह्लस्य॥ लिटि धातोरनभ्यासस्य॥ लिटि परेऽ
नभ्यासधात्ववयवस्यैकाचः प्रथमस्य द्वे स्त आदिभूतादचः परस्य तु द्वितीय

ति०। स्या॰ भूव् भूव् अ इति स्थिते॥ पूर्वोभ्यासः॥ अत्र ये द्वे विहिते तयोः पूर्वोभ्याससंज्ञः स्यात्॥

१२२ हलादिः शेषः॥ अभ्यासस्यादिर्हल् शिष्यतेऽन्ये हलो लुप्यते॥ इति वलोपः॥ ह्रस्वः॥ अभ्यासस्याचो ह्रस्वः स्यात्॥ भवतेरः॥ भवतेरभ्यासोकारस्य अः स्याल्लिटि॥ अभ्यासे चर्च॥ अभ्यासे झलां चरः स्युर्जशश्च॥ झशां जशः खयां चरः॥ तत्रापि प्रकृतिजशां प्रकृतिजशः प्रकृतिचरां प्रकृतिचर इति विवेक आंतरतम्यात्॥ असिद्धवदत्राभात्॥ इत ऊर्ध्वं आपादपरिसमाप्तेराभीयम्॥ समानाश्रये तस्मिन् कर्तव्ये तदसिद्धं स्यात्॥ इति वुकोऽसिद्धत्वादुवङिति प्राप्ते॥ वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ॥ बभूव। बभूवतुः। बभूवुः॥ आर्धधातुकस्येड्वलादेः॥ वलादेरार्धधातुकस्येडागमः स्यात्॥ बभूविथ॥ बभूवथुः॥ बभूव॥ ~~आर्धधातुकस्येड्वलादेः॥ वलोवर~~ बभूविव। बभूविम॥ अनद्यतने लुट्॥ भविष्यत्यनद्यतने धातोर्लुट् स्यात्। स्यतासी लृलुटोः। लृ इति लृङ्लृटोर्ग्रहणं। धातोः स्यतासी एतौ प्रत्ययौ स्तः लृलुटोः परतः ५

भुवः प्रथमस्य द्वारो रसः॥ एते केमरसः।
द्वित्वसामर्थ्यात् अभ्यासस्यापि हेतो
[illegible] पः। पुगंतलघूपधस्य चापुगंतस्य
लघूपधस्य चोपधास्य इ [illegible] को

नि कव्यवहितस्येको नगुणः। सवितृ आ। अत्रेको गुणे प्राप्ते। दीधीवेवीटाम्॥ दीधीवेव्योरिटश्च गुण वृद्धी न स्तः। सविता। तासस्त्योर्लोपः। तासेरस्ते
श्च लोपः स्यात्सादौ प्रत्यये परे। रि च। रादौ प्रत्यये प्राग्वत्। सवितारौ। सवितारः। सवितासि। सवितास्थः। सवितास्थ। सवितास्मि। सवितास्वः।
सवितास्मः॥ २॥ लृट् शेषे च। भविष्यदर्थाद्धातोर्लृट् स्यात् क्रियार्थायां क्रियायामसत्यां सत्यां वा। स्यः। इट्। सविष्यति। सविष्यतः। सविष्यं
ति। सविष्यसि। सविष्यथः। सविष्यथ। सविष्यामि। सविष्यावः। सविष्यामः॥ ३॥ लोट्। विध्यादिष्वर्थेषु लोट् स्यात्। आशिषि लिङ्लोटौ। लि — एरुः। ४
ट इकारस्य उः स्यात्। सवतु। तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्॥ आशिषि तुह्योस्तातङ् वा स्यात्। अनेकाल्त्वात्सर्वादेशः। यद्यपि ङिच्चेत्यप
वादस्तथाप्यनन्यार्थं ङित्त्वेष्वनङादिषु चरितार्थं इति गुणवृद्धिप्रतिषेधसंप्रसारणाद्यर्थं तयासं सर्वस्येयोऽनङ्कारेण तातङि भेथर्थं
प्रवृत्तः परेण बाध्यते। इहोत्सर्गापवादयोरपि समबलत्वात्। सवतात्। लोटो लङ्वत्। लोटो लङ इव कार्यं स्यात्। तामादयः स. लोपश्च। — नता ५
तथा हि। तस्थस्थमिपां तांतंतामः। ङितश्चतुणं तामादयः क्रमात्स्युः। नित्यं ङितः। सकारान्तस्य ङिदुत्तमस्य नित्यं लोपः स्यात्। अलो
न्त्यस्येति सलोपः। सवतां। सवन्तु। सेर्ह्यपिच्च। लोटः सेर्हिः स्यात्सोऽपिच्च। अतो हेः। अतः परस्य हेर्लुक् स्यात्। सव। सवतात्। सवतं। सवत। मे
र्निः। लोटो मेर्निः स्यात्। आडुत्तमस्य पिच्च। लोडुत्तमस्याडागमः स्यात्स पिच्च। हिन्योरुत्वं न। इकारोच्चारणसामर्थ्यात्। सवानि। सवाव।
सवाम॥ ५॥ अनद्यतने लङ्। अनद्यतनभूतार्थवृत्तेर्लङ् स्यात्। लुङ्लङ्लृङ्क्ष्वडुदात्तः। एषु परेष्वङ्गस्याडागमः स्यात्स चोदात्तः। इतश्च।

249

२३४

॥३॥

ङितो लस्य परस्मैपदमिकारान्तं यत्तस्य लोपः स्यात्। अभवत्। अभवतां। अभवन्। अभवः। अभवतं। अभवत। अभवं। अभवाव
अभवाम॥ ॥ विधिनिमंत्रणामंत्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्। एष्वर्थेषु धात्येषु वाच्येषु वा लिङ् स्यात्। विधिः प्रेरणं भृत्यादेर्नि
कृष्टस्य प्रवर्त्तनं। निमंत्रणं नियोगकरणं। आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्त्तनं। आमंत्रणं कामचारानुज्ञा। अधीष्टः स
त्कारपूर्वको व्यापारः। प्रवर्त्तनायां लिङ्। चतुर्णां विध्युपादानं प्रपंचार्थं। यासुट् परस्मैपदेषूदात्तो ङिच्च। लिङः परस्मैपदानां यासु
डागमः स्यात् स चोदात्तो ङिच्च। ङित्त्वोक्ते ज्ञापिते क्वचिदनुबंधकार्येऽनल्विधौ वेति प्रतिषेध इति। आदेशस्य स्थानवत्त्वः शित्वमपी
ह लिंगं। सुट्तिथोः। लिङस्तकारथकारयोः सुट् स्यात्। सुटा यासुण्न बाध्यते। लिङो यासुट् तकारस्य सुडिति विषयभेदात्
लिङः सलोपोनंत्यस्य। सार्वधातुकलिङोनंत्यस्य सस्य लोपः स्यात्। इति सकारद्वयस्यापि निवृत्तिः। सुटः श्रवणं त्वाशीर्लिङि स्फु
टतरं। तुत आत्मनेपदे। अतो येयः। अतः परस्य सार्वधातुकावयवस्य या इत्यस्य इय् स्यात्। गुणः। यलोपः। भवेत्। भवेतां। झेर्जुस्।
लिङो झेर्जुस् स्यात्। ज इत्। उस्यपदान्तात्। अपदान्तादवर्णादुसि पररूपमेकादेशः स्यात्। इति प्राप्ते परत्वान्नित्यत्वाच्चा
तो येय इति प्राप्तः। यद्यप्यंतरंगत्वात्पररूपं न्याय्यं तथापि यासुडित्येतस्य इयिति व्याख्येयं। एवं च सलोपस्यापवाद इति। अ
तो येय इत्यत्र संधिरार्षः। भवेयुः। भवेः। भवेतं। भवेत। भवेयं। भवेव। भवेम॥ ॥ लिङाशिषि। आशिषि लिङस्तिङार्द्धधा

सू२

कार्यो:

॥राम॥
॥३॥

250

तुकसंज्ञः स्यात्॥ किदाशिषि॥ आशिषि लिङो यासुट् कित् स्यात्॥ स्कोरिति सलोपः॥ क्ङिति च॥ गित्किङिन्निमित्ते इग्लक्षणे गुणवृद्ध
ध्दी न स्तः॥ भूयात्। भूयास्तां। भूयासुः। भूयाः। भूयास्तं। भूयास्त। भूयासं। भूयास्व। भूयास्म॥ ७॥ लुङ्॥ भूतार्थे धातोर्लुङ् स्यात्॥ माङि
लुङ्॥ सर्वलकारापवादः॥ स्मोत्तरे लङ् च॥ स्मोत्तरे माङि लुङ् स्यात् लङ् च॥ च्लि लुङि॥ शबाद्यपवादः॥ च्लेः सिच्॥ इचावितौ॥ गातिस्थाघु
पाभूभ्यः सिचः परस्मैपदेषु॥ एभ्यः सिचो लुक् स्यात्॥ गापाविहेणादेशपिबती ग्राह्यौ॥ भूसुवोस्तिङि॥ भूसू इत्येतयोः सार्वधातुके ति
ङि परे गुणो न स्यात्॥ अस्तिसिचोऽपृक्ते॥ सिच् अस् च इति समाहारद्वंद्वः॥ सिच्च स्च स्यसौ तैः सतं अस्तीत्यर्थ्येन कर्मधारयः॥ ततः पं
चम्याः सौत्रो लुक्॥ विद्यमानात् सिचोऽस्तेश्च परस्यापृक्तस्य हल ईडागमः स्यात्॥ इतीण्नेह॥ सिचो लुप्तत्वात्॥ अभूत्॥ हलः किं॥ ऐधिषि
सिजभ्यस्तविदिभ्यश्च॥ सिचोऽभ्यस्ताद्विदेश्च परस्य ङित्संबंधिनो झेर्जुस् स्यात्॥ इति प्राप्ते॥ आतः॥ सिज्लुकि आदंतादेव झेर्जुः॥ भूवु
क्॥ अभूवन्॥ अभूः॥ अभूतं॥ अभूत॥ अभूवं॥ अभूव॥ अभूम॥ न माङ्योगे॥ अडाटौ न स्तः॥ मा भवान् भूत्॥ मा स्म भवद्भूत्॥ ॥ लिङ्नि
त्ते लृङ् क्रियातिपत्तौ॥ हेतुहेतुमद्भावादि लिङ्निमित्तं तत्र भविष्यत्यर्थे लृङ् स्यात् क्रियाया अनिष्पत्तौ गम्यमानायां॥ अभविष्यत्॥ अभ
विष्यतां॥ अभविष्यन्॥ अभविष्यः॥ अभविष्यतं॥ अभविष्यत॥ अभविष्यम्॥ अभविष्याव॥ अभविष्याम॥ ॥ ते प्राग्धातोः॥ ते गत्युपसर्गसं

ङि ३

[illegible] १६

251

१३५

स्यात्२

ज्ञाधातोः प्रागेव प्रयोज्याः। आनि लोट्। उपसर्गस्थान्निमित्तात्परस्य लोडादेशस्य आनीत्यस्य नस्य णः। प्रभवाणि। दुरः षत्वणत्वयोरु-
पसर्गत्वप्रतिषेधो वक्तव्यः। दुःस्थितिः। दुर्भवानि। अंतःशब्दस्याङ्किविधिणत्वेषूपसर्गत्वं वाच्यम्। अंतर्भवाणि। शेषे विभाषाक-
खादावषांत उपदेशे। उपदेशे कादिखादिषांतवर्जिते गदनदादेरन्यस्मिन्धातौ परे उपसर्गस्थान्निमित्तात्परस्य नेर्ण-
त्वं वा स्यात्। प्रणिभवति। प्रनिभवति। इहोपसर्गाणामसमस्तत्वेपि संहिता नित्या। तदुक्तम्। संहितैकपदे नित्या नित्या
धातूपसर्गयोरिति। सत्ताद्यर्थनिर्देशश्चोपलक्षणम्। प्रयोगात्स्वर्गे भवतीत्यादावुत्पद्यत इत्यर्थः। उपसर्गास्त्वर्थवि-
शेषस्य द्योतकाः। प्रभवति। पराभवति। संभवति। अनुभवति। अभिभवति। उद्भवति। परिभवतीत्यत्र विलक्षणार्थवि-
गतेः। उक्तं च। उपसर्गेण धात्वर्थो बलादन्यः प्रतीयते। प्रहाराहारसंहारविहारपरिहारवत्॥ एधृ वृद्धौ।
कत्थंताः षट्त्रिंशदनुदात्तेतः। टित आत्मनेपदानां टेरे। टितो लस्य आत्मनेपदानां टेरेत्वं स्यात्। एधते। सार्वधातुक-
मपित्। अपित्सार्वधातुकं ङिद्वत्स्यात्। आतो ङितः। अतः परस्य ङितामाकारस्य इय् स्यात्। एधेते। एधंते। थासः से।

त्रनीयते२

॥४॥

॥४॥

252

स्यात्

गो४

टितो लस्य थासः सेः । एधसे । एधेथे । एधध्वे । अतो गुणे । एधे । एधावहे । एधामहे । इजादेश्च गुरुमतोनृच्छः । इजादिर्यो धातुर्गुरुमा
नृच्छत्यन्यस्ततः आम् स्यात् लिटि । आमो मकारस्य नेत्वं । आस्कासोराम्विधानात् ज्ञापकात् । आमः । आमः परस्य लुक्
स्यात् । कृञ्चानुप्रयुज्यते लिटि । आमंताल्लिट्पराः कृभ्वस्तयोनुप्रयुज्यंते । आम्प्रत्ययवत्कृञोनुप्रयोगस्येति सूत्रे कृञ्ग्रह
णसामर्थ्यादनुप्रयोगोन्यस्यापीति ज्ञायते । तेन कृभ्वस्तियोग इत्यतः कृञो द्वितीयेति ञकारेण प्रत्याहाराश्रयणात् कृभ्वस्ति
लाभः । तेषां क्रियासामान्यवाचित्वादाम्प्रकृतीनां विशेषवाचित्वात्तदर्थयोरभेदान्वयः । संपदिस्तु प्रत्याहारेंतर्भूतोपि न
न्वितार्थत्वान्न प्रयुज्यते । कृञस्तु क्रियाफले परगामिनि परस्मैपदे प्राप्ते । आम्प्रत्ययवत्कृञोनुप्रयोगस्य । आम्प्रत्ययो य
स्मादित्यतद्गुणसंविज्ञानो बहुव्रीहिः । आम्प्रकृत्या तुल्यमनुप्रयुज्यमानात् कृञोप्यात्मनेपदं स्यात् । इह पूर्ववदित्यनुवर्त्य वा
क्यभेदेन संबध्यते । पूर्ववदेवात्मनेपदं न तु तद्विपरीतमिति । तेन कर्तृगेपि फले इदांचकार । त्यादौ न तु । लिटस्तझयोरे
शिरेच् । लिडादेशयोस्तझयोरेशइरेचू स्तः । एकारोच्चारणं ज्ञापकं तङादेशानां टेरेत्वं नेति । तेन डारौरसां न । कृ ए इ
ति स्थिते । असंयोगाल्लिट् कित् । असंयोगात्परोऽपिल्लिट् कित् । क्ङिति चेति निषेधात्सार्वधातुकार्धधातुकयोरिति गुणो न ।

स्या

253

अभ्यासस्य आदि हलसिष्यते अप्रत्यये किं। व अच्छ्र २
न्येषु लोलुप्यते। २

प्रत्ययेपरे

१३६ द्वित्वात्परत्वाद्यणि प्राप्ते। द्विर्वचनेचि। द्विवनिमित्ते ऽचिपरे अच आदेशो न स्याद्द्विवकर्त्तव्ये। उरत्। अभ्यासस्य ऋवर्णस्य अत्स्यात्। रपरत्वं।
हलादिः शेषः। कुहोश्चुः। अभ्यासकवर्गहकारयोश्चवर्गादेशः स्यात्। एधांचक्रे। एधांचक्राते। एधांचक्रिरे। एकाच उपदेशेनुदात्तात्।
उपदेशे यो धातुरेकाजनुदात्तश्च ततः परस्यार्द्धधातुकस्येण्न स्यात्। उपदेश इत्युभयान्वयि। एकाच इति किं। यङ्लुग्व्यावृत्त्यर्थ
था स्यात्। ऊ स्मरंति हि। श्तिपा शपानुबंधेन निर्दिष्टं यद्गणेन च यत्। यत्रैकाज्ग्रहणं चैव पंचैतानि न यङ्लुकि॥१॥ इति। एतच्च इहैवेकाजु
ग्रहणेन ज्ञाप्यते। अच इत्येवैकाच्त्वविवक्षया तद्ग्रहणेन सिद्धे एकग्रहणसामर्थ्यादनेकाजुकोपदेशो व्यावर्त्यते। तेन वधेर्हि
त्युपदेशे एकाच्त्वेपि न निषेधः। आदेशोपदेशेनेकाच्त्वात्। अनुदात्ताश्चानुपदमेव संग्रहीष्यंते। एधांचकृषे। एधांचक्राथे। इणः
षीध्वंलुङ्लिटां धोंगात्। इणंतादंगात्परेषां षीध्वंलुङ्लिटां धस्य मूर्द्धन्यः स्यात्। एधांचकृढ्वे। एधांचक्रे। एधांचकृवहे। ए
धांचकृमहे। एधांबभूव। अनुप्रयोगसामर्थ्यादस्तेर्भूभावो न। अन्यथा हि कृञ्स्वनुप्रयुज्यत इति कृस्वेति वा ब्रूयात्। एधा
मास। एधामासतुः। इत्यादि। एधिता। एधितारौ। एधितारः। एधितासे। एधितासाथे। धि च। धादौ प्रत्यये परे सलोपः स्यात्। ॥५॥
एधिताध्वे। ह एति। तासस्त्योः सस्य हः स्यात् एति परे। एधिताहे। एधितास्वहे। एधितास्महे। एधिष्यते। एधिष्येते। एधिष्यंते। आ

अत आदेः। अभ्यासस्यादेरतो दीर्घः स्यात्। २
पररूपापवादः

५२

मेतः॥ लोट एकारस्य आमुस्यात्॥ एधतां॥ एधेतां॥ एधंतां॥ सवाभ्यां वामौ॥ सवाभ्यां परस्य लोडेतः क्रमाद्वअमू एतौ स्तः॥ एधस्व॥
एधेथां॥ एधध्वं॥ एत ऐ॥ लोडुत्तमस्य एत ऐ स्यात्॥ आमोपवादः॥ एधै॥ एधावहै॥ एधामहै॥ आडजादीनां॥ अजादीनामाडूस्याल्लु
ङादिष्वालोपवादः॥ आटश्च॥ ऐधत॥ ऐधेतां॥ ऐधंत॥ ऐधथाः॥ ऐधेथां॥ ऐधध्वं॥ ऐधे॥ ऐधावहि॥ ऐधामहि॥ लिङः सीयुट्॥ स
लोपः॥ ऐधेत॥ ऐधेयातां॥ झस्य रन्॥ लिङो झस्य रन्स्यात्॥ एधेरन्॥ एधेथाः॥ एधेयाथां॥ एधेध्वं॥ इटोत्॥ लिङादेशस्येटो
त्स्यात्॥ एधेय॥ एधेवहि॥ एधेमहि॥ आशीर्लिङि आर्द्धधातुकत्वात्सलोपो न॥ सीयुट्सुटोः प्रत्ययावयवत्वात्षत्वं॥ ए
धिषीष्ट॥ एधिषीयास्तां॥ एधिषीरन्॥ एधिषीष्ठाः॥ एधिषीयास्थां॥ एधिषीध्वं॥ एधिषीय॥ एधिषीवहि॥ एधिषीमहि॥
ऐधिष्ट॥ ऐधिषातां॥ आत्मनेपदेष्वनतः॥ अनकारात्परस्यात्मनेपदेषु झस्य अत इत्यादेशः स्यात्॥ ऐधिषत॥ ऐधिष्ठाः॥
ऐधिषाथां॥ इणः षीध्वंलुङ्लिटां धोङ्गात्॥ ऐधिढ्वं॥ इड्भिन्न एव इणि हग्रहणमिति इति मते ऐधिध्वं॥ ढधयोर्वस्य मस्य
व द्वित्व विकल्पात्षोडशरूपाणि॥ ऐधिषि॥ ऐधिष्वहि॥ ऐधिष्महि॥ ऐधिष्यत॥ ऐधिष्येतां॥ ऐधिष्यंत॥ ऐधिष्यथाः॥ ऐधिष्येथां॥

255

घ३

१३० ऐधिष्यध्वं।ऐधिष्ये।ऐधिष्यावहि।ऐधिष्यामहि।।उदात्तवादलादेरिह्रूतसंगादनुदात्ताः सेट् स्युंते ऊदृदंतैर्यौतिरुक्ष्णुशीस्नुनु
क्षुश्विडीश्रिभिः वृङ्वृञ्भ्यांचविनैकाचोऽजंतेषु निहताः स्मृताः।।१।।शक्लृपच्मुचिरिच्वच्विच्सिच्प्रछित्यज्निर्जिर्भजः
भंज्भुज्भ्रस्ज्मस्जियज्युज्रुज्रंज्विजिर्स्वंजिसंज्सृजः।।२।।अद्क्षुद्खिद्छिद्तुदिनुदः पद्यतिर्विद्यतिर्विन्
द्।शद्सदी स्विद्यतिः स्कंदिहदी क्रुध्क्षुधिबुध्यती।।३।।बंधियुधिरुधीराधिव्यधशुधः साधिसिध्यती।मन्यहन्नाप्
क्षिप्छुपितप्तिपः स्तृप्यतिदृप्यती।।४।।लिप्लुप्वप्शप्स्वप्सृपियभ्रभ्लभ्गम्नम्यमोरमिः।क्रुशिदंशिदिशीदृ
६ शमृशरिश्रुशलिशूविशस्पृशः कृषिः।।५।।त्विषतुषद्विषदुषपुष्यपिषविषशिषशुष।श्लिष्यतयोघसिः वसतिर्दहदिहिदु
हो नहमिहरुहलिहवहिस्तथा।।६।।अनुदात्ता हलंतेषु धातवो द्व्यधिकं शतं।तुदादौ मतभेदेन स्थितौ यौ च कुरा
दिषु।।७।।तृप्दृपी तौ वारयितुं श्यना निर्दिष्टौ आदृतः।किंच।स्विद्यपद्योसिध्यबुध्योमन्यपुष्यश्लिषः श्यना।।८।।विसिः ।।६।।
६२ रापाल्लुकायौति निर्दिष्टोन्य निहतये।निजिमूविजिरुशक्लृदृतिसानुबंधाजमीतथा।।९।।विंदतिश्चांद्रदौर्गादेरि
ष्टो साप्येपि दृश्यते।व्याघ्रभूत्यादयस्त्वेनं नेहपेठुरिति स्थितं।।१०।।रंजिमस्जीअदिपदीतुद्रुहधूशुषिपुषीशिषिः।सा

256

ष्यानुक्ता नवेहोक्ता व्याघ्रस्तृत्यादिसंमतेः॥१॥ स्पर्द्ध संघर्षे॥ संघर्षः पराभिभवेच्छा॥ धात्वर्थेनोपसंग्रहादकर्मकः॥ स्पर्द्धते॥ शर्पूर्वाः
खयः॥ अभ्यासस्य शर्पूर्वाः खयः शिष्यंते हलादिःशेष इत्यस्यापवादः॥ पस्पर्द्धे॥ स्पर्द्धिता॥ स्पर्द्धिष्यते॥ स्पर्द्धतां॥ अस्पर्द्धत॥ स्प
र्द्धेत॥ स्पर्द्धिषीष्ट॥ अस्पर्द्धिष्ट॥ अस्पर्द्धिष्यत॥३॥ गाधृ प्रतिष्ठा लिप्सयोर्ग्रंथे च॥ गाधते॥ जगाधे॥४॥ बाधृ लोडने॥ लोडनं प्र
तिघातः॥ बाधते॥ ५॥ नाथृ नाधृ याच्ञोपतापैश्वर्याशीःषु॥ आशिषि नाथ इति वाच्यम्॥ अस्याशिष्येवात्मनेपदं स्यात्॥ नाथ
ते॥ अन्यत्र नाथति॥ नाधते॥६॥ दध धारणे॥ दधते॥ अत एकहल्मध्येनादेशादेर्लिटि॥ लिण्निमित्तादेशादिकं न भवति य
दंगं तदवयवस्यासंयुक्तहल्मध्यस्थस्याकारस्यएकारः स्यादभ्यासलोपश्च किति लिटि॥ थलि च सेटि॥ प्रागुक्तं स्या
त्॥ आदेशश्चेह वैरूप्यसंपादक एवाश्रीयते॥ शसि ददोः प्रतिषेधवचनाज्ज्ञापकात्॥ तेन प्रकृतिजश्त्वं ते पुन
स्त्वपि एत्वाभ्यासलोपौ स्त एव॥ देधे॥ देधाते॥ देधिरे॥ अतः किम्॥ दिदिवतुः॥ तपरः किम्॥ ररासे॥ एकेत्यादि किम्॥ ततसरतुः॥
अनादेशादेः किम्॥ चकणतुः॥ लिटि किम्॥ आदेशविशेषणादिह स्यादेव नेमिथ सेहे॥७॥ स्कुदि आप्रवणे॥ आप्रवणमु

257

१३८

स्लुवनमुद्धरणे च॥९॥ इदितो नुम् धातोः। स्कुंदते। चुस्कुंदे॥८॥ श्विदि श्वैत्ये। अकर्मकः। श्विंदते। शिश्विंदे॥१०॥ वदि अभिवाद

बंदते।२ नस्तुत्योः। ववंदे॥११॥ भदि कल्याणे सुखे च। भंदते। बभंदे॥१२॥ मदि स्तुतिमो[illegible] मदस्वप्नगतिषु। मंदते। ममंदे॥१३॥ स्प कांति२

दि किंचि[illegible]च्चळने। स्पंदते। पस्पंदे॥१४॥ क्लिदि परिदेवने। शोक इत्यर्थः। सकर्मकः। क्लिंदते चैत्रमूं। चिक्लिंदे॥१५॥ मुद

हर्षे। मोदते॥१६॥ ददि दाने। ददते। नशसददवादिगुणानां॥ शसेर्ददेर्वकारा गुणशब्देन भावितस्य च यो कारस्तस्य ए दीनां४

दे५ त्वाभ्यासलोपौ न। दददौ [illegible] हद हाते। ददहिरा॥१७॥ षद स्वर्द आ[illegible]स्वादने। अयमनुलवे सकर्मकः। रुच्यावकर्म

कः। धात्वादेः षः सः। धातोरादेः षस्य सः स्यात्। सात्पदाद्योरिति षत्वनिषेधः। अनुस्वदते। स्वर्दते। सस्वर्दे॥१९॥ उर्द

माने क्रीडायां च। उपधायां च। धातोरुपधाभूतयोरेफवकारयोर्हल्परयोः परत इको दीर्घः स्यात्। ऊर्दते। ऊर्दां राम

चक्रे॥ कुर्द खुर्द गुर्द गुद क्रीडायामेव। कूर्दते। चुकूर्दे॥२१॥ खूर्दते॥२२॥ गूर्दते॥२३॥ गोदते। जुगुदे॥२४॥ षूद क्षर ॥७॥

णे। सूदते। सुषूदे। सेक्सृ स्प स्तृ स्त्य स्त्रि स्म स्यान्ये दंत्याजंतसादयः। एकाचः षोपदेशाः। ष्मिङ् स्विदि स्वदि स्वंज स्वप

258

स्मिङः ।१। दंस्यः केवळ दंस्य न तु दंतोष्ठ्जोपि । स्विदादीनां पृथग्ग्रहणात् । २। क्राह्जयक्के शब्दे क्रादते । चक्रादे । २६ ह्लादी सुखे च
वादव्यक्ते शब्दे ह्लादते । २७ स्वाद आस्वादने स्वादते । २८ पर्द कुत्सिते शब्दे गुदरव इत्यर्थः पर्दते । २९ यती प्रयत्ने यतते । येते । ३० युतृ जु
तृ भासने योतते । युयुते । जोतते । जुजुते । ३२ विथृ वेथृ याचने । विविथे । ३३ विवेथे ३४ श्रथि शैथिल्ये । श्रंथते । ३५ ग्रथि कौटिल्ये । ग्रंथ
ते । ३६ कत्थ श्लाघायां । कत्थते । ३७ एधादयो नुदात्तेतो गताः । अथाष्टत्रिंशत्तवर्गीयांताः परस्मैपदिनः । अत सातत्यगमने । अतति
अत आदेः । आत । आत । आततुः आतुः । छन्दु ङि आतिस ईदिति स्थिते । इट ईटि । इटः परस्य सस्य लोपः स्यादीटि परे । सिज्लोप एकादे
शे सिद्धो वक्तव्यः । आतीत् । आतिष्टां । आतिषुः । वदव्रज हलंतस्याचः वदे व्रजे हलंतस्य चांगस्याचः स्थाने वृद्धिः स्यात् सिचि परस्मैपदेषु ।
तिप्राप्ते नेटि । इडादौ सिचि प्रागुक्तं न स्यात् मा भवान् अतीत् । अतिष्टां । अतिषुः । ३८ चिती संज्ञाने । चेतति । चिचेत । अचेतीत् । अचेतिष्टां ।
अचेतिषुः । ३९ च्युतिर् आसेचने सेचनमार्द्रीकरणं । आङीषदर्थेभिव्याप्तौ वा । इर इत्संज्ञा वाच्या । च्योतति । चुच्योत । इरितो वा । इरितो धातो
श्च्लेः ङ्वा स्यात् परस्मैपदे परे । अच्युतत् । अच्योतीत् । ४० श्च्युतिर् क्षरणे । श्च्योतति । चुश्च्योत । अश्च्युतत् । अश्च्योतीत् । अथकाररहि
तोयम् । श्चोतति । ४१ मन्थ विलोडने । यासुटः किद्वाशिषीति किद्वादनिदितामिति नलोपः । मथ्यात् । ४२ कुथि पुथि लुथि मथि हिं

॥सिद्धांतकौ०

॥८॥

॥२३९॥

सासंक्लेशयोः।इदित्वान्नलोपो न।कुंथ्यात्।मंथ्यात्।४ षिध गत्यां।सेधति।सिषेध।सेधिता।असेधीत्।सात्पदाद्योरिति निषेधे प्राप्ते।उपसर्गा
त्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसंजस्वंजां।उपसर्गस्थान्निमित्तादेषां सस्य षः स्यात्।सदिरप्रतेः।प्रतिभिन्नादुपसर्गात्स
देः सस्य षः स्यात्।स्तन्भेः।स्तन्भेः सौत्रस्य सस्य षः स्यात्।योगविभाग उत्तरार्थः।किंच अप्रतेरिति नानुवर्तते।वा।कुप्रतिष्टंभविष्टब्धमन्युः।अ
वाच्चालंबनाविदूर्ययोः।अवात्स्तन्भेरेतयोरर्थयोः षत्वं स्यात्।वेश्च स्वनो भोजने।व्यवाभ्यांस्वनतेः सस्य षः स्याद्भोजने।परिनिविभ्यः सेवसितस
यसिवुसहसुट्स्तुस्वंजां।परिनिविभ्यः परेषामेषां सस्य षः स्यात्।निषेधति।प्राक्सितादड्व्यवायेपि।सेवसितेत्यत्र सितशब्दात्प्राग्ये सुनो
त्यादयस्तेषामड्व्यवायेपि षत्वं स्यात्।एषामेव वाभ्यासस्य न तु सुनोत्यादीनां।निषिषेध।निषिषिधतुः।सेधतेर्गतौ।गत्यर्थस्य सेधतेः षत्वं न स्या
त्।गंगां विसेधति।४ षिधू शास्त्रे मांगल्ये च।शास्त्रं शासनं।स्वरतिसूतिसूयतिधूञूदितो वा।स्वरत्यादेरूदितश्च परस्य वलादेरार्धधातुक
स्येड्वा स्यात्।झषस्तथोर्धोऽधः।झषः परयोस्तथोर्धः स्यान्न तु दधातेः।जश्त्वं।सिषेद्ध।सिषेधिथ।सेद्धा।सेधिता।सेत्स्यति।सेधिष्यति।असैत्सीत्।
झलो झलि।झलः परस्य सस्य लोपः स्याज्झलि।असैद्धां।असैत्सुः।असैत्सीः।असैद्धं।असैद्ध।असैत्सं।असैत्स्व।असैत्स्म।पक्षे।असेधी
त्।असेधिष्टामित्यादि।४ खादृ भक्षणे।आकारवत्।खादति।चखाद।४ खद स्थैर्ये हिंसायां च।चाद्भक्षणे।स्थैर्येऽकर्मकः।खदति।

न्यषेधत्।न्यषेधीत्।न्यषेधिष्यत्।स्थादिष्वभ्यासेन चाभ्यासस्य।प्राक्सितात्स्थादिष्वभ्यासेन व्यवायेपि षत्वं स्यात्।५

श्रीः

॥८॥ ॥२३९

260

अखदीत्॥२

ल॰१ प्रत्ययेपरे

अत उपधायाः॥ उपधाया अतो वृद्धिः स्याञ्ञिति णिति। चखाद। णलुत्तमो वा। उत्तमो णल्वा णित्स्यात्। चखाद। चखद। अतो हलादेर्लघोः॥ हलादेर्लघोरकारस्य इडादौ परस्मैपदे परे सिचि वृद्धिर्वा स्यात्। अखादीत्॥ प॰ बद स्थैर्ये [illegible]। पवर्गीयादिः। बदति। बबाद। बेदतुः। बेदिथ। बबाद। बबद। अबादीत्। अबदीत्॥ प॰ गद व्यक्तायां वाचि॥ नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च॥ उपसर्गस्थान्निमित्तात्परस्य नेर्णः स्यात् गदादिषु परेषु। प्रणिगदति। जगाद॥ प॰ रद विलेखने। विलेखनं भेदनम्। रराद॥ प॰ णद अव्यक्ते शब्दे॥ णो नः॥ धातोरादेर्णस्य नः स्यात्। णोपदेशास्त्वनर्द्नाटिनाथ्नाध्नन्दनक्कनॄनृतः। नाटेर्दीर्घाद्धिस्य पर्युदासात् घटादिर्णोपदेश एव। तवर्गचतुर्थान्तनाधतेर्नन्द्योश्च केचिण्णोपदेशतामाहुः॥ उपसर्गादसमासेपि णोपदेशस्य॥ उपसर्गस्थान्निमित्तात्परस्य णोपदेशस्य धातोर्नस्य णः स्यात् समासेऽसमासेपि। प्रणदति। प्रणिनदति॥ प॰ अर्द गतौ याचने च॥

उदि॰२

अत आदेः॥ तस्मान्नुड् द्विहलः॥ द्विहलो धातोर्दीर्घीभूतादकारात्परस्य नुट् स्यात्। आनर्द। आर्दीत्॥ प॰ नर्द गर्द शब्दे। णोपदेशत्वाभावान्न णः। प्रनर्दति॥ प॰ गर्द इति। जगर्द॥ प॰ तर्द हिंसायां। ततर्द॥ प॰ कर्द कुत्सिते शब्दे। कुत्सिते कुक्षिरवे। कर्दति॥ प॰ खर्द दंदशूके। दंश हिंसादिरूपायां दंदशूकक्रियायामित्यर्थः। खर्दति। चखर्द॥ प॰ अति अदि बंधने। अन्तति। आनन्त। अन्दति। आनन्द॥ १२

लो॰२

261

सि॰ २५॰

ति॰

इदि परमैश्वर्ये। इंदति। इंदांचकार ६३ बिदि अवयवे। पवर्गतृतीयादिः। बिंदति। अवयवं करोतीत्यर्थः। ६४ भिदि पाठांतरे। ६५ गडि व
दनैकदेशे। गण्डति। चंत्यादयः पंचैते न तिङ्विषया इति काश्यपः। अन्ये तु तिङमपीछंति। ६६ णिदि कुत्सायां। निंदति। प्रणिंदति। ६७
टुनदि समृद्धौ। आदिर्ञिटुडवः। उपदेशे धातोराद्या एते इतः स्युः। नंदति। इदित्वान्नलोपो न। नंद्यात् ६८ चदि आह्लादने। च
चंद ६९ त्रदि चेष्टायां। त्रन्द ७० कदि क्रदि क्लदि आह्वाने रोदने च। चकन्दे ७१ चक्रंदे ७२ चक्लंदे ७३ क्लिदि परिदेवने। चिक्लिंदे ७४।
शुंध शुद्धौ। शुशुंध। नलोपः। शुध्यात् ७५ अथ कवर्गीयांता अनुदात्तेतो द्विचत्वारिंशत् ४२। शीकृ सेचने। तालव्यादिः। दंत्यादि
रित्येके। शीकते। शिशीके ७६ लोकृ दर्शने। लोकते। लुलोके ७७ श्लोकृ संघाते। संघातो ग्रथः। स चेह ग्रथ्यमानस्य व्यापारो ग्रंथि
तुर्वा। आद्येऽकर्मको द्वितीये सकर्मकः। श्लोकते ७८ द्रेकृ ध्रेकृ शब्दोत्साहयोः। उत्साहो वृद्धिरौद्धत्यं वा। दिद्रेके ७९ दिध्रेके ८० रे
कृ शंकायां। रेकते ८१ सेकृ स्रेकृ स्रकि श्रकि श्लकि गतौ। त्रयो दंत्यादयः। द्वौ तालव्यादी। अषोपदेशत्वान्न षः। सिसेके ८२ शकि शं ॥ ९ ॥
कायां। शंकते। शशंके ८३ अकि लक्षणे। अंकते। आनंके ८४ वकि कौटिल्ये। वंकते ८५ मकि मण्डने। मंकते ८६ कक लौल्ये। लौ
ल्यं गर्वश्चापलं च। ककते। चकके ८७ कुक वृक आदाने। कोकते। चुकुके। वर्कते। ववृके ८८ चक तृप्तौ प्रतिघाते च। चकते। चेके। ८९।

ऋदुपधेभ्यो लिटः कित्त्वं गुणात्पूर्वविप्रतिषेधेन।

प

धा ४

ढौ १८

ककिवकिश्वकित्रकिढौ॑कृत्रौकृष्वष्कव॰ स्कमस्कटिकृटीकृतिकृतीकृरघिलघिगत्यर्थाः। कंकते९ष्टुढौके। ईदुत्त्रौके। सुधातु
ष्टिवुष्वष्कतीनां सत्वप्रतिषेधो वक्तव्यः। ष्वष्कते। षष्वष्के। अत्र तृतीये हंस्या द्विमेके। लघि सोऽजि तनिह नावपि।१०९ अघि वघि मघि
गत्याक्षेपे। आ तेपो निंदागतौ गत्यारंभे चेत्यन्ये। अंघते। आनंघे।११०। वंघते। मंघते।११२ मघि कैतवे च। राघृ लाघृ द्राघृ सामर्थ्ये
राघते। आघृ इत्यपि केचित्।११६ श्लाघृ कत्थने। श्लाघते।११७ अथ परस्मैपदिनः पंचाशत्।५० फक्क नीचैर्गतौ। नीचैर्गतिर्मंदगम
नं। असद्व्यवहारश्च। फक्कति।११८ तक हसने। तकति।११९ तकि कृच्छ्रजीवने। तंकति।१२० बुक्क भषणे। भषणं श्वरवः। बुक्कति।१२१ क
ख हसने। प्रनिकखति।१२२ ओखृ राखृ लाखृ द्राखृ ध्राखृ शोषणालमर्थयोः।१२७ शाखृ श्लाखृ व्याप्तौ। शाखति।१२९ उख उखि
वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईखि वल्ग रगि लगि अगि वगि मगि तगि त्वगि श्रगि श्लगि इगि रिगि लिगि
गत्यर्थाः। द्वितीयोताः पंचदश। तृतीयोतास्त्रयोदश। इरवांतेषु रिखत्रखत्रिखिशिखि इत्यपि। तुरः केचित्सगेति। अभ्यासस्या
सवर्णे। अभ्यासस्य इउवर्णयोरियङुवङौ स्तोऽसवर्णे। इयेख। उवोख। निपातपरिभाषया इजादेरित्याम्भावे ऊखतुः ऊखुः। इह सवर्णदी
र्घस्याभ्यासग्रहणेन ग्रहणाद्ध्रस्वः प्राप्तो न सवर्णेति सत्कृतत्वात्। आगत्वा द्विपर्जन्यवल्लुहणप्र हते स्याद्ध्रस्वकृते ततोऽदीर्घः वा

लगि ४

ग्रा घृ-न्नायामेव १४

ढौगोपा

263

ख्वगि कं पनेच। [illegible] गिव॰ घह॰

१४१ णदिंगंबव्रीयइतिन्यायाहापरत्वाच्च। उंखति। ववखतुः वंखतिमे खतुः। १६३ युगि जुगि बुगि वर्जने। युंगति। १६४ घुस [illegible]ने। घघति।
जघाघ। १६५ मघि मंडने। मंघति। १६६ शिघि आघ्राणे। शिंघति। १६७ अथ षवर्गीयांताः तत्रानुदात्तेतैकविंशतिः। वर्च दी-
प्तौ। वर्चते। १६८ षच सेचने सेवने च। सचते। सेचे। सचिता। १६९ लोचृ दर्शने। लोचते। लुलोचे। १७० शच व्यक्तायां वाचि। शचते। १७१
श्वच श्वचि गतौ। श्वचते। श्वंचते। १७२ कच बंधने। चकचे। १७४ कचि कांचि दीप्तिबंधनयोः। चकंचे। चकांचे। १७६ मुच मुचि कल्क-
ने। कल्कनं दंभः। शाठ्यं च। कथनमित्यन्ये। मोचते। मुमुचे। १७७ मचि धारणोच्छ्रायपूजनेषु। मंचते। १७९ पचि व्यक्तीकरणे। पंचते। १८०
ष्टुच प्रसादे। स्तोचते। तुष्टुचे। १८१ ऋज गतिस्थानार्जनोपार्जनेषु। अर्जते। नुड्विधौ ऋकारैकदेशो रेफो हल्त्वेन गृह्यते तेन द्वि-
हल्त्वान्नुट्। आनृजे। १८२ ऋजि भृजी भर्जने। ऋंजते। उपसर्गादृति धातौ वृद्धिः। प्रार्जति। ऋंजांचक्रे। आ[illegible]हा भर्जते। ऋंजै ४
बभृजे। अभर्जिष्ट। १८४ एजृ भ्रेजृ भ्राजृ दीप्तौ। एजांचक्रे। १८५ ईज गतिकुत्सनयोः। ईजांचक्रे। १८८ अथ द्विसप्ततिर्व्रज्यंताः
परस्मैपदिनः। शुच शोके। शोचति। १८९ कुच शब्दे तारे। कोचति। १९० कुंच क्रुंच कौटिल्याल्पीभावयोः। अनिदितामिति नलोपः। श्री ॥१७॥
कुच्यात्। क्रुच्यात्। १९२ लुंच अपनयने। १९३ अंचु गतिपूजनयोः। अच्यात्। गतौ नलोपः। पूजायां तु अंच्यात्। १९४ वंचु चंचु तंचु त्वंचु

श्राज्ह२

म्रुचु १ वच्यात् ८

म्रुंचु म्लुंः म्रुचु म्लुचु गत्यर्थाः। र्वच्यात्। वच्यात्। वच्यात्। अम्रुंचीत्। अम्लुंचीत्। २०॰ जृस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचु॰ग्लुंचुश्विभ्यश्च। एभ्य
श्च्लेरङ्वा स्यात्। अम्रुचत्। अम्रोचीत्। अम्लुचत्। अम्लोचीत्। ग्रुचु ग्लुचु कुजु खुजु स्तेयकरणे। जुग्रोच। अग्रुचत्। अग्रोचीत्। जुग्लोच। अ
ग्लुचत्। अग्लोचीत्। अकोजीत्। अखोजीत्। ग्लुंचु षस्ज गतौ। अङः। अग्लुचत्। अग्लुंचीत्। सस्य श्चुत्वेन शः। जश्त्वेन जः। सज्जति। स
सज्ज। अयमात्मनेपद्यपि। सज्जते। गुजि अव्यक्ते शब्दे। गुंजति। गुंज्यात्। अर्च पूजायां। आनर्च। २१॰ म्लेछ अव्यक्ते शब्दे। अस्फुटे अपशब्दे चे
त्यर्थः। म्लेछति। मिम्लेछ। लछ लाछि लक्षणे। ललछ। ललांछ। वाछि इच्छायां। वांछति। आछि आयामे। आंछति। अत आदेरित्यत्र तपर
करणं स्वाभाविकह्रस्वपरिग्रहार्थं तेन दीर्घस्याभावान्न नुट्। आंछ। तपरकरणं मुखसुखार्थमिति मते तु नुट्। आनांछ। ह्रीछ लज्जायां।
जिह्रीछ। हुर्छा कौटिल्ये। कौटिल्यमपसरणमिति मैत्रेयः। उपधायां चेति दीर्घः। हूर्छति। मुर्छा मोहसमुच्छ्राययोः। मूर्छति। स्फुर्छा वि
स्तृतौ। स्फूर्छति। युछ प्रमादे। युछति। २२॰ उछि उंछे। उंछः कणश आदानं कणिशाद्यर्जनं शिलमिति यादवः। उंछति। उं छौकारा उ
छी विवासे। विवासः समाप्तिः। प्रायेणायं विपूर्वः। व्युछति। ध्रज ध्रजि ध्रृज ध्रृजि ध्वज ध्वजि गतौ। ध्रजति। ध्रंजति। धर्जति। धृंजति। ध्व
जति। ध्वंजति। कूज अव्यक्ते शब्दे। चुकूज। अर्ज षर्ज अर्जने। अर्जति। आनर्ज। २३॰ सर्जति। ससर्ज। गर्ज शब्दे। गर्जति। तर्ज भर्त्सने।
तर्जति। कर्ज व्यथने। खर्ज पूजने च। चकर्ज। चखर्ज। अज गतिक्षेपणयोः। अजति। अजेर्व्यघञपोः। अजेर्वी इत्ययमादेशः स्या

यु४

र४

यु४

१४२

दार्द्धधातुकविषयेघञपंवर्जयित्वा।वलादावार्द्धधातुकेवेष्यते।विवाय।विव्यतुः।विव्युः।अत्रवकारस्यहल्परत्वादुपधायांचेति
दीर्घप्राप्तौऽचःपरस्मिन्नितिस्थानिवद्भावे नाचरत्वान्नवनपद्यतेतिनिषेधः।स्वरदीर्घयलोपेषुलोपाजादेशएवनस्थानिवद्
इत्युक्तेः।थलि।एकाचइतीण्निषेधेप्राप्ते कृसृभृवृस्तुद्रुस्रुश्रुवोलिटि।एभ्योलिटइण्नस्यात्।क्रादीनांचतुर्णांग्रहणंनियमार्थम्।
प्रकृत्याश्रयःप्रत्ययाश्रयोवाभावोनिण्निषेधःसलिटिचेत्तर्हिक्रादिभ्यएवनान्येभ्यइति।ततश्चतुर्णांथलिभारद्वाजनियमप्रापि
तस्यवमादिषुक्रादिनियमप्रापितस्येटोनिषेधार्थम्।अचस्तास्वत्थल्यनिटोनित्यम्।उपदेशेऽजन्तोयोधातुस्तासौनित्यानिट्त
तःपरस्यथलइण्नस्यात्।उपदेशेऽत्वतः।उपदेशेऽकारवतस्तासौनित्यानिटःपरस्यथलइण्नस्यात्।ऋतोभारद्वाजस्य।ता
सौनित्यानिटऋदन्तादेवथलोनेड्भारद्वाजस्यमतेनतेनान्यस्यस्यादेव।अयमत्रसङ्ग्रहः।अजन्तोऽकारवान्वायस्तास्वनिट्
थलिवेडयम्।ऋदन्तईदृङ्नित्यानिट्क्राद्यन्योलिटिसेड्भवेत्॥१॥नचस्तुद्र्वादीनामपिथलिविकल्पःशङ्क्यः।अचस्तास्वदितिउ
पदेशेत्वतइतियोगद्वयप्रापितस्यैवहिप्रतिषेधस्यभारद्वाजनियमोनिवर्त्तकः।अनन्तरस्येतिन्यायात्।विवयिथ।विवेथ।
आजिथ।विव्यथुः।विव्य।विवाय।विवय।विव्यिव।विव्यिम।वेता।अजिता।वेष्यति।अजिष्यति।अजतु।आजत्।अजेत्।वी
यात्।सिचिवृद्धिःपरस्मैपदेषु।इगन्ताङ्गस्यवृद्धिःस्यात्परस्मैपदपरेसिचि।अवेषीत्।आजीत्।अवेष्यत्।आजिष्यत्॥

॥१९॥

तेज पालने।तेजति।खज मन्थे।खजति।खजि गतिवैकल्ये।खंजति।एजृ कंपने।एजांचकार।२४० टुओस्फूर्जा वज्रनिर्घो-
षे।स्फूर्जति।पुस्फूर्ज।क्षि क्षये।अकर्मकः।अंतर्भावितण्यर्थस्तु सकर्मकः।क्षयति।चिक्षाय।चिक्षियतुः।चिक्षियुः।चिक्षयिथ।
चिक्षेथ।चिक्षियिव।चिक्षियिम।क्षेता।अकृत्सार्वधातुकयोर्दीर्घः।अजंतांगस्य दीर्घः स्यात् यादौ प्रत्यये परे न तु कृत्सार्वधातुक-
योः।क्षीयात्।अक्षैषीत्।क्षीज अव्यक्ते शब्दे।कूजिना सहायं पठितुं युक्तः।चिक्षीज।लज लजि लजने।लाज लाजि भर्त्सने च।
जज जजि युद्धे।तुज हिंसायां।तोजति।तुतोज।२५० तुजि पालने।गज गजि गृज गृजि मुज मुजि शब्दार्थाः।वज व्रज गतौ।वदव्रजे-
ति वृद्धिः।अव्राजीत्।अथ टवर्गीयांताः।शाडंताः अनुदात्तेतः षड्विंश।अट्ट अतिक्रमहिंसयोः।दोपधोयं।तोपध इत्येके।
अट्टते।आनट्टे।२६० वेष्ट वेष्टने।विवेष्टे।चेष्ट चेष्टायां।अचेष्टिष्ट।गोष्ट लोष्ट संघाते।जुगोष्टे।लुलोष्टे।घट्ट चलने।जघ-
ट्टे।स्फुट विकसने।स्फोटते।पुस्फुटे।अठि गतौ।अण्ठते।आनंठे।वठि एकचर्यायां।ववंठे।मठि कठि शोके।शोकः इहाध्या-
नं।मंठते।कंठते।२७० मुठि पालने।मुंठते।हेठ विबाधायां।जिहेठे।एठ च।एठांचक्रे।हिडि गत्यनादरयोः।हिंडते।जिहिंडे।हुडि
संघाते।जुहुंडे।कुडि दाहे।चुकुंडे।वडि विभाजने।मडि च।भडि परिभाषणे।परिहासः सनिंदोपालंभश्च परिभाषणं।पि-
डि संघाते।२८० मुडि मार्जने।शुद्धिर्न्यग्भावश्च।मुंडते।तुडि तोडने।[illegible]।तोडनं दारणं हिंसनं च।तुंडते।हुडि वरणे।हर

267

सिद्धांतकौमुदीत

१४३॥

श्र२

ण इत्येके। वडि कोपे। शाडि रुजायां। तडि ताडने। पा।६ डि गतौ। कडि मदे। खडि मंथे। हे।६ड होडृ अनादरे। जिहेडे। २९०. जुहोडे। बाडृ
आप्लाव्ये। बशादिः। आप्लाव्यमाप्लवः। बाडते। द्राडृ ध्राडृ विशरणे। शाडृ श्लाघायां। थ आटवर्गीयांतसमाप्तेः परस्मैपदिनः।
शौटृ गर्वे। शौटति। शुशौट। यौटृ बंधे। यौटति। म्लेटृ म्रेडृ उन्मादे। द्वितीयो डांतः। टांतमध्ये पाठस्त्वर्थसाम्यान्नो धातिवत्। म्लेट
ति। म्रेडति। कटे वर्षावरणयोः। चकाट। सिच्यतो हलादेरिति वृद्धौ प्राप्तायां ह्म्यंतक्षणश्वसजागृणिश्व्येदितां। ह्मयांतस्य क्षण
देर्ण्यंतस्य श्वयतेरेदितश्च वृद्धिर्न स्यादिडादौ सिचि। अकटीत्। ३००. अट पट गतौ। आट। आटतुः। आटुः। पपाट। पेटतुः।
पेटुः। रट परिभाषणे। लट बाल्ये। शट रुजाविशरणगत्यवसादनेषु। वट वेष्टने। ववाट। ववटतुः। ववटुः। ववटिथ। किट खिट
८७ त्रासे। शिट षिट अनादरे। शेटति। शिशेट। सेटति। सिषेट। ३१०. जट झट संघाते। भट भृतौ। तट उच्छ्राये। खट कांक्षायां।
णट नृत्तौ। नटति। पिट शब्दसंघातयोः। हट दीप्तौ। षट अवयवे। लुट विलोडने। डांतोयमित्येके। ३२०. चिट परप्रैष्ये। विट
शब्दे। बिट आक्रोशे। बशादिः। हिट इत्येके। इट किट कटी गतौ। एटति। केटति। कटति। ईकारः श्वीदितो निष्ठायामिति नि ॥१९८॥
षेधार्थः। केचित्तु इदितं मत्वा नुमि कृते कण्टीत्यादि वदंति। अंते च इ ई इति प्रश्लिष्य। अयति। इयाय। ईयतुः। ईयुः। इययि
थ। इयेथ। ईयाय। ईयात्। दीर्घस्याविजादेरित्यामि। अयांचकारेत्युदाहरन्ति। मडि भूषायां। कुडि वैकल्ये। कुण्डति। कु

॥१९२५

॥१४३५ ॥

268

ख१ ल्ये२

एुत इति तुदादेर्गतं। मुद पुट मर्दने। ३३० चुडि अल्पीभावे। मुडि खण्डने। मुण्डति। पुडि इत्येके। पुण्डति। रुटि लुटि स्तेये। रुण्टति। लुण्टति।
रुठि लुठीत्येके। रुडि लुडीत्यपरे। स्फुटिर् विशरणे। इरित्वाद्वा। अस्फुटत्। अस्फोटीत्। स्फुटीत्यपि केचित्। इदित्वान्नुम्। स्फुंटति।
पठ व्यक्तायां वाचि। पेठतुः। पेठिथ। अपठीत्। अपाठीत्। वठ स्थौल्ये। ववठतुः। ववठिथ। मठ मद निवासयोः। कठ कृच्छ्रजीवने। रठ
परिभाषणे। ३४० हठ प्लुतिशठत्वयोः। बलात्कार इत्येके। हठति। जहाठ। रुठ लुठ उठ उपघाते। ओठति। ऊठेत्येके। ऊठति। उ
गं [illegible] वकार। पिठ हिंसासंक्लेशनयोः। शठ कैतवे च। शुठ प्रतिघाते। शोठति। शुठीति स्वामी। शुंठति। कुठि च। कुंठति। लुठि आलस्ये प्र ति५०
ती घाते च। शुठि शोषणे। ३५० कुठि लुठि गतौ। चुडु लावकरणे। लावकरणमल्पीभावस्तनं चुडुति। चुचुडु। अडु अभियोगे। अ रू६ कै५
डुति। आनडु। कडु कार्कश्ये। कडुति। चुडुदयस्त्रयो ऽपि धात्वेनाछिपितुत्स्त्रुतः करत इत्यादि। क्रीडृ विहारे। चिक्रीड। तुड तोडने। तोड
ति। तुतोड। तूड इत्येके। हुडृ [illegible] हौडृ गतौ। [illegible] जुहूड। जुहूड। जुहौड। ३६०। रौडृ अनादरे। रोडृ लोडृ उन्मादे। अड उद्य गौदे
मने। अडति। आड। आडतुः। आडुः। लड विलासे। लडति। लडयोर्ललयोश्चैकत्वस्मरणात् ललनीति स्वाम्युदयः। कड मदे। कडति। क
डीत्येके। कंडति। गडि वदनैकदेशे। गंडति॥ इति टवर्गीयान्ताः॥ ॥अथ पवर्गीयान्ताः। तत्रानुदात्तेतस्त्रोऽत्र सन्ताः। अथ तिपृ तेपृ नि
ष्टते ष्टिपृ ष्टेपृ क्षरणार्थाः। अघोनुदात्तः। क्षीरस्वामी। ह्ययं सेट्। निवलामानेपते। नितेपे। कादिनियमादिट्। तितिपते। तितेपे॥

269

१४४

ते। लिङ्सिचावात्मनेपदेषु। इक्समीपाद्धलः परौ झलादी लिङ्सिचावात्मनेपदपरौ सिद्धौ ते तौ कितौ स्तः। कित्वान्न गुणः। ति
प्सीष्ट। तिप्सीयास्तां। तिप्सीरन्। अतिप्त। अतिप्साता। अतिप्सत। तितेपे। तिष्टिपे। तिष्टिपाते। तिष्टिपिरे। ३७०। तिष्टेपे।
तिष्टेपाते। तिष्टेपिरे। तेपृ कम्पने च। ग्लेपृ दैन्ये। ग्लेपते। टुवेपृ कंपने। वेपते। केपृ गेपृ ग्लेपृ च। चात्कंपने गतौ च। मे
पेरथसे हातुनःपावः। मेपृ रेपृ लेपृ गतौ। ३८०। त्रपूष् लज्जायाम्। त्रपते। तृफळभजत्रपश्च। एषामत एकारोऽभ्या
सलोपश्च स्यात् किति लिटि सेटि थलि च। त्रेपे। त्रेपाते। त्रेपिरे। ऊदित्वादिड्वा। त्रपिता। त्रप्ता। त्रपिषीष्ट। त्रप्सीष्ट। क
पि चलने। कम्पते। चकम्पे। रबि लबि अबि शब्दे। ररंबे। ललंबे। आनंबे। लबि अवस्रंसने च। कबृ वर्णे। चकबे। क्ली
बृ अधार्ष्ट्ये। चिक्लीबे। क्षीबृ मदे। क्षीबते। शीभृ कत्थने। शीभते। चीभृ च। ३९०। रेभृ शब्दे। रिरेभे। अभिरभी क्वचित्पठ्ये
ढ । लिक्षे । लिंढ्वे । लेढु । लीढि । लेहानि । अलेट् । अलिक्षत । अलीढ । अलिक्षावहि । अलिक्ष्महि । चक्षिङ्
व्यक्तायां वाचि । अयं दर्शनेपि । ईकारोनुदात्तः प्रुज्यर्थः विवक्षणः प्रथयन्नुनुस्तुनु । अनेदित इति व्याख्या मु
नात् । ङकारस्त्वनुदात्तेत्त्वप्रयुक्तमात्मनेपदमनित्यमिति ज्ञापनार्थः तेन स्फायन्तिमोकिसंधीत्या
दि सिद्धम् । वष्टे । वक्षाते । आर्द्धधातुके । वा लिङ् ख्याञ् वा लिटि । अत्र साध्यस्य शादिस्य मादेशः । असि
द्धकांडे शस्य यो वेति स्थितम् । आग्नि स्थात् दक्षयम् । चख्यौ । चख्ये । चक्शौ । चक्शे । चयो द्वितीयाः इति नु नचर्त्वस्या
सिद्धत्वात् । चचक्षे । ख्याता । क्शाता । ख्यास्यति । ख्यास्यते । क्शास्यति । क्शास्यते । अचष्ट । चक्षीत । ख्याया
त् । ख्येयात् । क्शायात् । क्शेयात् । अख्यति वक्ति ख्याति ख्याङ् । एत्यस्थ्योरङ् । अख्यत । अख्यत । अक्शासी
त् । अक्शास्त । वर्जने [illegible] क्शाञ्ज नेष्टः । समवहित इत्यादि । अष्टश्चेता अनुदात्तेतः । ईर गतौ कम्पने च । ईर्ते । ई

प

314

६४

रांवके। ईत्तमिमु। ईर्षी। ईर्ष्यिमू। ऐरिष्ट। ईड स्तुतौ। ईट्टे। ईशः से। ईडुनो ध्वेनि। ईशीडजनां से ध्वे शध्योः स्वार्वधातु
कयो रिट्स्यात्। योगविभागो वैचित्र्यार्थः। ईडिषे। ईडिध्वे। एकदेशविकृतस्यानन्यं ईडिषे ईडिध्वम्। विकृतिग्रहणे
न प्रकृतेरग्रहणात्। ऐडिध्वम्॥ ईश ऐश्वर्ये। ईष्टे। ईशिषे। ईशिध्वे। आस उपवेशने। आस्ते। आसांचक्रे। आस्व
आध्वम्। आसिष्ट। आङः शासु इच्छायाम्। आशास्ते। आशासाते। आङ् पूर्वं प्रायिकं। तेन नमोवाकं प्रशास्म
हे इति सिद्धम्। वस आच्छादने। वस्ते। वसे। वध्वे। ववसे। वसिता। कसि गतिशासनयोः। कंस्ते। कंसाते। अयमनि
दिदित्येके। कस्ते। तालव्यांतोयमनिदित्। कष्टे। कशाते। कड्ढे। कड्ढ्वे। णिसि चुम्बने। निंस्ते। दंत्यांतोयम्। आन्तरण
कारस्तु तालव्यांत इति बस्वामा। णिजि शुद्धौ। निंक्ते। निंक्षे। निंजिता। शिजि अव्यक्ते शब्दे। शिङ्क्ते। पिजि वर्णे। सं
पर्चन इत्येके। उलयन इत्यन्ये। अवयव इत्यपरे। अव्यक्ते शब्द इतीतरे। पिङ्क्ते। पृजी इत्येके। पृक्ते। वृजी वर्जने। इत्यो
ष्यादिः। ईदित्। वृक्ते। वृजाते॥ वृक्षे। इदिदित्यन्ये। वृङ्क्ते। पृची सम्पर्चने। पृक्ते। षूङ् प्राणिगर्भविमोच

६४

१६०

ने। सूते। सुषुविष। सोता। सविता। स्वसुवोरिति गुणनिषेधः। सुवै। सविषीष्ट। सोषीष्ट। असविष्ट। असोष्ट।
शीङ् स्वप्ने। शीङः सार्वधातुके गुणः। क्ङितीत्यस्यापवादः। शेते। शयाते। शीङो रुट्। शीङः परस्य
झादेशस्यातो रुडागमः स्यात्। शेरते। शेषे। शेध्वे। शये। शेवहे। शिश्ये। शयिता। अशयिष्ट। अथ
यन्ताः परस्मैपदिनः। यु मिश्रणेऽमिश्रणे च। उतो वृद्धिर्लुकि हलि। लुग्विषये उकारस्य वृ
द्धिः स्यात् पिति हलादौ सार्वधातुके न त्वभ्यस्तस्य। यौति। युतः। युवन्ति। युयाव। यविता। युयात्।
इहोतो वृद्धिर्नास्त्यत्र हेतोर्मते पिच्च ङिन्न ङिच्च पिन्नेति व्याख्यानात्। विशेषविहितेन ङित्त्वेन पि
त्त्वस्य बाधात्। यूयात्। अयावीत्। रु शब्दे। तुरुस्तुशम्यमः सार्वधातुके। एभ्यः परस्य सार्वधातुकस्य
हलादेस्तिङ ईड्वा स्यात्। नाभ्यस्तस्येत्यनुवृत्तिसंभवे पुनः सार्वधातुकग्रहणमपिदर्थम्। रवी ।।रामा।।
ति। रौति। रुवीतः। रुतः। हलादेः किम्। रुवन्ति। तिङः किम्। शाम्यति। सार्वधातुके किम्। आशिषि ।।२६।।

श्री

रूयात्। विध्यादौ तु रूयात्। रुवीयात्। अरावीत्। अरविष्यत्। तु इति सौत्रो धातुः गति वृद्धि हिंसासु। अयं लु
ग्विकरण इति स्मरंति। तवीति। तौति। तुवीतः। तुतः। तोता। तोष्यति। णु स्तुतौ। नौति। नविता। टुक्षु शब्दे। क्षौति।
क्षविता। क्ष्णु तेजने। क्ष्णौति। क्ष्णविता। ष्णु प्रस्रवणे। स्नौति। सुष्णाव। स्नविता। स्नूयात्। स्नूयात्। ऊर्णुञ् आ
च्छादने। ऊर्णोतेर्विभाषा। वृद्धिर्वा स्याद्धलादौ पिति सार्वधातुके। ऊर्णौति। ऊर्णोति। ऊर्णुतः। ऊर्णुवंति। ऊर्णु
ते। ऊर्णुवाते। ऊर्णुवते। ऊर्णोतेराम्नेति वाच्यम्। नन्द्राः संयोगादयः। अचः परास्संयोगादयो नदरा द्विर्न
भवंति। नुशब्दस्य द्वित्वम्। णत्वस्यासिद्धत्वात्। पूर्वत्रासिद्धीयमद्विर्वचने इति त्वनित्यः। तु लोसा स्यासस्पेति
लिंगात्। ऊर्णुनाव। ऊर्णुनुवतुः। ऊर्णुनुवुः। विभाषोर्णोः। इडादिप्रत्ययो ङित् स्यात्। ऊर्णुनुविथ। ऊर्णुनविथ।
ऊर्णुविता। ऊर्णविता। ऊर्णोतु। ऊर्णौतु। ऊर्णवानि। ऊर्णवै। गुणोऽपृक्ते। ऊर्णोतेर्गुणः स्यादपृक्ते हलादौ पिति
सार्वधातुके। वृद्ध्यपवादः। और्णोत्। और्णोः। ऊर्णुयात्। ऊर्णुयाः। इह वृद्धिर्न। ङिच्चपिन्नेति भाष्यात्। ऊर्णूयात्।

317

औ सिवि

१६८

ऊर्णविषीष्ट। ऊर्णुविषीष्ट। और्णुवीत्। और्णुविष्टाम्। ऊर्णोतेर्विभाषा। इडादौ परस्मैपदपरे वृद्धिर्वा स्यात् पक्षे गुणः। और्णावीत्। और्णा
विष्टाम्। और्णवीत्। और्णविष्टाम्। द्यु अभिगमने। द्यौति। द्योता। षु प्रसवैश्वर्ययोः। प्रसवोऽभ्यनुज्ञानम्। सोता। असौषीत्। कु
शब्दे। कोता। ष्टुञ् स्तुतौ। स्तौति। स्तवीति। स्तुतः। स्तुवीतः। स्तुते। स्तुवीते। स्तुसुधूञ्भ्यः इतीट्। अस्तावीत्। प्राक्सितादिति षत्वम्।
अभ्यष्टौत्। सिवादीनां वा। पर्यष्टौत्। पर्यस्तौत्। ब्रूञ् व्यक्तायां वाचि। ब्रुवः पंचा[illegible]नामा[illegible]त आहो ब्रुवः। ब्रुवो
लटः परस्मैपदानामादितः पंचानां णलादयः पंच वा स्युर्ब्रुवश्चाहादेशः। अकारस्तूच्चारणार्थः। आह। आहतुः। आहुः। आ
हस्थः। झलि परे। चर्त्वं। आत्थ। आहथुः। ब्रुव ईट्। ब्रुवः परस्य हलादेः पित ईट् स्यात्। आत्थेत्यत्र स्थानिवद्भावात्सिद्धोऽयम्।
झलीति थत्वविधानान्नेह भवति। ब्रवीति। ब्रूतः। ब्रुवन्ति। ब्रूते। आर्धधातुकाधिकारे। ब्रुवो वचिः। उवाच। ऊचतुः। ऊचुः। उ
वचिथ। उवक्थ। वक्ता। ब्रूतात्। ङिच्च पिन्नेत्यपित्त्वादीण्न। ब्रवाणि। ब्रवै। ब्रूयात्। उच्यात्। अस्य। वक्तीत्यङ्। वच उम्।
अङि परे। अवोचत्। अवोचत। अथ[illegible]। स्यंताः परस्मैपदिनः। इङ् त्वात्मनेपदी। इण् गतौ। एति। इतः। इणो यण्। अजादौ प्रत्य ॥राम॥
ये। इयङोऽपवादः। यंति। इयाय। दीर्घ इणः किति। इणोऽभ्यासस्य दीर्घः स्यात्किति लिटि। ईयतुः। ईयुः। इययिथ। इयेथ। ॥३७॥

ऐत। ऐताम्। आयन्। इयात्। ईयात्। एतेर्लिङि। उपसर्गात्परस्येणोऽणो ह्रस्वः स्यादार्धधातुके किति लिङि। समियात्। उभयत्र
आश्रयणे नान्तादिवत्। अभीयात्। अणः किम्। समेयात्। समीयादिति प्रयोगस्तु लोपादिकरयात्। इणो गा लुङि। गाति
स्थेति सिचो लुक्। अगात्। अगाताम्। अगुः। इङ् अध्ययने। नित्यमधिपूर्वः। अधीते। अधीयाते। अधीयते। गाङ् लिटि। इ
ङो गाङ् स्याल्लिटि। लावस्थायां विवक्षितेवा। अधिजगे। अधिजगाते। अधिजगिरे। अध्येता। अध्येष्यते। अध्यये। गु
णायादेशयोः कृतयोरुपसर्गस्य यण्। पूर्वं धातुरुपसर्गेणेति दर्शनेंतरंगत्वाद्गुणात्पूर्वं सवर्णदीर्घः प्राप्तः। णेरध्ययने
वृत्तमिति निर्देशान्न भवति। अध्यैत। परत्वादियङ्। ततआट्। वृद्धिः। अध्यैयाताम्। अध्यैयत। अध्यैयि। अध्यैवहि।
अधीयीत। अधीयीयाताम्। अधीयीध्वम्। अधीयीय। अध्येषीष्ट। विभाषा लुङ्लृङोः। इङो गाङ् स्यात्। गा
ङ्कुटादिभ्योऽञ्णिन्ङित्। गाङादेशात्कुटादिभ्यश्च परेऽञ्णितः प्रत्यया ङितः स्युः। घुमास्थागापाजहातिसां
हलि। एषामात ईत्स्याद्धलादौ क्ङित्यार्धधातुके। अध्यगीष्ट। अध्येष्ट। अध्यगीष्यत। अध्येष्यत। इक् स्मरणे।
अयमप्यधिपूर्वः। अधीगर्थदयेशामिति लिङ्गात्। अन्यथा हीगर्थेत्येन ब्रूयात्। इण्वदिक इति वक्तव्यम्।

१६९

अधियन्ति। अध्यगात्। केचित्सार्वधातुकाधिकाधिकारोऽस्यैवातिदेशमाहुः तन्मते यण्णात् तथा च लङि।
रासी• तयोराघनयोरध्यायन्निति। वा गतिव्याप्तिप्रजनकान्त्यसनखादनेषु। प्रजनो गर्भग्रहणं। अ
सनं क्षेपणं भुवि तिवीतः। वियन्ति। वि वि वे मि वी हि। अवेत्। अवीताम्। अवियन्। अडागमे सत्यनेका
च्ाघ्येलितिकेचित्। अयन्। अत्र ईकारोपि धात्वंतरं प्रश्लिष्यते। एति। इतः। इयन्ति। याता ऐषी तोया प्रा
पणे। प्रापणमिह गतिः। प्रणियाति। यातः। यान्ति। लङः शाकटायनस्यैव। अदि॰ न्नासर यलङीझेर्जुस्वास्या
त्। अयुः। अयात्। यायात्। यायाताम्। यायास्ताम्। वा गतिगंधनयोः। सादीन्नो। गशोचे। आपाके।
प्रा कुत्सायां गतौ। श्ला न दाणे। पार दाणे। पायास्ताम्। अपासीत्। अपासिष्टाम्। रा दाने। ला आदाने। दावपि
दान इति चंद्रः। दाप् लवने। प्रणिदाति। प्रनिदाति। अदासीत्। दायास्ताम्। ख्या प्रकथने। अयं सार्वधातुक
मात्रविषयः संख्यानं त्वनमः ख्यात्रे इति वार्त्तिकं भूतं द्राष्टव्यं हलि ङः। सख्यानो ङिकामूली यः सनेति

पूल२ सिहा३

॥राम॥
॥२८४॥

320

परि २

खशाआदेशस्यखशादित्वेप्रयोजन[illegible]मित्यर्थः।संपूर्वस्यख्यातेःप्रयोगोनेतिन्यासकारः।प्रापूरणे।मामाने।अकर्मक
तनौममुस्तत्र।उपसर्गविशेषात्अर्थान्तरेसकर्मकः।उदरंपरिमातिमुष्टिना।नेर्गदेत्यत्रनास्यग्रहणं।मू।प्रणिमाति।अत्रनिमा
ति।वचपरिभाषणे।वक्ति।वक्तः।अयमन्तिपरोनप्रयुज्यते।बहुवचनपरइत्यन्ये।झिपरइत्यपरे।वग्धि।वच्यात्।उच्यात्।
अवोचत्।विदज्ञाने।वेत्ति।लटोवा।वेत्तेर्लटःपरस्मैपदानांणलादयोवास्युः।वेद।विदतुः।विदुः।वेत्थ।विद
थुः।विद।वेद।विद्व।विद्म।पक्षेवेत्ति।वित्तः।इत्यादि।विवेद।विविदतुः।उषविदेत्याम्पक्षेविदेरकारान्तनिपातनान्न
लघूपधगुणः।विदांचकार।वेदिता।विदांकुर्वन्त्वित्यन्यतरस्याम्।वेत्तेर्लोट्यामगुणाभावोलोटोलुग्लोडन्तकरो
त्यनुप्रयोगश्चवानिपात्यते।पुरुषवचनेनविवक्षिते।इतिशब्दात्।तनादिकृञ्भ्यउः।तनादेःकृञश्चउप्रत्ययः
स्यात्।शपोऽपवादः।तनादित्वादेवसिद्धेकृञ्ग्रहणंगणकार्यस्यानित्यत्वेलिङ्गम्।तेननविश्वसेदविश्वस्तमि
त्यादिसिद्धम्।विदांकरोतु।अतउत्सार्वधातुके।उप्रत्ययांतकृञोकारस्योस्यात्सार्वधातुकेक्ङिति।उदि

मा
पदे

१२.

२५

ीतपरस्मा मध्यान्नगुणः। विदांकुरुतात्। विदांकुरुताम्। उतश्चेति हेर्लुक्। आसीयत्वेन लुको सिद्धत्वादुत्वम्। विदांकु
रु। विदांकरवाणि। अवेत्। अवित्ताम्। सिजभ्यस्तेति झेर्जुस्। अविदुः। दश्च। धातोर्दस्य पदान्तस्य सिपि परे रुः स्या
द्वा। अवेः। अवेत्। अस भुवि। अस्ति। श्नसोरल्लोपः। श्नस्यास्तेश्चाकारस्य लोपः स्यात्सार्वधातुके क्ङिति। स्तः।
सन्ति। तासस्त्योरिति सलोपः। असि। स्थः। स्थ। अस्मि। स्वः। स्मः। आर्द्धधातुकम् इत्यधिकृत्य। अस्तेर्भूः। बभू
व। भविता। अस्तु। स्तात्। स्तां। सन्तु। घ्वसोरेद्धावभ्यासलोपश्च। घोरस्तेश्चैत्वं स्याद्धौ परेऽभ्यासलोपश्च। आसी
यत्वेन एत्वस्यासिद्धत्वाद्धेर्धिः। श्नसोरित्यल्लोपः। एधि। तातङ्पक्षे एत्वं न। परेण तातङा बाधात्। सकृद्गता
विति न्यायात्। स्तात्। स्तं। स्त। असानि। असाव। असाम। अस्तिसिचव इतीट्। आसीत्। श्नसोरित्यल्लोपस्या
सीयत्वेनासिद्धत्वादाट्। आस्ताम्। आसन्। स्यात्। स्याद्। भूयात्। अभूत्। सिचोस्तेश्च विद्यमानत्वेन विशे
षणादीण्न। उपसर्गप्रादुर्भ्यामस्तिर्यच्परः। उपसर्गेणः प्रादुश्च परस्यास्तेः सस्य षः स्याद्यकारेऽचि च प
रे। निष्यात्। प्रादुःष्यात्। निषन्ति। प्रादुःषन्ति। यच्परः किम्। अभिस्तः। मृजूशुद्धौ। मृजेर्वृद्धिः। मृजेरिको वृ

॥राम॥
॥३१॥

३१

322

ममृजतुः

ङः स्याद्धातुप्रत्यये परे। कृत्यजादौ वेष्यते॥ व्रश्चेति षः। मार्ष्टि। मृष्टः। मृजन्ति। मार्जीति। ममार्ज। ममार्जतुः। ममृ
जुः। ममार्जिथ। ममार्ष्ठ। मार्जिता। मार्ष्टा। मृड्ढि। अमार्ट्। अमार्जम्। अमार्जीत्। अमार्क्षीत्। रुदिर् अश्रुवि
मोचने। रुदादिभ्यः सार्वधातुके। रुद् स्वप् श्वस् अन् जक्ष एभ्यो वलादेः सार्वधातुकस्येट् स्यात्। रोदिति। रु
दितः। हौ परत्वादिट्। धित्वं न। रुदिहि। रुदश्च पञ्चभ्यः। हलादेः पितः सार्वधातुकस्यापृक्तस्य ईट् स्यात्। अड्गा
र्ग्यगालवयोः। अरोदीत्। अरोदत्। अरुदिताम्। अरुदन्। अरोदीः। अरोदः। प्रकृतिप्रत्ययो विशेषापे
क्षात्स्यामडीट् स्यामन्तरङ्गत्वाद्यासुट्। रुद्यात्। अरुदत्। अरोदीत्। ञिष्वप् शये। स्वपिति। स्वपितः। सुष्वाप। सु
षुपतुः। सुषुपुः। सुष्वपिथ। सुषुपथ। सुविनिर्दुर्भ्यः सुपिसूतिसमाः। एभ्यः सुपादेः सस्य षः स्यात्। एवं धातु
रुपसर्गेण युज्यते। किति लिटि परत्वात्संप्रसारणे षत्वे च कृते द्वित्वम्। पूर्वत्रासिद्धीयमद्विर्वचने। सुषुप
तुः। सुषुपुः। अकिति तु द्वित्वे स्यात्संप्रसारणं षत्वस्यासिद्धत्वात्। ततः पूर्वं हलादिः शेषः। नित्यत्वाद्

पुर

पु

द्वि॰

ततः सुपिरूपासावान्नषः। सुष्वाप। सुस्वप्न। अस्वपीत्। अस्वपत्। स्वप्यात्। सुयात्। सुषुप्यात्। अस्वाप्सीत्। श्वस प्राणने। श्वसिति। श्वसिता। अश्वसीत्। अश्वसत्। श्वस्यात्। ह्म्यंतक्षणेति न वृद्धिः। अश्वसीत्। अन च। अनिति। आन। अनिता। आनीत्। आनत्। अनितेः। उपसर्गस्थान्निमित्तात्परस्यानितेर्नस्य णः स्यात्। प्राणिति। जक्ष भक्षहसनयोः। जक्षिति। जक्षितः। अदभ्यस्तात्। झस्य अदस्यादन्तापवादः। जक्षति। सिजभ्यस्तेति जुस्। अजक्षुः। अयमन्तस्थादिरित्युक्तळहन्तोबस्वाम। रुदादयः पंचगताः। जागृ निद्राक्षये। जागर्त्ति। जागृतः। जाग्रति। उषविदेत्याम्वा। जागरांचकार। जजागार। जाग्रोऽविचिण्णल्ङित्सु। जागर्तेर्गुणः स्याँच्चिणल्ङिद्भ्योऽन्यस्मिन् वृद्धिविषये प्रतिषेधविषये च। जजागरतुः। अजागः। अजागृताम्। अभ्यस्तत्वाज्जुस्। जुसि च। अजादौ जुसीगंतांगस्य गुणः स्यात्। अजागरुः। अजादौ किम्। जागृयुः। आशिषि तु। जागर्यात्। जागर्यास्ताम्। जागर्यासुः। लुङि। अजागरीत्। जागृह्

॥राम॥
॥४०॥

स्वइत्यत्रयण्ग्रासस्तंसार्वधातुकगुणेनबाधते।तेसिविद्धङिः।तांलागन्निगुणः।तत्रहूतेहलंतलक्षणाप्राप्ता।नेटीति
निषिद्धा।ततोऽतोहलादेरितिबाधित्वाऽतोल्रांतस्येतिप्राप्ताह्म्यंतेतिनिषिध्यते।तद्धाकुः॥ ॥गुणोवृद्धिर्गुणोवृद्धिः
प्रतिषेधोविकल्पनम्।पुनर्वृद्धिर्निषेधोतोयण्पूर्वाःप्राप्तयोनव॥१॥इति।दरिद्रादुर्गतौ।दरिद्राति।इद्दरिद्रस्य।
दरिद्रातेरिकारःस्याद्धलादौक्ङितिसार्वधातुकेपरे।दरिद्रितः।श्नाभ्यस्तयोरातः।अनयोरातोलोपःस्यात्क्ङिति
सार्वधातुके।दरिद्रति।अनेकाच्त्वादाम्।दरिद्रांचकार।आतऔणलइत्यत्रओइत्येव[illegible]सिद्धेऔ
कारविधानंदरिद्रातेरालोपेकृतेश्रवणार्थम्।अतएवज्ञापकादाम्नेत्येके।ददरिद्रौ।ददरिद्रतुरित्यादि।यत्तुणलिददरि
द्रेतितन्निर्मूलमेव।दरिद्रातेरार्धधातुकेविवक्षितेआलोपोवाच्यः।लुङिवासनिण्वुल्ल्युटोर्न।दरिद्रिता।अ
दरिद्रात्।अदरिद्रिताम्।अदरिद्रुः।दरिद्रियात्।दरिद्र्यात्।अदरिद्रीत्।इट्सकौ।अदरिद्रासीत्।चकासृदीप्तौ।
[illegible]स्यअत्।चकासति।चकासांचकार।धिचेतिलोपः।सिचएवेत्येके।चकाद्धि।चकाधीत्येवलाघवम्।तिप्यन
स्तेः।पदान्तस्यसस्यदःस्यात्।नवस्तेः।अचकासत्।अचकाद्।अचकासुः।सिपिधातोरुर्वापदान्तस्यधातोः

सस्य रुः स्याद्वा। पक्षे दः। अचकाः। अचकात्। शासु अनुशिष्टौ इच्छायाम्। शास्ति। शास इदङ्हलोः। शास उपधा-
या इत्स्यादङि हलादौ क्ङिति च। शासिवसीति षः। शिष्टः। शासति। शशास। शशासतुः। शास्तु। शिष्टात्। शिष्टा-
म्। शासतु। शाहौ। शास्तेः शादेशः स्याद्धौ परे। तस्याभीयत्वेनासिद्धत्वाद्धेर्धिः। शाधि। अशात्। अशिष्टाम्।
अशासुः। अशाः। अशात्। शिष्यात्। सर्तिशास्तीत्यङ्। अशिषत्। अशासिष्यत्। दीधीङ् दीप्तिदेवनयोः।
एतद्द्वयः पंच धातवश्छान्दसाः। दीधीते। एरनेकाच इति यण्। दीध्याते। यीवर्णयोर्दीधीवेव्योः। एतयोरन्त्य-
स्या स्य लोपः यकारे इवर्णे च परे। इति लोपं बाधित्वा नित्यत्वादेरेत्वम्। दीध्ये। दीधीवेवीटामिति गुणनिषेधः।
दीध्यांचक्रे। अदीधिता। दीधिष्यते। वेवीङिति नातुल्यो वीगतीत्यनेन तुल्यार्थे वर्त्तत इत्यर्थः। अथ त्रयः प-
रस्मैपदिनः। षस षस्ति स्वप्ने। सस्ति। सस्तः। ससन्ति। ससास। सेसतुः। सस्तु। सधि। पूर्वत्रासिद्धमिति सलो-
पस्यासिद्धत्वाद्धनो हेरिति लुङ्। असस्त्। असस्ताम्। असः। असत्। सस्यात्। असासीत्। अससीत्। सं-
न्ति। संतः। संस्तति। बहूनां समवाये द्वयोः संयोगसंज्ञा नेत्याश्रित्य स्कोरिति लोपाभावात् संस्ति। संस्त इत्ये

॥रामा॥
॥४८॥

326

कौ।वश कांतौ।कांतिरिच्छा।वष्टि।उष्टः।उशंति।वक्षि।उष्ठः।उवाश।ऊशतुः।वशिता।वष्टु।उष्टात्।उष्टाम्।उड्ढि।अव
ट्।औष्टाम्।औशन्।अवशं।उश्यात्।उश्याताम्।उश्यास्ताम्।चर्करीतं च।यङ्लुगन्तमदादौ बोध्यम्।ह्नुङ् अ
पनयने।ह्नुते।जुह्नुवे।ह्नुवीत।ह्नोषीष्ट।अह्नोष्ट॥ ॥इत्यदादयः॥ ॥हु दानादनयोः।आदाने चेत्येके।प्रीणनेऽपीति भाष्यम्।
दानं चेह प्रक्षेपः।स च वैधे आधारे हविषश्चेति स्वलावा लक्ष्यते।इतश्चत्वारः परस्मैपदिनः।जुहोत्यादिभ्यः श्लुः।शपः श्लुः स्यात्।श्लौ।
श्लौ।धातोर्द्वे स्तः।जुहोति।जुहुतः।अदभ्यस्तादित्यत्।हुश्नुवोरिति यण्।जुह्वति।भीह्रीभृहुवां श्लुवच्च।एभ्यो लिट्याम्वा स्यादामि
श्लाविव कार्यं च।जुहवांचकार।जुहाव।होता।होष्यति।जुहोतु।जुहुतात्।हेर्धिः।जुहुधि।आटः परत्वाद्गुणः।जुहवानि।पर
वा।जुसि चेति गुणः।अजुहवुः।जुहुयात्।हूयात्।अहौषीत्।ञिभी भये।बिभेति।भियोऽन्यतरस्याम्।इकारः स्याद्धलादौ
क्ङिति सार्वधातुके।बिभीतः।बिभितः।बिभ्यति।बिभयांचकार।बिभाय।भेता।ह्री लज्जायाम्।जिह्रेति।जिह्रीतः।
जिह्रियति।जिह्रयांचकार।जिह्राय।पॄ पालनपूरणयोः।अर्तिपिपर्त्योश्च।अभ्यासस्य इकारोऽन्तादेशः स्यात् श्लौ।उ
दोष्ठ्यपूर्वस्य।अंगावयवौष्ठ्यपूर्वो य ऋत् तदंतांगस्योत् स्यात्।गुणवृद्धी परत्वादिमं बाधेते।पिपर्ति।उत्वम्।रपरत्वं।

तेर

ति

हलि चेति दीर्घः। पिपूर्तः॥ पिपुरति। पपार। किति लिटि ऋच्छत्यॄतामिति गुणे प्राप्ते। शृदृप्रां ह्रस्वो वा। एषां किति लिटि ह्रस्वो
वा स्यात्। पक्षे गुणः। पप्रतुः। पप्रुः। पपरतुः। पपरुः। परिता। परीता। अपिपः। अपिपूर्ताम्। अपिपरुः। पिपूर्यात्। पूर्या
त्। अपारीत्। अपारिष्टाम्। ह्रस्वान्तोयमिति केचित्। पिपर्ति। पिपृतः। पिप्रति। पिपृयात्। आशिषि प्रियात्। अप
र्षीत्। पाणिनीयमते तु गरोहसी पिपृतमित्यादौ छां। इसत्वं शरणं। डुभृञ् धारणपोषणयोः। भृञामित्। भृ
ञ्माङ्। ओहाङ्। एषां त्रयाणामभ्यासस्य इत् स्यात् श्लौ। बिभर्ति। बिभृतः। बिभ्रति। बिभृघो श्लुवद्भावा
द्द्वित्वे बिभरामास। बभार। बभर्थ। बभृव। बिभृहि। बिभराणि। अबिभः। अबिभृताम्। अबिभरुः। बिभृ
यात्। भ्रियात्। भृषीष्ट। अभार्षीत्। अभृत। माङ्माने। शब्दे च। ई हल्यघोः। श्नाभ्यस्तयोरात ईत्स्या
त्सार्वधातुके क्ङिति हलि। मिमीते। श्नाभ्यस्तयोरित्यालोपः। मिमाते। मिमते। प्रण्यमास्त। ओहाङ् ग
तौ। जिहीते। जिहाते। जहे। हाता। हास्यते। ओहाक् त्यागे। परस्मैपदी। जहाति। जहातेश्च। इत्स्याद्वा हलो
हौ क्ङिति सार्वधातुके। पक्षे ईत्त्वम्। जहितः। जहीतः। जहति। जहौ। जहातु। जहितात्। जहीतात्। आ च हौ। ज

ले

॥राम॥
॥४२॥

328

स्या।४

हातेर्हौ परे आ स्याच्चा इदीतौ। जहाहि। जहिहि। जहीहि। अजहात्। अजहुः। लोपो यि। जहातेरालोपः स्याद्यादौ
सार्वधातुके। जह्यात्। एर्लिङि। हेयात्। अहासीत्। डुदाञ् दाने। प्रणिददाति। दत्तः। ददति। दत्ते। ददौ। घ्वसोरित्ये
त्वाभ्यासलोपौ। देहि। अददात्। अदत्ताम्। अददुः। दद्यात्। देयात्। अदात्। अदाताम्। अदुः। अदित। डुधाञ्
धारणपोषणयोः। दाने इत्येके। प्रणिदधाति। दधस्तथोश्च। द्विरुक्तस्य झषन्तस्य धाञो बशो भष् स्यात्तथयोः स्ध्वो
श्च परतः। वचनसामर्थ्यादालोपो न स्थानिवदिति वामनमाधवौ। वस्तुतस्तु पूर्वत्रासिद्धे न स्थानिवत्।
धत्तः। दधति। धत्थः। दध्वः। धत्ते। धत्से। धध्वे। धेहि। अधित। अथ त्रयः स्वरितेतः। णिजिर् शौचपोषणयोः।
निजां त्रयाणां गुणः श्लौ। निज् विज् विषामभ्यासस्य गुणः स्यात् श्लौ। नेनेक्ति। नेनिक्तः। निनेज। नेक्ता। ने
क्ष्यति। नेनेक्तु। नेनिग्धि। नाभ्यस्तस्याचि पिति सार्वधातुके। लघूपधगुणो न स्यात्। नेनिजानि। अनेने
क्। अनेनिक्ताम्। अनेनिजुः। नेनिज्यात्। अनिजत्। अनैक्षीत्। अनिक्त। विजिर् पृथग्भावे। वे
वेक्ति। वेविक्ते। विवेजिथ। अत्र विज इडिति ङित्त्वं न। ओविजी इत्यस्यैव तत्र ग्रहणात्। णिजिविजी रुधा
दावपि। विष्लृ व्याप्तौ। वेवेष्टि। वेविष्टे। लृदित्वादङ्। अविषत्। तङि क्सः। अजादौ क्सस्याचीत्यल्लोपः। अ

धा५

विहस्तता। अविहस्तता। यथागणं तासं परस्मैपदिनश्छांदसाश्च। घृ क्षरणदीप्त्योः। जिघर्म्यग्निं हविषा घृतेन प्रतिक्ष
यन्तं भुवनानि विश्वा। न आमितो बहुलं छंदसीति त्वं। हृ प्रसह्यकरणे। प्रयंसुवो अजिहर्ति हिमान्।
ऋसृ गतौ। बहुलं छंदसीत्येव सिद्धे अर्तिपिपर्त्योश्चेतीत्वविधानादयं भाषायामपि। ऋत्यासस्यो सवर्ण
इतीयङ्। इयर्ति। इयृतः। इयृति। आर। आरतुः। इयृत्यन्तीति नित्यमिट्। आरिथ। अर्ता। अरिष्यति।
इयरात्। ऐयः। ऐयृतां। ऐयरुः। इयृयात्। अर्यात्। आरत्। ससर्ति। ससर्ति नदी स्योः। वसस्तोघ
सिसो हलि चेत्युपधालोपः। झलो झलीति सलोपः। बब्धः। बप्सति। कित ज्ञाने। चिकेति। तुर त्वरणे। तुतोर्ति।
तुतूर्तः। तुतुरति। धिष शब्दे। दिधेष्टि। दिधिष्टः। धन धान्ये। दधंति। दधंतः। दधनति। जन जनने। जजन्ति।
जनसनखनां सञ्झलोः। एषामाकारोंतादेशः स्याज्झलादौ सनि झलादौ क्ङिति। जजातः। जज्ञ
ति। जजंति। जजान। जजन्यात्। जजायात्। जजन्यात्। जायात्। गा स्तुतौ। देवाञ्जिगाति सुम्नयुः। जिगीतः।
जिगति॥ ॥इति जुहोत्यादयः॥ ॥दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकांतिगति
षु। एते परस्मैपदिनः। दिवादिभ्यः श्यन्। शपोपवादः। हलि चेति दीर्घः। दीव्यति। दिदेव। देविता। देविष्यति।

ष्टु१

धं: ६

॥राम॥

॥४३॥

330

क्रा२

दी व्यतु। दीव्य। अदीव्यत। दीव्येत। दीव्यात्। अदेवीत। अदेविष्यत। षिवु तन्तुसंताने। परिषीव्यति। परिषिषेव। न्यषेवी
त। न्यसेवीत। स्त्रिवु गति शोषणयोः। ष्ठिवु निरसने। केचिदिहेमं न पठन्ति। ष्णुसु अदने। आदान इत्येके। अद
र्शन इत्यपरे। स्नुस्यति। सुष्णोस। ष्णसु निरसने। स्नस्यति। सस्नास। क्नसु ह्वरणदीप्त्योः। ह्वरणं कौटिल्यं। [illegible]सा
व्युष दाहे। वुव्योष। प्लुष च। नृती गात्रविक्षेपे। नृत्यति। ननर्त। सेऽसिचि कृत चृत छृद तृद नृतः। एभ्यः परस्य सिज्भिन्नस्य
सादेरार्द्धधातुकस्येड्वा स्यात्। नर्तिष्यति। नर्त्स्यति। नृत्येत्। नृत्यात्। अनर्तीत्। त्रसी उद्वेगे। वा भ्राशेति श्यन्वा। त्रस्य
ति। त्रसति। त्रेसतुः। तत्रसतुः। कुथ पूतीभावे। पुथ हिंसायां। गुध परिवेष्टने। क्षिप प्रेरणे। क्षिप्यति। क्षेप्ता। पुष्प विक
सने। पुष्प्यति। पुपुष्प। तिम ष्टिम ष्टीम आर्द्रीभावे। ति[illegible]ति। स्ति[illegible]ति। स्तीम्यति। व्रीड चोदने लज्जायां च। व्रीड्यति।
इष गतौ। इष्यति। षह षुह शक्यर्थे। शक्यर्थस्त्विति। सह्यति। सुह्यति। जॄष् झॄष् वयोहानौ। जीर्यति। जजरतुः।
जेरतुः। जरिता। जरीता। जीर्येत्। जीर्यात्। जॄस्तंसुसु इत्यङ्वा। ऋदृशोऽङि गुणः। अजरत्। अजारीत्। अजारिष्ट
ष्टा। झीर्यति। जझरतुः। अझारीत्। षूङ् प्राणिप्रसवे। सूयते। सुषुवे। स्वरति सूती ति विकल्पं बाधित्वा श्र्युकः
किती ति निषेधे प्राप्ते। क्रादिनियमान्नित्यमिट्। सुषुविषे। सुषुविवहे। सोता। सविता। दूङ् परितापे। दूय

क्रा३
दे६४
न्य०७

न्य०७

331

सिद्धांतकौमुदी॥
॥राम॥
॥६४॥

ओरीक्ष्लपाइति
बोपदेवः

तिं२

ते।दीङ् क्षये।दीयते।दीङो युडचि क्ङिति।दीङः परस्याजादेः क्ङित आर्धधातुकस्य युट् स्यात्।वुग्युटावुवङ्यणो
सिद्धौ [illegible]।दिदीये।मीनाति मिनोति दीङां ल्यपि च।एषामात्वं स्याल्ल्यपि चकारादशित्येज्निमित्ते।दा
ता।दास्यते।अदास्त।अदास्थाः।डीङ् विहायसा गतौ।डीयते।धीङ् आधारे।धीयते।दिध्ये।धेता।मीङ् हिं
सायाम्।हिंसात्र प्राणवियोगः।मीयते।रीङ् स्रवणे।रीयते।लीङ् श्लेषणे।विभाषा लीयतेः।लीयतेरिति
यका निर्देशो न तु श्यना।लीलीङोरात्वं वा स्यादेज्विषये ल्यपि च।लेता।लाता।लेष्यते।लास्यते।एज्विषये
किम्।लीयते।लिल्ये।व्रीङ् वृणोत्यर्थे।व्रीयते।विव्रिये।स्व दयश्चो हितः।तत्सूत्रं तु तिष्ठान त्वम्।पीङ्
पाने।पीयते।माङ् माने।मायते।ममे।ईङ् गतौ।ईयते।अयांचक्रे।प्रीङ् प्रीतौ।सकर्मकः।प्रीयते।पिप्रिये
अथ परस्मैपदिनः।शो तनूकरणे।ओतः श्यनि।लोपः स्यात्।श्यति।श्यतः।श्यंति।शशौ।शश
तुः।शाता।शास्यति।विभाषा घ्राधेडिति सिचो लुक्।लुगभावे यमरमेतीट्सकौ।अशात्।अशाताम्।अशुः।
अशासीत्।अशासिष्टाम्।छो छेदने।छ्यति।षो अन्तकर्मणि।स्यति।ससौ।अतिष्यति।अस्यथत्।असिससौ।दो अव
खण्डने।द्यति।ददौ।अलि दाता।देयात्।अदात्।अथात्मनेपदिनः पंचदश।जनी प्रादुर्भावे।ज्ञाजनोर्जा।अनयो

वा२

॥राम॥
॥६४॥दि॥

332

ने

जादिशः स्याच्छिति। जायते। जज्ञे। न ज्ञाते। जज्ञिरे। जनिता। जनिष्यते। दीपड तिवा [illegible] विणू। जनिवध्योश्च। अनयो
रुपधाया वृद्धिर्न स्यात् चिणि ञ्णिति कृति च। अजनि। अजनिष्ट। दीपी दीप्तौ। दीप्यते। दिदीपे। अदीपि। अदीपि
ष्ट। पूरी आप्यायने। पूर्यते। अपूरि। अपूरिष्ट। तूरी गतित्वरणहिंसनयोः। तूर्यते। तुतूरे। धूरी गूरी हिंसागत्योः।
धूर्यते। दुधूरे। गूर्यते। जुगूरे। घूरी जूरी हिंसावयोहान्योः। शूरी हिंसास्तंभनयोः। चूरी दाहे। तप ऐश्वर्ये
वा। अयं धातुरैश्वर्ये वा तङ् श्यनौ लभते। अन्यदा तु शविकरणः परस्मैपदीत्यर्थः। केचित्तु वाग्रहणं वृतु धातो
राद्यावयवमिच्छन्ति। तप्यते। तेपे। तप्स्यते। तपतेर्व्यत्यासेन पागं तरं। द्युत द्यामा नियुतः पत्यमानः। वृतु वरणे।
वृत्यते। पवृते। वर्त्यते। ततो वा वृत्यमाना सारामं शाळांन्यविश ते तिल हिः। [illegible] क्लिश उपतापे। क्लि
श्यते। क्लेशिता। काशृ दीप्तौ। काश्यते। वाशृ शब्दे। वाश्यते। ववाशे। अथ पंच स्वरितेतः। मृष तितिक्षायाम्।
मृष्यति। मृष्यते। ममर्ष। ममृषे। ईशुचिर् पूतीभावे। पूतीभावः क्लेदः। शुच्यति। शुच्यते। शुशोच। शुशुचे।
अशुचत्। अशोचीत्। अशोचिष्ट। णह बंधने। नह्यति। [illegible] नह्यते। ननाह। ननद्ध। निहिथ। नेहे। नद्धा। नत्स्य

ध॰४

ति॰

ति। अनात्सीत्। रंज रागे। रज्य[illegible]। रज्यते। शप आक्रोशे। शपति। शप्यते। अथैकादश अनुदात्तेतः। पद गतौ। पद्य
ते। पेदे। पत्ता। पद्येत। पत्सीष्ट। चिण् ते पदः। पदश्च्लेश्चिण् स्यात्तशब्दे परे। अपादि। अपत्साताम्। अपत्सत। खिद
दैन्ये। खिद्यते। चिखिदे। खेत्ता। अखित्त। विद सत्तायाम्। विद्यते। वेत्ता। बुध अवगमने। बुध्यते। बुबुधे। बोद्धा। भोत्
स्यते। भुत्सीष्ट। अबोधि। अबुद्ध। अभुत्साताम्। युध संप्रहारे। युध्यते। युयुधे। योद्धा। अयुद्ध। कथं युध्यतीति। युधमिच्छ
तीति क्यच्। अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यं वा। अनोरुध कामे। अनुरुध्यते। अण प्राणने। अण्यते। आणे। आणि
ता। अनेति दंत्यांतोयमित्येके। मन ज्ञाने। मन्यते। मेने। मंता। युज समाधौ। समाधिश्चित्तवृत्तिनिरोधः। अकर्मकः। युज्य
ते। योक्ता। सृज विसर्गे। अकर्मकः। संसृज्यते सरसिजैररुणांशुभिन्नैः। ससृजिषे। स्रष्टा। स्रक्ष्यते। लिङ्सिचाविति कि
त्त्वान्न गुणो नाप्यम्। सृक्षीष्ट। असृष्ट। असृक्षाताम्। लिश अल्पीभावे। लिश्यते। लेष्टा। लेक्ष्यते। लिक्षीष्ट। अलिक्ष
त। अलिक्षाताम्। अथ गणांताः परस्मैपदिनः। राधोकर्मकाद्वृद्धावेव। एवकारो भिन्नक्रमः। राधोकर्मकादेव श्य
न्। उदाहरणमाह। द्वाविति। यन्मह्यमपराध्यति। द्रुह्यतीत्यर्थः। विराध्यंतं क्षमेत कः। द्रुह्यंतं। राध्यत्योदनः। सिध्यतीत्य

ध्य५

।।राम।।
।।४५।।

334

थीः क्ष्मायत। ध्यति। देवं पर्यालोचयतीत्यर्थः दैवस्य धात्वर्थैतलवि। उद्दीवत्या दिवह कर्मकत्वो रराध। रराधतुः॥
रराधिथ। राधो हिंसाया। मित्येवा स्यासलोप। विद्दन। हिंसार्थस्यैस कर्मकतयादैवादिकत्वाद्ये गात्। राद्धा। रात्स्य
ति। अयं स्वादिश्चुरादिश्च। व्यध ताडने। ग्रहिज्या। विध्यति। विव्याध। विविधतुः। विव्यद्ध। विव्यधिथ। व्यद्धा। व्यत्स्यति। वि
ध्येत्। विध्यात्। अव्यात्सीत्। पुष पुष्टौ। पुष्यति। पुपोष। पुपोषिथ। पोष्टा। पोक्ष्यति। पुषादीत्यङ्। अपुषत्। शुष शोषणे।
अशुषत्। तुष प्रीतौ। दुष वैकृत्ये। श्लिष आलिंगने। श्लिष्यति। शिश्लेष। श्लेष्टा। श्लेक्ष्यति। श्लिषः। अस्मात् सरस्यानि
ट्श्लेः क्सः स्यात्। पुषाद्यङोऽपवादो न तु चिणः पुरस्तादपवादन्यायात्। आलिंगने। श्लिष श्लेः आलिंगन एव क्सो
नान्यत्र। योगविभागसामर्थ्यात् छिल दृगुपधादित्यस्यायं नियमः। अश्लिक्षत् कन्यां देवदत्तः। आलिंगनए
वेति किम्। समश्लिषज्जतुकाष्ठम्। अङ्। प्र्यासत्ता। विहश्लिषिः कर्मणि अनो लिंगने सिजेव न तु क्सः। एक
वचने चिण्। अश्लेषि। अश्लिक्षत। अश्लिक्षाः। अश्लिड्ढ्वम्। शक विभाषितो मर्षणे। विभाषित इत्युभ
यपदीत्यर्थः। शक्यति। शक्यते। हरिं द्रष्टुं लक्ले शशाक। शेकिथ। शशक्थ। शेके। शक्ता। शक्ष्यति। शक्ष्यते।

ग॰ २

शा॰

सि॰ ता॰ मा॰ २

335

इति माधवादयः। नस्नुनस्नुवसतिक्षुधोरिती दृश्यते।४

अशकत्। अशक्त। सेट्कोयमित्येके। तन्मते नानिट्कारिकासु लृदिस्सरितः। शकिता। शकिष्यति। ञिष्विदा गात्र
प्रक्षरणे। घर्मस्रुतावित्यर्थः। अयं नीहिहिति न्यासकारादयः। नेति हरदत्तादयः। स्विद्यति। सिष्वेद। सिष्वे
दिथ। स्वेत्ता। अस्विदत्। क्रुध क्रोधे। क्रोद्धा। क्रोत्स्यति। क्षुध बुभुक्षायां। क्षोद्धा। कथं क्षुधित इति। सं
पदादिक्विबंतात्तारकादित्वादित शु॥ शुध शौचे। शुध्यति। शुशोध। शोद्धा। षिधु संराद्धौ। तुदि सागः
प्राग्माहिकः। सिध्यति। सेद्धा। सेत्स्यति। असिधत्। रध हिंसासंराध्योः। रध्यति। रधिजभोरचीति नुम्। र
रंध रंधतुः। रधादिभ्यश्च वलादावार्धधातुकस्य वेट्स्यात्। ररंधिथ। ररद्ध। ररंधिव। रेध्व। नेट्यलिटि र
धेः॥ इडर्थे इटि रधेर्नुम्न स्यात्। रधिता। रद्धा। रधिष्यति। रत्स्यति। अङि नुम्। अनिदितामिति नलोपः। अर
धत्। णश अदर्शने। नश्यति। ननाश। नेशतुः। नेशिथ। मस्जिनशोर्झलि। नुम् स्यात्। ननंष्ठ। नेशि
व। नेश्व। नशिता। नंष्टा। नशिष्यति। नङ्क्ष्यति। नश्येत्। नश्यात्। अनशत्। प्रणश्यति। नशेः षान्तस्य
णत्वं न स्यात्। प्रणंष्टा। अन्तग्रहणं स्तत एव प्रातिपत्यर्थं॥ प्रनङ्क्ष्यति। तृप प्रीणने। प्रीणनं तृप्ति

नर

नशिष्यति

लि४

निष्पत्तिः४

घ६

॥श्रम

॥४६॥

336

स्तर्पणा॥ नाग्निस्तृप्यति काष्ठानां पिस्तृनताप्सीत्। इत्युक्तं यच्च दर्शनात्। ततर्पिथ। तत पृथ। ततृप्थ।
श।२ तर्पिता। तप्ता त्रप्ता। क्रमे मृशेति सिज्वा। अतर्पीत्। अताप्सीत्। अत्राप्सीत्। अतृपत्। दृप हर्षमोहने
योः। मोहने गर्वः। दृप्यति। इत्यादि। रधादिसादिमौ वेक्ताव मर्थमनुहान्तेता। द्रुह जिघांसायां। वा द्रुह
मुहेति वा घः। पक्षे ढः। दुद्रोग्ध। दुद्रोढ। दुद्रोहिथ। द्रोहिता। द्रोग्धा। द्रोढा। द्रोहिष्यति। ध्रोक्ष्यति।
ढत्वघत्वयोस्तुल्यं रूपम्। अद्रुहत्। मुह वैचित्ये। वैचित्यमविवेकः। मुह्यति। मुमोहिथ। मुमोग्ध।
मुमोढ। मोग्धा। मो ढा। मोहिता। मोहिष्यति। मोक्ष्यति। अमुहत्। ष्णुह उद्गिरणे। स्नुह्यति। सुष्णो
ह। सुष्णोहिथ। सुष्णोग्ध। सुष्णोढ। सुष्णुहिव। सुष्णुह्म। स्नोहिता। स्नोग्धा। स्नोढा। स्नोहिष्यति।
स्नोक्ष्यति। अस्नुहत्। ष्णिह प्रीतौ। स्निह्यति। सिष्णेह। वृत्। रधादयः समाप्ता इत्यर्थः। पुषादयस्त्वा
गणान्तादिति सिद्धान्तः। शमु उपशमे। शमामष्टानां दीर्घः श्यनि। शमादीनामित्यर्थः। [illegible] शा
म्यति। शेमतुः। शेमिथ। शमिता। अशमत्। तमु काङ्क्षायाम्। ताम्यति। तमिता। अतमत्। दमु उ

337

।।राम।।
।।५७।।

पशमे।उपशम इतिण्यंतस्यातिनरूढकर्मकोयम्।नतुशमिवदकर्मकः।अदमत्।श्रमुतपसिखेदेच।श्रा
म्यति।अश्रमत्।भ्रमुअनवस्थाने।वाभ्राशेतिश्यन्वा।तत्रकृते।शमामष्टानामितिदीर्घः।भ्राम्यति।
लुङ्।अभ्रमत्।शेषंस्वादिवत्।क्षमूसहने।क्षाम्यति।चक्षमिथ।चक्षंथ।चक्षमिव।चक्षण्व।चक्ष
मिम।चक्षण्म।क्षमिता।क्षंता।अयमूदित्।भ्वादिस्तुषित्।अषितः क्षाम्यतेः क्षांतिः।क्षमूषः क्षमतेः क्ष
मा।क्लमुग्लानौ।क्लाम्यति।क्लामति।शपीवश्यन्यपि ष्ठिवुक्लम्वित्येवं सिद्धेशमादिपाठो घिनुणर्थः।
लुङ्।अक्लमत्।मदीहर्षे।माद्यति।अमदत्।शमादयोष्टौगताः।असुक्षेपणे।अस्यति।आस।अ
सिता।अस्यतेस्थुक्।अङिपरे।आस्थत्।अस्यपुषादित्वादङ्।सेडस्यतिवक्तीतिवचनंतङ
र्थमूलम्।उपसर्गादस्यत्यूह्योरितिवक्तव्यात्।पर्यस्थित।यसुप्रयत्ने।यसोनुपसर्गात्।संयसश्च।
श्यन्वास्यात्।यस्यति।यसति।संयस्यति।संयसति।अनुपसर्गात्किम्।प्रयस्यति।जसुमोक्षणे।ज
स्यति।तसुउपक्षये।दसुच।तस्यति।अतसत्।दस्यति।अदसत्।वसुस्तंभे।वस्यति।ववास।ववस
तुः।नशसददेति निषेधः।बशादिरयमितिमतेतु।बेसतुः।बेसुः।व्युषविभागे।अयंदाहेपठितः।अथ

दीर्घे ५

।।राम।।
।।५७।।

338

पु १

सेदेनत्वङ् र्थं पुनः पद्यते। अयुषत्। ओष्ठ्यादिरीत्यां तो यमू[illegible]सीत्यन्ये। अयकारं पुष्महृत्यपरे। पुष्ह होऽ
पुषत्। पूर्वत्रपाठः स्निजर्थ इत्यफुः। तदू ष्वादिपाठेन गतार्थमिति सुवर्मः। विस प्रेरणे। विस्यति। अविस
त्। कुस संश्लेषणे। अकुसत्। वुस उत्सर्गे। मुस खण्डने। मसी परिणामे। समी इत्येके। लुठ विलोडने।
उंच समँवाये। उच्यति। उवो चऊचतुः। मा भवानुचत्। भृशु भ्रंशु अधःपतने। अभृशत्। अभ्रशत्।
अनिदितामिति न्लोपः। भ्रश्यति। अभ्रशत्। वृश वरणे। वृश्यति। अवृशत्। कृश तनूकरणे। कृश्यति।
ञितृष पिपासायाम्। हृष तुष्टौ। श्यन्नङो लोवादिकाद्विशेषः। रुष रिष हिंसायाम्। तीषसहेति वेट्। रो
षिता। रोष्टा। रेषिता। रेष्टा। डिप क्षेपे। कुप क्रोधे। गुप व्याकुलत्वे। युप रुप लुप विमोहने। युप्यति।
रुप्यति। लुप्यति। सिद्धः। अनिट्कारिकासु लिपिसाहचर्यात्तौदादिकस्यैव — ग्रहणात्। लुल
गार्ध्ये। गार्ध्यमाकांक्षा। तीषसहेति वेट्। लोभिता। लोब्धा। लोभिष्यति। लुभ्येत्। लुभ्यात्। अ
लुलत्। ल्हैवादेर वृहेन्तवा स्त्रोलते(य)फुः। क्षुभ संचलने। क्षुभ्यति। णभ तुभ हिंसायाम्
त्वा। ल्पः

ऐक्यं ४

लोपिता। लुप्यातिः ३

परिणामो विकारः २

द्युतिनलितुल्ययोः। द्युतादौ क्यादौ च पठ्यन्ते। तेषां द्युतादित्वाद्रु सिद्धः। क्यादित्वात्सलोपे सिजलुक्

वत्येव। इह पाठस्तु श्यनर्थः। क्लिदू आर्द्रीभावे। क्लिद्यति। विक्लेदिथ। विक्लेत्थ। विक्लिदिव। विक्लि

द्व। क्लेदिता। क्लेत्ता। ञिमिदा स्नेहने। मिदेर्गुणः। इत्संज्ञकशकारादौ प्रत्यये परे। मेद्यति। अ

मिदत्। द्युतादिपाठादेवामिदत्। अमेदिष्टेति सिद्धे इह पाठो अमेदीदिति मा भूदिति। द्युता

दिभ्यो बहिरेवात्मनेपदि पुषागस्त्तावितः। ञिक्ष्विदा स्नेहनमोचनयोः। ऋधु वृद्धौ। आनर्ध।

आर्धत्। गृधु अभिकांक्षायाम्। अगृधत्। राद्वृता। पुषादयो दिवादयश्च समाप्ताः। केचित्तु पु

षादिसमाप्त्यर्थमेव वृत्करणम्। दिवादिस्तु भ्वादिवदाकृतिगणः। तेन लीयते मृग्यतीत्यादि सि

द्धिरित्याहुः॥ ॥१३७॥ ॥इति दिवादयः॥ ॥षुञ् अभिषवे। अभिषवं स्नपनं पीडनं स्ना

नं सुरासंधानं वा। तत्र स्नाने अकर्मकः। स्वादिभ्यः श्नुः। सुनोति। सुनुतः। हुश्नुवोरिति यण्।

सुन्वंति। सुन्वः। सुनुवः। सुन्वहे। सुनुवहे। सुषाव। सुषुवे। सोता। सुनु। सुनवानि। सुनवै। सुनुया

॥राम॥
॥५८॥

पु १

सेदेनत्वङर्थं पुनः पठ्यते। व्युषत्। ओ व्यादिरीयं ततो यमू[उ]सीत्यन्ये। यकारं पुमृष्यपरे। पुष्प हो अ
पुषत्। पूर्वं च पाठः स्विजर्थ इत्याकुः। तद् स्वादिपाठेन गतार्थमिति सुवक्ष्मा। बिस प्रेरणे। बिस्यति। अविस परिणामो विकारः ३
त्। कुस संश्लेषणे। अकुसत्। बुस उत्सर्गे। मुस खण्डने। मसी परिणामे। समी इत्येके। लुट विलोडने।
ऐक्यं ४ उच समवाये। उच्यति। उवोच। ऊचतुः। मा स्म वानुचत्। भृशु भ्रंशु अधःपतने। अवभ्रशत्। अभ्रशत्।
अनिदितामिति नलोपः। भ्रश्यति। अभ्रशत्। वृश वरणे। वृश्यति। अवृशत्। कृश तनूकरणे। कृश्यति।
नितृष पिपासायाम्। हृष तुष्टौ। श्यन्नडो लोवादिकाद्विशेषः। रुष रिष हिंसायाम्। तीषसहेति वेट्। रो
षिता। रोष्टा। रेषिता। रेष्टा। डिप क्षेपे। कुप क्रोधे। गुप व्याकुलत्वे। युप रुप लुप विमोहने। युप्यति।
लोपिना। लुप्यतिः ३ रूप्यति। लुप्यति। सिद्धः अनिद्कारिकासु लिपिसाहचर्यात्तौदादिकस्यैव -- ग्रहणात्। लुभ
गार्द्ध्ये। गार्द्ध्यमाकाङ्क्षा। तीषसहेति वेट्। लोभिता। लोब्धा। लोभिष्यति। लुभ्येत्। लुभ्यात्। अ
लुभत्। क्त्वाहेर वृहत्तवा ल्लोलती(यु)णु। क्षुभ संचलने। क्षुभ्यति। णभ तुभ हिंसायाम्।
त्वा १ ल्यपि १

तास्यात्। स्तुसुधूञ्भ्य इतीट्। असावीत्। असोष्ट। अभिषुणोति। अभ्यषुणोत्। अभिषुषाव। सुनोतेः स्यसनोः स्येस
नि स्यपरे षुञः षो न स्यात्। विसोष्यति। षिञ् बंधने। सिनोति। विसिनोति। सिषाय। सिष्ये। सेता। शिञ् निशाने। तालव्या
दिः। शेता। डुमिञ् प्रक्षेपणे। मीनाति मिनोतीत्यात्वम्। ममौ। ममिथ। ममाथ। मिम्ये। माता। मीयात्। अमासीष्ट।
अमासीत्। अमासिष्टाम्। अमास्त। चिञ् चयने। प्रणिचिनोति। विभाषा चेः। अभ्यासात्परस्य चिञः कुत्वं वा स्या
त्सनि लिटि च। प्रणिचिकाय। चिचाय। चिक्ये। चिच्ये। अचैषीत्। अचेष्ट। स्तृञ् आच्छादने। स्तृणोति। स्तृणुते। गु
णोर्तीति गुणः। स्तर्यात्। ऋतश्च संयोगादेः। ऋदंतात्संयोगादेः परयोर्लिङ्सिचोरिड्वा स्यात् तङि। स्तरिषीष्ट।
स्तृषीष्ट। अस्तरिष्ट। अस्तृत। कृञ् हिंसायाम्। कृणोति। कृणुते। चकार। चकर्थ। चक्रे। क्रियात्। कृषीष्ट। अ
कार्षीत्। अकृत। वृञ् वरणे। बभूथाततंथजगृम्भववर्थेति निगमे। एषां वेदे इडभावो निपात्यते। तेन भाषा
यां थलीट्। ववरिथ। ववृव। ववृवहे। वरिता। वरीता। लिङ्सिचोरात्मनेपदेषु। वृङ्वृञ्भ्यामृदंताच्च प
रयोर्लिङ्सिचोरिड्वा स्यात्तङि। न लिङि। वृत इटो दीर्घो न स्यात्। वरिषीष्ट। वृषीष्ट। अवारीत्। अवरिष्ट।
अवरीष्ट। अवृत। धुञ् कंपने। धुनोति। धुनुते। अधौषीत्। अधोष्ट। दीर्घांतोऽयम्। धूनोति। धूनु

श्र्यु १   दु २

सिद्धांतकौमुदी ति.

ता।स्वरतिसूतीति वेट्।दुधविथ।दुधोथ।किति लिटि तु कइति निषेधं बाधित्वा क्रादिनियमान्नित्यमिट्।दुधुविव।स्तु
सुधूञ्भ्य इति नित्यमिट्।अधावीत्।अधविष्ट।अधोष्ट।अथ परस्मैपदिनः।दु दु उपतापे।दुनोति।हि गतौ वृद्धौ
च।हिनुमीना।उपसर्गस्थान्निमित्तात्परस्यैतयोर्नस्य णः स्यात्।प्रहिणोति।हेरचङि।अभ्यासात्परस्य हिनोते
र्हस्य कुत्वं स्यान्नतु चङि।जिघाय।पृ प्रीतौ।पृणोति।पपार।स्पृ प्रीतिपालनयोः।प्रीतिबलनयोरित्यन्ये।बलने
जीवनमिति स्वामी।स्पृणोति।पस्पार।स्मृ इत्येके।स्मृणोति।पृणोत्यादयस्त्रयोपि छान्दसा इत्याहुः।आपॢ व्या
प्तौ।आप्नुवंति।आप्नुवः।आप्ता।आप्नुहि।ॡदित्वादङ्।आपत्।शकॢ शक्तौ।अशकत्।राध साध संसिद्धौ
राध्नोति।राधो हिंसायाम्।एत्वाभ्यासलोपौ स्तः किति लिटि सेटि थलि च।अपरेधतुः।रेधुः।रेधिथ।रराध।
साध्नोति।साद्धा।असात्सीत्।असाद्धाम्।अथ द्वावनुदात्तेतौ।अशू व्याप्तौ संघाते च।अश्नुते।अश्नुवी
ता।अक्षीष्ट।अशिषीष्ट।आष्ट।आशाताम्।ष्टिघ आस्कंदने।स्तिघ्नुते।तिष्टिघे।स्तेघिता।अथ आगणा
तात्परस्मैपदिनः।तिक तिग च।तिक्नोति।तिग्नोति।षघ हिंसायाम्।सघ्नोति।ञिधृषा प्रागल्भ्ये।धृष्णो
ति।दधर्ष।धर्षिता।दंभु दंभने।दंभनेदंभः।दभ्नोति।ददंभ।श्रंथिग्रंथिदंभिस्वंजीनां लिटः कित्वं वेति य

॥रा॥ह
॥४ री॥

अश्नुते।अश्नोतेश्च।दीर्घादित्यासावर्णात्स्वरस्य नुट् स्यात्।आनशे।आशिता।आष्टा।आशि
ष्यते।४

343

करणोत्तरं। इहाद्याश्रायत इत्युक्तम्।। अनिदितामिति न्लोपः। तस्याभीयत्वादसिद्धत्वेन एत्वाभ्यासलोपयोरप्र
प्तौ हंहेश्च एत्वाभ्यास लोपौ वक्तव्यौ। देहतुः। ददंहतुः। ददंहिथ। देहिथविषयकमिति सुधाकरादयः।
तन्मते तिश्चिमिश्रुत्यादेला देहिथ। देहेति रूपांतरं बोध्यम्। अपि विषयकमिति न्यासकाराः। इमे तु द
दंत्वाद दंहिथ। ददेहेत्येवाहं सिता। दस्याद। आधु दृक्षौ। तपश्राणन इत्येके। हुला दि लाण वैला हनी
ति। छंदसि। आगणांतादधिकारोयम्। अरव्याप्तौ। अक्नोति। दघ घातने पालनेवा। दघ्नोति। चमु च हणे
चम्नोति। रि क्षि चिरि जिरि दाश दृ हिंसायाम्। रिणोति। क्षिणोति। अयं भाषायामपीत्येके। न तद्वशः शास्
ष्टतां क्षिणोति। अक्षीत्येके एवादादिरित्यन्ये। अक्षिणोति। चिरिणोति।। जिरिणोति। दाश्नोति। दृणोति
दृता। ५। इति स्वादयः।। तुद व्यथने। इतः षड् स्वरितेतः। तुदादिभ्यः शः। तुदति। तुदते। तुतोद। तुतो
दिथ। तुतुदे। तोत्ता। अतौत्सीत्। अतुत्त। णुद प्रेरणे। नुदति। नुदते। नुनोद। नुनुदे। नोत्ता। दिश अति
सर्जने। अतिसर्जनं दानम्। देष्टा। दिक्षीष्ट। अदिक्षत्। अदिक्षत। भ्रस्ज पाके। ग्रहिज्यासस्य श्चुत्वे

।।बालकौमुदी।।
।।५०।।

न ढाः। शस्य जश्त्वेन जः। भृज्जति। भृज्जते। भ्रस्जो रोपधयोरमन्यतरस्याम्। भ्रस्जो रेफस्य उपधायाश्च स्था
नेरमागमो वा स्यात् आर्धधातुके। मित्वादंत्यादचः परः। स्थानषष्ठीनिर्देशाद्रोपधयोर्निवृत्तिः। बभर्ज्ज।
बभर्ज्जतुः। बभर्ज्जिथ। बभर्ष्ठ। बभृज्जे। रमभावे बभ्रज्ज। बभ्रज्जतुः। बभ्रज्जिथ। स्कोरिति लोपः। व्रश्चे
ति षः। बभ्रष्ठ। बभ्रज्जे। भर्ष्टा। भर्क्ष्यति। भ्रष्टा। भ्रक्ष्यति। क्ङिति रमागमं बाधित्वा संप्रसारणं पूर्वविप्रति
षेधेन। भृज्ज्यात्। भृज्ज्यास्ताम्। भर्क्षीष्ट। भ्रक्षीष्ट। अभार्क्षीत्। अभ्राक्षीत्। अभर्ष्ट। अभ्रष्ट। क्षिप प्रेर
णे। क्षिपति। क्षिपते। क्षेप्ता। अक्षैप्सीत्। अक्षिप्त। कृष विलेखने। कृषति। कृषते। क्रष्टा। कर्ष्टा। कृष्यात्। कृ
क्षीष्ट। स्पृशमृशकृषेति सिज्वा। पक्षे क्सः। सिच्यम्वा। अक्राक्षीत्। अकार्क्षीत्। अकृक्षत्। तङि। लिङ्सि
चावि[illegible]कित्वाद न्मा। अकृष्ट। अकृक्षाताम्। अकृक्षत। अकृक्षत। अकृक्षाताम्। अकृक्षंत। ऋषी ग
तौ। परस्मैपदी। ऋषति। आनर्ष। जुषी प्रीतिसेवनयोः। आत्मनेपदिनश्चत्वारः। जुषते। ओविजी भयच
लनयोः। प्रायेणायमुत्पूर्वः। उद्विजते। विज इट्। विजेः पर इडादिः प्रत्ययो ङिद्वत्। उद्विजिता। उद्विजैते।
ष्य

।।रामा।।
।।५०।। हरये नमः।।

345

ओलजी। ओलस्जी व्रीडि।। लजते। लेजे।। लज्जते। ललज्जे। अथ परस्मैपदिनः। ओव्रश्चू छेदने। ग्रहिज्या। वृश्चति। वव्रश्च
तुः वव्रश्चिथ। वव्रष्ठ। लिट्यस्यासस्येति सम्प्रसारणं रेफस्य ऋकारः। उरत्। तस्याचः परस्मिन्निति स्थानिवद्भावान्न सं
प्रसारणमिति वस्यो वं न। व्रश्चिता। व्रष्टा। व्रश्चिष्यति। व्रक्ष्यति। वृश्च्यात्। अव्रश्चीत्। अव्राक्षीत्। व्यच व्याजीकर
णे। विचति। विव्याच। विविचतुः। व्यचिता। व्यचिष्यति। विच्यात्। अव्याचीत्। अव्यचीत्। व्यचेः कुटादित्वमनसीति
तु नेह प्रवर्त्तते। अनसीति पर्युदासेन कृन्मात्रविषयत्वात्। उछि उंछे। उंछति। उछी विवासे। उच्छति। ऋछ
गतींद्रियप्रलयमूर्त्तिभावेषु। ऋच्छत्यृतामिति गुणः। द्विहल्ग्रहणस्यानेकहलुपलक्षणत्वान्नुट्। आन
र्छ। आनर्छतुः। ऋछिता। मिछ उत्क्लेशे। उत्क्लेशः पीडा।। मिमिच्छ। अमिच्छीत्। जर्ज चर्च झर्झ परिभाषण
भर्त्सनयोः। त्वच संवरणे। तत्वाच। ऋच स्तुतौ। आनर्च। उब्ज आर्जवे। उज्झ उत्सर्गे। लुभ विमोहने। विमोह
नमाकुलीकरणं। लुभति। लोभिता। लोब्धा। लोभिष्यति। रिफ कत्थनयुद्धनिंदाहिंसादानेषु। रिफति।
रिरेफ। रिहेत्येके। शिशुं न विप्रा मतिभी रिहंति। तृप तृम्फ तृप्तौ। आद्यः प्रथमान्तः। द्वितीयो द्वितीयान्तः। द्वा
वपि द्वितीयान्तावित्यन्ये। तृपति। ततर्प। तर्पिता।। स्ट शम्फ

॥सिद्धांतकौमुदी
॥५९॥

प्रथमः प्रथमोंतः। द्वितीयांत इत्येके।

शेतिसिज्विकल्पः पोषादिकस्यैवा अपवादत्वात्। तेनात्र नित्यं सिच्। अतपीत्। तृम्फति। शस्य ङित्वादनिदि
तामिति नलोपः। शे तृंफादीनां नुम्वाच्यः। आदिशब्दः प्रकारे तेन येऽत्र नकारानुषक्तास्ते तृंफादयः। ततृंफ।
तृफ्यात्। तुप तुंप तुफ तुंफ हिंसायाम्। तुपति। तुंपति। तुफति। तुंफति। दृप दृंफ उत्क्लेशे। दृपति। दृफति।
दृंफति। ऋफ ऋंफ हिंसायाम्। ऋफति। आनर्फ। ऋंफति। ऋंफांचकार। गुफ गुंफ ग्रंथे। गुफति। जुगो
फ। गुंफति। जुगुंफ। उभ उंभ पूरणे। उभति। उवोभ। उंभति। उंभांचकार। शुभ शुंभ शोभार्थे। शुभति।
शुंभति। दृभी ग्रंथे। दृभति। चृती हिंसाग्रंथनयोः। चर्तिता। सेसिचीति वेट्। चर्तिष्यति। चर्त्स्यति। अचर्तीदि।
विध विधाने। विधति। वेधिता। जुड गतौ। तवर्गपंचमांतमित्येके। जुडति। मते जुनति। मृड सुख
ने। मृडति। मडिता। पृड च। पृडति। पृण प्रीणने। पृणति। पपर्ण। वृण च। वृणति। मृण हिंसायाम्। तुण कौ
टिल्ये। तुतोण। पुण कर्मणि शुभे। पुणति। मुण प्रतिज्ञाने। कुण शब्दोपकरणयोः। शुन गतौ। द्रुण हिंसाग
तिकौटिल्येषु। घुण घूर्ण भ्रमणे। षुर ऐश्वर्यदीप्त्योः। सुरति। सुषोर। आशिषि सूर्यात्। कुर शब्दे। कुरति।

॥राम॥
॥५९॥

श्रीराम

कुर्यात्। अत्र न भकुर्छुरामिति निषेधो न। करोतेरेव ग्रहणादित्याहुः। खुर छेदने। मुर संवेष्टने। क्षुर विलेख
ने। घुर भीमार्थशब्दयोः। पुर अग्रगमने। वृहू उद्यमने। दंत्यौष्ठ्यादिः। पवर्गीयादिरित्यन्ये। तृहू ष्टृहू
तृंहू हिंसार्थाः। तृहति। ततर्ह। स्तृहति। तस्तर्ह। तर्हिता। तर्ढा। स्तर्हिता। स्तर्ढा। अतृंहीत्। अतार्ढ् ह्री
तो। अताण्ढां। इषु इच्छायाम्। इषुगमीति छः। इच्छति। एषिता। एष्टा। एषिष्यति। इष्यात्। ऐषीत्। मि
ष स्पर्धायाम्। मिषति। मेषिता। किल श्वैत्यक्रीडनयोः। तिल स्नेहने। चिल वसने। चल विलसने।
इल स्वप्नक्षेपणयोः। बिल संवरणे। दंत्यौष्ठ्यादिः। बिल भेदने। ओष्ठ्यादिः। णिल गहने। हि
ल भावकरणे। शिल षिल उञ्छे। मिल श्लेषणे। लिख अक्षरविन्यासे। लिलेख। कुट कौटिल्ये।
गाङ्कुटादिभ्य इति ङित्वं। चुकुटिथ। चुकोट। चुकुट। कुटिता। पुट संश्लेषणे। कुच संकोच
ने। गुज शब्दे। गुड रक्षायाम्। डिप क्षेपे। छुर छेदने। न भकुर्छुरामिति न दीर्घः। छुर्यात्। स्फु
ट विकसने। स्फुटति। पुस्फोट। मुट आक्षेपप्रमर्दनयोः। त्रुट छेदने। वा भ्राशेति श्यन्वा। जु

वि ५

348

त८

घ्यति। त्रुटति। तुत्रोट। त्रुटिता। तुट कलहकर्मणि। तुटति। तुतोट। तुटिता। चुट छुट छेदने। जुड बंधने। कड मदे। लुठं। श्ले
षणे। कृड घनत्वे। घनत्वं सांद्रता। चकडी। कृडिता। कुड बाल्ये। पुड उत्सर्गे। घुट प्रतिघाते। तुड तोडने। तोडनं भेदः।
थुड स्थुड संवरणे। थुडति। तुथोड। स्थुडति। पुस्फोड। खुड छुड इत्येके। स्फुर स्फुल संचळने। स्फुर स्फुरणे।
स्फुल संचळन इत्येके। स्फुरतिस्फुलत्यो निर्निविभ्यः षत्वं वा स्यात्। निष्फुरति। निःस्फुरति। स्फर इत्य
कारोपधं के चित्पठन्ति। पस्फार। स्फुड चुड व्रुड संवरणे। क्रुड भृड निमज्जन इत्येके। गुरी उद्यमने।
अनुदात्तेत्। गुरते। जुगुरे। गुरिता। णू स्तवने। दीर्घान्तः। परिणूतगुणोदयः। इतश्चत्वारः परस्मैपदिनः।
नुवति। अनुवीत्। धू विधूनने। धुवति। गु पुरीषोत्सर्गे। जुगुविथ। जुगुथ। गुता। गुष्यति। अगुषीत्। कु
त्वादन्तौ। अगुताम्। अगुषुः। ध्रु गतिस्थैर्ययोः। ध्रुव इति पाठान्तरम्। आद्यस्य ध्रुवति। द्वीहि गुवेतिव
त्। द्वितीयस्तु सेट्। दुध्रुविथ। ध्रुविता। ध्रुविष्यति। ध्रुयात्। अध्रुवीत्। अध्रुविष्टां। कुङ् शब्दे। दी
र्घांत इति कैयटादयः। कुविता। अकुविष्ट। ह्रस्वांतोयमिति न्यासकारः। कुता। अकुत। वृत।

।राम॥
।।५२।।

349

कुटादयो वृत्ताः॥४१॥ ॥ पृङ् व्यायामे। प्रायेण व्याङ्पूर्वः। रिङ्। इयङ्। व्याप्रियते। व्यापप्रे। व्यापप्राते। व्यापप्रिरे। व्यापरिष्यते। व्याप्र
ता। व्यापृषाताम्। मृङ् प्राणत्यागे। म्रियतेर्लुङ्लिङोश्च। लुङ्लिङोः शितश्च प्रकृतिभूतान्मृङस्तङ् नान्यत्र। ङित्वं स्वरार्थं
म्रियते। ममार। ममर्थ। मम्रिव। मर्तासि। मरिष्यति। मृषीष्ट। अमृत। अथ परस्मैपदिनः सप्त। रि पि गतौ। अन्तरङ्ग
त्वादियङ्। रियति। पियति। रेता। पेता। धि धारणे। क्षि निवासगत्योः। षू प्रेरणे। सुवति। सविता। कॄ विक्षेपे। किरति। कि
रतः। चकार। चकरतुः। करिता। करीता। कीर्यात्। अकारीत्। किरतौ लवने। उपात्किरतेः सुडागमः स्याच्छेदेऽर्थे। उ
पस्किरति। अडभ्यासव्यवायेऽपि सुट् कात्पूर्व इति वक्तव्यम्। उपास्किरत्। उपचस्कार। हिंसायां प्रतेश्च। उपात्प्रते
श्च किरतेः सुट् स्याद्धिंसायाम्। उपस्किरति। प्रतिस्किरति। गॄ निगरणे। अचि विभाषा। गिरते रेफस्य लत्वं वा स्या
दजादौ। गिरति। गिलति। जगार। जगाल। जगरिथ। जगलिथ। गरिता। गरीता। गलिता। गलीता। दृङ् आद
रे। आद्रियते। आद्रियेते। आदद्रे। आददृषे। आदर्ता। आदरिष्यते। आदृषीष्ट। आदृत। आदृषाताम्। धृङ्
अवस्थाने। ध्रियते। अथ परस्मैपदिनः षोडश। प्रच्छ ज्ञीप्सायाम्। पृच्छति। पप्रच्छ। पप्रच्छतुः। पप्रच्छिथ। पप्र

ष्टा। स्रष्टा। स्रक्ष्यति। अस्राक्षीत्। दृता। किरादयो [illegible] ॥ सृज विसर्गे। विलापार्थ [illegible] जिदृशोः। ससर्जिथ। सस्रष्ठ। स्रष्टा।
स्रक्ष्यति। सृजिदृशोर्झल्यमकिति। इत्यमागमः। सृजेत्। सृज्यात्। अस्राक्षीत्। टुमस्जो शुद्धौ। मज्जति। ममज्ज। मस्जिन
शोर्झलीति नुम्। मस्जेरन्त्यात्पूर्वो नुम्वाच्यः। संयोगादिलोपः। ममङ्क्थ। ममज्जिथ। मङ्क्ता। मङ्क्ष्यति। अमाङ्
क्षीत्। अमाङ्क्ताम्। अमाङ्क्षुः। रुजो भङ्गे। रोक्ता। रोक्ष्यति। अरौक्षीत्। अरौक्ताम्। भुजो कौटिल्ये। रुजिवत्।
छुप स्पर्शे। छोप्ता। अच्छौप्सीत्। रुश रिश हिंसायाम्। लघ्यांतौ। रोष्टा। रोक्ष्यति। रेष्टा। रेक्ष्यति। लिश गतौ। अलि
क्षत्। स्पृश संस्पर्शने। स्प्रष्टा। स्पर्ष्टा। स्प्रक्ष्यति। स्पर्क्ष्यति। अस्प्राक्षीत्। अस्पार्क्षीत्। अस्पृक्षत्। विछ गतौ।
गुपूधूपेत्यायः। आर्धधातुके वा। विच्छायति। विच्छायांचकार। विविच्छ। विश प्रवेशने। विशति। वेष्टा। मृश
आमर्शने। आमर्शनं स्पर्शः। अम्राक्षीत्। अमार्क्षीत्। अमृक्षत्। णुद प्रेरणे। कर्त्रभिप्राये पिप्फछे परस्मै
पदार्थः पुनः पाठः। षद्लृ विशरणगत्यवसादनेषु। सीदती। शौवादिकवत्। इह पाठो नुम्विकल्पार्थः। सी
दती। सीदन्ती। ज्वलादौ पाठस्तु णार्थः। सादः। स्वरार्थश्च। शावैनुदात्तः। शास्तूदात्तः। शद्लृ शातने। स्वरार्थ

पित्स्वरेण। प्रत्ययस्वरेण।

त्यादितौर

कृ२

॥राम॥
॥५३॥

एवं पुनः पाव:ष्टात्। तुनास्ति स्वादेरिटो त इत्यात्मनेपदे ते के:। अथ षट् स्वरितेत:। मिल संगमे। मिल श्लेषण इति सं

पठितस्य पुनः कथ्चिति प्रायेतदर्थः। मिलति। मिलते। मिमेल। मिमिले। मुच्लृ मोक्षणे। शे मुचादीनां नु

म् स्यात्। मुंचति। मुंचते। मोक्ता। मुच्यात्। मुक्षीष्ट। अमुचत्। अमुक्त। अमुक्षाताम्। लुप्लृ छेदने। लुंप

ति। लुंपते। अलुपत्। अलुप्त। विद्लृ लाभे। विंदति। विंदते। विवेद। विविदे। व्याघ्रभूत्यादिमते सेडयम्।

वेदिता। भाष्यादिमते ऽनिट्। वेत्ता। परिवेत्ता। परिवर्जने। ज्येष्ठं परित्यज्य दारानग्नीश्च लब्धवानित्य

प५ र्थः। तन्वत्त्वौ। लिप उपदेहे। उपदेहो वृद्धिः। लिंपति। लिंपते। लेप्ता। लिपिसिचीत्यङ्। तङि तु वा। अलिप

त्। अलिप्त। अलिपत। षिच क्षरणे। सिंचति। सिंचते। असिचत्। असिचत। असिक्त। अभिषिंचति। अ

भ्यषिंचत्। अभिषिषेच। अथ त्रयः परस्मैपदिनः। कृती छेदने। कृंतति। चकर्त्त। कर्तिता। कर्तिष्यति।

कर्त्स्यति। अकर्तीत्। खिद परिघाते। खिंदति। चिखेद। खेत्ता। अयं दैन्ये दिवादौ रुधादौ च। पिश अ

352

वयवे। पिंशति। पेशिता। अयं दीपनायामपि। त्वष्टा रूपाणि पिंशतु।। ।।इति मुचादयस्तुदादयश्च।। ।।७।। रुधि-
रावरणे। नक्ष्वरितेतइरितश्चा। रुधादिभ्यः श्नम्। मित्वादन्त्यादचः परः। नित्यत्वाद्गुणं बाधते। रुणद्धि। श्नसो-
रल्लोपः। णत्वस्यासिद्धत्वादनुस्वारः। परसवर्णः। तस्यासिद्धत्वाण्णत्वं न। न पदान्तेति सूत्रेणानुस्वारसवर्ण-
योर्ल्लोपो नेष्टः। निवर्तते। रुन्धः। रुन्धन्ति। रुंधे। रोद्धा। रोत्स्यति। रोत्स्यते। रुणद्धु। रुंधात्। रुन्धि। रुणधानि।
रुणधै। अरुणत्। अरुंधाम्। अरुणत्। अरुणः। अरुणधम्। अरुधत्। अरौत्सीत्। अरुद्ध। भिदिर् वि-
दारणे। भिनत्ति। भिंते। भेत्ता। भेत्स्यति। भेत्स्यते। अभिनत्। अभिनताम्। अभिनत्। अभिनः। अ-
भिनदम्। अभिंत्ता। अभिदत्। अभैत्सीत्। अभित्त। छिदिर् द्वैधीकरणे। अच्छिदत्। अच्छैत्सीत्। अ-
च्छित्त। रिचिर् विरेचने। रिणक्ति। रिङ्क्ते। रिरेच। रिरिचे। रेक्ता। अरिणक्। अरिचत्। अरैक्षीत्। अरि-
क्त। विचिर् पृथग्भावे। विनक्ति। विङ्क्ते। क्षुदिर् संपेषणे। क्षुणत्ति। क्षुन्ते। क्षोत्ता। अक्षुदत्। अक्षौ-
त्सीत्। अक्षुत्त। युजिर् योगे। योक्ता। उछृदिर् दीप्तिदेवनयोः। छृणत्ति। छृन्ते। चच्छर्द। सेसिचीतिवे

पर७

।।राम।।
।।५४।।

353

छर्त्स्यति

ट्रूव छृदिषे। वछृत्से। छर्दिता। छर्दिष्यति। अछृदत्। अछर्दीत्। अछर्दिष्ट। उतृदिर् हिंसानादरयोः।
तृणत्तीत्यादि छृणत्तिवत्। कृती वेष्टने। परस्मैपदी। कृणत्ति। आर्धधातुके तौदादिकवत्। ञि
इंधी दीप्तौ। अयमात्मनेपदिनः। श्नान्नलोपः। श्नमः परस्य नस्य लोपः स्यात्। श्नसोरल्लोपः। इ
न्धे। इन्त्से। इंधिता। इनधै। ऐंधा ऐंधाः। खिद दैन्ये। खिन्ते। खेत्ता। विद विचारणे। विन्ते। वेत्ता। अथ प
रस्मैपदिनः। शिष्लृ विशेषणे। शिनष्टि। शिंष्टः। शिंषन्ति। शिशेषिथ। शेष्टा। शेक्ष्यति। हेधिः। जश्त्वम्।
ष्टुत्वम्। झरो झरीति वा लोपः। अनुस्वारपरसवर्णौ। शिण्ढि। शिण्ड्ढि। शिनषाणि। अशिनट्।
लृदित्वादङ्। अशिषत्। पिष्लृ संचूर्णने। शिषिवत्। भंजो आमर्दने। भनक्ति। बभंजिथ। ब
भङ्थ। भङ्क्ता। भुज पालनाभ्यवहारयोः। भुनक्ति। भोक्ता। अभुनक्। तृह हिसि हिंसायाम्।
तृणह इम्। तृहः। श्नमि कृते इमागमः स्याद्धलादौ पिति। तृणेढि। तृण्ढः। ततर्ह। तर्हिता। अ
तृणेट्। हिनस्ति। जिहिंस। हिंसिता। उंदी क्लेदने। उनत्ति। उन्तः। उंदंति।

पिनष्टि ७

तर्क्ष्यति

म१

ज्यानन्नर

तुं हां वकार। औ नत। औ न्नामू। औं दनू। औ नः। औ नत। औ नदमू। अं स्त्यक्तिम ग्रहण कांति

गतिषु। अनक्ति। अङ्क्तः। अंजन्ति। आनंजिथ। आनङ्क्थ। अङ्क्ता। अंजिता। अङ्ग्धि।

अनजानि। आनक्। अंजेः सिचि। अंजेः सिचो नित्यमिटस्यात्। आंजीत्। तंचू संकोचने।

तनक्ति। तङ्क्ता। तंचिता। ओविजी भयचलनयोः। विनक्ति। विङ्क्तः। विजे इडिति ङित्स्यमू।

विविजिथ। विजिता। अविनक्। अविजीत्। वृजी वर्जने। वृणक्ति। वर्जिता। पृची सम्पर्के।

पृणक्ति। पपर्च। ॥इति रुधादयः॥ ॥अथ सप्तस्वरितेतः। तनु विस्तारे। तनादि कृञ्भ्य

उः। तनोति। तन्वः। तनुवः। तनुते। ततान। तेने। तनु। अतनीत्। अतानीत्। तनादिभ्यस्तथा ॥राम॥

सोः। तनादेः सिचो वा लुक् स्यात्तथासोः। थासा साहचर्यादिक वचनं तशब्दो गृह्यते तेनेह ॥५५॥

न। यूयमतनिष्ट। अतनिष्ट। अनुदात्तोपदेशेत्यनुनासिकलोपः। तङि। अतत। अ

355

तनिष्ट। अतथाः। अतनिष्ठाः। षणु दाने। सनोति। सनुते। ये विभाषा। सायात्। सन्यात्। जनसनेत्यात्वम्। असत।
असनिष्ट। असाथाः। असनिष्ठाः। क्षणु हिंसायाम्। क्षणोति। क्षणुते। ह्म्यन्तेति न वृद्धिः। अक्षणीत्। अक्षत। अ
क्षणिष्ट। अक्षथाः। अक्षणिष्ठाः। क्षिणु च। उ प्रत्ययनिमित्तो लघूपधगुणः संज्ञापूर्वको विधिरनित्य इति न भ
वतीत्यात्रेयादयः। भवत्येवेत्यन्ये। क्षिणोति। क्षेणोति। क्षेणितासि। क्षेणितासे। अक्षेणीत्। अक्षित। अ
क्षेणिष्ट। ऋणु गतौ। ऋणोति। अर्णोति। अर्णुतः। अर्ण्वन्ति। आनर्ण। आनृणे। अर्णितासि। आर्णीत्।
आर्त। आर्णिष्ट। आर्थाः। आर्णिष्ठाः। तृणु अदने। तृणोति। तर्णोति। तृणुते। तर्णुते। घृणु दीप्तौ। ज
वर घर्ण। जघृणे। अथ द्वानुदात्तेतौ। वनु याचने। वनुते। ववने। चान्द्रमते परस्मैपदी। वनोति। ववान। म
नु अवबोधने। मनुते। मेने। डुकृञ् करणे। करोति। अत उत्सार्वधातुके। कुरुतः। यण्। नभकुर्छु
राम् इति न दीर्घः। कुर्वन्ति। नित्यं करोतेः। करोतेः प्रत्ययोकारस्य नित्यं लोपः स्यान्म्वोः परयोः। कुर्वः।

।।राम।
।।५६।

वकथीवहृवा।कर्त्ता।करिष्यति।ये वा।कृञ उतो लोपः स्याद्यादौ प्रत्यये परे।कुर्यात्।आशिषि क्रियात्।कृ
षीष्ट।अकार्षीत्।तनादिभ्य इति लुको नावेकृत्वादगादिति सिचो लोपः।अकृत।अकृथाः।संपरिभ्यां
करोतौ भूषणे।समवाये वा।ये वा।संपरिपूर्वस्य करोतेः सुट् स्याद्भूषणे संघे वार्थे।संस्करोति।अलंकरोती
त्यर्थः।संस्कुर्वंति।संघीभवंतीत्यर्थः।संपूर्वस्य क्वचिदभूषणेपि सुट्।संस्कृतं भक्षा इति ज्ञापकात्।
परिनिविभ्य इति षः।परिष्करोति।सिवादीनां वा।पर्यष्कार्षीत्।पर्यस्कार्षीत्।उपात्प्रतियत्नवैकृतवाक्या
ध्याहारेषु च।उपात्कृञः सुट् स्यादेष्वर्थेषु।चात्प्रागुक्तयोरर्थयोः।प्रतियत्नो गुणाधानं।विकृतमेव वै
कृतं विकारः।वाक्यस्याध्याहारः आकांक्षितैकदेशपूरणम्।उपस्कृता कन्या।अलंकृतेत्यर्थः।उ
पस्कृता ब्राह्मणाः समुदिता इत्यर्थः।एधोदकस्योपस्कुरुते।गुणाधानं करोतीत्यर्थः।उपस्कृतं भुं
क्ते।विकृतमित्यर्थः।उपस्कृतं ब्रूते।वाक्याध्याहारेण ब्रूत इत्यर्थः।सुट्कात्पूर्वेऽड्भ्यासव्यवायेपीत्युक्त
म्।संचस्कार।कात्पूर्व इत्यादि लाघवे व्याख्यातम्।तथा हि।पूर्वं धातुरुपसर्गेण युज्यते।अन्तरंगत्वा

।।राम।।
।।५६।।

स्सुट्। ततो द्वित्वम्। एवं च ऋतश्च संयोगादेर्गुणः। संचस्करतुः। हृस्वस्य स्तते चे ऋतो भारद्वाजस्येति सूत्रे च कृञो सुट् इति व
क्तव्यम्। तेन ससुट्कस्य स्येट्। संचस्करिथ। संचस्करिव। गुणोर्त्तीति सूत्रे चेनित्यं छंदसीति सूत्रान्नित्यमित्यनुवर्त्तते।
नित्यं यः संयोगादिस्तस्येत्यर्थात् सुटि गुणो न। संस्क्रियात्। ऋतश्च संयोगादेरिति लिङ्सिचोर्नेट्। एकाच उ
पदेशे इति सूत्रादुपदेश इत्यनुवर्त्य उपदेशे यः संयोगादिरिति व्याख्यानात्। संस्कृषीष्ट। समस्कृत। सम
स्कृषाताम्। ॥ इति तनोत्यादयः॥ ॥डुक्रीञ् द्रव्यविनिमये। क्र्यादिभ्यः श्ना। क्रीणाति। ई हल्यघोः। क्रीणी
तः। इत्वात्पूर्वं झोऽन्तादेशः परत्वान्नित्यत्वादंतरंगत्वाच्च। एवं च झस्यान्तिलाभः। ततः श्नाभ्यस्तयोरित्यालो
पः। क्रीणंति। क्रीणीते। क्रीणाते। क्रीणते। चिक्राय। चिक्रियतुः। चिक्रयिथ। चिक्रेथ। चिक्रियिव। चिक्रि
यिषे। क्रेता। क्रेष्यति। क्रीयात्। क्रेषीष्ट। अक्रैषीत्। अक्रेष्ट। प्रीञ् तर्पणे कांतौ च। कांतिः कामना।
प्रीणाति। प्रीणीते। श्रीञ् पाके। मीञ् हिंसायाम्। हिनुमीना। प्रमीणाति। प्रमीणीतः। मीनातिमि
नोतीत्यात्वविषये आत्वम्। ममौ। मिम्यतुः। ममिथ। ममाथ। मिम्ये। माता। मास्यति। मीयात्। मासी
ष्ट। अमासीत्। अमासिष्टाम्। अमास्त। षिञ् बंधने।

स्त ६

सिनाति। सिनीते। सिषाय। सिष्ये। सेता। स्कुञ् आप्रवणे। स्तंभुस्तुंभुस्कंभुस्कुंभुस्कुञ्भ्यः श्नुश्च। चात् श्ना। स्कु
नोति। स्कुनुते। स्कुनाति। स्कुनीते। चुस्काव। चुस्कुवे। स्कोता। अस्कोषीत्। अस्कोष्ट। स्तंभ्वादयश्चत्वारः
सौत्राः सर्वे रोधनार्था इत्येके। माधवस्तु प्रथमतृतीयौ स्तंभार्थौ द्वितीयो निष्कोषणार्थः चतुर्थो
धारणार्थ इत्याह। सर्वे परस्मैपदिनः। न्लोपः। विष्टभ्नोति। विष्टभ्नाति। अवष्टभ्नोति। अवष्टभ्ना
ति। अवतष्टंभ। जृस्तंभ्वित्यङ्वा। व्यष्टभत्। व्यष्टंभीत्। स्तुभ्नोति। स्तुभ्नाति। वेः स्कभ्नातेर्नित्य
म्। वेः परस्य स्कभ्नातेः सस्य षः स्यात्। विष्कभ्नोति। विष्कभ्नाति। स्कुभ्नाति। हलः श्नः शान
ज्झौ। हलः परस्य श्नः शानजादेशः स्याद्धौ परे। स्तभान। स्तुभान। स्कभान। स्कुभान। प
क्षे स्तभ्नुहीत्यादि। युञ् बंधने। युनाति। युनीते। योता। क्नूञ् शब्दे। क्नूनाति। क्नूनीते। क्नवि
ता। द्रूञ् हिंसायाम्। द्रूणाति। द्रूणीते। पूञ् पवने। प्वादीनां ह्रस्वः। शिति परे। पुनाति। पुनी
ते। पविता। लूञ् छेदने। लुनाति। लुनीते। स्तॄञ् आच्छादने। स्तृणाति। स्तृणीते। तस्तार।

॥राम॥
॥१७॥

359

तस्तरतुः। स्तरिता। स्तरीता। स्तृणीयात्। स्तृणीत। आशिषि। स्तीर्यात्। लिङ्सिचोरिति वेट्। न लिङि। । स्तरिषी
ष्ट। उश्चेति कित्वम्। स्तीर्षीष्ट। सिचि च परस्मैपदेष्विति न दीर्घः। अस्तारीत्। अस्तारिष्टाम्। अस्तरिष्ट। अस्त
रीष्ट। अस्तीर्ष्ट। कॄञ् हिंसायाम्। कृणाति। कृणीते। चकार। चकरे। वॄञ् वरणे। वृणाति। वृणीते। ववार। ववरे।
वरिता। वरीता। आशिषि। उदोष्ठ्यपूर्वस्य। वूर्यात्। वरिषीष्ट। वूर्षीष्ट। अवारीत्। अवारिष्टाम्। अवरिष्ट। अ
वरीष्ट। अवूर्ष्ट। धूञ् कम्पने। धुनाति। धुनीते। दुधविथ। दुधोथ। दुधुविव। धोता। धविता। स्तुसुधूञ्भ्य
इतीट्। अधावीत्। अधविष्ट। अधोष्ट। अथ वध्रात्यंताः परस्मैपदिनः। शॄ हिंसायां। शॄदॄपां ह्रस्वो
वेति ह्रस्वपक्षे यण्। अन्यदा ऋच्छत्यॄतामिति गुणः। शश्रतुः। शशरतुः। श्र्युकः कितीति निषेधस्य क्रादि
नियमेन बाधः। शशरिव। शश्रिव। शरिता। शरीता। शृणीहि। शीर्यात्। अशारिष्टाम्। पॄ पालनपूरण
योः। पप्रतुः। पपरतुः। आशिषि। पूर्यात्। वॄ वरणे। भॄ भरणे इत्येके। भॄ भर्त्सने। भरणेऽप्येके। मॄ हिंसायाम्।

360

मृणाति। ममार। दृ विदारणे। ददरतुः। दद्रतुः। ज्ॄ वयोहानौ। झॄ इत्येके। धॄ इत्यन्ये। नॄ नये। कॄ हिंसायाम्। ॠ गतौ। ऋणाति। अरां
चकार। अरिता। अरीता। आर्णात्। आर्णीताम्। इयिहि। आरीत्। आरिष्टाम्। गॄ शब्दे। ज्या वयोहानौ। ग्रहिज्या। हलः। अंगावय
वात् हलः परं यत्संप्रसारणं तदंतांगस्य दीर्घः स्यात्। इति दीर्घे कृते। प्वादीनां ह्रस्वः। जिनाति। जिज्यौ। जिज्यतुः। री गतिरेषण
योः। रेषणं वृकशब्दः। ली श्लेषणे। विभाषा लीयतेरित्येज्विषये आत्वं वा। ललौ। लिलाय। लाता। लेता। व्ली वरणे।
व्लिनाति। प्ली गतौ। वृता ल्वादयो वृत्ताः। प्वादयोपीत्येके। व्री वरणे। स्री लये। लर इत्येके। श्रीशृ हिंसायाम्।
एषां त्रयाणां ह्रस्वः। बंधु बंधने। बध्नाति। बबंधिथ। बबंध। बंधा। बंधारौ। भंत्स्यति। बधान। अभांत्सीत्। पूर्वत्रासि
द्धमिति भष्भावात्पूर्वं लिसिज्लोपः। प्रत्ययलक्षणेन सादिप्रत्ययमाश्रित्य भष्भावो न। प्रत्ययलक्षणं प्रति
सिज्लोपस्यासिद्धत्वात्। अबांद्धाम्। अभांत्सुः। वृङ् संभक्तौ। वृणीते। वव्रे। ववृषे। वरिता। वरीता। अ
वरिष्ट। अवरीष्ट। अवृत। श्रंथ विमोचनप्रतिहर्षयोः। इतः परस्मैपदिनः। श्रथ्नाति। श्रंथिग्रंथीत्यादिना कि
त्वे एत्वाभ्यासलोपौ। तथात्र वक्तव्याविति हरदत्तादयः। श्रेथतुः। श्रेथुः। इदं किंत्वं पितामपीति सुधाकरम
×केषांचिन्मतेन तु न। ज्ञा अवबोधने। ज्ञाजनोर्जा। जानाति। दीर्घनिर्देशसामर्थ्यान्न ह्रस्वः। ६५

प्र ४

पद्मे १

॥राम॥
॥५८॥

थे

ग्रंथ

ते श्रेथिथ। अस्मिन्नपि पक्षे णलि। शश्राथ। उत्तमे तु शश्राथ। शश्रँति। माधवः। तत्र मूलं मृग्यम्। मंथ विलोडने। श्रंथ संदर्भे। अथ लिहाकुं
थेः पुनः पाठः रूपं तु तत्क्रमम्। कुंथ संश्लेषणे। संक्लेश इत्येके। कुथ्नाति। चुकुंथ। कुथेति दुर्गः। चुकोथ। मृद क्षोदे। मृद्नाति। मृदाना
ड्वा। अयं सुखेपि। मृडत्वा। मृडणाति। गुध रोषे। गुध्नाति। कुष निष्कर्षे। कुष्णाति। कोषिता। निरकुषः। निःपरात् कुषो बलादेरा
धातुकस्य इड्वा स्यात्। निष्कोषिता। निष्कोष्टा। निरकोषीत्। निरकुक्षत्। क्षुभ संचलने। क्षुभ्ना। विक्षुभ्ना। क्षुभ्नाति। क्षुभ्नी
तः। क्षोभिता। क्षुभ्नाण। णभ तुभ हिंसायाम्। नभ्नाति। तुभ्नाति। नभते तोभते इति शपि। नभ्यति तुभ्यति इति श्यनि।
क्लिश विबाधने। शादिति स्तुत्वनिषेधः। क्लिश्नाति। क्लेशिता। क्लेष्टा। अक्लेशीत्। अक्लिक्षत्। अश भोजने। अश्ना
ति। आश। उ ध्रस उंछे। उकार इत्। ध्रस्नाति। उकारो धात्ववयव इत्येके। उध्रसांचकार। इष आभीक्ष्ण्ये। पौनःपु
न्यं भृशार्थो वा आभीक्ष्ण्यम्। इष्णाति। एषिता। तीषसहेत्यत्र सहिना साहचर्याद्दिकारविकरणतौदादिकस्य
विषे ग्रहणं। न तु इष्यति क्र्याद्योरित्याहुः। वस्तुतस्तु इष्णातेरपि विकल्प उविता। तथा च वार्तिकम्। इषेस्तका
रे श्यन्प्रत्ययात्प्रतिषेध इति। विष विप्रयोगे। विष्णाति। वेष्टा। प्रुष प्लुष स्नेहनसेवनपूरणेषु। प्रुष्णाति। प्लुष्णाति।

[illegible] मःशारदे
[illegible] तिसरले

३२

हा॥

पुषपुष्टौ।पोषिता।मुषस्तेये।मोषिता।खचभूतप्रादुर्भावे।भूतप्रादुर्भावोऽतिक्रांतोत्पत्तिः।खच्ञाति।वांतोयमि
त्येके।छ्वोःशूडनुनासिकेच।सतुक्कस्य छस्य वस्य च क्रमात् शऊठ् एतावादेशौ स्तोऽनुनासिके क्वौ झलादौ च कि
ति।खौनाति।चखाव।खविता।शानचःपरत्वादूठि कृते हलंतत्वाभावान्नशानच्।खौनीहि।हेठच।ष्टुत्वम्।
ग्णाति।ग्रहउपादाने।स्वरितेत्।ग्रहिज्या।गृह्णाति।गृह्णीते।ग्रहोऽलिटि दीर्घः।एकाचो ग्रहेर्विहितस्येटो दी
र्घः स्यान्नतु लिटि।ग्रहीता।लिटि तु जग्रहिथ।गृह्यात्।ग्रहिषीष्ट।ह्म्यंतेति न वृद्धिः।अग्रहीत्।अग्रही
ष्टाम्।अग्रहीष्ट।अग्रहीषातां।अग्रहीषताः॥ ९॥ ॥इतिक्र्यादयः॥ ॥चुरस्तेये।सत्यापपाशरूपवीणा
तूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्योणिच्।एभ्योणिच्स्यात्।चूर्णांतेभ्यः प्रातिपदिका
द्धात्वर्थ इत्येव सिद्धम्।तेषामिहग्रहणं प्रपंचार्थम्।चुरादिभ्यस्तुस्वार्थे।पुगंतेतिगुणः।सनाद्यंताध ॥राम॥ ॥५९॥
तिधातुत्वम्।तिपूशबादि।गुणायादेशौ।चोरयति।णिचश्च।णिजंतादात्मनेपदं स्यात् कर्तृगामिनि क्रि
याफले।चोरयांचोरया मास।चोरयिता।चोर्यात्।चोरयिषीष्ट।णिश्रीति चङ्।णौ चङीति ह्रस्वः।

ते॰

363

चिंतेति पाठितव्ये इदित्करणं णिचः पाक्षिकत्वे लिंगम्। तेन॰ चिंत्यात्। चिंत्यते इत्यादौ न लोपो न। चिन्तति। २

चितं। हलादिः शेषः। दीर्घो लघोरित्यस्यासत्यदी॰ घः। अचूचुरत्। अचूचुरत। चितिस्मृत्याम्। चिंतयति। अचि
चिंतत्। चिंतेत्। एतच्च ज्ञापकं सामान्यापेक्षमित्येके। अत एव हलित्यत्र वृत्तिकृता॰ जगणतुः। जगणुः। इत्युदाहृ
तत्वात्। विशेषापेक्षमित्यपरे। अत एवाध्येषादेः त्यस्य नवैयर्थ्यम्। यत्रि संकोचे। यंत्रयति। यंत्रेति पठिते तु शा
क्यम्। यत्तु इदित्करणं द्योतनीति माधवेनोक्तम्। तच्चिंत्यम्। एवं कुद्रितत्रिमव्यादिषु। स्फुडि परिहासे। स्फुण्ड
यति। इदित्करणात् स्फुण्डति। स्फुटीति पाठान्तरम्। स्फुण्टयति। स्फुण्टति। लक्ष दर्शनांकनयोः। कुद्रि अ
नृतभाषणे। कुंद्रयति। लड उपसेवायाम्। लाडयति। मिदि स्नेहने। मिन्दयति। मिन्दति। ओलडि उत्
क्षेपणे। ओलण्डयति। ओलण्डति। ओकार इदित्येके। लण्डयति। लण्डति। उकारादिरयमित्यन्ये। ज
ल अपवारणे। लज इत्येके। पीड अवगाहने। पीडयति। भ्राजभासभाषदीपजीवपीडामन्यतरस्या मील २
म्। एषामुपधाया ह्रस्वो वा स्याच्चङ्परे णौ। अपीपिडत्। अपिपीडत्। नट अवस्यन्दने। अवस्यन्दनं

जै २

सिद्धान्तकौमुदी॥
॥१

त २

ना॥ घम्। श्रथ प्रयत्ने। प्रस्थान इत्येके। बध संयमने। बाधयति। बंधेति चांद्राः। पॄ पूरणे। पारयति। दीर्घोच्चारणं णिचः
पाक्षिकत्वे लिङ्गम्। तद्भि सेदूक त्वाया। एवं च पृणाति पिपर्त्तिर्योपरिते सा हि सिद्धावपि पर्ति· परं इत्यादि सिद्धिः
फलम्। ऊर्ज बलप्राणनयोः। पक्ष परिग्रहे। वर्ण चूर्ण प्रेरणे। वर्ण वर्णन इत्येके। प्रथ प्रख्याने। प्राथयति। नान्ये
मितो हेताविति वक्ष्यमाणत्वान्नास्य मित्त्वम्। अत्स्म इत्यत्र अथ प्रथ स्तृस्पशाम्। एषामभ्यासस्य अकारोन्तादे
शः स्याच्चङ्परे णौ। इत्यपवादः। अपप्रथत्। पृथ प्रक्षेपे। पार्थयति। उऋत्॥ उपधाया ऋवर्णस्य स्थाने ऋत् स्या
द्वा चङ्परे णौ। इररामपवादः। अपीपृथत्। अपपर्थत्। पथ इत्येके। पाथयति। षम्ब संबंधने। संबयति। असस
म्बत्। शंब च। अशशंबत्। सांब इत्येके। भक्ष अदने। कुट्ट छेदनभर्त्सनयोः। पूरण इत्येके। कुट्टयति। पुट्ट चुट्ट
अल्पीभावे। अट्ट षुट्ट अनादरे। अट्टयति। अयं दोपधः। हु तस्यासिद्धत्वान्नन्द्राः इति निषेधः। आट्टि
टत्। लुण्टस्तेये। लुण्टयति। लुण्टतीति तु लुटि स्तेय इति भौवादिकस्य। शठ श्वठ असंस्कारगत्योः। श्वठ

रा

॥ ६०॥

365

त्येके। तुजिपिजि हिंसाबलादाननिकेतनेषु। तुंजयति। पिंजयति। इदित्करणात् तुञ्जति पिञ्जति। तुजपिजेति केचित्। लजि
लुजी त्येके। पिस गतौ। पिसयति। पेसतीति। शपि गत मृषान्त्वसामप्रयोगे। श्वल्क वल्क परिभाषणे। ष्णिह स्नेहने।
स्फिट इत्येके। स्मिट अनादरे। अषोपदेशत्वान्नषः। स्मिसि स्मिटत्। स्मिङ् अनादर इत्येके। ङित्वस्यावयवेऽचरित
र्थत्वा। णिजन्तात् तङ्। स्माययते। श्लिष श्लेषणे। पथि गतौ। पंथयति। पंथति। पिच्छ कुट्टने। छदि संवरणे। छंदयति। छं
दति। श्रण दाने। प्रायेणायं विपूर्वः। विश्राणयति। तड आघाते। ताडयति। खड खडि कडि भेदने। खाडयति।
खंडयति। खण्डति। कण्डयति। कण्डति। कुडि रक्षणे। गुडि वेष्टने रक्षण इत्येके। कुठि इत्यन्ये। अवकुण्ठयति। अ
वकुण्ठति। गुठि इत्यपरे। खुडि खण्डने। वटि विभाजने। वडी त्येके। मडि भूषायां हर्षे च। भडि कल्याणे। छर्द वि
मने। पुस्त बुस्त आदरानादरयोः। चुद संचोदने। नक्क धक्क नाशने। णोपदेशलक्षणपर्युदस्तोयम्। नक्क
यति। चक्क चुक्क व्यथने। क्षल शौचकर्मणि। तल प्रतिष्ठायाम्। तुल उन्माने। तोलयति। अत एव तुलया। कथं
तुलयति तुलना इति। अतुलोपमाभ्यामिति निपातनात् इदं तस्य तुलाशब्दस्य सिद्धौ तन्तो रिशा। दुल

५२

366

त्क्षेपे। पुल महत्वे। चुल समुच्छ्राये। मूल रोहणे। कल किल क्षेपे। बिल भेदने। तिल स्नेहने। चल भृतौ। पाळ रक्षणे। लूष हिं
ल्बं २ सायाम्। शुल्ब माने। शूर्प च। चुट छेदने। मुट संचूर्णने। पडि पसि नाशने। पण्डयति। पण्डति। पंसयति। पंसति। व
ज मार्गसंस्कारगत्योः। शुल्क अतिस्पर्शने॥ चपि गत्याम्॥ चम्पयति॥ चम्पति॥ क्षपि क्षान्त्याम्॥ क्षम्पयति॥ क्षम्प
ति॥ छजि कृच्छ्रजीवने॥ श्वर्त गत्याम्॥ श्वभ्र च॥ ज्ञप मिच्च॥ अयं ज्ञाने ज्ञापने च वर्तते॥ मितां ह्रस्वः॥ मितामुप
धाया ह्रस्वः स्याण्णौ परे॥ ज्ञपयति॥ यम च परिवेषणे॥ चान्मित्॥ परिवेषणमिह वेष्टनम्॥ न तु भोजनं॥ नापि
वेष्टना॥ यमयति चन्द्रम्॥ परिवेष्टत इत्यर्थः॥ चह परिकल्कने॥ चहयति॥ अचीचहत्॥ कथादौ चह्यमाण
स्य तु अदंतत्वे नाग्लोपित्वाद्दीर्घसन्वद्भावौ न॥ अचचहत्॥ चप इत्येके॥ चपयति॥ रह त्याग इत्येके॥ अरीर
हत्॥ कथादेस्तु अररहत्॥ बळ प्राणने॥ बळयति॥ चिञ् चयने॥ चिस्फुरोर्णौ॥ आत्वं वा स्यात्॥ अर्तिह्री
ब्लीरीक्नूयीक्ष्माय्यातां पुङ् णौ॥ एषां पुक् स्याण्णौ॥ चययति॥ चपयति॥ निष्करणसामर्थ्याद्धस्य णिज्विक
ल्पः॥ चययति॥ चयते॥ प्रणिचयति॥ प्रनिचयति॥ नान्ये मितोऽहेतौ॥ स्वार्थे णिचि ज्ञपादिभ्योऽन्ये मितो न स्युः॥

श्री॥६०॥
॥राम॥
॥हरि॥

॥राम॥
॥६१॥

तेनश माही नाममंतत्व प्रयुक्तं मित्वेन। घट्ट चलने। मुस्त संघाते। खट्ट संवरणे। षट्ट स्फिट्ट चुबि हिंसायाम्। पूल संघाते। पू
र्णेत्येके। पुणेत्यन्ये। पुंस अभिवर्द्धने। टकि बंधने। टंकयति। टंकति। धूस कान्तिकरणे। दंत्यांतः। मूर्द्धन्यांत इत्यन्ये। ता
लव्यांत इत्यपरे। कीट वर्णे। चूर्ण संकोचने। पूज पूजायाम्। अर्क स्तवने। तपने इत्येके। शुठ आलस्ये। शुठि शोष
णे। शुण्ठयति। शुण्ठति। जुड प्रेरणे। गज माज शब्दार्थौ। गाजयति। माजयति। मर्च च। मर्चयति। घृ प्रस्रवणे। स्रा
वण इत्येके। पचि विस्तारवचने। पंचयति। पंचति। पंचते इति व्यक्तार्थस्य शपि गतम्॥ तिज निशाने। तेजयति। कृ
त संशब्दने। उपधाया श्च। धातोरुपधाभूतस्य ऋत इत्स्यात्। रपरत्वम्। हलि चेति दीर्घः। कीर्तयति। उर्ऋत्। तु
अचीकृतत्। अचिकीर्तत्। वर्ध छेदनपूरणयोः। कुबि आच्छादने। कुंबयति। कुंबति। कुभीत्येके। लुबि तुबि अ
दर्शने। अर्दने इत्येके। ह्लप व्यक्तायां वाचि। क्लृपेत्येके। चुटि छेदने। इल प्रेरणे। एलयति। [illegible]ति। एलि लद। म्ले
ज [illegible] म्लेच्छने। म्लेच्छ अव्यक्तायां वाचि। ब्रूस बर्ह हिंसायाम्। केचिद्बिहि। गर्ज गर्द शब्दे। गर्ध अभिकांक्षायाम्। मि
तिपवन्ति। गुर्द पूर्वनिकेतने। जसि रक्षणे। मोक्षण इत्येके। चिह्र। जंसयति। जंसति। ईड स्तुतौ। जसु हिंसायाम्।

उपधायां च

मूर्द्धं २

368

सिद्धांतकौमु
॥६२॥

क२

ष्टु

पिडि संघाते। रुष रोषे। रुट इत्येके। डिप क्षेपे। पसमुच्छ्राये। आकुस्मादात्मनेपदिनः। कुस्म नाम्नो वेति वक्ष्यते। तमसि व्याप्येत्यर्थः।
अर्त्रगामिफलार्थमिदं। चित संचेतने। चेतयते। अचीचितत। दशि दंशने। दंशयते। अददंशत। इहि स्वालिजना
वोदंशाति। आकुस्मीयमात्मनेपदं णिच् सन्नियोगेनैवेति व्याख्यातारः। न लोपे सज्जिसाहचर्याद्दिश्वाहेरेव ग्रहणं। दसि
दर्शनदंशनयोः। दंसयते। दंसति। दस इत्येके। डप डिप संघाते। तत्रि कुटुंबधारणे। तंत्रयते। चांद्रा धातुद्वयमिति मन्वा
कुटुंबयते इत्युदाहरंति। मत्रि गुप्तभाषणे। स्पश ग्रहणसंश्लेषणयोः। तर्ज भर्त्स तर्जने। वस्त गंध अर्दने। वस्तयते।
गंधयते। विष्क हिंसायाम्। हिष्क इत्येके। निष्क परिमाणे। लल ईप्सायाम्। कूण संकोचे। तूण पूरणे। भ्रूण आशाविशं
कनयोः। शठ श्लाघायाम्। यक्ष पूजायाम्। स्यम वितर्के। गूर उद्यमने। शम लक्ष आलोचने। नान्ये मित इति मि
त्वनिषेधः। शामयते। कुत्स अवक्षेपणे। त्रुट छेदने। कुट इत्येके। गल स्रवणे। भल आलंभने। कूट अप्रसादे।
अवसादन इत्येके। कुट्ट प्रतापने। वंचु प्रलंभने। वृष शक्तिबंधने। शक्तिबंधनं प्र जननसामर्थ्यं शक्तिसंबंधश्च।
वर्षयते। मद तृप्तियोगे। दिवु परिकूजने। गॄ विज्ञाने। गारयते। विद चेतनाख्याननिवासेषु। वेदयते। सत्त्रायां वि

ग्रैड२ आप्रदाने२

॥राम॥
॥६२॥

369

घते ज्ञाने वेत्ति विंत्ते विचारणे। विंदते विंदति प्राप्तो श्यन लुक् श्नम् शो षिदंकमाह॥१॥ मन स्तंसे मानयते। युजु गुञ्झाया
मू। यावयते॥ ॥कुस्म नाम्नो वा। कुस्मेति धातुः कुत्सितस्मयने वर्त्तते। कुस्मयते। चुकुस्म ते। अथवा कुस्मेति प्रातिप
दिकम्। ततो धात्वर्थे णिच्॥ ॥इत्याकुस्मीयाः॥ ॥चर्च अध्ययने। बुक्क भषणे। शब्द उपसर्गादाविष्कारे च। दाक्षिणे। प्रतिशब्दय
ति। प्रतिश्रुतमाविष्करोतीत्यर्थः। अनुपसर्गाच्च। आविष्कार इत्येव। शब्दयति। कण निमीलने। काणयति। णोरुपधायाह्र
स्वः। काण्यादीनां चेति विकल्प्यते। अचीकणत्। अचकाणत्। जसि नाशने। जंसयति। जंसति। षूद क्षरणे। सूदयति।
असूषुदत्। जसु ताडने। जासयति। जसति। पश बंधने। पाशयति। अम रोगे। आमयति। नान्ये मित इति निषेधः। अ
म४ म गत्यादौ शपि गतः। तस्माद्धेतुर्णौ। अमयति। चट स्फुट भेदने। विकासे शपोः स्फुटति स्फोटत इत्युक्तम्। घ
ट संघाते। घाटयति। हन्त्यर्थाश्चेति न गण्या। मुक्ता अपि हन्त्यर्थाः स्वार्थणिचं लभन्ते इत्यर्थः। द्विवु मर्दने। उदित्वाद्दे व
तीत्यपि। अर्ज प्रतियत्ने। अयमर्थान्तरेऽपि। द्रव्यमर्जयति। घुषिर् विशब्दने। घोषयति। घुषिर् विशब्दने इति सूत्रेऽवि
शब्दन इति निषेधात्। लिङ्गं दनित्योस्माणिच्। घोषयति। इरि त्वाद ङ्वा। अघुषत्। अघोषीत्। ण्यन्तस्य तु।

विशब्दनार्थादस्मात् चानंतरानिष्ठानास्तीति किंप्रतिषेधेनेति भावः १

370

सिद्धान

॥राम॥
॥हरि॥

अजू घुषत। आङः क्रंदसातत्ये। लौवादिकः क्रंदधातुराह्वानाद्यर्थ उक्तः स एवाङ्पूर्वो णिचं लभते सातत्ये। आक्रंदयति।
अन्ये तु। आङ्पूर्वो घुषिः क्रंदसातत्य इत्याहुः। आघोषयति। लस शिल्पयोगे। तसि भूष अलंकरणे। अवतंसयति।
अवतंसति। भूषयति। अर्ह पूजायाम्। ज्ञा नियोगे। आज्ञापयति। भज विश्राणने। शृधु प्रहसने। अशशर्धत्। अशी
शृधत्। यत निकारोपस्कारयोः। रक लग आस्वादने। राघ इत्येके। रग इत्यन्ये। अंचु विशेषणे। अंचयति।
उदित्त्वमिड्विकल्पार्थम्। अत एव विलाषितो णिज्वा। अंचति। एवं शृधु जसु प्रभृतीनामपि बोध्यम्। लिगि चित्री
करणे। लिङ्गयति। लिङ्गति। मुद संसर्गे। मोदयति सक्तून् घृतेन। त्रस धारणे। ग्रहण इत्येके। वारण इत्यन्ये। उ
ध्रस उञ्छे। उकारो धात्ववयव इत्येके। नेत्यन्ये। उध्रासयति। ध्रासयति। मुच प्रमोचने मोदने च। वस स्नेहच्छेदा
पहरणेषु। चर संशये। च्यु सहने। हसने चेत्येके। च्यावयति। च्युस इत्येके। च्योसयति। भुवोऽवकल्कने। अवक
ल्कनं मिश्रीकरणमित्येके। चिंतनमित्यन्ये। भावयति। कृपेश्च। कल्पयति। आ स्वदः सकर्मकात्। स्वदि
मलियाद्य सम्प्लवत्कर्मत्येव णिज्वा। ग्रस ग्रहणे। ग्रासयति फल्ल मू। पुष धारणे। पोषयति। दल विदारणे। दळ

॥राम॥
॥हरि॥

वि दारणे। दाळयति। पट पुट लुट तुजि मिजि पिजि लुजि लजि लषि त्रसि पिसि कुसि दसि कुशि घट घाटि बृहि
बर्हि बल्ह गुप धूप विछ चीव पुथ लोकृ लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः। पाटयति। पोटयति। लोटयति। तु
जयति। तुंजति। एवमपरेषामपि। घाटयति। घण्टयति। नाग्लोपिशास्वृदितामूणि च्यग्लोपिनः शास्तेः ऋदितां चोप
धाया ह्रस्वो न स्याच्चङ्परे णौ। अलुलोकत्। अलुलोचत्। अववर्त्तत्। वर्त्तयति। वर्धयति। उदित्वात्। वर्त्तति। वर्धति। रुट ल
जि अजि दसि भृशि रुशि शीक नद पुटि जुचि रघि लघि अहि रहि महि वा लडि तड नल वा पूरी आप्यायने।
इदित्वं निष्ठायामिण्निषेधाय। अत एव णिज्वा। पूरयति। पूरति। रुज हिंसायाम्। ष्वद आस्वादने। स्वाद इ
त्येके। असिषदत्। दीर्घस्य त्वषोपदेशत्वादसिस्वदत्॥ ॥आधृषाद्वा॥ ॥इतउर्ध्वं विभाषितणिचः। युष
धा। तुमलिख्याथ्यो युज पृच संयमने। योजयति। योजति। अयौजीत्। पर्चयति। पर्चति। पर्चिता। अपर्ची
त्। अर्च पूजायाम्। षह मर्षणे। साहयति। सहते। सरैवायं नागः सहति कलभेभ्यः पुरिसवम्। ईर क्षेपे। ली द्रवी
करणे। लाययति। लयति। लेता। वृजी वर्जने। वर्जयति। वर्जति। वृञ् आवरणे। वारयति। वरति। वरते।

लापयति।

सिद्धांतकौमु

जरीता १

वरिता। वरीता। ज्रि वयोहानौ। जारयति। जरति। जरिता। ज्रिच। ज्राययति। ज्रयति। ज्रेता। रिच वियोजनसम्पर्चनयोः। रे
चयति। रेचति। रेक्ता। शिष असर्वोपयोगे। शेषयति। शेषति। शेष्टा। अशिक्षत्। अयं विपूर्वोतिशये। तप दाहे। ता
पयति। तपति। तप्ता। तृप तृप्तौ। संदीपन इत्येके। तर्पयति। तर्पति। तर्पिता। छृदी संदीपने। छर्दयति। छर्दति।
छर्दिता। छर्दिष्यति। सेसिचीति विकल्पो न। साहचर्यात्तत्र शैधादिकस्यैव ग्रहणात्। चृप छृप तृप दृप संदी
पन इत्येके। चर्पयति। छर्पयति। दृभी भये। दर्भयति। दर्भति। दर्भिता। दृभ संदर्भे। अयं तु दाशवीदितः। श्रथ
मोक्षणे। हिंसायामित्येके। मी गतौ। माययति। मयति। मेता। ग्रंथ बंधने। ग्रंथयति। ग्रंथति। शीक आमर्ष
णे। चीक च। अर्द हिंसायाम्। अर्दयति। स्वरितेत्। अर्दति। अर्दते। हिसि हिंसायाम्। हिंसयति। हि
सति। हिनस्तीति श्नमि गतम्। अर्ह पूजायाम्। आङः षद पद्यर्थे। आसादयति। आसीदति। पाघ्रेति
सीदादेशः। आसत्ता। आसात्सीत्। शुंध शौचकर्मणि। शुंधिता। अशुंधीत्। अशुंधिष्ट। छद अपवार
णे स्वरितेत्। जुष परितर्कणे। परितर्कणमूहो हिंसा वा। परितर्पण इत्यन्ये। परितर्पणं परितृप्तिक्रिया। जो

यद्

॥राम॥
॥६७॥
॥६७॥

६

षयति। जोषति। प्रीतिसेवनयोः जुषित इति तुदादौ। धूञ् कम्पने णाविति धिकृत्य। धूञ्प्रीञोनुग्वक्तव्यः। धूनयति। धवति। धवते। केवि

न्तु धूञ्प्रीणोरिति पठित्वा प्रीणातिसाहचर्यच्छ्रौनातेरेव नुकमाहुः। धावयति। अयं स्वादौ क्र्यादौ तुदादौ च। स्वादौ ह्रस्वश्चात

थाचेकविरहस्ये॥ ॥धूनोति चम्पकवनानि धुनोत्यशोकं चूतं धुनाति धुवति स्फुटितातिमुक्तम्। वायुर्विधूनयति चम्प

कपुष्परेणून्नयत्काननेषु धवति चन्दनमंजरीश्च॥१॥ प्रीञ् तर्पणे। प्रीणयति। धूञ्प्रीणोरिति हरदत्तोक्तपाठे तु प्रायय

ति। श्रथयति। श्रथयते। श्रंथ ग्रंथ संदर्भे। आप्लृ लंभने। आपयति। आपति। ओपदे। ओप्या। स्वरितेदयमित्येके। आप ते। त

नु श्रद्धोपकरणयोः। उपसर्गाद्दिदैर्घ्ये। तानयति। वितानयति। तनति। वितनति। चन श्रद्धोपहननयोरित्येके। चानयति।

वनति। वद संदेशवचने। वादयति। स्वरितेत्। वदति। वदते। अनुदात्तेदित्येके। ववदतुः। ववदिथ। ववदाव धातौ। वच परि

भाषणे। वाचयति। वचति। वक्ता। अवाहीत्। मान पूजायाम्। मानयति। मानति। मानिता। विचारणे तु भौवादिको नि

त्यसनेतः। स्तम्भे मानयते इत्याकुस्मीयः। मन्यते मनुते इति दिवादौ तनादौ च। त्रपाप्लावात्मनेपदी। लावयते। ल

वेते। णिरूसंनियोगेनैवात्मनेपदमित्येके। सवति। गर्ह विनिंदने। मार्ग अन्वेषणे। कठि शोके। उत्पूर्वोयमुत्कंठायामूकं

ति॰

वत इत्यात्मनेपदी गतः। मृजू शौचालंकारयोः। मार्जयति। मार्जति। मार्जिता। मार्ष्टा। मृषँ तितिक्षायाम्। स्वरितेत्। मर्षयति। मर्षति। मृ
ष्यति। मृष्यते। इति दिवादौ। सेवने शपि मर्षति। धृष प्रसहने। धर्षयति। धर्षति।। ॥ इत्या धृषीयाः॥ ॥ अथादन्ताः। कथ वाक्यप्रबं
धे। अल्लोपस्य स्थानिवत्त्वान्न वृद्धिः। कथयति। अग्लोपित्वान्न दीर्घसन्वद्भावौ। अचकथत्। वर ईप्सायाम्। वरयति। वारयती
ति गतम्। गण संख्याने। गणयति। ई च गणः। गणेरभ्यासस्य ईस्याच्चङ्परे णौ वा। अजगणत्। अजीगणत्। शठ श्वठ स
म्यगवभाषणे। पट वट ग्रन्थे। रह त्यागे। अररहत्। स्तन गदी देवशब्दे। स्तनयति। गदयति। अजगदत्। पत गतौ वा। वा णिजन्तः॥
वाऽदन्त इत्येके। आद्ये पतयति पतति। पतांचकार। अपतीपतत्। द्वितीये पातयति। अपीपतत्। पष अनुपसर्गात्। गतौ विस्ते
व। पषयति। स्वर आक्षेपे। स्वरयति। रच प्रतियत्ने। रचयति। कल गतौ संख्याने च। चह परिकल्कने। परिकल्कनं दम्भः
शाठ्यं च। मह पूजायाम्। महयति। महतीति गते शपि। सार कृप श्रथ दौर्बल्ये। सारयति। कृपयति। श्रथयति। स्पृह ई
प्सायाम्। भाम क्रोधे। अबभामत्। सूच पैशुन्ये। सूचयति। अपोपदेशत्वान्न षः। असुसूचत्। खेट भक्षणे। तृतीयो
न्त इत्येके। खोट इत्यन्ये। क्षोट क्षेपे। गोम उपलेपने। अजुगोमत्। कुमार क्रीडायाम्। अचुकुमारत्। शील उपधारणे।
उपधारणम् अभ्यासः। साम सान्त्वप्रयोगे। असासामत्। सान्त्वन इत्यतीतस्य तु असससामत्। वेल कालोपदेशे। वेलयति॥

मर्षति॰

थ२

॥राम॥
॥हरि॥

यौ॰ ६

375

प२ यो: १ ३४

काळ इति पृथग्धातुरित्येके। कालयति। पल्पूल लवनपवनयोः। वात सुखसेवनौ गतिसुखसेवनयोरित्येके। वातयति। अववातत्। ग
वेष मार्गणे। अजगवेषत्। वास उपसेवायाम्। निवास आच्छादने। अनिनिवासत्। भाज पृथक्कर्मणि। सभाज प्रीतिदर्शनयोः। प्रीतिसे
वनयोरित्यन्ये। सभाजयति। ऊन परिहाणे। ऊनयति। ओः पुयण्जीति सूत्रे पययोरिति वक्तव्ये वर्गप्रत्याहारग्रहो लिङ्गं णिच्य
वलादेशोनस्याहृद्विवेकल्पी इति यच्च द्विरुक्तौ अस्या सोत्तरखण्डस्य आद्योऽत्र क्रियायां परिनिष्ठितरूपे वाऽवर्णो
लभ्यते तत्रैवायं निषेधः। ज्ञापकस्य सजातीयापेक्षत्वान्नाचिकीर्तदिति सिद्धम्। प्रकृते तु न शास्त्रस्य द्वित्वं तत उत्तरखण्डे
ल्लोपः। औननत्। मा भवानूननत्। ध्वन शब्दे। अदध्वनत्। कूट परितापे। परिदाह इत्यन्ये। संकेतग्रामकुण गुण चामन्त्रणे।
वा कूटोपि। कूटयति। सङ्केतयति। ग्रामयति। कुणयति। गुणयति। पाठान्तरम्। केत श्रावणे निमन्त्रणे च। केतयति। निकेतयति।
कुण गुण चामन्त्रणे। चकारात् केत। कूण संकोचन इति। स्तेन चौर्ये। अतिस्तेनत्॥ ॥ आ गर्वादात्मनेपदिनः। पद गतौ।
पदयते। अपदत। गृह ग्रहणे। गृहयते। मृग अन्वेषणे। मृगयते। मृग्यतीति कण्ड्वादिः। कुह विस्मापने। शूर वीर विक्रान्तौ।
स्थूल परिबृंहणे। स्थूलयते। अतुस्थूलत। अर्थ उपयाच्ञायाम्। अर्थयते। आर्तथत। सत्र संतानक्रियायाम्। अससत्र
त्रत। अनेकाच्त्वान्न षोपदेशः। सिसत्रयिषते। गर्व माने। गर्वयते। अदन्तत्वसामर्थ्याण्णिज्विकल्पः। धातोरन्तउदात्तः। लि
ञ्यपलावः। कथं तिगणयतीत्यादावुपधावृद्धिनिवारणेनावकथदित्यादावग्लोपित्वाद्दीर्घसन्वद्भावविरहेण मारलगमप्र
स्तीनामुपधाह्रस्वव्यावर्तनेन गृह मृग प्रभृतीनामुपधागुणव्यावर्तनेन चादन्तत्वं सार्थकम्। गर्वादीनां त्वदन्तत्वे प्रागु
क्फलासंभवात् णिज्विकल्पोऽनुमीयते। १

अकार २

प२

376

ष
लोप४

धाम्वफ ळम्। एवमग्रेपि। ॥ इत्याग वीयाः॥ ॥ स्तन वेष्टने। स्तनयति। अमुस्तनत्। मूत्र प्रस्रवणे। मूत्रयति। मूत्रति। रूल्लपारुथे। पारती
र कर्मसमाप्तौ। अपपारत्। अतितीरत्। पुट संसर्गे। पुटयति। धेक दर्शने इत्येके। अदिधेकत्। कत्र शैथिल्ये। कत्रयति। कत्रति। क
र्तैत्यैके। कर्तयति। कर्त्रति। ॥ ॥ प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च। प्रातिपदिकाद्धात्वर्थे णिच् स्यात्, इष्ठे यथा प्रातिपदिकस्य
पुंवद्भावरभावटिलोपविन्मतुब्लोपयणादिपरप्रस्थस्फाद्यादेशभसंज्ञास्तद्वण्णावपि स्युः। पटुमाचष्टे पटयति। पूरवा दृढीसत्यां
टिलोपः। अपीपटत्। णौ चङि त्यत्र साध्येतु हृढेलोपो बलीयानिति स्थितम्। अपपटत्। तत्करोति तदाचष्टे। पूर्वस्य प्रपंचः। करो
त्याचष्ट इति धात्वर्थमात्रेणिजर्थः। लडर्थस्त्वविवक्षितः। तेनातिक्रामति। अश्वेनातिक्रामति। अश्वयति। हस्तिनातिक्रामति। अ
ति हस्तयति। धातुरूपं च। णिच्प्रकृतिर्धातुरूपं स्यात् तिपद्यते। वशा श्लेनुक्समुच्चयार्थः। तथा च वार्तिकम्। आख्यानात् कृ
तस्तदाचष्टे कृल्लुक् प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकमिति। कंसवधमाचष्टे। कंसं घातयति। इह कंसे हन् इति स्थि
ते। हनस्तोऽचिण्णलोः। हन्तेस्तकारोऽन्तादेशः स्यात् चिण्णल्वर्जिते ञ्णिति। न च त्राङ्गसंज्ञा धातुसंज्ञा च के सति विशिष्टस्यापा
घ्ना। तत श्चाड्डित्वयो होषिः। किं वकुवतत्वे न स्यात्। ताम्। धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात्। सत्यम्। प्रकृतिवच्चे
ति वकारो लिङ्गक्रमः। कारकं च। वाक्यार्थम्। हेतुमण्णिचः प्रकृते हन्त्याहेहेतुमण्णेः यादृशं कारकं धातोर्वर्तते तादृशं द्वितीया

॥राम॥
॥हरि॥

अ७

स्पशादिस्थो नुदीतिस्त्वेके यदह रदन्ताख्यातिथोक्तत्वादिति साव॥ एतेन स्वस्यानुदात्तत्वमपाणिनीयमिति मैत्रेयोक्तिः प्रत्युक्ता। न चैवं साध्यो क्रमु
पसर्गपृथक्करणज्ञापकत्वं सज्येतेति वाच्यं। युक्ते योग्रामशब्द इत्युक्तेनैव सामर्थ्यात्पूर्वस्य लाभे सति द्विःशिष्टपाठो ज्ञापकं इति स्नात्थ्याशयात्। नन्वे
वमप्यसंग्रामयतेर्न सिध्येत्। अग्लोपित्वाभावेनोपधाह्रस्वापत्तेरित्याशंक्याहृ अकारप्रश्लेषादिति। ५

कंसमजीघनत्२ त्रम्। यादृशञ्च कार्यं कुर्वते [illegible]वादीतदिहापीत्यर्थः॥ कर्तृकरणात्त्वर्थे कर्तुर्यत्प्राप्यं यत्करणं न तु बहुलादिमात्रमित्य
र्थः। असिनाहति। असयति। वक्ष दर्शने। चित्र चित्रकरणे। आलेख्यकरण इत्यर्थः। कदाचिद्दर्शने। चित्रेत्ययमद्भुतद द ई
र्शने णिचं लभते। चित्रयति। अंस समाघाते। वट विभाजने। लज प्रकाशने। वटि लजि इत्येके। वण्टयति। लञ्जयति। अ
तिषु पाठबलाददन्तत्वे वृद्धिरित्यन्ये। वण्टापयति। लञ्जापयति। शाकटायनस्तु कथादीनां सर्वेषामुक माहातन्म तं ५
ति। कथापयति। गणापयतीत्यादि। मिश्र सम्पर्के। संग्राम युद्धे। अनुदात्तेत्। अकारप्रश्लेषात्। अससंग्रामत। स्तोम
श्लाघायाम्। अतुस्तोमत। छिद्र कर्णभेदने। करण भेदन इत्यन्ये। कर्णेति धात्वन्तरमित्येके। अन्ध दृष्ट्युपघाते।
उपसंहार इत्यन्ये। आन्दधत्। दण्ड दण्डनिपातने। अङ्क पदे लक्षणे च। आञ्चकत्। अङ्ग च। सुख दुःख तत्क्रि
यायाम्। रस आस्वादनस्नेहनयोः। व्यय वित्तसमुत्सर्गे। अवव्ययत्। रूप रूपक्रियायाम्। रूपस्य दर्शनं कर
णं वा रूपक्रिया। छेद द्वैधीकरणे। अचिच्छेदत्। छद अपवारणे इत्येके। छदयति। लाभ प्रेरणे। व्रण गात्रवि
चूर्णने। वर्ण वर्णक्रियाविस्तारगुणवचनेषु। वर्णक्रिया वर्णकरणम्। सुवर्णं वर्णयति। कथां वर्णयति। विस्त
णातीत्यर्थः। हरिं वर्णयति स्तौतीत्यर्थः। बहुलमेतन्निदर्शनम्। अदन्तधातुनिदर्शनमित्यर्थः। बाहुळको

तु३ ल२

दन्येपि बोध्याः। तद्यथा। पर्ण हरितभावे। अपपर्णत्। विष्क दर्शने। क्षप प्रेरणे। वस निवासे। तुत्थ आवरणे। एवमान्दो
लयति। प्रेंखोलयति। विडम्बयति। अवधीरयति इत्यादि। अन्ये दशगणीपाठो बहुमित्याहुः। तेनापठिताश्च
पि सौत्रलौकिकवैदिका बोध्याः। अपरे तु नवगणीपठितेभ्योपि क्वचित्स्वार्थे णिच्। रामो राज्यमचीकरदित्य
होयथेत्याहुः। चुरादिभ्य एव बहुलं णिजित्यर्थ इत्यन्ये। सर्वेपि ह्याः प्रायो ग्रंथे स्थिताः॥ ॥णिङङ्गान्निरसने
अङ्गवाचिनः प्रातिपदिकान्निरसनेऽर्थे णिङ् स्यात्। हस्तौ निरस्यति हस्तयते। पादयते। श्वेताश्वाश्वतरगा
लोडिताह्वरकाणामश्वतरेतकलोपश्च। श्वेताश्वादीनां चतुर्णामश्वादयो लुप्यन्ते णिङ् च धात्वर्थे। श्वेताश्व
माचष्टे तेनातिक्रामति वा श्वेतयते। अश्वतरमाचष्टे ऽश्वयते। गालोडितं वाचां विमर्शः तं करोति गालोडय
ते। आह्वरयते। केचित्तु णिचमेवानुवर्तयन्ति। तन्मते परस्मैपदमपि। पुच्छादिषु धात्वर्थ एवेत्यादि सिद्धम्। पि
ण्यन्तादेव बहुळं वचनादात्मनेपदमस्तु। मास्तु पुच्छभांडेति णिङ्विधिः। सिद्धशब्दो ग्रंथान्ते मंगलार्थः॥ ॥
॥ ॥छ॥ इति चुरादयः॥ ॥ ॥छ॥ श्रीः॥ ॥ तत्प्रयोजको हेतुश्च। कर्तुः प्रयोजको हेतुसंज्ञः कर्तृसं
ज्ञश्च स्यात्। हेतुमति च। प्रयोजकव्यापारे प्रेषणादौ वाच्ये धातोर्णिच् स्यात्। भवन्तम्प्रेरयति भावयति

ते ४
नेष्ठ

इतेव४

॥राम॥

॥६७॥

ञंगयत्वद्धिरुच्यतइतिमतेयद्धु रणेगेयलघुइतिमतेवेत्यर्थः ५

णिचश्चेतिकर्तृगे फले आत्मनेपदम् । लावयते । लावयाम्बभूव । ओःपुयण्ज्यपरे । सनिपरेयदंगंतदवयवस्यवास्यात्सोकारस्ये
त्वं स्यात्सवर्णयण्जकारश्चवर्णपरेषु परतः । अबीभवत् । अपीपवत् । मूङ् । अमीमवत् । अयीयवत् । अरीरवत् । अ
लीलवत् । अजीजवत् । स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनांवा । एषामभ्यासोकारस्येत्वंवा स्यात्सनि । अवर्ण
परेधात्वक्षरेपरे । असिश्रवत् । असुस्रवत् । इत्यादि । नाग्लोपी तिङ्ह्रस्वनिषेधः । अशशासत् । अडुढौकत् ।
अचीचकासत् । मितां ह्रस्वः । अचकासत् । अग्लोपी तु सुधातुप्रकरणे उदाहरिष्यते । ण्यन्तामिश्रा पूर्ववि
प्रतिषेधादपवादत्वाच्च वृद्धिम्बाधित्वा णिलोपः । वोरयति । णौ चङि तिङ्ह्रस्वः । दीर्घो लघोः । नवाग्लोपिवा
ह्वयोरथसम्प्लवः । ण्याह्वेतिनिर्देशात् । अजूहुवत् । णौ सञ्चङोः सन्परे चङ्परे वा णौ श्वयतेस्तु सम्प्रसारणंवा
स्यात् । सम्प्रसारणं तदाश्रयं च कार्यं बलवदिति वचनात्सम्प्रसारणम् । वरूपम् । अशूशवत् । अल
घुत्वान्न दीर्घः । अशिश्वयत् । स्तम्भुसिवुसहां चङि । उपसर्गनिमित्तस्य सस्य षो न स्याच्चङि । अवातक्तं
सत् । पर्यसीषिवत् । न्यसीषहत् । आटिटत् । आशिशत् । बहिरंगो घुपधाह्रस्वो दित्वात्प्रागेव । ओणे ऋदि
हे

सिद्धान्तकौ·
॥ह॥

२३

करणाल्लिंगात्।मासवानिदिधत्।एजादावेधतौ वृद्धिविधानान्नवृद्धिःमासवान्स्वेदिधत्।नन्द्राइतिनदराणांनद्वि
त्वम्।औंदिदत्।आडिडत्।आर्चिचत्।उ दुज ञ्चाजवे।उपदेशे दकारोपधः।सुजन्यु। ओ पाण्युपतापयो
रितिसूत्रेनिपातनाद्ध्रस्वत्वः।सवांतगोपि द्विर्वचनविषये नन्द्रा इतिनिषेधात्।रजिशब्दस्य द्विर्वे कृते चर्त्वे कृते।न
तु ततः प्राक्।दकारोच्चारणसामर्थ्यात्।औज्झिजत्।अजिहरित्येवानेहा।अदिडुपत्। रलेरशक्लिटोः।
रसेर्नुमुस्याद्दविनतुश।बुलिटोः।लसेश्च।अररसत्।अललसत्।हेरचडीतिसूत्रेचडिचुक्कौ कुर्वे
ना।अजीहयत्।अतस्मृद्दृत्वरत्रथम्रदस्तृस्पशाम्।असस्मरत्।अददरत्।तपरत्वसामर्थ्यादिचलघो
र्नदीर्घः।विनोपाते चिरे षत्।अभ्यासस्यात्वंवास्यादृत्वरेणो।अववेष्टत्।अविवेष्टत्।अ ● चवेष्ट
त्।अचिचेष्टत्।स्वा ᳚ लासेत्यादिनावोपधाकृत्वः।अविभ्वजत्।अवस्रोजत्।काण्यादीनांवेतिव
क्तव्यम्।कणरणलणश्राणलुपहेडः।काण्यादयःषड् साधे उक्तः।काधियिकाणि लोपिल्लोपयःवत्वा
शोधिकान्यासे।वाणिलोटीअथेन्यत्।इस्थंकादशी।अचीकणत्।अवकाण त्।स्वापश्च।डिण्यन्तस्यस्व
काणराणक्वथाश्राणलाणहेंठेलुविरपिण्यंतस्यलाघ्यकारणकाण्यादिवत्प्रकीर्तितम्।वाधिन्यासकृतालोविल्लोपिवालि श्रुकायि
ना।सहिता।पूर्वमुक्ताश्चकाण्यादौपरिकीर्तिताः।दुर्गश्चाल्लिंकाण्यादिमन्यतेशाकटायनः।लोडिति तदेवमेतेनधातवोद्वादशस्मृताः।

ज२
ण्यंताः२

इत्यादि
॥राम॥
॥ह॥

२॥२

381

अवीवृतत्। अववर्त्तत्। ५

पेश्चङि संप्रसारणं स्यात्। असूषुपत्। शाछासाह्वाव्यावेपां युक्णौपरे। शाययति। ह्वाययति। ह्वः संप्रसारणं। सन्परे चङ्परे च
णौ ह्वः संप्रसारणं स्यात्। अजूहवत्। अजुहावत्। लोपः पिबतेरीच्चाभ्यासस्य। पिबतेरुपधाया लोपः स्यात्। अभ्यासस्य ई-
दन्तादेशश्च चङ्परे णौ। अपीप्यत्। अर्त्ति ह्री ति पुक्। अर्पयति ह्रेपयति। व्लेपयति। रेपयति। यलोपः। क्नोपयति। क्ष्मापय-
ति। स्थापयति। तिष्ठतेरित्। उपधाया इदादेशः स्याच्चङ्परे णौ। अतिष्ठिपत्। जिघ्रतेर्वा। अजिघ्रिपत्। अजिघ्रपत्। उर्-
त्। अचीकृतत्। अचिकीर्त्तत्। अमीमृजत्। अममार्जत्। पातेर्णौ लुग्वक्तव्यः। पुकोपवादः। पालयति। वो विधूनने जु-
क्। वातेर्जुक् स्याण्णौ कंपेर्थे। वाजयति। कंपे किम्। केशानावापयति। विभाषा लीयतेः। लीलोर्नुग्लुकावन्यतरस्यां
स्नेहविपातने। लीयतेर्लातेश्च क्रमान्नुग्लुकावागमौ स्तौ णौ स्नेहद्रवे। विलीनयति। विलापयति। विलालय-
ति। विलापयति वा घृतम्। ली इति ईकारप्रश्लेषादात्वपक्षे नुक्। स्नेहद्रवे किम्। लोहं विलापयति। विलाप-
यति। प्रलंसनाति सव पूजासु लियो नित्यमात्वमशितिवाच्यम्। लियः संमाननशालिनीकरणयोश्च। ली-
ङ्लियोर्ण्यन्तयोरात्मनेपदं वा स्यादकर्तृगेपि फले। पूजातिसवयोः प्रलंसनेवार्थे जटालिलापयते। पूजाम-
धिगच्छतीत्यर्थः। श्येनो वर्त्तिकामुल्लापयते। अलिसवतीत्यर्थः। बालमुल्लापयते। वंचयतीत्यर्थः। बिभेतेर्हेतुभये।
बिभेतेरेच आत्वं वा स्यात्तस्य योजकाद्भयं चेत्। भीस्म्योर्हेतुभये। आभ्यामात्मनेपदं स्याद्धेतोश्चेद्भयस्मयौ। स्तू
हेतुभयग्रहणं धात्वर्थोपलक्षणं। मुंडो भापयते। भियो हेतु

वा

ल७

362

ई ई
सये पुकू। ली इति कारः प्रश्लिष्यते। ईकारांतस्य लियः पुकू स्याण्णौ हेतुसये। लीपयते। नित्यं स्मयतेः। स्मयतेरेचो
नित्यमात्वं स्याण्णौ हेतोः स्मये। जटिलो विस्मापयते। हेतोश्चेद्भयस्मयावित्युक्तेर्नेह। कुंचिकयैनं स्माययति विस्माप
यति। कथं तर्हि विस्मापयन्विस्मितमा मद्वतावितिः मनुष्यवारेतिकरणादेव हि तत्र स्मयः। अन्यथा शानजपि
स्यात्। सत्यं। विस्माययन्नित्येव पाठ इति सांप्रदायिकाः। यद्वा। मनुष्यवाक्प्रयोज्यकर्त्री विस्मापयते। तया सि
हो विस्मापयन्नितिण्यत् ताण्णौ शतेति व्याख्येयम्। स्फायो वः। णौ। स्फावयति। शदेरगतौ तः। शदेर्णौ तो नादेशः
स्यान्न तु गतौ। शातयति। गतौ तु गाः शादयति गोविंदः। गमयतीत्यर्थः। रुहः पोन्यतरस्यां णौ। रोपयति। रोह
यति। क्रीङ्जीनां णौ एषामेच आत्वं स्याण्णौ। क्रापयति। अध्यापयति। जापयति। णौ च संश्चङोः। सन्परे चङ्
परे णौ इङो गाङ् वा स्यात्। अध्यजीगपत्। अध्यापिपत्। सिध्यतेरपारलौकिके। ऐहलौकिकेऽर्थे विद्यमानस्य सि
ध्यतेरेच आत्वं स्याण्णौ। अन्नं साधयति निष्पादयतीत्यर्थः। अपारलौकिके किम्। तापसः सि ध्यति तत्त्वं निश्चि
नोति। तं प्रेरयति सेधयति तापसं तपः। प्रजने वीयतेः। अस्येच आत्वं वा स्याण्णौ। प्रजनेऽर्थे वापयति वाययति गाः ॥राम॥
पुरो वातः। गर्भं ग्राहयतीत्यर्थः। ऊदुपधाया गोहः। गूहयति। दोषो णौ। दुष इति सुवचमुच्यते रूपधाया ऊत् ॥हरि॥
स्याण्णौ। दूषयति। मितां ह्रस्वः। भ्वादौ चुरादौ च मित उक्ताः। घटयति। जनी। जनयति। जृष्। जरयति। ज्रूणा

वा चित्तविरागे। विरागोऽप्रीतता। चित्तं दूषयति दोषयति वा कामः। २

तेस्तु जारयति। रंजेर्णौ मृगरमणे नलोपो वक्तव्यः। मृगरमणमाखेटकम्। रजयति मृगान्। मृगेति किम्। रंजयति पक्षिणः। र
मणादन्यत्र अनुरंजयति मृगान् तृणदानेन। जुरादिषु ज्ञपादिश्चिक्। चिस्फुरोरिति आत्वम्। वपयति। वययती युक्तम्। विलो
तेस्तु वापयति। वाययति। स्फारयति। स्फोरयति। अपुस्फरत्। अपुस्फुरत्। उरोत्साभ्यासस्य। साभ्यासस्य अनिते दृसौ
न कारेणत्वं प्राप्नुतो निमित्ते सति। प्राणिणत्। णौ गमिरबोधने। इणो गमिः स्यात्णौ। गमयति। बोधने तु प्रत्याय
यति। इण्वदिकः। अधिगमयति। हनस्तोऽचिण्णलोः। होहन्तेरिति कुत्वम्। घातयति। ईर्ष्यियति। ईर्ष्यतिस्तृतीयस्येति वक्त
व्यं। तृतीयस्य अजनस्य तृतीयैकाच इति वार्थः। आद्येषकारस्य द्वित्ववारयितुमिदम्। द्वितीये तु अजादेर्द्वितीयस्येत्य
स्यापवाद तयासनेते प्रवर्त्तते। ऐर्ष्यियत्। ऐर्षिष्यत्। द्वितीयव्याख्यायां णिजंता द्वा डिषकार एवा स्याने श्रूयते
हला हि शेषात्। द्वित्वं तु द्वितीयस्यैव तृतीया सावेन अहकृत वा विकी प्रवृत्तेः। निवृत्तप्रेषणाद्धातो हेतुमत्सो। शुद्धे
नतु त्योर्थः तेन प्रायश्चितिशयनो भिनेत्प्रियाः इत्यादि सिद्धम्। एवं सकर्मकेषु सर्वेषु ह्यम्।। ।।इति ण्यन्तप्रक्रि
या।। धातोः कर्मणः समानकर्तृकादिच्छायां वा। इषिकर्मणो धातो रिषिणैककर्तृकात् सन्प्रत्ययो वा स्यादिच्छायाम्। धा
तोर्विधेरिह सनआर्धधातुकत्वम्। इट्। द्वित्वम्। सन्यतः। पवितुमिच्छति पिपविषति। कर्मणः किम्। गमनेनेच्छती

तिकरणान्मा भूत्। समानकर्तृकात्किम्। शिष्याः पठेयुरितीच्छति गुरुः॥ वाग्रहणात्सेवाक्यमपि। लुङ्सनोर्घस्लृ। एका
च उपदेश इति नेट्। सस्य तत्वम्। अत्तुमिच्छति जिघत्सति। ईर्ष्यतेस्तृतीयस्येति यिसनोर्द्वित्वम्। ईर्ष्यियिषति। ईर्ष्यिषिष
ति। रुदविदमुषग्रहिस्वपिप्रच्छः संश्च। एभ्यः संश्च क्त्वा च कितौ स्तः। रुरुदिषति। विविदिषति। मुमुषिषति। सनि ग्रहगुहो
श्च। ग्रहेर्गुहेरुगन्ताच्च सन इण् न स्यात्। ग्रहिज्येति संप्रसारणम्। सनः षत्वस्यासिद्धत्वाद्भष्भावः। जिघृक्षति। जु
घुक्षति। किरश्च पञ्चभ्यः। कॄ गॄ दृङ् धृङ् प्रच्छ एभ्यः सन इट् स्यात्। पिपृच्छिषति। चिकरिषति। जिगरिषति। जि
गलिषति। अत्रेटो दीर्घो नेष्टः। दिदरिषते। दिधरिषते। कथमुद्दिधीर्षुरिति। लोवादिकयोर्धृङ्धृञोरिति ग्र
हणात्। इको झल्। इगन्ताज्झलादिः सन् कित्स्यात्। वुस्तूषति। दीङ्। दातुमिच्छति दिदीषते। एज्विषये ल्यलावा
मीनातिमिनोतीत्यात्वं न। अत एव सनि मीमेति सूत्रे मा धातोः पृथग्ग्रहणं कृतम्। हलन्ताच्च। इक्समीपाद्ध
लः परो झलादिः सन् कित्स्यात्। गुहू। जुघुक्षति। बिभित्सति। इकः किम्। [illegible]ते। झल् किम्। विवर्धिषते। ह
लन्तग्रहणं जातिपरम्। तृन्हू। तृन्हाति। तितृंहिषति। अज्झनगमां सनि। अजन्तानां हन्तेरजादेशगमेश्च दी
र्घः स्याज्झलादौ सनि। सन्लिटोर्जेः। जिगीषति। विभाषा चेः॥ चिकीषति। चिचीषति। जिघांसति। सनि वा। इ

णोगमिः स्यात्सनि न तु बोधने। जिगमिषति। बोधने तु प्रतीषिषति। एवदिकू। अधिजिगमिषति। कर्मणि
तङः। परस्मैपदेष्विति युक्तेने ट्राज्झलादौ सनीति दीर्घः। जिगांस्यते। अधिजिगांस्यते। अजादेशस्येत्यु
क्तेर्गेच्छते न दीर्घः। जिगंस्यते। संजिगंसते। इङः श्च। इङो गमिः स्यात्सनि। अधिजिगांसते। रलो व्यु
पधाद्धलादेः संश्च। इश्च उश्च वी ते उपधे यस्य तस्माद्धलादेरलन्तात्परौ क्त्वासनौ सेटौ वा कितौ स्तः।
द्युतिस्वाप्योः संप्रसारणम्। दिद्युतिषते। दिद्योतिषते। रुरुविषते। रुरोविषते। लिलिखिषति। लिले
खिषति। रलः किम्। दिदेविषति। व्युपधात् किम्। विवर्त्तिषते। हलादेः किम्। एषिषिषति। इह नित्यम
पि द्वित्वं गुणेन बाध्यते। उपधाकार्यं हि द्वित्वात्प्रबलम्। णौ अदिकेरणस्य सामान्यापेक्ष
ज्ञापकत्वात्। सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्। इवन्तेभ्य ऋधादिभ्यश्च सन इड्वा स्यात्।
इडभावे हलन्ताच्चेति कित्त्वम्। च्छ्वो रिति वस्य ऊठ्। यण्। दिवम्। दुद्यूषति। स्तौतिण्योरेवेति वक्ष्यमाण
नियमान्न षः। सुस्यूषति। सिसे विषति। आप्ज्ञप्यृधामीत्। एषामच इत् स्यात्सादौ सनि। अत्र लोपोऽ

दिदेविषति २

भ्यासस्य। सनिमीमेत्यादौ यदुक्तं तत्राभ्यासस्य लोपः स्यात्। आप्तुमिच्छति ईप्सति। ऋधितुमिच्छति। रपरत्वं। च द्विभू।
ईर्त्सति। अर्दिधिषति। बिभ्रज्जिषति। बिभर्जिषति। बिभ्रक्षति। बिभर्क्षति। दंभ इच्च। दंभेरच इत्स्यादीच्च सोदी
सनि। अभ्यासलोपः। हलंताच्चेत्यत्र हल्ग्रहणं जातिपरमित्युक्तम्। तेन सनः कित्वान्नलोपः। धिप्सति। धी
प्सति। दिदंभिषति। शिश्रीषति। शिश्रयिषति। उदोष्ठ्यपूर्वस्य। मुमूर्षति। सिस्तरिषति। युयूषति। यियविषति।
ऊर्णुनूषति। ऊर्णुनुविषति। ऊर्णुनविषति। ननु परत्वाद्गुणावादेशयोः सतोरभ्यासे उकारो न श्रूयेतेति वाच्यम्।
निद द्विर्वचनेऽचीति सूत्रेण द्वित्वे कर्तव्ये स्थानिरूपादेशात्। आदेशनिषेधाद्वा। न च सने तस्य द्वित्वं प्रति कार्यित्वान्नि
मित्तता कथमिति वाच्यम्। कार्यमनुभवन्हि कार्यी निमित्ततया नाश्रीयते। न त्वननुभवन्नपि। न चेह स
नो द्वित्वमनुभवति। बुभूर्षति। बिभरिषति। ज्ञपिः पुगंतो मित्संज्ञः पकारांतश्चौरादिकश्चाहुडलावे इको झ
लिति कित्वान्न गुणः। अज्झनेति दीर्घः परत्वाल्लिलोपेन बाध्यते। आप्ज्ञपीति इति। ज्ञीप्सति। जिज्ञपयिषति। ॥राम॥
अमित्त्वात्तु जिज्ञापयिषति। जनसनेत्यात्वम्। सिषासति। सिसनिषति। तनिपति दरिद्रातिभ्यः सनो वा इ ॥७१॥

का४

387

स्कोऽशितसलोपः १

द्युः स्यः। तनोतेर्विभाषा। अस्योपधाया दीर्घो वा स्याज्झलादौ सनि। तितांसति। तितंसति। तितनिषति। वा। शंकायां सन्वक्तव्यः। श्वा
मुमूर्षति। कूलं पिपतिषति। सनि मीमाघुरभलभशकपतपदामच इस्। एषामच इस् स्यात्सादौ सनि। अभ्यासलोपः। पि
त्सति। दि दरिद्रिषति। दिदरिद्रासति। डु मिञ्। मीञ्। आत्वं सानुबन्धतदीर्घस्य मिनोतेरपि। मेरूपाविशेषा दिस्मा सः सीति
तः। मित्सति। मित्सते। मा माने। मित्सति। माङ् मेङः। मित्सते। दो दाणोः। दित्सति। दिङ्। दित्सते। दाञ्। दित्सति। दित्सते। धेट्।
धित्सति। धाञ्। धित्सति। धित्सते। रिप्सते। लिप्सते। शकॢ। शिक्षति। शक मर्षणे इति दिवादिः स्वरितेत्। शिक्षति। शि
क्षते। पित्सते। राधो हिंसायां सनीस्वाच्यः। रित्सति। हिंसायां किम्। आरिरात्सति। मुचोऽकर्मकस्य गुणो वा। सादौ स
नि। अभ्यासलोपः। मोक्षते। मुमुक्षते वा वत्सः स्वयमेव। अकर्मकस्य किम्। मुमुक्षति कर्म वत्सं। वृद्भ्यः स्यसनोः। श्वस्तु स्यः
विवृत्सति। तङि तु विवर्तिषते। सेसिचीतिवेट्। निनर्तिषते। निनृत्सति। इट् सनि वा। वृङ्वृञ्भ्यामृदन्तात्सन इड्वा
स्यात्। तितरिषति। तितरीषति। तितीर्षति। विवरिषति। विवरीषति। वुवूर्षति। वृङ्। वुवूर्षते। धृङ्। दुधूर्षति। स्मिपूङ्र
ञ्ज्वशां सनि। स्मिपूङ्। अञ्जू अशू एभ्यः सन इट्। सिस्मयिषते। पिपविषते। अरिरिषति। इह ऋस्य शश्वस्यादि

त्वम्। इस्त इतिसनोऽवयवः कार्यसागीतिकार्यिणो निमित्तत्वायोगात् द्विर्वचने वीति न प्रवर्त्तते। अजिजिषति। अशिशिष
ते२ [illegible]। उत्तोसास्यासस्य। आणिणिषति। उन्देस्तु क्। उत्वम्। पूर्वत्रासिद्धीयमद्विर्वचने इति वचनात् स्यांसहितस्येटो द्वित्वम्।
हलादिः शेषः। उविच्छिषति। निमित्तापाये नैमित्तिकापाय इति त्वनित्यम्। छ्वोरिति सतुक्कस्य ग्रहणा [illegible] रह्नाप
कोह। प्रकृतिप्रत्यापत्तिवचनाद्धा। णौच संश्चङोरितिस्त्रात्स्या मिङोगाङ्। श्वयतेः संप्रसारणं वा। अधिजि
य५ गापयिषति। अध्यापिपयिषति। शिश्वायिषति। शुशावयिषति। ह्वः संप्रसारणं। जुहावयिषति। णौ द्विर्वास्यागव
स्य६ स्यादेशो नेत्युक्तत्वादुकारद्वित्वम्। पुस्फारयिषति। चुह्लावयिषति। ओः पुयण्ज्यपरे। पिपावयिषति। बिभाव
यिषति। यियावयिषति। रिरावयिषति। लिलावयिषति। जिजावयिषति। पुयण्ज इति किम्। नुनावयिषति। अ ति४
परे किम्। बुभूषति। स्रवतीति वा। सिस्रावयिषति। सुस्रावयिषति। इत्यादि। अपर इत्येव। शुश्रूषते। स्तौति ॥राम॥
प्य२ ण्योरेव षः स्यात्। अभ्यासेणः परस्य स्तौतिण्यन्तयोरेव सस्य षः स्यात्। षन्ते सनि नान्यस्य। तुष्टूषति। द्यु ॥७२॥
तिस्वायोरित्युत्वम्। सुघापयिषति। सिषाधयिषति। स्तौतिण्योः किम्। सिसिक्षति। उपसर्गात्तु स्थौदिषत्वं।

389

स्तृ१

घ४

त्रिमृच्छ्यध्य ऊर्णोति स्योयङ्नान्यः। आद्यास्त्रयश्शुरादावकृन्ताः। सोस्मूर्यते। सोस्मूर्य्यते। अनेकाच्त्वेनाभ्यासोपदेशत्वा
स्पद्वेन। सोमूर्च्यते। यस्य हलः। यस्येति स घात ये हण। हलः परस्य यश इस्य लोपः स्यादार्धधातुके। आदेः परस्य।
अतो लोपः। सोस्मूर्वा..। वकौ सोस्मूर्विता। सोस्मूर्विता। मोमूर्विता। दीर्घोकितः। अकितो भ्यासस्य दीर्घः स्याद्यङि य
७३ ङु कि वाच्य टा घ्रते। यङि वा। अर्तेः संयोगादेश्च ऋतो गुणः स्याद्यङि। यकारपरस्य रेफस्य न द्वित्वनिषेधः। अराय
तै इति साध्वी। हृ हरणात्। अरारिता। अशाशिता। ऊर्णोनूयते। वेलिघ्यते। अल्लोपस्य स्थानिवत्त्वान्नोपधागुणः। वेलि
हिता। नित्यं कौटिल्ये गतौ। गत्यर्थात्कौटिल्ये एव यङ् स्यान्न तु क्रियासमभिहारे। कुटिलं व्रजति वाव्रज्यते। लुपस
द वृत् जप जे स द ह द श ग्रहृभ्यो सावगर्हायाम्। एभ्यो धात्वर्थगर्हायामेव यङ् स्यात्। गर्हितं लुम्पति लोलुप्यते। सा
सद्यते। चरफलोश्च। अनयोरभ्यासस्यातो नुक् स्याद्यङ्लुकोः। नुगित्यनेनानुस्वारो लक्ष्यते। सन्वपदान्तवद्धान्यः।
चापदान्तस्येति यथा स्यात्। उत्परस्यातः। चरफलोरभ्यासात्परस्यातः उत्स्याद्यङ्लुकोः। हलि चेति दीर्घः। चञ्चूर्य ॥राम॥
ते। चञ्चूर्यते। पंफुल्यते। पं ल्यते। जपजभदहदशभञ्जपशांच। एषामभ्यासस्य नुक् स्याद्यङ्लुकोः। गर्हितं ॥७३॥

स्फुर१

370

सूष ३

सिनत्वेतिषत्वम्। परिषिषिक्षति। षणि किं। तिष्ठासति। सुषुप्सति। अभ्यासादित्युक्तेर्नेह निषेधः। इणः प्रतीषिषति। इकः। अधीषिषति। सस्वि
दि ॰स्वदिसहीनांच। अभ्यासेणः परस्य ण्यन्तानामेषां सस्य सः एव न षः षणि परे। सिस्वेदयिषति। सिस्वादयिषति। सिसाहयिषति। स्था
दिष्वभ्यासस्येति नियमान्नेह। अतिसु[illegible]ति। शैषिकान्मतुवर्थीयाच्छैषिको मतुवर्थिकः। सरूपः प्रत्ययो नेष्टः सन्नंतान्नस
निष्यते॥ शालीयः। शैषिकाच्छैषिकः सरूपो नातेन शालीये भव इति वाक्यमेव। न तु छान्तात् छः। सरूपः किम्। अहिच्छत्रे भवः आ
हिच्छत्रीयः। अणन्तात् छः। तथा मतुवर्थीयात्सरूपः स न। धनवानस्यास्तीति। इह मतुबन्तान्न मतुप्। विरूपस्तु स्यादेव। दण्डिम
ती शाला। सरूप इत्यनुषज्यते। अर्थद्वारा सादृश्यं तस्यार्थः। तेन इच्छासन्नंतात् सन्न। स्वार्थसन्तु स्यादेव। जुगुप्सिषते।
मीमांसिषते॥ ॥इति सन्प्रक्रिया॥ ॥धातोरेकाचो हलादेः क्रियासमभिहारे यङ्। पौनःपुन्ये भृशार्थे वा क्रि
यासमभिहारस्तस्मिन्द्योत्ये यङ् स्यात्। गुणो यङ्लुकोः। अभ्यासस्य गुणः स्याद्यङि यङ्लुकि वा। सनाद्यन्ता इति धा
तुत्वाल्लडादयः। ङित्वादात्मनेपदम्। पुनः पुनरतिशयेन वा भवति बोभूयते। बोभूयांचक्रे। अबोभूयिष्ट
धातोः किम्। आर्द्धधातुकत्वे यथा स्यात्। तेन बुबोवविरित्यादि। एकाचः किम्। पुनःपुनर्जागर्ति। हलादेः किम्।
भृशमीक्षते। भृशं शोभते रोचते इत्यत्र यङ् नेति भाष्यम्। पौनःपुन्ये तु स्यादेव। रोरुच्यते। शोशुभ्यते। सूचिसू

नैनार्हं

391

निसेसिच्यते।। न कवतेर्यङि। कवतेरभ्यासस्य चुत्वं न स्याद्यङि।

जपनि जंजप्यते इत्यादि।। ग्रो यङि। गिरते रेफस्य लत्वं स्याद्यङि। गर्हितं गिलति जेगिल्यते। घुमास्थेती
गुण: २ त्वम्। द्विमु। देदीयते। पेपीयते। सेषीयते। विभाषा श्वेः। शोशूयते। शेश्वीयते। यङि च। सास्मर्यते।
रीङृतः। चेक्रीयते। सुट्। संचेस्क्रीयते। सिचो यङि। सिचः सस्य षो न स्याद्यङि। कोकूयते। कौतिकुव
त्योस्तु। चोकूयते। नीग्वंचुस्रंसुध्वंसुभ्रंसुकसपतपदस्कंदाम्। एषामभ्यासस्य नीगागमः स्याद्यङ्
लुकोः। अकित इत्युक्तेर्न दीर्घः। नलोपः। वनीवच्यते। सनीस्रस्यते इत्यादि।। नुगतोनुनासिकां
तस्य। अनुनासिकांतस्यांगस्य योभ्यासोकारांतस्तस्य नुक् स्यात्। नुकानुस्वारो लुप्यत इत्युक्ते र।
यंयम्यते। यंयम्यते। तपरत्वसामर्थ्याद्भूतपूर्वदीर्घस्यापि न। भाम क्रोधे। बाभाम्यते। ये विभाषा। जा
जायते। जंजन्यते। हन्तेर्हिंसायां घ्नीभावो वाच्यः। जेघ्नीयते।। हिंसायां किं। जिंघन्यते। रीगृदुपधस्य च
स्य च। ऋदुपधस्य धातोरभ्यासस्य रीगागमः स्याद्यङ्लुकोः। वरीवृत्यते। लुस्ना। द्विर्वांल्ने रसः। नरी
नृत्यते। जरीगृह्यते। उत्र यत्र लत्वे। चलीक्लृप्यते। रीगृत्वत इति वक्तव्यम्। वरीवृश्च्यते। परीपृच्छ्यते
स्वपिस्यमिव्येञां यङि। सम्प्रसारणं स्याद्वे। सोषुप्यते। से। सिम्यते। वेवीयते। न वशः। वावश्यते। चाय
भौ ३ की। चेकीयते। ई घ्राध्मोः। जेघ्रीयते। देध्मीयते। अयङ्यि क्ङिति। शीङोयङादेशः स्याद्यादौ क्ङिति
परे। शाशय्यते। अभ्यासह्रस्वः। ततो गुणः। डोढौक्यते। तोत्रौक्यते।। ।।इति यङन्तप्रक्रिया।।।

अ५

॥सिद्धान्त०॥
॥७५॥

यङोचि च। यङोऽच्प्रत्यये लुक् स्यात् चकारात्तं विनापि बहुलं लुक् स्यात्। अनैमित्तिकोयमन्तरंगत्वादादौ भव
ति ततः प्रत्ययलक्षणेन यङन्तत्वाद्द्वित्वम्। अभ्यासकार्यं। धातुत्वाल्लडादयः। शेषात्कर्तरीति परस्मै
पदम्। अनुदात्तङित इति तु न। ङित्त्वस्य प्रत्ययाप्रत्ययसाधारणत्वेन प्रत्ययलक्षणाप्रवृत्तेः। यत्र हि
प्रत्ययस्यासाधारणरूपमाश्रीयते। तत्रैव तत्। अत एव सुहृत्पत्यासाहड्व्यज्ञावेतस्योतिदीधीनि
यपिस्पर्धशीङ् ह्रयोरनुदात्तङितस्तस्यापि नानु[illegible]दात्त ङित इत्यनुबन्धनिर्देशान्नेह शाग्नचवशिनपु
शपेति नि[illegible]षेधात्। अत एव श्यन्नाहयोन। गणेन निर्देशात्। किन्तु बेवाचर्करीतंचे
त्यदादौ पाठाच्छपो लुक्। यङो वा यङन्तात्सरस्य हल्ग्रहः पितः सार्वधातुकस्य ईड्वा स्या
त्। भूसुवोरिति गुणनिषेधो यङ्लुकि भाषायां न। बोभूतु तेतिक्ते इति छन्दसि निपातनात्।
अत एव यङ्लुग्भाषायामपि सिद्धः। न च यङ्लुक्यप्राप्त एव गुणस्तो बोभूतु इति निपात्यतां इति
निवाच्यम्। चेक्रीयितग्रहणे यङ्लुगन्तस्यापि ग्रहण[illegible]णात्। द्विःप्रयोगो द्विर्वचनं षाष्ठमिति
सिद्धान्तात्। बोभवीति। बोभोति। बोभूतः। बोभुवति। बोभवाञ्चकार। बोभविता।
अबोभवीत्। अबोभोत्। अबोभूताम्। अबोभूवुः। बोभूयात्। बोभूयास्ताम्। बोभूया
स्ताम्। गातिस्थेति सिचो लुक्। यङो [illegible] नीह्रस्वे गुणं बाधित्वा नित्यत्वाद्वुक्। अबोभूवीत्। अ

अद

॥राम॥
॥७५॥श्री

वे१

वोस्तोत।अवोस्तूताम्।अस्त्यस्ता।अयोजुःस्तनित्यत्वाद्वुक्।अवोस्तुवुः।अवोस्तविष्ठदित्यादि॥।पास्पर्द्धी
ति।पास्पर्द्धि।पास्पर्द्धः।पास्पर्द्धति।पास्पर्त्सि।कुत्सत्स्योर्धिः।पोस्पर्धि।लङ्।अपास्प र्।अपास्पर्द्धी धा:३
त्।सिपि।दश्चेति रुत्वपक्षे रोरि।अपास्पाः।जागाघ्रि।जाघास्ति।अजाघात्।सिपि।रुत्वपक्षे अजाघः।नो
धृ।नानाति।नानोत्तः।दधदादृधि।दादृढः।दाधसि।अदाधत्।अदाधाम्।अदादधुः।अदाधः।अदा
धत्।लुङि।अदादाधीत्।अदाधीत्।वोस्कुर्दीति।वोस्कुर्ति।अवोस्कुन्।अवोस्कुर्ताम्।अवोस्कुर्दुः।
मोमुदीति।मोमोत्ति।मोमोदाञ्चकार।मोमोदिता।अमोमुदीत्।अमोमोत्।अमोमुत्ताम्।अमोमु
दुः।अमोमुदीः।अमोमोः।अमोमोत्।लुङि गुणः।अमोमोदीत्।वोकुन्ति।वोकुर्दीति।लङ्।तिपि।अ
वोकूर्त्।सिपि।पक्षे अवोकूः।अवोखूः।अजागृः।वनीवचीति।वनीवक्ति।वनीवक्तः।वनीवचति।अ
वनीवचीत्।अवनीवन्।जंगमीति।जंगन्ति।अनुदात्तोपदेशेत्यनुनासिकलोपः।जंगतः।जंगम
ति।म्वोश्च।जंगन्मि।जंगन्वः।एकाज्यदणोक्त्वान्नेण निषेधः।जंगमिता।अनुनासिकलोप
स्याभीयत्वेनासिद्धत्वान्न हेर्लुक्।जंगहि।मोनो धातोः।अजगन्वाङ्नुबंधनि इरशान्न्वेरुङः।
ह्म्यन्तेति न वृद्धिः।अजंगमीत्।अजंगमिष्टाम्।हन्तेर्यङ्लुकि।अभ्यासाद्धेति कुत्वम्।यद्यपि
हो हन्तेरित्यतो हन्तेरित्यनुवर्त्य विहितं।तथापि यङ्लुकि लवत्वमेवेति न्यासकारः।इति पाश

॥सि०॥
॥७५॥

द्वित्वे एकाचु ग्रहणं [illegible] धो नायं ङलुक्यभ्यासस्य गुणविधिनातस्या नित्यत्वज्ञापनात् तथा स्यासकार्यं पंचरनामपि
निषध्यतामिति ना [illegible] पम् १

पेति निषेधस्तु नित्यः। गुणो यङ्लुकोरिति सामान्यापेक्षज्ञापकत्वादिति स्थावः। जंघनीति। जंघंति।
जंघ्नतः। जंघ्नति। जंघ नेना। श्तिपा निर्देशाज्जादेशो न। जंघन्मि। अजंघनीत्। अजंघन्। जंघन्या-
त्। जिघांसिषितु। वध्यात्। अवधीत्। अवधिष्टाम्। इत्यादि। वृधातोस्तस्य द्वित्वं तु न भवति। [illegible] निवृत्ते
नानत्वासस्येति निपधात्वात् तद्विसमानाधिकरणधातो विशेषणम्। बकुडी। हिवलौ [illegible] डुवो
नु आङो यमहनः इत्यात्मनेपदम्। आजंघते। इत्यादि। उत परस्यैति न परत्वान्न गुणः। हु लि
यैति दीर्घस्तु स्यादेव तस्यासिद्धत्वे भन परत्व निर्वर्त्यतोह। वर्वृतीति। वर्वुरीति। वर्वूर्तः। वर्वुरति। अ-
र्वुरीत्। अवर्वूः। चंखनीति। चंखन्ति। जनसनखनेत्यात्वं। चंखातः। गमहनेत्युपधालोपः। चंख्नति।
चंखाहि। चंखनानि। अचं खनीत्। अचंखन्। अचंखानाम्। अचंख्नुः। ये विभाषा। चंखायात्।
त्। चंखन्यात्। अचंखनीत्। अचंखानीत्। तु नो वृद्धिरित्यत्र नोत्यस्तस्येत्यनुवृत्तेर्वृद्धिर्न। यो-
योति। योयवीति। अयोयवीत्। अयोयोत्। योयुयात्। आशिषि दीर्घः। योयूयात्। अयोयावी-
त्। नोनवीति। नोनोति। जाहेति। जाहाति। ईहल्यघोः। जाहीतः। इ हल्जहातेश्च। आ च हौ। लो-
पो यि। घुमास्था। एर्लिङि। इत्येते परत्वादपि ने भवन्ति। श्तिपा शपेति निर्देशात्। जाहति। जाहा-
सि। जाहेषि। जाहीथः। जाहीथ। जाहाहि। अजाहेत्। अजाहात्। अजाहीताम्। अजाहुः।

जाध
पे०ग
स०ग
॥राम॥
॥७५॥

395

ववर्त्ति।मास ३ ववर्त्तिति। ३ गणनिर्दिष्टत्वान्नद्युश्चतुस्वइतिन। ववर्त्तिथेति। ४

८३

जाह्रीयात्। आशि। षि। जाहायात् अजा

हासीत्। अजाहासिष्टाम्। अजाहिषुः। लुक्। लुप्ते प्रत्ययलक्षणाभावात्स्वापिस्य मीत्युत्वं न। स्वप्ना दित्य इतिगणनिर्दिष्टं न वा। दि
ण्न। सास्वपीति। सास्वप्ति। सास्वप्तः। सास्वपति। असास्वपीत्। असास्वप्। सास्वप्यात्। आशिषि तु। वचिस्वपीत्युत्वम्। सा
सुप्यात्। असास्वापीत्। असास्वपीत्। औणादिको वलुकि। अदुपधस्य धातोरभ्यासस्य रुक् रिक् रीक् एते आगमाः स्युर्य
ङ्लुकि। आ तश्च। अदन्तधातोरपि तथा। वर्वृतीति। वरिवृतीति। ववर्त्ति। वरिवर्त्ति। वरीवर्त्ति। वर्वृत्तः ३ वर्वृतति। ३ अवर्वृ

वारिवृतीति। ४

तीत्। ३ अववर्त्। श्तिपि दृशेति रूपद्वये रोरि। अववाः ३ गणनिर्दिष्टत्वादङ्। अवर्वृतत्। ३ वर्करीति। वरिकरीति। वरी
करीति। वर्कर्ति। वरिकर्ति। वरीकर्ति। वर्कृतः। ३ वर्क्रति ३ वर्करांचकार। ३ वर्करिता। ३ अवर्करीत्। ३ अवर्कः। ३ व
र्क्रियात्। ३ आशिषि रिङ्। वर्क्रियात्। ३ अवर्करीत्। ३ आतश्चेति न परत्वान्नेट्। हृ। विक्षेपणे। वाकर्त्ति। तानर्त्ति।
तातीर्त्तः। तातिरति। तातीर्हि। तातराणि। अतातारीत्। अतातः। अतातीर्त्ताम्। अतातरुः। अतातारिष्टाम् इत्यादि। अ
तैर्यङ्लुकि द्विते अभ्यासस्योरदत्वं रपरत्वम्। हलादिः शेषः। रुक् रिग्रीकौ। अस्याभ्यासस्यासवर्ण इतीयङ्। अर

अतातारीह २

396

री १ घ २

त्रीः। अरियर्त्ति। अररीति। अरीयर्ति। अर्तेः। अरियृतः। ह्रि अरयणु। रुकोरोरीति लोपः। ननु तस्मिन्कर्तव्ये यणः स्थानिवत्त्वम्।
पूर्वत्रासिद्धे तन्निषेधात्। आरति। अरियृति। लिङि श्तिपा निर्देशात्। गुणोऽर्तीति गुणो न न। रिङ्। रलोपः। ह्रीं घः। अरियात्। अ
रि रियात्। गृ धृ ग्रहणे। जर्गृहीति। १ जगर्ढि। २ जर्गृढः। ३ जर्गृहति। ३ अजर्गृढुः। २ गृ स्तातेस्तु। जाग्रहीति। जा
ग्या ढि। तसा ढौ। ङिन्निमित्तं सम्प्रसारणम्। तस्य बहिरंगत्वेनासिद्धत्वान्न रुगादयः। जागृढः। जागृहति। जाग्र
हीषि। जाघ्राह्मि। लुटि जाग्रहिता। ग्रहोलिटि दीर्घः। स्तुनो तत्रैकाच इत्यनुवृत्तेः। माधवस्तु दीर्घमाह। तच्छ
ष्यादिविरुद्धम्। जर्गृधीति। १ जागर्धि। १ जागर्द्धः। ३ जर्गृधति। १ जर्गृधीषि। १ जागर्धि। ३ अजर्गृधीत। २
ङि लावे गुणः। हल्ङ्यादिलोपः। लघुलावः। जश्त्वचर्त्वे। अजर्घर्त्। २ अजर्गृधाम्। सिपि दश्चेति पक्षे रुत्वम्। अज
र्घाः। २ अजर्गृधीः। अ[illegible]धिष्टाम्। पापच्छीति। पापष्टि। तसा ढौ। ग्रहिज्येति सम्प्रसारणं न वर्तते। श्तिपा निर्देशा
त्। ह्लुः। श्रूटितिशः। व्रश्चेति षः। पापृष्टः। पापृच्छति। पापृश्मि। पापृच्छ्मः। पापृश्मः। यकारवकारान्तौ तुच्छु विनो

अरीरियात् ३

॥राम॥
।७६।

न २ ना १

यङः लुङ्नास्तीति छ्वोरिति सूत्रे ताभ्यां ध्वनितम्। कैय्यटेनैव स्पष्टीकृतम्। इदं च छ्वोरिति यत्रौठ् तद्विषयकम्। ज्वरत्वरेत्यूठ् तावनोः त्रिविभ
व्योस्तु यङ्लुगस्त्येवेति न्यायम्। माधवादिसम्मतं च। मव बंधने। अयं वौनो जुहलादौ। तेहदे हदेवने हसादयो वान्ताः। हय गतौ।
जाहयीति। जाहति। जाहतः। जाहयति। जाहसीव लिलोपे यमादौ दीर्घः। जाहावः। जाहामः। हय कांतिगत्योः। जाहयी जाहामि २
जाहर्ति। जाहर्तः। जाहयति। लोटि। जाहर्ति। अजाहः। अजाहर्तां। अजाहयुः। मव बंधने। ज्वरत्वरस्त्रिव्यविमवामुपधायाश्च।
ज्वरादीनामुपधावकारयोरूठ् स्यात् क्वौ झलादावनुनासिकादौ च प्रत्यये परे। अत्र क्ङितीति नानुवर्तते। अवतेस्त्व भि
ओतुरिति दर्शनात्। अनुनासिकग्रहणं चानुवर्तते। अवतेर्मनिन्प्रत्यये तस्य टिलोपे ओमिति दर्शनात्। ङित्वाद्वेनु वि
तिगुणः। मामोति। मामवीति। मामूतः। मामवति। मामोषि। मामोमि। मामावः। मामूमः। मामोतु। मामूतात्। मामूहि। मामव
वानि। अमामोत्। अमामोः। अमामवम्। अमामाव। अमामूम। तुर्वी हिंसायाम्। तोतूर्वीति। राल्लोपः। रेफात् छ्वोः
लोपः स्यात्। क्वौ झलादावनुनासिकादौ च प्रत्यये इति वलोपः। लघूपधगुणः। न धातुलोप आर्धधातुके। धात्वंश
लोपनिमित्ते आर्धधातुके परे इको गुणवृद्धी न स्तः। इति नेह निषेधः। तिबादीनामनार्धधातुकत्वात्। तोतोर्त्ति। ह

398

।लिवेतिदीर्घः।तोतूर्त्ति।तोतूर्वति।तोथोर्त्ति।दोदोर्त्ति।दोधोर्त्ति।मुर्छा।मोमोर्त्ति।मोमूर्त्तः।मोमूर्छति।इत्यादि।आर्द्धधातुकइ
तिविषयसप्तमी।तेनयङिविवक्षितेऽजेर्वी।वेवीयते।अस्ययङ्लुङ्नास्ति।लुकापहारे विषयत्वासंभवेनवीभावस्या
प्रवृत्तेः॥ ॥इतियङ्लुगन्तप्रक्रिया॥ ॥ ॥सुपआत्मनःक्य ।चू।इषिकर्मणएषितुःसंबंधिनःसुबन्तादिच्छा
यामर्थेक्यच्प्रत्ययोवास्यात्।धात्ववयवत्वात्सुब्लुक्।क्यचिच।अस्यईत्स्यात्।आत्मनःपुत्रमिच्छतिपु
त्रीयति।वान्तोयिप्रत्यये।गव्यति।नाव्यति।लोपःशाकल्यस्येतितुन ।अपदान्तत्वात्।तथाहि।नःक्ये।क्यचि
क्यङिचनान्तमेवपदंस्यान्नान्यत्।संनिपातपरिभाषयायस्यलोपोन।गव्यांवकार।गव्यिता।नाव्यांवका
रा।नाव्यिता।लोपः।राजीयति।प्रत्ययोत्तरपदयोश्च।त्वद्यति।मद्यति।एकार्थयोरित्येव।युष्मद्यति।अस्मद्यति।ह
लिवाणीयति।पूर्यति।धातोरित्येवानेह।दिवमिच्छति।दिव्यति।पुरमिच्छति।पुर्यति। तिमाभवानकस्युदाहरणेरि
त्यमू।पूर्गिरिः।सोम्यादीयतिइतिदीर्घस्तुप्रा ः।क्षामादिकएव।अदस्यति।रीऋतः।कर्त्रीयति।क्यच्यो।श्वागाग
येति।वाच्यति।अकृत्सार्वेतिदीर्घः।कर्वीयति।समिध्यति।क्यस्यविभाषा।हलःपरयोःक्यच्क्यङोर्लोपोवास्या

॥राम॥
॥८७॥

ह्॥२

399

६६

दार्द्धधातुके। आदेः परस्य। अतो लोपः तस्य स्थानिवत्वाल्लघूपधगुणो न। समिधिता। समिध्यिता। मांतप्रकृतिकसुबंतादव्ययाच्च क्यच् न। कि
मिच्छति। इदमिच्छति। स्वरिच्छति। अशनायोदन्यधनाया बुभुक्षापिपासागर्द्धेषु। क्यजंता निपात्यंते। अशनायति। उदन्यति। ध[illegible]नायति। बुभुक्षा
दौ किम्। अशनीयति। उदकीयति। धनीयति। अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि। असुगागमः स्यात्। अश्ववृषयोर्मै
थुनेच्छायाम्। अश्वस्यति वडवा। वृषस्यति गौः। क्षीरलवणयोर्लालसायाम्। क्षीरस्यति बालः। लवणस्यत्युष्ट्रः। सर्वप्रातिपदि
कानां क्यचि लालसायां सुगसुकौ। दधिस्यति। दध्यस्यति। मधुस्यति। मध्वस्यति। काम्यच्च। उक्तविषये काम्यच् स्यात्। पु
त्रमात्मन इच्छति पुत्रकाम्यति। पुत्रकाम्यिता। इह यस्य हल इति लोपो न। अनर्थकत्वात्। यस्येति संघातग्रह
णमित्युक्तत्वाच्च। यशस्काम्यति। सर्पिष्काम्यति। मांताव्ययेभ्योप्ययं स्यादेव। किंकाम्यति। स्वःकाम्यति। उपमा
नादाचारे। उपमानात्कर्मणः सुबंतादाचारेर्थे क्यच् स्यात्। पुत्रमिवाचरति पुत्रीयति छात्रम्। विष्णूयति
द्विजम्। अधिकरणाच्चेति वक्तव्यम्। प्रासादीयति कुट्याम्। कुटीयति प्रासादे। कर्तुः क्यङ् सलोपश्च।
उपमानात्कर्तुः सुबंतादाचारे क्यङ् वा स्यात्। सांतस्य तु कर्तृवाचकस्य लोपो वा स्यात्। क्यङ् स्युकेः पद्देवा

क्यम्। सान्तस्य लोपस्तु क्यङ् संनियोगशिष्टः स च व्यवस्थितः। ओजसोऽप्सरसो नित्यमितरेषां विभाषया। कृष्ण इ
वाचरति कृष्णायते। ओजःशब्दो वृत्तिविषये तद्वति। ओजायते। अप्सरायते। यशायते। यशस्यते। विद्वायते। वि
द्वस्यते। त्वद्यते। मद्यते। अनेकार्थत्वे तु युष्मद्यते। अस्मद्यते। क्यङ्मानिनोश्च। कुमारीवाचरति कुमारायते।
हरिणीवाचरति हरितायते। गुर्वीव गुरूयते। सपत्नीव सपत्नायते सपतीयते। सपत्नीयते। युवतिरिव युवा
यते। पट्वीमृद्व्याविव पट्वीमृदूयते। न कोपधायाः। पाचिकायते। आचारेऽवगल्भक्लीबहोडेभ्यः क्विब्वा। वाग्रह
णात्क्यङपि। अवगल्भादयः पचाद्यजन्ताः॥ क्विप्संनियोगेनानुदात्तत्वमनुनासिकत्वं वा। अनुप्रत्ययस्य
त्राति ज्ञायते॥ तेन तङ्। अवगल्भते। क्लीबते। होडते। भूतपूर्ववदिष्टानेकाच्त्वादाम्। एतद्वार्तिकारंभसामर्थ्या
त्। न चावगल्भत इत्यादिसिद्धिस्तत्फलम्। केवलानामेवाचारेऽपि वृत्तिसंभवो धातूनामनेकार्थत्वात्। अ
वगल्भांचक्रे। क्लीबांचक्रे। होडांचक्रे। वार्तिकेऽवेत्युपसर्गविशिष्टपाठात्। केवलादुपसर्गान्तर। विशिष्टाच्च क्य
ङेवेति माधवादयः। तन्नेत्युचितम्। सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः। पूर्ववार्तिकं तु अनबंधासंगार्थम्।

॥राम॥
॥७८॥

वा२

पुर

त्रक्विबनूद्यते। प्रातिपदिकग्रहणादिह सुप इति न संबध्यते ते॰ नपदकार्यं नो कृष्णभूवा॰ वरति कृकति। अतो गुणा इति शपास ह
पररूपम्। अट्वावरति। अति। अतः। अंति। प्रत्ययग्रहणमपनीय अनेकान्त इत्युक्ते नम्रि। ओ। अनुः। उ। द्वित्वम्। अतो गुणो अ
त आदेरितिदी॰ घः॰ल ल ओ दृढ्ढि। अनुसादितु आतो लोप इटि चेत्यालोपः। मालेवाचरति मालाति। लिंगविशिष्टपरिभाषय लोप
एकादेशपूर्वांतित्वाद्धाद्धि पू। मालांचकार। लङ्। अमालात्। अत्र हल्ङ्यादिलोपो न। ङीसाहचर्यादापोपि सोरेव विधान
त्। हृ हृकौ। अमालासीत्। कविरिवकवयति। आशीर्लिङि। कवीयात्। शिविड्ढिरित्यत्र धातोरित्यनुवर्त्य धातुरेव यो
धातुरिव यो तु रिति व्याख्यानान्नाम धातो न इड्ढिरिति कैयटादयः। अकवयीत्। माधवस्तु नामधातोरपि वृद्धि
छति। अकवायीत्। विरिवविवयति। विवाय। विय्यतुः। अवयीत्। अवायीत्। श्रीरिवश्रयति। शिश्राय। शिश्रियतुः। पि
तेव। पितरति। आशिषि पिरुः। पित्रियात्। स्तृरिवास्तवति। अचेगाति स्त्रेति लुवो॰ वु गिति लवतेरङ् इति न लवति। अ
तिव्यकृत्वेन धातुपावस्त्रस्यैव तत्र ग्रहणात्। अस्तावीत्। वुलावाडुरिवड्वति। लिग्रीति रुङ्। अड्वावीत्। अनुनासिक
स्यक्विझलोः क्ङिति। अनुनासिकांतस्योपधाया दीर्घः स्यात् क्वौ झलादौ च क्ङिति। इदमिवाचरति। इदामति। राजेव

402

९

मथो न ति २

विति वचना २

राजानतिपंथाइवपथीनतीँ॥ अनुक्षीणति। ध्योरिवदेवतीतिमाधव॥ अनौ ङ्घिवतीति नूवितमूक इव वकाविति हरदत्त। माधवस्तु ण्य
ल्लोपाँम लिट् द्विबाधित्वात्तो लोपा वक इति रूपमाह। स्व इवं सखीसस्व। यसु स्वामासस्वां नकारे तितदनाकरमेव॥ ॥स्य
श्वादिभ्यो लुच्चे लोपश्च हलः॥ ॥अस्लत नञ्जाव विषये भ्यो ल्लमादिभ्यो लवत्यर्थे क्यङ् स्यात्। हलं नानामे षां लोप
श्च। अस्लशो स्लशो लवति स्लशायते। अद्वैरितिपर्युदासबलाद स्लतनञ्जावइति लब्धम्। तेन हनाकदिवा स्लशालवति। येषां
ञ्चो स्लशाः नव्लाचादयस्तेहि वा कलवंतीत्यर्थः। सुमनस्। अस्य सलोपः। सुमनायते। उरादौ संग्राम युद्ध इति पठ्यते सं
ग्रामेति प्रातिपदिकम्। तस्मान्न करोतीति णिच्। सिद्धः नतसैयोगे नरनुबंधश्चास नयते। युद्धे योयं ग्रामशब्द इत्युक्ते पि
साम थ्या त्संग्रामशब्दे लब्धो विशिष्टपावेज्ञापयति उपसर्गसमाकारं पूर्वपदं धातुसंज्ञा प्रयोजके प्रत्यये णिकी षिति
पृथक्क्रियेत इति। तेन मनःशब्दात्यागदूस्वमनायत। उन्मनायते। उद्मनायत। एवं व अवागल्भेत अवागल्भि
ष्टेत्यादावपि अवेत्यस्य पृथक्करणं बोध्यम्। ज्ञापकं च सजातीयविषयं तेन यत्रोपसर्गसरूपं सकलं श्रूयते न
त्वादेशेनापहृतं तत्रैव पृथक्कृतिः। एवं च अत्र उद्ढ चोढः स इनायमी। औढायिता। अत्र उन्मनाय्य अवगा

तव ५
मि ६

॥ राम ॥
॥ ७९ ॥

2103

ब

ल्स्येति वक्तव्यम्। ज्ञापकस्य विशेषविषयत्वात् वार्त्तिकं तज्ज्ञापकार्थं प्रमाणम्। तथा हि। तस्यो माङ्‌स्वाटः प्रतिषेधः। तसि चो माङोऽप्रयोगा
टः परत्वपंने त्यर्थः। उस्त्वामैच्छत। औस्त्वीयत। औकारीयत। ओदीयत। आटश्चेति वृद्धिः। न पुनर्वृद्धिविधानादिदं सिद्धमिति भाष्ये स्थि
तम्॥ ॥ लोहितादिडाज्भ्यः क्यष्। लोहितादिभ्यो डाजन्तेभ्यश्च भवत्यर्थे क्यष् स्यात्। वा क्यषः। क्यषन्तात्परस्मैपदं वा स्यात्। लोहिता
यति। लोहितायते। अत्राच्वेरित्यनुवृत्त्याऽभूततद्भावविषयत्वं लभ्यम्। तच्च लोहितस्यैव विशेषणम्। न तु डाजोऽसम्भवात्। भाष्या
दिषु डाज्ग्रहणं। तस्य प्रत्याख्यानात्। तथा च वार्त्तिकम्। लोहितडाज्भ्यः क्यष्वचनं भृशादिष्वितराणीति। न चैवं काम्यवद्
वक्यषोऽपि ककारः श्रूयेत। उच्चारणसामर्थ्यादिति वाच्यम्। तस्यापि साध्ये प्रत्याख्यानात्। पटपटायति। पटपटायते। कृत्वस्तिथ
गांविने हुडाजू। डाजन्तो क्यषो विधानसामर्थ्यात्। यत्तु लोहितश्याम दुःखानि हर्षगर्वसुखानि च। मूर्छानिद्राकृपाधूमाः क
रुणा नित्यचर्म लोहितादिषु पठित्वा श्यामादिभ्यो क्यषिपद्यमुदाहरन्ति। तद्भाष्यवार्त्तिकविरुद्धम्। तस्मादेभ्यः क्यङेव।
श्यामायते। दुःखादयो वृत्तिविषये तद्वति वर्त्तन्ते। लिंगविशिष्टपरिभाषया लोहिनीशब्दादपि क्यष्। लोहिनीयति। लोहि
नीयते। कष्टाय क्रमणे। चतुर्थ्यन्तात्कष्टशब्दादुत्साहेऽर्थे क्यङ् स्यात्। कष्टाय क्रमते कष्टायते। पापं कर्तुमुत्सहत इत्यर्थः। सत्रक

पि



पुछ्। उत्सने व्यसने पर्यसने च। विछ्छर्दं विविधं वो ह्लेपणं व्यसनम्। उत्पुछ्यते। विपुछ्यते। परिपुछ्यते। भांडा समायने। संभांडयते। भां
डानि समाचिनोति राशीकरोतीत्यर्थः। संभवताऽप्युत। चीवरार्जने परिधाने च। संचीवरयते भिक्षुः। चीवराण्यर्जयति। परिधत्ते वेत्यर्थः। मु
ड मिश्र श्लक्ष्ण लवण व्रत वस्त्र हल कल कृत तूस्तेभ्यो णिच्। कृञर्थे मुंडं करोति मुंडयति। व्रताद्भोजने तन्निवृत्तौ च। पयः। शूद्र
न्नं वा व्रतयति। वस्त्रात् समाच्छादने। संवस्त्रयति। हल्या हलियोर्ग्रहणे। हलिकल्योरदन्तत्वं च निपात्यते। हलिकलिग्रहणात्। हलय
ति। कलयति। महद्धलं हलिः। परत्वाद्वृद्धौ सत्यामपि इष्टवद्भावेन अगो वलुप्यते। अतः सन्वद्भाव दीर्घौ न। अजहलत्। अचक
लत्। कृतं गृह्णाति कृतयति। तूस्तानि विहन्ति वितूस्तयति। तूस्तं केश इत्येके। जटीभूताः केशा इत्यन्ये। पापमित्यन्ये। परे ६
मुंडादयः सत्यापेत्यन्ते चपुरादिषु युक्ताः। प्रातिपदिकाद्धात्वर्थे इति वा सिद्धे केषांचिद्ग्रहणं सापेक्षेभ्योपि णिजर्थम्। ह
लकल्योरदन्तार्थम्। सत्यस्यापुगर्थम्। केषांचित्तु प्रपंचार्थम्। सत्यं करोत्याचष्टे वा सत्यापयति। अर्थवेदयोरप्या
पुग्वक्तव्यः। अर्थापयति। वेदापयति। पाशं विमुंचति विपाशयति। रूपं पश्यति रूपयति। वीणयोपगायति उपवीणयति।
तूलेनानुकुष्णाति। अनुतूलयति। तृणाग्रम्। तूलेनानुघट्टयतीत्यर्थः। श्लोकैरुपस्तौति उपश्लोकयति। सेनया

मुंडयति माणवकं। मिश्रयत्यन्नं। श्लक्ष्णयति वस्त्रं। लवणयति व्यंजनमिति।४

अभ्यषेणयत्। आक्सितादिति षः। अभिसिषेणयिषति। स्थादिष्वभ्यासेन चेति षः।१

मृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः। एते सप्त क्यबन्ता निपात्यन्ते। राज्ञा सोतव्योऽभिषवद्वारा निष्पादयितव्यः। यद्वा। लतात्म
कः सोमः। सोमो राजा स सूयते कण्ड्यतेऽत्रेति अधिकरणे क्यप् निपातनाद्दीर्घः। राजसूयः। राजसूयं। अर्धर्चादिः। सरत्याका
शे सूर्यः। कर्त्तरि क्यप् निपातनादुत्वं। यद्वा। षूप्रेरणे तुदादिः। सुवति कर्मणि लोकं प्रेरयति। क्यपो रुट्। मृषोपपदाद्वदेः कर्म
णि नित्यं क्यप्। मृषोद्यं। विरोधान्निष्कार्यं। उच्छ्रायसौन्दर्यगुणा मृषोद्याः। रोचते रुच्यः। गुपेरादेः कत्वं च संज्ञायां। सुवर्णरजतभिन्नं
धनं कुप्यं। कृष्टे स्वयमेव पच्यन्ते कृष्टपच्याः। कर्मकर्तरि। शुद्धे तु कर्मणि कृष्टपाक्याः। न व्यथतेऽव्यथ्यः। भिद्योद्ध्यौ नदे। भिदे
रुज्झेश्च क्यप्। उज्झेर्धत्वं। भिनत्ति कूलं भिद्यः। उज्झत्युदकमुद्ध्यः। नदे किं। भेत्ता। उज्झिता। पुष्यसिध्यौ नक्षत्रे। अधिकरणे ॥४॥
क्यब्निपात्यते। पुष्यंत्यस्मिन्नर्थाः पुष्यः। सिध्यंत्यस्मिन् सिध्यः। विपूयविनीयजित्या मुंजकल्कहलिषु। पूङ् नी जि एभ्यः क्यप्। वि
पूयो मुंजः। रज्ज्वादिकरणाय शोधयितव्य इत्यर्थः। विनीयः कल्कः। पिष्टऔषधविशेष इत्यर्थः। पापमिति वा। जित्यो हलिः। ब

नीय२

449

त्यजिपूज्योश्चेति काशिका। तत्र पूजेर्ग्रहणं चिंत्यं। साध्यानुकृत्वात्। ण्यत्प्रकरणे त्यजेरुपसंख्यानमिति हि तार्त्यं।२
अजिव्रज्योश्च। नकुत्वं। समाजः। परिव्राजः। भुजन्युब्जौ पाण्युपतापयोः। एतयोरेतौ निपातौ। भुज्यतेऽनेनेति भुजः पाणिः। हलश्चेति घञ्। न्यु
ब्जंत्यस्मिन्न्युब्जः। उपतापो रोगः। पाण्युपतापयोः किं। भोगः। समुद्गः। प्रयाजानुयाजौ यज्ञांगे। एतौ निपातौ यज्ञांगे। पंच प्रयाजाः। त्रयोनुयाजाः। यज्ञांगे किं। प्रयोगः। अह पागः २
।।५।। प्रत्ततीनां नकुत्वं निष्ठायां सेट्त्वात्। गृधुगलुंचु प्रत्ततीनां तु कादित्वेपि कुत्वस्यादेव। तच्च मतं तु यद्यपि विपरीतं प्राप्ते तथापि यथोत्तरं मुनी
नां प्रामाण्यं। वंचेर्गतौ। कुत्वं न। वंच्यं। गतौ किं। वंक्यं काष्ठं। कुटिलीकृतमित्यर्थः। ण्य आवश्यके। कुत्वं न। अवश्यपाच्यं। यजयाचरुचप्रवच
र्चश्च। ण्ये कुत्वं न। याज्यं। याच्यं। रोच्यं। प्रवाच्यं। ग्रंथविशेषः। अर्च्यं। ऋदुपधत्वेपि अत एव ज्ञापकात् ण्यत्। त्यजिपूज्योश्च। त्याज्यं। पू
ज्यं। वचोऽशब्दसंज्ञायां। वाच्यं। शब्दसंज्ञायां तु वाक्यं। प्रयोज्यनियोज्यौ शक्यार्थे। प्रयोक्तुं शक्यः प्रयोज्यः। नियोज्यो भृत्यः। भोज्यं
भक्ष्ये। भोग्यमन्यत्। ण्यत्प्रकरणे लपिदभिभ्यां चेति वक्तव्यं। लाप्यं। दभिर्धातुष्वपठितोपि वार्तिकबलात्स्वीकार्यः। दाभ्यः। ओरा
वश्यके। उवर्णान्ताद्धातोर्ण्यत्स्यात्। आवश्यंभावे द्योत्ये। लाव्यं। पाव्यं। आसुयुवपिरपिलपित्रपिचमश्च। षुञ्। आसाव्यं। युमिश्रणे। याव्यं।
वा वाप्यं। राप्यं। लाप्यं। त्राप्यं। आचाम्यं। आनाय्योऽनित्ये। आङ्पूर्वान्नयतेर्ण्यदायादेशश्च निपात्यते। दक्षिणाग्निविशेषस्य वेदं। स हि गार्हपत्यादा
नीयतेऽनित्यश्च सततमप्रज्वलनात्। आनेयोन्यः। घटादिः। वैश्यकुलादेरानीतो दक्षिणाग्निश्च। प्रणाय्योऽसंमतौ। संमतिः
प्रीतिविषयीभवनं कर्मव्यापारः। तथा भोगेष्वादरोपि संमतिः। प्रणाय्यश्चोरः। प्रीत्यनर्ह इत्यर्थः। प्रणाय्योन्तेवासी विरक्त इत्यर्थः। आ ।।५।।
प्रणेयोन्यः। पाय्यसान्नाय्यनिकाय्यधाय्यामानहविर्निवाससामिधेनीषु। मीयतेऽनेन पाय्यं। मानं ण्यत्। धात्वादेः पत्वं। ओ
क उचः के। उचेर्गुणकुत्वे निपात्येते के परे। ओकः। शकुन्तवृषलौ। इगुपधलक्षणः कः। घञा सिद्धेऽन्तोदात्तार्थमिदम्। ९

450

तोयुगितियुक्।सम्यङ्नीयतेहोमार्थमग्निंप्रतीतिसान्नाय्यं।हविर्विशेषः।ण्यदायादेशः।समोदीर्घश्चनिपात्यते।निचीयतेऽस्मिन्धान्या
दिकंनिकाय्योनिवासः।अधिकरणेण्यतायाय्।धावादेःकत्वंचनिपात्यते।धीयतेऽनयासमिदितिधाय्या।ऋक्।क्रतौकुण्डपाय्यसंचा
य्यौ।कुंडेनपीयतेऽस्मिन्सोमइतिकुण्डपाय्यः।क्रतुः।संचीयतेऽसौसंचाय्यः।अग्नौपरिचाय्योपचाय्यसमूह्याः।अग्निधारणार्थेस्थ
लविशेषेएतेसाधवः।अन्यत्रतुपरिचेयं।उपचेयं।संचाय्यं।चित्याग्निचित्येच।चीयतेऽसौचित्योऽग्निः।अग्नेश्चयनमग्निचित्या।प्रैषा
तिसर्गप्राप्तकालेषुकृत्याश्च।त्वयागन्तव्यं।गमनीयं।गम्यं।हलोऽदाबाधायामास्त्रदितिपुनःकृत्यविधिः।स्त्र्यधिकारादूर्ध्वंवासरूप
विधिःक्वचिन्नेतिज्ञापयति।तेनक्तल्युट्तुमुन्खलर्थेषुनेतिसिद्धं।अर्हेकृत्यतृचश्च।स्तोतुमर्हःस्तुत्यःस्तुतिकर्मा।स्तोता।स्तुतिक
र्त्ता।लिङाबाधामाभूदितिकृत्यतृचोर्विधिः।भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्यावा।एतेकर्त्तरिवानिपा
त्यंते।पक्षेतयोरेवेतिसकर्मकात्कर्मण्यकर्मकाद्भावेज्ञेयाः।भवतीतिभव्यः।भव्यमनेनवा।गायतीतिगेयःसाम्नामयं।गेयं
सामानेनवा।इत्यादि।शकिलिङ्च।वाह्याः।वोढुंशक्योवोढव्यः।वहनीयोवाह्यः।लिङाबाधामाभूदितिकृत्योक्तिः।लाघ
वादनेनैवज्ञापनसंभवेशेषादिस्त्वेकृत्याश्चेतिसूत्रं।अर्हेकृत्यतृचोर्ग्रहणे।। ।।इतिकृत्यप्रक्रिया।। ।।ण्वुल्तृचौ।धा

451

॥श्री॥ तोरेतोस्तः। कर्त्तरि कृदिति कर्त्तर्यर्थे युवोरनाकौ। कारकः। कर्त्तरि वोढुमर्हतीति वोढा। कारिका। कर्त्री। गाङ्कुटादि ङित्वे। कुटिता।
अञ्णितीत्युक्तेर्न ङित्वं। कोटकः। विज इट्। विजिता। हनस्तोचिण्णलोः। घातकः। आतो युक्। दायकः। नोदात्तोपदेशस्येति वृ न२
द्धिः। शमको दमकः। अनिटस्तु नियामकः। जनिवध्योश्च। जनकः। वध हिंसायां। वधकः। रधिजभोरचि। रंधकः। जंभकः। ने
ट्यलिटि रधेः। रधिता। रद्धा। मस्जिनशोरिति नुम्। मंक्ता। नंष्टा। नशिता। रभेरशब्लिटोः। रंभकः। रब्धा। लभेश्च। लंभकः। लब्धा।
तीषसह। रुषिता। रुष्टा। सहिता। सोढा। दरिद्रातेरालोपः। दरिद्रिता। ण्वुलि न। दरिद्रायकः। कृत्यल्युट इत्येवसूत्रमस्तु
यत्र विहितास्ततोऽन्यत्रापि स्युरित्यर्थः। एवं च बहुलग्रहणं योगविभागेन कृन्मात्रस्यार्थव्यभिचारार्थं। पादाभ्यां ह्रि
यते पादहारकः। कर्मणि ण्वुल्। क्रमेः कर्त्तर्यात्मनेपदविषयात् कृत इण्निषेधो वाच्यः। प्रक्रन्ता। कर्त्तरीति किं। प्रक्रमि
तव्यं। आत्मनेपदेति किं। संक्रमिता। अनन्यत्रावेविषयत्वाद्। तेनानुपसर्गाद्वेति विकल्पात्स्य न निषेधः। क्रमिता। तद
त्वमेव तद्विषयत्वं। तेन क्रन्तेत्यपीति केचित्। गमेरिडित्यत्र परस्मैपदग्रहणं तङानयोरभावं लक्षयति। संजिगमिषिता॥ ॥श्री॥
एवं वृद्भ्यश्च तुल्यः। विवृत्सिता। यङन्तात् ण्वुल्। अल्लोपस्य स्थानिवत्वान्न वृद्धिः। पापचकः। पापाचकः। यङ्लुगन्तात्तु॥

452

पापात्मकः। नंदिग्रहिपचादिभ्यो ल्युणिन्यचः। नंद्यादेर्ल्युः। ग्रह्यादेर्णिनिः। पचादेरच् स्यात्। नंदयतीति नंदनः। जनमर्दय-
तीति जनार्दनः। मधुसूदनः। विशेषेण भीषयतीति विभीषणः। लवणः। नंद्यादिगणे निपातनाण्णत्वं। ग्राही। स्थायी। मंत्री।
विशयी। वृद्ध्यभावो निपातनात्। विषयीत्यत्र षत्वमपि। परिभवी। परिभावी। पाक्षिको वृद्ध्यभावो निपात्यते। पचादिराकृ-
तिगणः। शिवशमरिष्टस्य करे। कर्मणि घटोऽठच्। इति सूत्रयोः करोतेर्घटेश्चानुप्रयोगात् अच्प्रत्ययपरे यङ्लुग्विधानाच्च। केषां-
चित्सामस्तु अनुबंधासंजनार्थः। केषांचित्स्वपरार्थः। केषांचिद्बाधकबाधनार्थः। पचतीति पचः। नदट् चोरट् देवट् इत्यादयष्टितः।
नदी। चोरी। देवी। दीव्यतेरिगुपधेति कः [illegible]। जारभराश्वपचा अनयोः कर्मण्यण् प्राप्तः। न्यंक्वादिषु पाठात् श्वपाकोऽपि। यङो-
ऽचि चेति लुक्। न धातुलोप इति गुणवृद्धिनिषेधः। चेक्रियः। नेन्यः। लोलुवः। पोपुवः। मरीमृजः। चरिचलिपतिवदीनां वा द्वित्वम-
च्याक् चाभ्यासस्येति वक्तव्यं। आगमस्य दीर्घसामर्थ्यादभ्यासह्रस्वो हलादिशेषश्च न। चराचरः। चलाचलः। पतापतः। वद-
वदः। हन्तेर्घत्वं च। घत्वमभ्यासस्य उत्तरस्य तु अभ्यासाच्चेति कुत्वं। घनाघनः। पाटेर्णिलुक् चोक् दीर्घश्चाभ्यासस्य। पाटूपटः।
पक्षे चरः। चलः। पतः। वदः। पाटः। राचेर्हृतीति वामुसराविसरः। राचिसरः। इगुपधज्ञाप्रीकिरः कः। एभ्यः कः स्यात्। क्षिपः।
लिखः। बुधः। कृशः। ज्ञः। प्रीणातीति प्रियः। किरतीति किरः। वासरूपविधिनाण्वुल्तृचावपि। क्षेपकः। क्षेप्ता। आतश्चोपसर्गे।

कौ

कृतः १२

॥७॥

श्या घ्र ~ खशो न्यत्र २

कः स्यात्॥ ॰॰ धेतिणस्यापवादः। सुग्लध्वत्तः। पाघ्राध्माधेट्दृशः शः। पिबतीति पिबः। जिघ्रः। धमः। धयः। ध्माकध्या। धेट्ष्टित्वा
त्स्त्वान्ङे धयी तिरवशी कडी घूम्बा घ्नः। ञ्च्ञिनेध्यत इति स्वदत्तः। पश्यतीति पश्यः। डाः संज्ञायीन्। व्याघ्रादिस्लिविति निदेशात्। अ
नुपसर्गाल्लिंपविंदधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च। शः स्यात्। लिंपः। विंदः। धारयः। पारयः। वेदयः। उ
देजयः। चेतयः। सातिः सुखार्थः सौत्रो हेतुमण्यंतः। सातयः। वासरूपन्यायेन क्विपि सात्। परमात्मा। सात्वंतो भक्ताः। षत्म
र्षणे। चुरादिः हेतुमण्यंतो वा। साहयः। अनुपसर्गात्किं। प्रलिपः। नो लिंपे वक्तव्यः। निलिंपा देवाः। गवादिषु विंदेः संज्ञायां। गो

पाघ्रे नुवि स्मर्गीं तुम

विंदः। अरविंदं। ददातिदधात्योर्विभाषा। ददः। दधः। पक्षे वक्ष्यमाणो णः। अनुपसर्गादित्येव। प्रदः। प्रधः। ज्वलितिकसंतेभ्यो

शः स्यात्॥६

णः। इतिशब्दश्चाद्यर्थः। ज्वलादिभ्यः कसंतेभ्यो णः स्याद्वा। पक्षे अच्। ज्वालः। ज्वलः। चालः। चलः। अनुपसर्गादित्येव। उ
ज्वलः। तनोतेरुपसंख्यानं। इह अनुपसर्गादिति विशेषेति न संबध्यते। अवतनोतीति अवतानः। श्याद्व्यधास्रुसं[illegible]तीणवसाव

ख४ ७०

हृलिहश्लिषश्वसश्च। श्यैङ्प्रस्मृतिभ्यो नित्यं णः स्यात्। श्यैङो ऽश्यतेश्चादेचत्वात्। सिद्धे पृथ[illegible]ग्रहणं उपसर्गे कं बाधितुं। अ

॥७॥

वश्यायः। प्रतिश्यायः। आत्। दायः। धायः। व्याधः। स्रु गतौ। आङ्पूर्वः संपूर्वश्च। आस्रावः। संस्रावः। अत्यायः। अवसायः। अ
वहारः। लेहः। श्लेषः। श्वासः। दुन्योरनुपसर्गे णः स्यात्। दुनोतीति दावः। नीसाहचर्यात् सानुबंधकस्य दुनोतेर्ग्रहणं। दवः। नेतुप

तौ। ख४

454

शिल्पिनि कर्तरि

साघन्‌। दवः। नयतीति नायः। उपसर्गे तु प्रदवः प्रणयः। विभाषा ग्रहः। णो वा। पक्षेऽच्‌। व्यवस्थितविभाषेयम्‌। तेन जलचरे ग्राहः। ज्यो
तिषि ग्रहः। भवतेश्चेति काशिका। भवो देवः संसारश्च। भावः पदार्थः। भाष्यमते तु भाष्य धा[illegible]रा दिष्यनादश्च। भावः। गेहे कः। गे
हे कर्तरि ग्रहेः कः स्यात्‌। गृह्णाति धान्यादिकमिति गृहं। तात्स्थ्या गृहाः दाराः। शिल्पिनि ष्वुन्‌। क्रियाकौशलं शिल्पं त
द्वति कर्तरि ष्वुन्‌ स्यात्‌। नृतिखनिरञ्जिभ्य एव। नर्त्तकः नर्त्तकी। खनकः खनकी। अस्मिन्प्रत्यये रञ्जेर्नलोपो वाच्यः। रजकः
रजकी। भाष्यमते तु नृतिखनिभ्यामेव ष्वुन्‌। रञ्जेस्तु क्वुन्‌ शिल्पिसंज्ञयोरिति क्वुन्‌। टापू रजिका। पुंयोगे तु रजकी। गस्थ
कन्‌। गायतेस्थकन्‌ स्यात्‌। गाथकः। ण्युट्‌ च। गायनः। स्त्रियां गायनी। हश्च व्रीहिकालयोः। हाको ण्युट्‌ स्या
त्‌। व्रीहौ काले च कर्तरि। जहात्युदकमिति हायनो व्रीहिः। जहाति भावानिति हायनो वर्षं। जिहीते वा प्राप्नोतीति
वा। प्रुसृल्वः समभिहारे वुन्‌। समभिहारग्रहणेन साधुकारित्वं लक्ष्यते। प्रवकः सरकः लवकः। आशिषि च। आशी
र्विषयार्थवृत्तेर्धातोर्वुन्‌ स्यात्‌ कर्तरि। जीवतात्‌। जीवकः। नंदकः। आशीः प्रयोक्तृधर्मः। आशासितुः पित्रादेरियमु
क्तिः॥ ॥कर्मण्यण्‌। कर्मण्युपपदे धातोरण्प्रत्ययः स्यात्‌। उपपदसमासः। कुंभं करोतीति कुंभकारः। आदित्यं पश्य

नंदतात्‌

455

तीत्यादावनभिधानान्न।शी॰लिकामिभक्ष्याचरिभ्योणः।अणोपवादार्थंवार्त्तिकं।मांसशीला।मांसकामा।मांसभक्षा।क
ल्याणाचारा।ईक्षिक्षमिभ्यांच।सुखप्रतीक्षा।बहुक्षमा।कथंतर्हिगंगाधरभूधरादयः।कर्मणःशेषत्वविवक्षायांसिध्यंति
।ह्वावामश्च।अण्स्यात्कापवादः।स्वर्गह्वायः।तंतुवायः।धान्यमायः।आतोऽनुपसर्गेकः।आदंताद्धातोरनुपसर्गात्कर्म
ण्युपपदेकःस्यान्नाण्।आतोलोपः।गोदः।पार्ष्णित्रं।अनुपसर्गेकिम्।गोसंदायः।कविधौसर्वत्रप्रसारणिभ्योडः।ब्रह्मजि
नातिब्रह्मज्यः।सर्वत्रग्रहणात्सोपसर्गे।आह्वः।प्रह्वः।सुपिस्थः।सुपीतियोगोविभज्यते।सुप्युपपदेआदंतात्कःस्या
त्।द्वाभ्यांपिबतीतिद्विपः।समस्थः।विषमस्थः।ततःस्थः।सुपितिष्ठतेःकःस्यात्।आरंभसामर्थ्याद्भावे।आखूनामु
त्थानमाखूत्थः।अंबांबगोभूमिसव्यापद्वित्रिकुशेकुशंकंगुमंजिपुंजिपरमेबर्हिर्दिव्यग्निभ्यःस्थः।स्थइतिकप्रत्य
यांतस्यानुकरणं।षष्ठ्यर्थेप्रथमा।एभ्यःस्थस्यसस्यषःस्यात्।द्विष्ठः।त्रिष्ठः।इतऊर्ध्वंकर्मणिसुपीतिद्वयमप्यनुवर्त्त
तेतत्राकर्मकेषुसुपीत्यस्यसंबंधः।तुंदशोकयोःपरिमृजापनुदोः।तुंदशोकयोःकर्मणोरुपपदयोःआन्योःकःस्या
त्।आलस्यसुखाहरणयोरितिवक्तव्यं।तुंदंपरिमार्ष्टिइतितुंदपरिमृजोऽलसः।शोकापनुदः।सुखस्यहर्त्ता।अल ॥८॥

प्रष्ठोग्रगामिनि।प्रतिष्ठतइतिप्रष्ठोगौः।अग्रतोगच्छतीत्यर्थः।अग्रेतिकिम्।प्रस्थः।४

स्वो॰५

456

स्तादन्यचतुंदपरिमार्जस्वायअभ्रंसारासार चोपदेशेनशोकमपनुदतिसशोकापनोदः। कप्रकरणे मूलविभुजादिभ्यउपसंख्या
नम्। मूलानिविभुजतिमूलविभुजोरथः। आकृतिगणोयंमहीध्रः। कुध्रः। गिलेश्तिमिगिलः। प्रेदाज्ञः। दारूपौज्ञानीतेभ्यज्ञापस्थात्
कर्मण्युपपदेकः स्यादणोपवादः। सर्वप्रदः। पथिप्रज्ञः। अनुपसर्गइत्युक्तेः प्रादन्यस्मिन्नुपसर्गेनकः। गोसंप्रदायः। समिख्यः। गोसंख्यः। गापो
ष्टक्। अनुपसृष्टाभ्यामाभ्यां टक्स्यात्कर्मण्युपपदे। सामगः। सामगी। उपसर्गेतु सामसंगायः। पिबतेःसुराशीध्वोरितिवक्तव्यम्। सु
रापी। शीधुपी। अन्यत्रक्षीरपाब्राह्मणी। सुरांपातीतिसुरापा। हरतेरनुद्यमनेऽच्। अंशहरः। अनुद्यमनेकिम्। भारहारः। शक्ति
लांगलांकुशतोमरयष्टिघटघटीधनुःषु ग्रहेरुपसंख्यानम्। शक्तिग्रहः। लांगलग्रहः। सूत्रेचधार्यर्थे। सूत्रग्रहः। यस्तुसू
त्रंकेवलमुपादत्तेनतुधारयतितत्राणेव। सूत्रग्राहः। वयसिच। उद्यमनार्थमिदं। कवचहरः। कुमारः। आङिताच्छील्ये। पुष्पाण्या
हरतितच्छीलःपुष्पाहरः। ताच्छील्येकिम्। भारहारः। अर्हः। अर्हतेरच्स्यात्कर्मण्युपपदे। अणोपवादः। पूजार्हाब्राह्मणी।।
स्तंबकर्णयोरमिजपोः। हस्तिसूचकयोरितिवक्तव्यम्। स्तंबेरमतेरस्तंबेरमोहस्ती। तत्पुरुषेकृतीतिहलदंता
दितिवाऽलुक्। कर्णेजपः सूचकः। शमिधातोःसंज्ञायाम्। शंभवः। शंवदः। पुनर्धातुग्रहणंबाधकविषयेपिप्रवृत्त्यर्थं।

८।४

457

उदरेणशेते२

॥राम॥
॥ ७॥

कृञो हेत्वादिषु टो मा भूत्। शंकरा नाम परिब्राजिका तच्छीला। अधिकरणे शेतेः। खे शेते खशयः। पार्श्वादिषूपसंख्यानम्। पा
र्श्वाभ्यां शेते पार्श्वशयः। पृष्ठशयः। उदरशयः। उत्तानादिषु कर्तृषु। उत्तानः शेते उत्तानशयः। अवमूर्द्धशयः। अवनतो मूर्धा य
स्य सो ऽवमूर्द्धा। अधोमुखः शेत इत्यर्थः। गिरौ डश्छंदसि। गिरौ शेते गिरिशः। कथं तर्हि गिरिशमुपचचार प्रत्यहं सा सु
केशीति। गिरिरस्यास्ति इति विग्रहे लोमादित्वात् शः। चरेष्टः। अधिकरणे उपपदे। कुरुचरः। कुरुचरी। भिक्षासे
नादायेषु च। भिक्षां चरतीति भिक्षाचरः। सेनाचरः। आदायेति ल्यबन्तं। आदायचरः। कथं प्रेक्ष्य स्थितां सहचरी
मिति। पचादिषु चरट् इति पाठात्। पुरोऽग्रतोऽग्रेषु सर्त्तेः। पुरःसरः। अग्रतःसरः। अग्रमग्रेणाग्रे वा सरतीत्य
ग्रेसरः। सूत्रे ऽग्रे इति एदन्तत्वमपि निपात्यते। कथं तर्हि यूथं तदग्रसरगर्वितकृष्णसारमिति। बाहुलकादिति
द्रष्टव्यः। पूर्वे कर्त्तरि। कर्तृवाचिनि पूर्वशब्दे उपपदे सर्त्तेष्टः स्यात्। पूर्वः सरतीति पूर्वसरः। कर्त्तरि किम्। पूर्वं देशं
सरतीति पूर्वसारः। कृञो हेतुताच्छील्यानुलोम्येषु। एषु द्योत्येषु करोतेष्टः स्यात्। अतः कृकमीति सः। यशस्क
री विद्या। श्राद्धकरः। वचनकरः। दिवाविभानिशाप्रभाभास्करान्तानन्तादिबहुनान्दी किंलिपिलिबिबलि

॥ ७॥

458

कह्र

त्तत्किंलिपिचित्रक्षेत्रसंख्याजंघाबाह्वहर्यत्तद्धनुररुष्षु। एषु कृञः टः स्यात् चेत्वादावपि। दिवाकरः रविः। निशाकरः। कस्कादित्वात्सः।
भास्करः। बहुकरं बहुशब्दस्य वैपुल्यार्थं संख्यापेक्षया पृथग्ग्रहणं। लिपिलिबिशब्दौ पर्यायौ। संख्या। एककरः। द्विकरः।
कस्कादित्वादहस्करः। नित्यसमासेनुत्तरपदस्थस्येति षत्वम्। धनुष्करः। अरुष्करः। किंयत्तद्बहुषु कृञोऽज्विधानमिति
वार्त्तिकम्। किंकरा। यत्करा। तत्करा। हेत्वादौ टं बाधित्वा परत्वादच्। पुंयोगे तु ङीष्। किंकरी। कर्मणि भृतौ। कर्मणि द्दृ
उपपदे करोतेष्टः स्यात् भृतौ। कर्मकरो भृतकः। कर्मकारोऽन्यः। नशब्दश्लोककलहगाथावैरचाटुसूत्रमंत्रपदेषु। एषु
कृञष्टोन। हेत्वादिषु प्राप्तः प्रतिषिध्यते। शब्दकार इत्यादि। स्तंबशकृतोरिन्। व्रीहिवत्सयोरिति वक्तव्यम्। स्तंबकरि

त्सयोः३

र्व्रीहिः। शकृत्करिर्वत्सः। व्रीहौ वत्से किम्। स्तंबकारः। शकृत्कारः। हरतेर्दृतिनाथयोः पशौ। दृतिनाथयोरुपपदयोर्हरतेरिन्
स्यात् पशौ कर्त्तरि। दृतिं हरतीति दृतिहरिः। नाथं नासारज्जुं हरतीति नाथहरिः। पशौ किम्। दृतिहारः। नाथहारः। फले
ग्रहिरात्मंभरिश्च। फलानि गृह्णातीति फलेग्रहिः। उपपदस्य एदंतत्वं च इन्प्रत्ययश्च निपात्यते। आत्मानं बिभ

459

॥१०॥ य३

न्तीति चात्मंभरिः। चात्मनोमुमागमः। स्वउदरस्य। वाकुक्षिंभरिः। वाङ्कास्तु चात्मोदरकुक्षिष्विति पेठुः। ज्योत्स्नाक
रंसमुद्रंलरयश्चकोराङ्गतिमुरारिः। एजेः खश्। ण्यंतादेजेः खश्स्यात्। अरुर्द्विषदजंतस्य मुम्। अरुषो द्विषतो
ऽजंतस्य च मुमागमः स्यात्। खिदंते उत्तरपदे न त्वव्ययस्य। शिवाह्वादि जनेरजयतीति जनमेजयः। वातशुनी
तिलशर्द्धेषु अजधेट्तुदजहातिभ्यः खश उपसंख्यानम्। वातमजा मृगाः। खित्यनव्ययस्य। खिदंते परे पूर्वप
दस्य ह्रस्वः स्यात् ततो मुम्। शुनिंधयः। तिलंतुदः। शर्द्धंजहा माषाः। शर्द्धोऽपानशब्दः। तं जहतीति विग्रहः।
जहातेरेतत्सार्वितण्यर्थः। नासिकास्तनयोर्ध्माधेटोः। चवार्तिकम्। स्तने धेटो नासिकायां ध्मश्चेति। वाच्यम्।
स्तनंधयतीति स्तनंधयः। धेटष्टित्वात् स्तनंधयी। नासिकंधमः। नासिकंधयः। नाडीमुष्ट्योश्च। एतयोः क
र्मणोरुपपदयोर्ध्माधेटोः खश्स्यात्। यथासंख्यं नेष्यते। नाडिंधमः। नाडिंधयः। मुष्टिंधमः। मुष्टिंधयः। घ
टीखारीखरीषूपसंख्यानम्। घटिंधमः। घटिंधयः। खारी परिमाणविशेषः। खरी गर्द्दभी। उदि कूले रुजि

इत्यादि।१ इति वक्तव्यम्।४

गर्द्धंजहाश्चा इतिभाष्यं ६

॥१०॥

450

वहोः।उत्पूर्वाभ्यांरुजिवहिभ्यांकूलेकर्मण्युपपदेखशस्यात्।कूलमुद्रुजतीतिकूलमुद्रुजः।कूलमुद्वहः।वहाभ्रेलिहः।वह
स्कंधस्तंलेढीतिवहंलिहोगौः।अदादित्वाच्छपोलुक्।खशोङित्वान्नगुणः।अभ्रंलिहोवायुः।परिमाणेपचः।प्रस्थंपचास्था
ली।खारिंपचःकटाहः।मितनखेच।मितंपचाब्राह्मणी।नखंपचायवागूः।पश्यिवज्ञतापवार्ती॥विध्वरुषोस्तुदः।विधुंतुदः।
मुमिकृतेसंयोगांतस्यलोपः।अरुंतुदः।असूर्यललाटयोर्दृशितपोः।असूर्यमित्यसमर्थसमासः।दृशिनानञःसंबंधा
त्।सूर्यंनपश्यंतीत्यसूर्यंपश्याराजदाराः।ललाटंतपःसूर्यः।उग्रंपश्येरंमदपाणिंधमाश्च।एतेनिपात्यंते।उग्रमितिक्रि
याविशेषणंतस्मिन्नुपपदेदृशेःखश्।उग्रंपश्यतीत्युग्रंपश्यः।इराउदकंतेनमाद्यतिदीप्यतेऽबिंधनत्वादितीरं
मदोमेघज्योतिः।इहनिपातनात्श्यन्।पाणयोध्मायंतेऽस्मिन्नितिपाणिंधमोध्वा।अंधकाराद्यावारतद्व्यर्थः
तत्रहिसर्पादिपनोदायपाणयःध्मायंते॥।प्रियवशेवदःखच्।प्रियंवदः।वशंवदः।गमेःसुपिवाच्यः।खचेहार्थमि
मितंगमोहस्ती॥विहायसोविहखच्डिद्वाच्यः।विहंगमः।विहंगः।भुजंगमः।भुजंगः।द्विषत्परयोस्तापेः।खच्स्यात्

इतिवाच्यम।२ वा२ ६९

यमेः २

॥१२१॥ खचि ह्रस्वः। खच्परे णौ उपधाया ह्रस्वः स्यात्। द्विषंतं परं वा तापयति द्विषंतपः। परंतपः। घटघटीग्रहणं लिंगविशिष्टपरिभाषा अनि-
त्या। तेनेह न। द्विषतीं तापयतीति द्विषतीतापः। वाचि यमो व्रते। वाक्शब्दे उपपदे खच् स्याद् व्रते गम्ये। वाचंयमपुरंदरौ च। वाक्पुरयोरम्-
न्तत्वं निपात्यते। वाचंयमो मौनव्रती। व्रते किम्। अशक्त्यादिना वाचं यच्छतीति वाग्यामः। पूःसर्वयोर्दारिसहोः। पुरं दारयतीति पुरं-
दरः। सर्वंसहः। सहिग्रहणमसंज्ञार्थम्। भगे च दारेरिति काशिका। बाहुलकेन लब्धमित्याहुः। भगं दारयतीति भगंदरः। सर्व- मिद४
कूलाभ्रकरीषेषु कषः। सर्वंकषः खलः। कूलंकषा नदी। अभ्रंकषो वायुः। करीषंकषा वात्या। मेघर्त्तिभयेषु कृञः। मेघंकरः। ऋ-
तिंकरः। भयंकरः। भयशब्देन तदंतविधिः। अभयंकरः। क्षेमप्रियमद्रेऽण् च। एषु कृञोऽण् स्यात्। चात् खच्। क्षेमंकरः। क्षेमकारः॥
प्रियंकरः। प्रियकारः। मद्रंकरः। मद्रकारः। वेति वाच्ये अण्ग्रहणं हेत्वादिषु टो मा भूदिति। कथं तर्हि श्रेयस्यारिसाः क्षेमकरा श्रुतिः। कर्मणः शेषत्व-
विवक्षायां षष्ठ्या द्वयम्। आशिते भुवः करणभावयोः। आशितशब्दे उपपदे भवतेः खच्। आशितो भवत्यनेन आशितंभवः। ओदनः। आ- ॥१२१॥
शितस्य भवनमाशितंभवः। संज्ञायां भृतॄवृजिधारिसहितपिदमः। विश्वं बिभर्तीति विश्वंभरः। विश्वंभरा। रथंतरं साम। इह र-
थेन तरतीति व्युत्पत्तिमात्रं न त्ववयवार्थो निगमः। पतिंवरा कन्या। शत्रुंजयो हस्ती। युगंधरः पर्वतः। शत्रुंसहः। शत्रुंतपः। अरिंद-

मः।दमिःशामनार्थीतेनसकर्मकइत्युक्तम्।मतांतरेतुचेतसावितण्यर्थोदमिः।गमश्च।सुतंगमः।अंतात्यंताध्वदूरपारसर्वानंते
सुडःसंज्ञायामितिनिवृत्तं।एषुगमेडःस्यात्।डित्वसामर्थ्याद्भस्यापिटेर्लोपः।अंतंगछतीत्यंतगः।सर्वत्रपन्नयोरुपसंख्यान
म्।सर्वत्रगः।पन्नंगछतीतिपन्नगः।पन्नमितिपद्यतेःक्तांतंक्रियाविशेषणं।उरसोलोपश्च।उरसागछतीत्युरगः।सुदुरोरधि
करणे।सुखेनगछंत्यस्मिन्सुगः।दुर्गः।अन्यत्रापिदृश्यतइतिवक्तव्यम्।ग्रामगः।डेचविहायसोविहादेशोवक्तव्यः।विहगः।आशि
षिहनः।शत्रुंवध्यात्शत्रुहः।आशिषिकिम्।शत्रुघातः।दारावाहनोणंतस्यचटःसंज्ञायाम्।दारुशब्देउपपदेआङ्पूर्वाद्धंतेर
ण्टकारश्चांतादेशोवक्तव्यइत्यर्थः।दार्वाघाटः।चारौवा।चार्वाघाटः॥ [illegible] र्वाघातः।कर्मणिसमिच।कर्मण्यु
पपदेसंपूर्वाद्धंतेरुक्तंवेत्यर्थः।वर्णान्संहंतीतिवर्णसंघाटः।वर्णसंघातः।पदसंघाटः।पदसंघातः।अपेक्लेशतमसोः।अपपूर्वाद्ध
न्तेर्डःस्यात्।अनाशीरर्थमिदं।क्लेशापहःपुत्रः।तमोपहःसूर्यः।कुमारशीर्षयोर्णिनिः।कुमारघाती।शिरसःशीर्षभावोनिपा
त्यते।शीर्षघाती।लक्षणेजायापत्योष्टक्।हंतेष्टक्स्यात्।लक्षणवतिकर्तरि।जायाघ्नोना।पतिघ्नीस्त्री।अमनुष्यकर्तृ

पतितरं

इत्यादि

483

काळ

॥कृदंत॥ ॥१२॥

केय। जायाघ्नस्तिलकः। पतिघ्नी पाणिरेखा। पित्तघ्नं घृतं। अमनुष्येति किम्। आखुघातः शूद्रः। अथ कथं बलभद्रः प्रलंबघ्नः। शत्रुघ्नः।
कृतघ्नः। इत्यादि मूलविभुजादित्वात्सिद्धं। चोरघातो नगरघातो हस्ती। तु बाहुलकादणि। शक्तौ हस्तिकपाटयोः। हन्तेष्टक्
स्यात् शक्तौ द्योत्यायां। मनुष्यकर्तृकार्थमिदं। हस्तिघ्नो ना। कपाटघ्नश्चोरः। कवाटेति पाठान्तरं। पाणिघताडघौ शिल्पिनि।
हन्तेष्टक्। टिलोपो घत्वं च निपात्यते। पाणिताडयोरुपपदयोः। शिल्पिनि किम्। पाणिघातः। ताडघातः। राजघ उपसंख्यानम्।
राजानं हन्ति राजघः। आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन्। एषु च्व्यर्थेष्वच्व्यन्तेषु कर्मसूपप
देषु कृञः ख्युन् स्यात्। अनाढ्यमाढ्यं कुर्वन्त्यनेनाढ्यंकरणं। अच्वौ किम्। आढ्यीकुर्वन्त्यनेन। इह प्रतिषेधसामर्थ्यात् ल्युडपि नेति
काशिका। माधवमते तु ल्युट् स्यादेव। अच्वावित्युत्तरार्थम्। कर्तरि भुवः खिष्णुच्खुकञौ। आढ्यादिषु च्व्यर्थेष्वच्व्यन्तेषु भवतेरेतौ
स्तः। अनाढ्य आढ्यो भवति। आढ्यंभविष्णुः। आढ्यंभावुकः। स्पृशोऽनुदके क्विन्। घृतस्पृक्। कर्मणीति निवृत्तम्। मंत्रेण स्पृश
तीति मंत्रस्पृक्। ऋत्विग्दधृक्। व्याख्यातं। त्यदादिषु दृशोऽनालोचने कञ्च। समानान्ययोश्चेति वाच्यम्। सदृक्। सदृशः। अ

[illegible]म॥ ॥१२॥

न्यादृक्। अन्यादृक्षः। क्सोपि वाच्यः। तादृक्षः। सदृक्षः। अन्यादृक्षः। सत्सूद्विषद्रुहदुहयुजविदभिदछिदजिनीराजामुपसर्गेपि क्विप्। एभ्यः
क्विप् स्यादुपसर्गे सत्यसति सुप्युपपदे। द्युसत्। उपनिषत्। अण्डसूः। प्रसूः। मित्रद्विट्। प्रद्विट्। मित्रध्रुक्। प्रध्रुक्। गोधुक्। प्रधुक्। अश्वयु
क्। प्रयुक्। वेदवित्। निभित्। इत्यादि। अग्रग्रामाभ्यां नयतेर्णो वाच्यः। अग्रणीः। ग्रामणीः। भजो ण्विः। अंशभाक्। प्रभाक्। अदोनन्ने। विट्
स्यात्। आममत्ति आमात्। सस्यात्। अनन्ने किम्। अन्नादः। क्रव्ये च। अदेर्विट्। पूर्वेणसिद्धे क्वनमणबाधनार्थम्। क्रव्यात्। आममांसभ
क्षकः। कथं तर्हि क्रव्यादोऽपक्वाश इति। पक्वमांसशब्दे उपपदे ऽणि उपपदस्य क्रव्यादेशः पृषोदरादित्वात्। दुहः कब्घश्च। कामदुघा।
अन्येभ्योपि दृश्यन्ते। छंदसीति निवृत्तं। मनिन्क्वनिप्वनिप्विच्। एते प्रत्यया धातोः स्युः। नेड्वशि कृति। वशादेः कृत इण्न स्यात्। शॄ।
सुशर्मा। प्रातरित्वा। विड्वनोरनुनासिकस्यात्। अनुनासिकस्यात्स्यात्। विजायत इति विजावा। ओणृ। अवावा। विच्। रोट्। रेट्॥
सुगण्। क्विप् च। अयमपि दृश्यते। सत्सूद्विषेत्यस्यैव प्रपंचः। उखास्रत्। पर्णध्वत्। वाहभ्रट्। ष्वैतः। पदान्तस्यानितनस्य। एगदि
स्यात्। उपसर्गस्थान्निमित्तात्स्यतश्चेत्। हेपाण्। शास इदिति इत्वं। मित्राणि शास्तीति मित्रशीः। आशासः क्वौ उपधाया इत्वं

हि

उत्त॰१२

२२

वाच्यम्। आशीः। इवो वेगीः। पूः। इस्मन्त्वक्षिषु च। एषु छादेर्ह्रस्वः स्यात्। तनुछत्। अनुनासिकस्य क्वीति दीर्घः। मो नो धातोः। प्रतान्। प्रशान्। छ्वोरित्यूठ्। अक्षद्यूः। ज्वरत्वरेत्यूठ्। जूः। जुरौ। तूः। स्रूः। ऊः। वृद्धिः। जनानवतीति जनौः। जनावौ। जनावः। सूः। सुवौ। सुवः। सुमूः। सुम्वौ। सुम्वः। राल्लोपः। मुर्छा। मूः। मुरौ। मुरः। धुर्वी। धूः। धुरौ। धुरः। गमः क्वौ। अनुनासिकलोपः स्यात्। अंगगत्। गमादीनामिति वक्तव्यौ। परीतत्। संयत्। सुनत्। ऊङ्चगमादीनामिति वक्तव्यम्। लोपश्च। अग्रेगूः। अग्रेस्नूः। रुठः कब। वाक्षिप्। शस्त्रैः। शस्त्राः। छामि धातोरित्यत्र बाधितु स्वरूचौ सुध्वन। सुप्यजातौ णिनिस्ताच्छील्ये। अजात्यर्थे सुपि धातोर्णिनिः स्यात्ताच्छील्ये द्योत्ये। उष्णभोजी। शीतभोजी। अजातौ किम्। ब्राह्मणानामंत्रयिता। ताच्छील्ये किम्। उष्णं भुंक्ते कदाचित्। इहकृतिकारणोपसर्गासिन्न एव सुपि णिनिरिति व्याख्याय। उत्प्रतिभ्यामाङि सर्त्तेरुपसंख्यानमिति पठितौ। हरदत्तमाधवादिभिश्च तदेवानुसृतम्। एतच्च भाष्यविरोधादुपेक्ष्यम्। प्रसिद्धश्चोपसर्गेऽपि णिनिः। स्वबन्धवोपजीविनौ। अनुयायिवर्गः। पतत्यधो धामविसारि। नवेयनीयाः प्रसवोनुजीविनिः। साधुकारिण्युपसंख्यानम्। ब्रह्मणि वदः। अताच्छील्यार्थं वा

इत्यादौ।

२२

466

भाष्यकारेति। अयं भावः। यथा प्रष्ठादयः शब्दाः पुंयोगात् स्त्रियां वर्त्तन्ते प्रष्ठी कगाणि केति तथेदं श्रीशब्दः परित्यक्तस्वलिंगः क्लीबः सन्क्लैब्यं वर्त्तते तत्र ह्रस्वो नपुंसक इति ह्रस्वः मुमन्तु न। अपवादेनाबाधात्। स्वमोर्नपुंसकादिति मो लुक् न एवं गांमन्य इत्यादावपि सुपो धातुप्रातिपदिकयोरिति लुक् स्यादिति वाच्यम्। अम्विधिसामर्थ्यादेव तद्बाधात्। श्रीशब्दस्येह क्लीबत्वे प्रमाणं तु भाष्यमेवेति दिक्। ६

त्रिकषव्यी। साधुदायी ब्रह्मवादी। कर्त्तर्युपमाने। णिनिः स्यादुपपदार्थः कर्त्ता धात्वर्थस्य कर्त्तुरुपमानं चेत् उष्ट्र इव क्रोशति उष्ट्रक्रोशी। ध्वांक्षरावी। अताच्छील्यार्थं जात्यर्थं चेदम्। कर्त्तरि किम्। अपूपानिव भक्षयति माषान्। उपमाने किम्। उष्ट्रः क्रोशति। व्रते। णिनिः स्यात्। स्थंडिलशायी। बहुलमाभीक्ष्ण्ये। पौनःपुन्ये द्योत्ये सुप्युपपदे णिनिः। क्षीरपायिण उशीनराः। मनः। सुपि मन्यतेर्णिनिः स्यात्। दर्शनीयमानी। आत्ममाने खश्च। स्वकर्मके मनने वर्त्तमानान्मन्यतेः सुपि खश् स्याण्णिनिश्च। पंडितमात्मानं मन्यते पंडितंमन्यः। पंडितमानी। खित्यनव्ययस्य। कालिंमन्या। अनव्ययस्य किम्। दिवामन्या। इच एकाचोम्प्रत्ययवच्च। इजंतादेकाचोम् स्यात्स च स्वाद्यम्वत् खिदंते परे। औतोम्शसोः। गांमन्यः। वाम्शसोः। स्त्रियंमन्यः। स्त्रीमन्यः। नरंमन्यः। सुवीमन्यः। श्रियमात्मानं मन्यते श्रियंमन्यं कुलं। सौ श्यकारवचनात् श्रीशब्दस्य ह्रस्वः मुममोरत्तावश्च। भूते। अधिकारोयम्। वर्त्तमाने लडितियावत्। करणे यजः। करणे उपपदे भूतार्थाद्यजेर्णिनिः स्यात्कर्त्तरि। सोमेनेष्टवान् सोमयाजी। अग्निष्टोमयाजी। कर्मणि हनः। पितृव्यघाती। कर्मणीत्येतत्सत्सेति यावदधिक्रियते। ब्रह्मभ्रूणवृत्रेषु क्विप्। एषु कर्मसूपपदेषु हंतेर्भूते क्विप् स्यात्। ब्रह्महा। भ्रूणहा। वृत्रहा। क्विप्चेत्येव सिद्धे नियमार्थमिदं। ब्रह्मादिष्वेव हंतेरेव। भूत एव। क्विबेवेति। चतुर्विधो नियम इति काशिका। ब्रह्मादिष्वेव क्विबेवेति द्विविधो नियम इति भाष्यम्। सुकर्मपापमंत्रपुण्येषु कृञः। सोकर्मादिषु कृञः क्विप् स्यात्। त्रिविधोत्र नियम इति काशिका। सुकृत्। कर्मकृत्। पापकृ

वे

नियमस्यचातुर्विध्यम्।२

१४ त।मंत्रकृत्।पुण्यकृत्।क्विबेवेति नियमात् कर्मकृतवानित्यत्रा एन कृञः एवेति नियमान्मंत्रमधीतवान्मंत्राध्यायः।अत्र न क्विप्।भूत एवेति नियमात्।मं
त्रंकरोति करिष्यति वेति विवक्षायां न क्विप्।स्वादिष्वेवेति नियमात्तावादन्यस्मिन्नप्युपपदे क्विप्।शास्त्रकृत्।भाष्यकृत्।सोमे सुञः।सोमसुत्।एवं सुत चतुर्विधोत्रनियमइतिकाशिका २=
रस्त्रेपि।अग्नौ चेः।अग्निचित्।कर्मण्यग्न्याख्यायाम्।कर्मण्युपपदे कर्मण्येव कारके चिनोतेः क्विप्स्यात्।अग्न्याधारस्थलविशेषस्याख्यायाम्।श्ये
नइव चितः श्येनचित्।कर्मणीनिविक्रियः।कर्मण्युपपदे विपूर्वात्क्रीणातेरिनिः स्यात्।कुत्सितग्रहणं कर्तव्यम्।सोमविक्रयी।घृतविक्रयी।दृशे
क्वनिप्।कर्मणिभूतेदृशेः।पारं दृष्टवान्पारदृश्वा।राजनि युधि कृञः।क्वनिप्स्यात्।युधिरन्तर्भावितण्यर्थः।राजानं योधितवान्।राजयुध्वा।रा
जकृत्वा।सहे च।कर्मणीति निवृत्तम्।सहयुध्वा।सहकृत्वा।सप्तम्यां जनेर्डः।सरसिजम्।मंदुरायां जातो मंदुरजः।ड्याप्पोरिति ह्रस्वः।पं
चम्यामजातौ।जातिशब्दवर्जितपंचम्यन्त उपपदे जनेर्डः स्यात्।संस्कारजः।अदृष्टजः।उपसर्गे च संज्ञायाम्।प्रजा स्यात्संततौ जने।अनौ
कर्मणि।अनुपूर्वाज्जनेः कर्मण्युपपदे डः स्यात्।पुमांसमनुरुध्य जाता पुमनुजा।अन्येष्वपि दृश्यते।अन्येष्वप्युपपदेषु जनेर्डः स्यात्॥ १४
अजः।द्विजः।ब्राह्मणजः।अपिशब्दः सर्वोपाधिव्यभिचारार्थः।तेन धात्वन्तरादपि कारकान्तरेष्वपि क्वचित्।परितः खाता परिखा।क्तक्त
वतू निष्ठा।एतौ निष्ठासंज्ञौ स्तः।निष्ठा।भूतार्थवृत्तेर्धातोर्निष्ठा स्यात्।तत्र तयोरेवेति भावकर्मणोः क्तः।कर्तरि कृदिति कर्तरि क्त

468

द्विपा ३४

वतुः।उक्तवितौ।स्नातंमया।स्तुतस्त्वया विष्णुः।विष्णुर्विश्वंकृतवान्।निष्ठायामण्यदर्थे।ण्यदर्थोभावकर्मणी।ततोन्यत्रनिष्ठायांक्षियोदीर्घःस्या
त्।क्षियोदीर्घात्।दीर्घात्क्षियोनिष्ठातस्यनःस्यात्।क्षीणवान्।भावकर्मणोस्तुक्षितःकामोमया।श्र्युकःकिति।श्रितः।श्रितवान्।स्तुतः।स्तुतवान्।ऊ
र्णुतः।ऊर्णोर्णुवद्भावोवाच्यः।तेननएकाच्त्वान्नेट्।ऊर्णुतः।नुतः।हुतः।रदाभ्यांनिष्ठातोनःपूर्वस्यचदः।रेफदकाराभ्यांपरस्यनिष्ठातस्यनःस्यात्।निष्ठाप
क्षयापूर्वस्यधातोर्दकारस्यच।शॄ।ऋतइद्धातोः।रपरः।णत्वं।शीर्णः।बहिरंगत्वेनष्टुत्वेरसिद्धत्वान्नेह।कृतस्यापत्यंकार्तिः।भिन्नः।छिन्नः।संयोगादेरातो
धातोर्यण्वतः।निष्ठातस्यनःस्यात्।द्राणः।ग्लानः।ल्वादिभ्यः।एकविंशतेर्लूञादिभ्यःप्राग्वत्।लूनः।ग्रहिज्या।जीनः।दुग्वोर्दीर्घश्च।दुगतोदू
नः।टुदुउपतापइत्यस्यतुनगृह्यतेसानुबन्धत्वात्।मृदुतयादुतयेतिमाघः।गूनः।पूञोविनाशे।पू×ज्या०४नायवाः।विनष्टाइत्यर्थः।पूतमन्य
त्।सिनोतेर्ग्रासकर्मकर्तृकस्य।सिनोग्रासः।ग्रासेतिकिम्।सितापाशेनसूकरी।कर्मकर्तृकेइतिकिं।सितोग्रासोदेवदत्तेन।ओदितश्च।भुजो
भुग्नः।ओहाक्।प्रहीणः।स्वादयओदितइत्युक्तं।सूनः।सूनवान्।दूनः।ओदिन्मध्येडीङःपाठसामर्थ्यान्नेट्।उड्डीनः।द्रवमूर्तिस्पर्शयोःश्यः।
द्रवस्यमूर्तौकाठिन्येस्पर्शेचार्थेश्यैङःसंप्रसारणंस्यान्निष्ठायां।श्योस्पर्शे।श्यैङोनिष्ठातस्यनःस्यादस्पर्शेर्थे।हलइतिदीर्घः।शीनंघृतं।अ
स्पर्शेकिं।शीतंजलं।द्रवमूर्तिस्पर्शयोरितिकिं।संश्यानोवृश्चिकः।शीतात्संकुचितइत्यर्थः।प्रतेश्च।प्रतिपूर्वस्यश्यःसंप्रसारणंस्यान्निष्ठायां।प्र
तिशीनः।विभाषाभ्यवपूर्वस्य।श्यःसंप्रसारणंवास्यात्।अभिश्यानंघृतम्।अभिशीनं।अवश्यानोवशीनोवृश्चिकः।व्यवस्थितविभाषेयंतेन

ओश्व·उत्तून·५

469

नत्वस्यासिद्धत्वं
दुष्येतिबत्वेषां

१५

निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु सिद्धो वाच्यः। वृक्णः। वृक्णवान्। परिस्कन्दः प्राच्यभरतेषु। पूर्वेण मूर्द्धन्ये प्राप्ते तदभावो निपात्यते। परि
स्कन्दः। प्राच्येति किं। परिष्कन्दः। परिस्कन्दः। परेश्चेति वि(दृ)कल्पः। स्तन्भेरिति षत्वे प्राप्ते। प्रतिस्तब्धः निस्तब्धश्च। अत्र षत्वं न स्यात्॥ २

हन्न। समवध्यानः। अञ्चोऽनपादाने। अञ्चेर्निष्ठातस्य नः स्यान्न त्वपादाने। यस्य विभाषा। यस्य क्वचिद्विभाषयेड्विहितस्ततो निष्ठाया इण्न स्यात्। उदितो वेति क्त्वा
यां वेट्। तदादिहन्ते। समक्नः। अनपादाने किम्। उदक्तमुदकं कूपात्। दिवोऽविजिगीषायाम्। दिवो निष्ठातस्य नः स्यादविजिगीषायाम्। द्यूनः। विजिगीषायां
तु। द्यूतम्। निर्वाणोऽवाते। अवाते इति च्छेदः। निर्पूर्वाद्वातेर्निष्ठातस्य नत्वं स्याद्वातश्चेत्कर्ता न। निर्वाणोऽग्निर्मुनिर्वा। वाते तु। निर्वातो वातः। शुषः कः। निष्ठात
इत्येव। शुष्कः। पचो वः। पक्वः। क्षायो मः। क्षामः। स्त्यः प्रपूर्वस्य। प्रात्स्त्यः संप्रसारणं स्यान्निष्ठायाम्। प्रस्त्योऽन्यतरस्याम्। निष्ठातस्य मो वा स्यात्। प्रस्तीमः।
प्रस्तीतः। प्रात्किम्। स्त्यानः। अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः। ञिफला। फुल्लः। निष्ठातस्य लत्वं निपात्यते। क्तवतेरेकदेशस्यापीदं निपातनमि
ष्यते। फुल्लवान्। क्षीबादिषु तु क्तप्रत्यये एव तलोपः। तस्यासिद्धत्वात्स्याद्ध स्येटोऽभावश्च निपात्यते। क्षीबो मत्तः। कृशस्तनुः। उल्लाघो नीरो
गः। अनुपसर्गात्किं। आदितश्च। आकारेतो निष्ठाया इण्न स्यात्। तिर। वृतफलोरत्त्वं तस्याभावो किं ति। प्रफुल्लः। प्रक्षीबितः। प्रकृशितः।
प्रोल्लाघितः। कथं तर्हि लोध्रद्रुमं सानुमतः प्रफुल्लमिति। फुल्ल विकसने। पचाद्यच्। त्रस्ते तु फुल्लवान् इत्यर्थः। उत्फुल्लसंफुल्लयोरुप
संख्यानम्। नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम्। एभ्यो निष्ठातस्य नो वा। नुन्नः नुत्तः। विद विचारणे। रौधादिक एव गृह्यते। उंदिना परेण
साहचर्यात्। विन्नः। वित्तः। वेत्तेस्तु विदितः। विद्यतेर्विन्नः। उंदी। श्वीदितो निष्ठायाम्। श्वयतेरीदितश्च निष्ठाया इण्न। उन्नः। उत्तः। त्राणः। त्रातः।
घ्राणः। घ्रातः। ह्रीणः। ह्रीतः। न ध्याख्यापॄमूर्च्छिमदाम्। एभ्यो निष्ठातस्य नत्वं न। ध्यातः। ख्यातः। पूर्तः। रालोपः। मूर्तः। मत्तः। वित्तो भो

त२

१५

470

गप्रत्यययोः॥ विंदते र्निष्ठान्तस्य निपातोयं। भोग्ये प्रतीते चार्थे। वित्तं धनं। वित्तः पुरुषः। अनयोः किं। विन्नः। विलाभागमरुनेति
धसौ वेट्त्वादिडनेट्। भित्तं शकलं। भिन्नमन्यत्। ऋणमाधमर्ण्ये। ऋधातोः क्तस्य नत्वं निपात्यते। अधमर्णव्यवहारे।
ऋतमन्यत्। स्फायः स्फी निष्ठायां। स्फीतः। इण्निष्ठायां। निरः कुषो निष्ठाया इट् स्यात्। यस्य विभाषेति निषेधे प्राप्ते
पुनर्विधिः॥ निष्कुषितः। वसतिक्षुधोरिट्। अनयोः क्त्वानिष्ठयोर्नित्यमिट् स्यात्। उषितः। क्षुधितः। अंचेः पूजायां। पूजार्थादं
चेः क्त्वानिष्ठयोरिट् स्यात्। अंचितः। गतौ तु अक्तः। लुभो विमोहने। लुभः क्त्वानिष्ठयोरिट् स्यात्। न तु गार्ध्ये। लुभितः॥
गार्ध्ये तु लुब्धः। क्लिशः क्त्वानिष्ठयोः। इड्वा स्यात्। क्लिश उपतापे। नित्यं प्राप्ते। क्लिशू विबाधने। अस्य क्त्वायां विकल्पे सिद्धे
पि निष्ठायां निषेधे प्राप्ते विकल्पः। क्लिशितः। क्लिष्टः। पूङश्च। पूङः क्त्वानिष्ठयोरिड्वा स्यात्। पूङः क्त्वा च। पूङः क्त्वानिष्ठा
च सेट् किन्न स्यात्। पवितः। पूतः। क्त्वाग्रहणमुत्तरार्थं। नोपधा दित्यत्र क्त्वैव संबध्यते। निष्ठा शीङ्स्विदिमिदिक्ष्विदि
धृषः। एभ्यः सेण्निष्ठा किन्न स्यात्। शयितः। शयितवान्। अनुबंधनिर्देशो यङ्लुङ्निवृत्त्यर्थः। शेश्यितः। शेश्यितवान्। आ
दिकर्मणि निष्ठा वक्तव्या। आदिकर्मणि क्तः कर्तरि च। आदिकर्मणि यः क्तः स कर्तरि स्याच्चाद्भावकर्मणोः। विभाषा भावा
दिकर्मणोः। भावे आदिकर्मणि चादितो निष्ठाया इड्वा स्यात्। प्रस्वेदितश्चैत्रः। प्रस्वेदितं तेन। ञिष्विदेरादित्वादिरत्र गध्य

471

९६

ते।ञीद्रिः स्नात्स्ययादि।स्विद्यतेस्तु स्विदित इत्येव।ञिमिदा ञिक्ष्विदा दिवादौ भ्वादौ च।प्रमेदितः।प्रमेदितवान्।प्रक्ष्वेदितः।प्रक्ष्वेदितवान्।
प्रधृषितः।प्रधर्षितवान्।धर्षितं तेन।सेट्किं।प्रस्विन्नः।स्विन्नं तेनेत्यादि।मृषस्तितिक्षायाम्।सेण्निष्ठा किन्न स्यात्।मर्षितः।मर्षितवान्।क्ष
मायां किम्।अपमृषितं वाक्यं।अविस्पष्टमित्यर्थः।उदुपधाद्भावादिकर्मणोरन्यतरस्याम्।उदुपधात्परा भावादिकर्मणोः सेण्निष्ठा वा
किन्न स्यात्।द्युतितं।द्योतितं।मुदितं।मोदितं साधुना।प्रद्युतितः।प्रद्योतितः।प्रमुदितः।प्रमोदितः साधुः।उदुपधात्किम्।विदितं।
भावेत्यादि किम्।रुचितं कार्षापणं।सेट्किं।कुष्टं।शब्विकरणेभ्य एवेष्यते।नेह।गुध्यते गुधितं।निष्ठायां सेटि णेर्लोपः स्यात्।भावितो भावित
वान्।श्वीदित इति नेट्।संप्रसारणं।शूनः।दीप्तः।गुहू।गूढः।वनु।तनु।वतः।ततः।पतेः स निवेट्कत्वादिड्भावे वा प्राप्ते।द्वितीयाश्रि
तेति सूत्रे निपातनादिट्।पतितः।सेऽसिचीति वेट्कत्वात्सेट्के तत्यादौ नामी इड्विकल्पेनानित्यत्वज्ञापनाद्वा।तेन धावितमित्तरा
जसियेत्यादि।यस्य विभाषेत्यत्र एकाच इत्येवा दरिद्रितः।क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःस
क्ताविस्पष्टस्वरानायासभृशेषु।क्षुब्धादीन्यष्टौ च निष्ठान्तानि निपात्यन्ते।समुदायेन मन्था दिष्टौ।द्रवद्रव्यसंसृष्टाः सक्तवो मन्थः।मं
थनदण्डश्च।क्षुब्धः मन्थश्चेत्।स्वान्तं मनः।ध्वान्तं तमः।लग्नं सक्तं।निष्ठानत्वमपि निपातनात्।म्लिष्टमविस्पष्टं।विरिब्धः स्वरः।म्ले
छेरिट् चानयोरुपधाया ह्रस्वत्वमपि निपात्यते।फाण्टं चानायाससाध्यः कषायविशेषः।माधवस्तु नवनीतभावात्प्रागवस्थापन्नं दध्यौ

९६

वाक्येषु।८

पदिस्यान्नत्रविभाषा मावादीत्यादिना विकल्पे प्राप्ते नित्यनिषेधार्थो विधिरेव स्यात्तन्त्र भावादिकर्मण्याम न्यत्र वैयात्याभावे प्यादितश्चेति निषेध एव स्यादतः

फांटमिति वेदसाध्ये। आद। बाढं भृशं अन्यत्र क्षुभितं। क्षुब्धो राजेति तु आगमशास्त्रस्यानित्यत्वात्। स्वनितं। ध्वनितं। लगितं। म्लेछितं। विरेभि मु २
तं। फणितं। बाहितं। धृषिशसी वैयात्ये। एतौ निष्ठायां अविनये एवानिटौ स्तः। धृष्टो विशस्तः। अन्यत्र धर्षितः। विशसितः। सावादिकर्मणोर्वै
यात्ये धृषिर्नास्ति। अत एव नियमार्थमिदं सूत्रमिति वृत्तिः। धृषेरादित्वे फलं चिंत्यमिति हरदत्तः। माधवस्तु सावादिकर्मणोर्वैयाबोधि
कत्वेमाह। धृष्टं धर्षितं। प्रधृष्टः। प्रधर्षितः। दृढः स्थूलबलयोः। स्थूले बलवति च निपात्यते। दृह दृहि वृद्धौ। क्तस्य इडभावः। तस्य ढ
प५ त्वं हस्य लोपः इदितो नलोपश्च। दृहितो दृंहितोऽन्यः। प्रेतो परिवृढः। वृहू वृहि वृद्धौ [illegible] तेप्रागवत्। परिवृंहितः। परिबृंहि
तोऽन्यः। कृच्छ्रगहनयोः कषः। कषो निष्ठायामिण्न स्यात्। एतयोरर्थयोः। कष्टं [illegible] वेत कारणे च स्यात्। कष्टं कृच्छ्रमा
सीतं। कष्टो मोहः। कष्टं शास्त्रं। दुरवगाहमित्यर्थः। कषित मन्यत्। घुषिरविशब्दने। घुषेर्निष्ठायामनिट् स्यात्। घुष्टा रज्जुः।
अविशब्दने किं। घुषितं वाक्यं। शब्देन प्रकटीकृतमभिप्रायमित्यर्थः। अर्दे संनिविभ्यः। एतत्पूर्वादर्देः निष्ठायामिण्न स्यात्॥
समर्णः। न्यर्णः। व्यर्णः। अर्दितोऽन्यः। अभेश्चाविदूर्ये। अभ्यर्णमभ्याशं नातिदूरं। आसन्नं वा। अभ्यर्दितमन्यत्। णेरध्ययने वृत्तं। ण्य
न्ताद्वृतेः क्तस्येडभावो णिलुक् च। अधीयमानेऽर्थे। वृत्तं छंदश्छात्रेण। संपादितमधीतमिति यावत्। अन्यत्रानुवर्तिता रज्जुः॥

प१

शृतंपाके। श्रातिश्रपैयोः क्ते शृभावो निपात्यते। क्षीरहविषोः पाके। शृतं क्षीरं स्वयमेव क्लिन्नं पक्वं वेत्यर्थः। क्षीरहविर्भ्यामन्यत्र तु। श्राणं श्र
पितं वा। वा दांतशांतपूर्णदस्तस्पष्टछन्नज्ञप्ताः। एते णिचि निष्ठांता वा निपात्यंते। पक्षे दमितः। शमितः। पूरितः। दासितः। स्पाशितः। छादि
तः। ज्ञपितः। रुष्यमत्वरसंघुषास्वनाम्। एभ्यो निष्ठाया इड्वा। रुष्टः रुषितः। आंतः अमितः। तूर्णः त्वरितः। अस्यादित्वेफलेभेदौ। संघु
ष्टः संघुषितः। आस्वांतः। आस्वनितः। हृषेर्लोमसु। हृषेर्निष्ठाया इड्वा स्याल्लोमसु विषये। हृष्टं हृषितं लोम। विस्मि
तप्रतिघातयोश्च। हृष्टो हृषितो मैत्रः। विस्मितः प्रतिहतो वेत्यर्थः। अन्यत्र तु हृषुअलीके उदित्वान्निष्ठायां नेट्। हृष
तुष्टौ। इट्टू। अपचितश्च। [illegible]यते निर्पातोयं वा। अपचितः। अपचायितः। प्यायः पी। वा स्यान्निष्ठायां। व्यवस्थित
विभाषेयं तेन स्वांगे नित्यं पीनं मुखं। अन्यत्र। प्यानः पीनः। स्वेदः। सोपसर्गस्य न। प्रप्यानः। आङ्पूर्वस्यान्धूधसोः स्यादेव॥
आपीनोंधुः। आपीनमूधः। ह्लादो निष्ठायाम्। ह्रस्वः स्यात्। प्रह्लन्नः। द्यतिस्यतिमास्थामित्ति किति। एषामिकारोंतादेशः स्या
त्तादौ किति। इत्वदत्वयोरपवादः। दितः। सितः। माङ्मेङ्मितः। स्थितः। शाच्छोरन्यतरस्याम्। शितः शातः। छितः छातः। व्य
वस्थितविभाषात्वात्व्रतविषये श्यतेर्नित्यं। संशितं व्रतं। सम्यक्संपादितमित्यर्थः। संशितो ब्राह्मणः। व्रतविषयकयत्नवानित्य

मा २

थः।दधातेर्हिः।तादौ किति।हितं।निहितं।दो दद्घोः।घु संज्ञस्य दा इत्यस्य दथ् स्यात् तादौ किति।दत्तं।दत्तं।घोः किम्।दातः।तान्तोवास्यमादेशः॥
न सैवं विदत्तमित्यादावुपसर्गस्य दस्ती तिदीर्घापत्तिः।तकारादेन विधानात्।दान्तो वा धातो वान्न्वदां नैवे निष्ठानत्वं धातत्वे असषत्वं यथा रितिधत्वे
शंक्यं।सन्निपातपरिभाषाविरोधात्।अच उपसर्गात्तः।अजन्तादुपसर्गात्परस्य दा इत्यस्य घोरचस्तः स्यात्तादौ किति।प्रत्तं।प्रत्तः।अवत्तः।अव
दत्तं विदत्तं च प्रदत्तं चादिकर्मणि।सुदत्तमनुदत्तं च निदत्तमिति चेष्यते।कृशाद्वा ध्याधाघ्नो।दस्ति।इगन्तोपसर्गस्य दीर्घः स्यात् दादेशो यस्त
कारः तदादावुत्तरपदे।स्वरितेति च दमाश्रया सिद्धं।नीत्तं।सूत्तं।घुमास्थेती।वी।धेट्।धीतं।गीतं।पीतं।जनसनेत्यात्वम्।
जातं।सातं।खातं।अदो जग्धिर्ल्यप्ति किति।ल्यबिति लुप्तसप्तमीकं।अदो जग्धिः स्यात् ल्यपि तादौ किति च।इका
रनुच्चारणार्थः।धत्वं।झरो झरि।जग्धः।आदिकर्मणि क्तः।कर्तरि च।प्रकृतः कटं सः।प्रकृतः कटस्तेन।निष्ठाया
मण्यदर्थे इति दीर्घः।क्षियो दीर्घादिति नत्वं।प्रक्षीणः सः।वाक्रोशदैन्ययोः।क्षियो निष्ठायां दीर्घो वा स्यात् आक्रोशे दैन्ये च।क्षीणा
युस्त्वं।क्षितायुर्वा।क्षीणोयं तपस्वी।क्षितो वा।निनदीभ्यां स्नातेः कौसले।आभ्यां स्नातेः सस्य षः स्यात् कौशले गम्ये।निष्णातः शास्त्रेषु।
नदीष्णः।सुपीति कः।गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च।एभ्यः कर्तरि क्तः स्यात् भावकर्मणोश्च।
सूत्रं प्रतिष्णातं।प्रतेः स्नातेः षत्वं।प्रतिष्णातं सूत्रं शुद्धमित्यर्थः।अन्यत्र प्रतिस्नातं।कपिष्ठलो गोत्रे।कपिष्ठलो नाम यस्य स कापिष्ठलिः पुत्रः।गोत्रे किं।
कपीनां स्थलं कपिस्थलं।विकुशमिपरिभ्यः स्थलं।एभ्यः स्थलस्य सस्य षः स्यात्।विष्ठलम्।कुष्ठलम्।शमिष्ठलम्।परिष्ठलम्।१४

णे२

१८

गंगांगतः।गंगांप्राप्तः।ग्लानःसः।लक्ष्मीमाश्लिष्टोहरिः।शेषमधिशयितः।वैकुंठमधिष्ठितः।शिवमुपासितः।हरिदिनमुपोषितः।राम
मनुजातः।गरुडमारूढः।विश्वमनुजीर्णः।पक्षेप्राग्वत्।गंगागतेनेत्यादि।क्तोधिकरणेचध्रौव्यगतिप्रत्यवसानार्थेभ्यः।एभ्योऽधिकर
णेक्तःस्यात्स्वाद्यथाप्राप्तं।ध्रौव्यंस्थैर्यं।मुकुंदस्यासितमिदमिदंयातंरमापतेः।भुक्तमेतदनंतस्येयूनुगोष्ठीदिहसर्वः।पक्षे।प
आस्तेरकर्मकत्वात्कर्त्तरिभावेच।आसितोमुकुंदः।आसितंतेन।गत्यर्थेभ्यः कर्त्तरिकर्मणिच।रमापतिरिदंयातः।तेनेदंयातं।
भुजेःकर्मणि।अनंतेनेदंभुक्तं।कथंभुक्ताःब्राह्मणा इति।भुक्तमस्त्येषामितिमत्वर्थीयोऽच्।वर्त्तमानेप्रत्य
धिकृत्यञीतःक्तः।ञिक्ष्विदा।क्ष्विष्णः।ञिइंधीइद्धः।मतिबुद्धिपूजार्थेभ्यश्च।मतिरिहेच्छा।बुद्धेःपृथग्ग्रुपादा
नात्।राज्ञांमतंदृष्टःतैरिष्यमाणइत्यर्थः।बुद्धः विदितः।पूजितः।अर्चितः।चकारोनुक्तं।क्लीबत्वविशिष्टेभावेकालसा
मान्येक्तःस्यात्।जल्पितं।शयितं।हसितं।सुयजोर्ङ्वनिप्।सुनोतेर्यजेश्चङ्वनिप्स्याद्भूते।सुत्वा।सुत्वानौ।यज्वा।यज्वा १८
नौ।जीर्यतेरतृन्।तृन्नित्येव।जरन्।जरंतौ।जरंतः।वासरूपन्यायेनति ष्ठापि।जीर्णः।जीर्णवान्।छंदसिलिट्।लि
टःकानज्वा।क्वसुश्च।इहभूतसामान्ये छंदसिलिट्।तस्यविधीयमानौक्वसुकानचावपिछांदसावितित्रिमुनिमतं।
×समुद्रयाथः।गामी।लितोरक्षितः।सीतत्रा।कुष्टोजुष्टइत्यपि।नपुंसकेभावेक्तः।४



वस्वेकाजाद्घसां कृतद्वित्वानामेकाचामादंतानां घसेश्च वसो रिट् नान्येषां।। आदिवान्। आरिवान्। ददिवान्। जक्षिवान्। एषां किम्। बभूवान्।१

कवयस्तु बहुलं प्रयुंजते। तेन त्विष्वांसं नगरोपकंठे श्रेयांसि सर्वाण्यधिजग्मुषस्त इत्यादि। भाषायां सदवसश्रुवः। सदादिभ्यो भूत
सामान्ये भाषायां लिट् वा स्यात् तस्य च नित्यं क्वसुः। निषेदुषीमासनबंधधीरः। अध्यूषुषस्तामभवज्जनस्य। शुश्रुवान्। उपेयिवाननाश्वा
ननूचानश्च। एते निपात्यंते। उपपूर्वादिणो भाषायामपि भूतमात्रे लिट्। तस्य नित्यं क्वसुः द्वित्वं। उपेयिवांस्त्वामपि मूर्त्तिभिम्या।
उपेयुषी। उपेत्य विवक्षिते ईयिवान् समीयिवान्। न[illegible]ञ्पूर्वादश्नातेः क्वसुरिडभावश्च। धृतजयधृतेरनाशुषद्
तिसारवि:। अनुपूर्वाद्वचेः कर्त्तरि क्तो नञ्। वेदस्यो[illegible]नुवचनेन क्तवान्। अनूचानः। लुङः [illegible] अनूचानस्य वषय ना
समानाधिकरणे। अप्रथमांतेन समानाधिकरण्ये[illegible]सतीत्यर्थः। शबादि। पचंतं चैत्रं पश्य। आने मुक्। अंतोङ्गस्यातो
मुमागमः स्यादाने परे। पचमानं चैत्रं पश्य। लडित्यनुवर्त्तमाने पुनर्लड्ग्रहणं अधिकविधानार्थम्। तेन प्रथमासामानाधि
करण्येपि क्वचित्। सन्ब्राह्मणः। माभूदाक्रोशो इति वान्यम्। माजीवन्। माङि। तिपाक्षे एतद्भवनत्सामर्थ्यात् लुङ्। संबोधने च।
हे पचन्। हे पचमान। लक्षणहेत्वोः क्रियायाः। क्रियायाः परिचायके हेतौ चार्थे वर्त्तमानाद्धातोर्लटः शतृशानचौ स्तः। शया
ना भुंजते यवनाः। अर्जयन्वसति। हरिं पश्यन्मुच्यते। हेतुः फलं कारणं च। लृत्यवः। प्रमीयमाणः सोमः। ईदासः। आसः प

विभाषा गमहनविदविशां। एभ्यो वसो रिड्वा। जग्मिवान्। जगन्वान्। जघ्निवान्। जघन्वान्। विविदिवान्। विविद्वान्।
विविशिवान्। विविश्वान्। विदिना साहचर्याद्विंदतेर्ग्रहणं। वेत्तेस्तु विविद्वान्। दृशेश्च। ददृशिवान्। ददृश्वान्।६

श्रु २
उपेयुषः २
लुङि २

॥सिद्धांतकौमुदी

॥१५॥

करिष्य [illegible]

रस्यानस्यईदस्यात्।आदेः परस्य।आसीनः।विदेःशतुर्वसुः।वेत्तेःपरस्य शतुर्वसुरादेशोवास्यात्।विदन्।विद्वान्।विदुषी।तौ
सत्।तौशतृशानचौसत्संज्ञौस्तः।लृटःसद्वा।व्यवस्थितविभाषेयं।तेनाप्रथमासामानाधिकरण्येप्रत्ययोत्तरपदयोःसंबो
धनेलक्षणहेत्वोश्चनित्यं।करिष्यंतंकरिष्यमाणंपश्य।करिष्यतोपत्यंकारिष्यतः।करिष्यद्भक्तिः।हेकरिष्यन्।अर्जयिष्य
न्वसति।प्रथमासमानाधिकरणेपिक्वचित्।करिष्यतिकरिष्यन्।पूङ्यजोःशानन्।पवमानः।यजमानः।
ताच्छील्यवयोवचनशक्तिषुचानश्।एषु द्योत्येषुकर्त्तरिचानश्।भोगंभुंजानः।कवचंबिभ्राणः।शत्रुंनिघ्ना
नः।इङ्धार्योःशत्रकृच्छ्रिणि।आध्योःशतृस्यादकृच्छ्रिणिकर्त्तरि।अधीयन्।धारयन्।अकृच्छ्रिणिकिम्।कृ
च्छ्रेणाधीतेधारयति।द्विषोमित्रे।द्विषन्शत्रुः।सुञोयज्ञसंयोगे।सर्वेसुन्वन्तः।सर्वेयजमानाःसत्रिणः।अर्हः
प्रशंसायां।अर्हन्॥ ॥आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु।क्विपमभिव्याप्यवक्ष्यमाणाःप्रत्ययास्तच्छी
लादिषुकर्तृषुबोध्याः।तृन्।कर्त्ताकटान्।अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतु

॥राम॥
॥१५॥

478

दंशेश्छंदस्युपसंख्यानं। दंक्ष्णवः पशवः।४

वी१

भविष्णुः।

॥सिद्धांतकौमुदी

वृधुसहचरइष्णुच्॥ अलंकरिष्णुः। इत्यादि। णेश्छंदसि॥ रुधःपारयिष्णवः॥ भुवश्च॥ छंदसीत्येव। कथं तर्हि जगत्प्रभोरप्रभविष्णु वैष्णवमिति। निरंकुशाः कवयः। चकारोऽनुक्तसमुच्चयार्थः। भ्राजिष्णुरिति वृत्तिः। एवं क्षयिष्णुः। नैतद्भाष्ये दृष्टं। ग्लाजिस्थश्च ग्स्नुः॥ छंदसीति निवृत्तं। गिदयं न तु कित्। तेन स्थ ईत्वं न। ग्लास्नुः। गित्वान्न गुणः। जिष्णुः। स्थास्नुः। चाद्भुवः॥ श्र्युकः क्किति। त्यत्र गकारप्रश्लेषान्नेट्। भूष्णुः। त्रसिगृधिधृषिक्षिपेः क्नुः॥ त्रस्नुः। गृध्नुः। धृष्णुः। क्षिप्नुः॥ शमित्यष्टाभ्यो घिनुण्॥ उकार उच्चारणार्थः। इति काशिका। अनुबंध इति [illegible] साध्वी। तेन शमिनितरा। शमिनीतरेत्यत्र उगित्वेति ह्रस्वविकल्पः। नन्वेवं शमीशमिनावित्यादौ नुम्प्रसंगः। झल्ग्रहणमपकृष्य झलंतानामेव तद्विधानात्। नोदात्तोपदेशस्येति वृद्धिनिषेधः। शमी। तमी। श्रमी। भ्रमी। क्षमी। प्रमादी। उत्पूर्वान्मदेः। अलंकृञादिसूत्रेण इष्णुचो वासरूपविधानात् घिनुणपि। उन्मादी। ताच्छीलिकेषु वासरूपविधिर्नास्तीति तु प्रायिकं। संपृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरजभजातिचरापचरामुषाभ्याहनश्च। घिनुण् स्यात्। संपर्की। अनुरोधी। आयामी। आयासी। परिसारी। संसर्गी। परिदेवी। संज्वारी। परिक्षेपी। परिराटी।

नविष्णुः१

द्

दमी४

क्लमी४

सि

६

परिवादी। परिदाही। परिमोही। दोषी। द्वेषी। द्रोही। दोही। योगी। आक्रीडी। विवेकी। त्यागी। रागी। भागी। अतिचारी। अपचारी। आमोषी।
२० अभ्याघाती। वौकषलसकत्थस्रम्भः। विकाषी। विलासी। विकत्थी। विस्रंभी। अपे च लषः। वाक्षे। अपलाषी विलाषी। प्रेलपसृद्रु
८३ मथवदवसः। प्रलापी। प्रसारी। प्रद्रावी। प्रमाथी। प्रवादी। प्रवासी। निंदहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्या
यो४ भाषासूयो वुञ्। पंचम्यर्थे प्रथमा। एभ्यो वुञ् स्यात्। निंदकः। हिंसकः। इत्यादि। ण्वुला सिद्धे वुञ्वचनं ज्ञापकं तच्छीलादिषु
वासरूपन्यायेन तृजादयो नेति। देविक्रुशोश्चोपसर्गे। आदेवकः। आक्रोशकः। उपसर्गे किम्। देवयिता॥
क्रोष्टा। चलनशब्दार्थादकर्मकाद्युच्। चलनार्थेभ्यः शब्दार्थाच्च युच् स्यात्। चलनः। चोपनः। कंपनः। शब्दनः।
रवणः। अकर्मकात्किम्। पठिता विद्याम्। अनुदात्तेतश्च हलादेः। अकर्मकाद्युच् स्यात्। वर्तनः। वर्धनः।
अनुदात्तेतः किम्। भविता। हलादेः किम्। एधिता। अकर्मकात्किम्। वसिता वस्त्रम्। जुचंक्रम्यदंद्रम्यसृगृधिज्वलशुचल २०
षपतपदः। जुरिति सौत्रो धातुः गतौ वेगे च। जवनः। चंक्रमणः। दंद्रमणः। सरणः। पूर्वेण सिद्धे पदिग्रहणं लषपतपदेत्युकञा
बाधा मा भूदिति। तेन ताच्छीलिकेषु परस्परं वासरूपविधिर्नास्तीति। तेनालंकृञः स्नुच् न। क्रुधमंडार्थेभ्यश्च। क्रोधनः। रो

पराः। मेडपसैनः स्तूषणः। नयः। यकारोनात्पुनस्यात्। कूपिना। स्नापितो स्तदंदीपदीन्तुस्थ। मुज्ता। स्तूदिता। दीपिता। दीक्षिता।
नमिकैपीतिरेणयुयोवा। धेनमिक्केदीपियह्लोगृपुयतिनाह्वी लिकेपुवास्तरूपविधिर्नास्तीतिप्रायिकैद्युतितेन। कम्प्राकम
नायुवतिः। कैश्राकम्पनाशास्वा। यैयदिस्तद्वेज्जकथेमधुस्तदनः। नेद्यादिः। लषपतपदस्थाह्लूहषरणकमगमपुद्दय
उकञ्। लषुकः पातुकः इत्यादि। जल्पभिक्षकुट्टलुंटवृङः षाकन्। जल्पाकः। भिक्षाकः। कुट्टाकः लुण्टाकः वराक
वराकी। प्रजोरिनिः। प्रजविनो प्रजविनः। जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च। जयी दरी क्षयी। विश्र
यी। अत्ययी। वमी। अव्यथी अभ्यमी। परिभवी प्रसवी। स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्। आद्यास्त्रय
श्चुरादौ वर्दताः स्पृहयालुः गृहयालुः पतयालुः दयालुः। निद्रालुः। तत्पूर्वो द्रा। नद्रोनां नत्वं निपात्यते। तन्द्रालुः।
शीङोवाच्यः। शयालुः। दाधेट्सिशदसदोरुः। दारुः धारुः सेरुः सद्रुः सृघस्यदः क्मरच्। सृमरः। घस्मरः। अद्मरः। भं
जभासमिदो घुरच्। भंगुरः। भासुरः। मेदुरः। विदिभिदिछिदेः कुरच्। विदुरः। भिदुरं छिदुरं। इण्नशजिसर्तिभ्यः क्वरप्।

सामुरः।२

शद्रुः।२

481

नछंदस्यपुत्रस्येतिईत्वदीर्घौनि ५

सि॰ कृदंत॰ ५ त्वरः इत्वरी नश्वरः जित्वरः सृत्वरः गत्वरश्च। गमेरनुनासिकलोपोपिनिपात्यते। गत्वरः गत्वरी। जागरूकः। जागर्तेरूकः
स्यात्। जागरूकः। यजजपदशां यङः। एभ्यो यङंतेभ्य ऊकः स्यात्। दशामिति त्नोविना नलोपे नेनेतिनिर्देशः। यायजूकः
॥२१॥ जंजपूकः। दंदशूकः। नमिकंपिस्म्यजसकमहिंसदीपो रः। नम्रः कम्प्रः स्मेरः। जसिर्नञ्पूर्वः क्रियासातत्ये वर्तते। अजस्र
मसैंततमित्यर्थः। कम्रः हिंस्रः दीप्रः। सनाशंसभिक्ष उः। चिकीर्षुः आशंसुः भिक्षुः। विंदुरिच्छुः। वेत्तेर्नुम् इषेश्छत्वं च
निपात्यते। वेत्तीति विंदुः। इच्छति इच्छुः। क्याच्छंदसि। देवायुः जिगातिः सुम्नयुः। आदृगमहनजनः किकिनौ लि
ट्च। आदंतादृदंताद्गमादिभ्यश्च किकिनौ स्तस्तौ च लिड्वत्। बभ्रिर्वज्रं पपिः सोमं ददिर्गाः। जग्मिर्युवा। जघ्नि
र्वृत्रममित्रियं। जघ्निः। भाषायां धाञ्कृसृगमिजनिनमिभ्यः। दधिः चक्रिः सस्निः जग्मिः जघ्निः नेमिः। सासहिवा
वहिचाचलिपापतीनामुपसंख्यानं। यङंतेभ्यः सह्यादिभ्यः किकिनौ पतेर्नीगर्त्वविश्च निपात्यते। स्वपितृषोर्न ॥२१॥
जिङ्। स्वप्नक् तृष्णक्। तृष्णजौ। तृष्णजः। धृषेश्चेति वाच्यं। धृष्णक्। शृवंद्योरारुः। शरारुः। वंदारुः। भियः क्रुक्लु
मितिकाशिकायां। ७

482

छ्

कनौ। भीरुः। भीलुकः। क्रुकन्नपि वाच्यः। भीरुकः। स्थेशभासपिसकसो वरच्। स्थावरः। ईश्वरः। भास्वरः। पेस्वरः। कस्वरः। यश्च यङः॥ ॥२३॥
यातेर्यङन्ताद्वरच् स्यात्। अतो लोपः। तस्य यलोपे प्रतिस्थानिवत्त्वनिषेधाल्लोपो व्योरिति यलोपः। अल्लोपस्य स्थानिवत्त्वमाश्रित्य आतो
लोपप्राप्ते वेलुप्ते न स्थानिवत्। यायावरः। भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप्। विभ्राट्। भाः। भासौ। धूः। धुरौ।
विद्युत्। ऊर्क्। पूः। पुरौ। दृशिग्रहणस्यापकर्षाज्जवतेर्दीर्घः। जूः। जुवौ। जुवः। ग्रावशब्दस्य धातुना समासः सत्वं च निपात्यते। ततः क्वि
प्। ग्रावस्तुत्। अन्येभ्योऽपि दृश्यते। क्विप्। छित्। भित्। दृशिग्रहणं। विध्यन्तरोपसंग्रहार्थं क्वचिद्दीर्घः क्वचिदसंप्रसारणं। क्व
चिद्द्वं चिद्ध्रस्वः। तथा च वार्त्तिकम्। क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसंप्रसारणं च। क्विब्वचीत्यादिना। उणादि
सूत्रेण केषांचित्सिद्धत्वेऽपि ल्वादौ हलाबाधामात्रादिति वार्त्तिकेऽग्रहणं। वक्ति इति वाक्। पृच्छतीति प्राट्। आयतं स्तौतीत्याय
तस्तूः। कटं प्रवते कटप्रूः। जूरुक्तः। श्रयति हरिं श्रीः। द्युतिगमिजुहोतीनां द्वे च। दृशिग्रहणादभ्याससंज्ञा। दिद्युत्। जगत्।
जुहोतेर्दीर्घश्च। जुहूः। दृ भये। ह्रस्वश्चादीयति। ददृत्। ध्यायतेः संप्रसारणं च। धीः। भुवः संज्ञान्तरयोः। मित्रभूर्नाम क

कृ॰८

कृ॰५४

क्षित्। धनिकाधमर्णयोरंतरे यस्तिष्ठति विश्वासार्थं स प्रतिभूः। विप्रसंभ्यो ड्वसंज्ञायाम्। एभ्यो भुवो डुः स्यात् न तु संज्ञायाम्। विभुर्व्या
पकः। प्रभुः स्वामी। संभुर्जनिता। संज्ञायां तु विभूर्नाम कश्चित्। मितद्र्वादिभ्य उपसंख्यानम्। मितं द्रवतीति मितद्रुः। शंभुः। अंतर्भावितण्य
र्थोत्र भवतिः। धः कर्मणि ष्ट्रन्। धेटो धाञश्च कर्मण्यर्थे ष्ट्रन् स्यात्। धात्री जनन्यामलकी वसुमत्युपमाता च। दाम्नीशसयुयुजस्तुतुदसिसि
चमिहपतदशनहः करणे। दाबादेः ष्ट्रन् स्यात् करणेऽर्थे। दात्यनेन दात्रं। नेत्रं। तितुत्रतथसिसुसरकसेषु च। एषां दशानां कृत्प्रत्ययानामि
ट्न स्या[illegible]त्रं। योत्रं। योक्त्रं। स्तोत्रं। तोत्रं। सेत्रं। सेक्त्रं। मेढ्रं। पत्रं। दंष्ट्रा। नद्ध्री। हलसूकरयोः पुवः। पूङ्पूञोः करणे ष्ट्रन् स्यात् तच्चेत्करणं हल
सूकरयोरवयवः। हलस्य सूकरस्य च पोत्रं। मुखमित्यर्थः। अर्तिलूधूसूखनसहचर इत्रः। अरित्रं। लवित्रं। धुवित्रं। सवित्रं। खनित्रं।
सहित्रं। चरित्रं। पुवः संज्ञायाम्। पवित्रं। येनाज्यमुत्पूयते। यच्चानामिकावेष्टनं। कर्तरि चर्षिदेवतयोः। पुव इत्रः स्यात् ऋषौ करणे दे
वतायां कर्तरि। ऋषिर्वेदमंत्रः। तदुक्तमृषिणेति दर्शनात्। पूयतेऽनेनेति पवित्रो। देवतायां तु अग्निः पवित्रं स मा पुनातु॥ ॥अथोणादयः॥ ॥२२॥
॥ ॥ कृवापाजिमिस्वदिसाध्यशूभ्य उण्। करोतीति कारुः शिल्पी कारकश्च। आतो युक्। वातीति वायुः। पायुर्गुदं। जयत्यभिभवति रोगम्

484

न्र्जास्मुरौषधी। मिनोतिघद्विपतिदेत्वुभ्भाण मितिमायुः पित्तं स्वादुः स्ता श्वोतिपरकार्यसाधुः। स्यमुने। श्यामुशीर्षी। श्यामुर्वी। हिः। पा टलः
स्यात्। छंदसीगः मानश्चायो। हृतनिजमिनरिवटिस्योगुण। दीयतिइतिदास्यः। स्नुः प्रस्थः सानुः स्त्रियाम्। जानुजानुनी इत्यजमिवध्यो
श्वेतिनिषेधः। श्चनुबंधद्वयसामथ्यातिः। वारुतन्यै। चाटुप्रियवाक्यं। मृगघ्या दिवा कुजयेयरहु रत्यपि। किंजरयोभ्रिलेगः। किंशृणगतीति
किंशारुः सस्यशूकं। ~~ग्ध्यादिवाकुअसयेरहुरुयपि~~ वा एष्या। जरामेति जरायुर्गर्भाशयः। चोरश्च लक्ष्यतरीत्यनेनेमवर्णः इतितरलः। कु
केवरः कश्च। कुकेनगलेत्वकी इति कुकवाकुर्मयूरेवसतरटेरवणायुधे इतिविश्वः। स्यमृशीत्यवरिला रिनतिधनिमिम स्त्रिश्यतः। म
स्वामी ९ रतिविनतिविवासरः। हरिर्हरिश्च। चियतेतस्मिन्नृतानिमरुः निर्जलदेशः। शेतेनेश्यायुः अजगरः। तरुःहृत्सः। बरेतितत्त्वयतिदेवनाश्म
मितिवरुः। त्सरुः खड्गादिमुष्टिः। वमुस्वल्पी। स्त्रियोमूर्तिस्तनुस्तनूः। धनुः शास्त्रं। धनुर्धारि धनुर्विदिः धनुरिवाजतिवकः इतिश्रीए विशेषः १७
षः। मयुः किंनरः। मद्गुः पानीयकाकः। न्यङ्कुर्दिवा कुः। जश्वेतनसस्य द्रः। अपाश्च। लवलेशः कणाणवः। वाकटिवटिस्थी। कटुः। वदति
वदतीतिवदुः। धान्यो निद। धान्येवास्यो ऽएवं बच्यायः स्यात्तसमनिदः। निवादाघुदातः। प्रियंगवश्चमे। ऽएवश्चमो। ब्रीहिसेदस्त्वणुः
पुमान्। निष्प्रवलीफलिपाटीत्यादिस्तत्रमसिद्धायसंबध्यते। शृप्यत्रम्लिनिशिवन्धयतिवतिरिननिक्लिदिवंधिमतिस्यश्चा। शृणगतीतिश
वाहुल्केशरा बोभावः ३२ केतिरनसः। १२

485

नदविशेषेब्रौ २

॥२३॥

अमरः १२
६२

स्त्रायुधको पयोः स्वरुवज्रे। त्रिपु चापिः पेडइत्यन्ये। त्रपुसीसे। पुंसित्वन्यस्तवः प्राणाः। वसु उद्देऽजतोयो वृक्षेऽशो वसु तोये धने मणौ॥
दनुर्वङ्क्षैकदेशः। कूदुश्चेङः। वन्धुः मनुः यात विदित्थवयवे विदुः। स्यन्देः संप्रसारणं धश्च। सिंधुर्नद्यां नदे देशे सिंधुस्तु नदे तिरि स्त्रियाम्॥
उंदेरिच्चादेः। उनत्ति इंदुः। इषेः किच्च। इषेः स्याल्लस्व कित्व चादेरिकारादेशश्च। इष्यते हिनस्ति इषुः शरः। इषुर्द्वयोः। स्कंदेः सलोपश्च।
कंदुः। सृजेः ससुमश्च। सासलोपः। उप्रत्ययश्च। रज्जुः। कृतेराद्यंतविपर्ययश्च। ककारतकारयोर्विनिमयः। तर्कुः सूत्रवेष्टनी नाविर्वधेः। न्यु
ङ्कुः। दिवा कुः। नियतः सन्नवति न्यंकुः मृगः। फलिपाटिनमिमनिजनांगुक्पटिनाकिधतश्च। फल्गुः फल्गुः पाटेः पटिः पाटयतीति
पटुः। न मयतेऽनेन नाकुः वल्मीकं। मद्यते इति मधु। जायते इति जनु। वल्गु। वलसंवरणे। वल्गु। शाः किसन्वच्च। श्यतेरुः स्यात्स
धकिस्सन्वच्छशिशुबालिः। योदेर। यतुरुधोऽश्वमेधीयः सन्वदिति प्रकृते द्वयहलमित्वमित्यथर्मी। कुरुबि। बभ्रुर्मुनौ तरेवि क्लीब
त्रुर्नकुलपिंगलौ। ऊँ च्यूतो पि। रक्तुः कर्तावि नभूरन्तापपुः पालकः। सृजि दिचाधिगृधि धृषिभ्यः। कुंस्यादपूरुः। सिनत्ति सिंदु
वज्रौ। ग्रहिज्येति संप्रसारणे। विरहिली विध्यति विधुः। विधुः शशाके कर्पूरे हृषीकेशे यता हस्तौ। गृधुः कामः। धृषु दृढः। कृषेस्स
त्वा। कसेत्नीति कुरुः। गृणाति गुरुः। अपदुः सुषुक्तः। सुषामादित्वात्षत्वं। अपष्टु। प्रतिकूलं। दुष्टु। सुष्टु। रपेरिच्चोपधायाः। रच्चनि

वातर्द्ध

॥२३॥

486

रंपतीति रिपुः । अर्जिदृशिकम्यमिपंसिबाधामृजिपशितुक्धुक्दीर्घहकाराश्च । ऋर्जयति गुणान् ऋजुः । सर्वानि विशेषेण पश्यतीति
पशुः । कंतुः । वधुः । कूपः । पांसुः । मनिह्द्योरडः । तालव्यो ऽपि दंत्यो ऽपि । सम्यवल्लूकपांसवः । बाधतेरिति बाहुः । स्त्रीपुंसयोः ऋजुः । प्रथिम्रदि
भ्रस्जां संप्रसारणं सलोपश्च । वर्याणीकुः संप्रसारणं स्वजेः सलोपश्च । पृथुः । मृदुः । न्यंकादित्वात्कुत्वं भृज्जति तपसा भृगुः । लं
लमं ४ घिबंह्योर्नलोपश्च । वालमूललघ्वंगुलीनां वा लो रमापद्यते । रघुर्लघुः । बहुः । ऊर्णोतेर्नुलोपश्च । उरुः । जेघो । महति
ह्रस्वश्च । उरु महत् । श्लिषेः कश्च । श्लिष्यतीति श्लिकुः । खट्यः । उद्यतेर्ज्योतिश्च । आङ्परयोः खनिशृभ्यां डिच्च । आखनतीत्याख
नीत्याखुः । परं शृणातीति परशुः । पृषोदरादित्वादकारलोपात्पर्शुरपि । हरिमितयोर्द्रुवः । हरिभिर्द्रूयते हरिद्रुः वृक्षः
मितं द्रवतीति मितद्रुः समुद्रः । शते च । शतं धावतीति शतद्रुः । बाहुलकात्केवलादपि । द्रवत्यूर्ध्वमिति द्रुः वृक्षः । शाखावा
न द्रुमः । खरुशंकुपीयुनीलंगुलिगु । एते कुप्रत्ययांता निपात्यंते । खनतेरंतस्य रेफ आदेशः । खरुः कामः । ख
रो मूर्खः । अश्वश्च । शंकेर्नकीलकशल्ययोः । पिबतेरीत्वं युगागमश्च । पीयुर्वयसः कालस्तु वर्णः । नि पूर्वाल्लगि गता
वस्मात्कुः । नेर्दीर्घश्च । नीलंगुः । क्रिमिविशेषः । लिगु गत्यर्थः । नीलं गुरिति पाठांतरे तपिदी घः । लगेः संगे च अस्य

सं २
सक्थि ४

487

मि५

॥२४॥

